# काव्यशास्त्रालोकः ( प्रथमो भागः )

## कनिष्ठोपाध्यायः

कक्षा—11

माध्यमिक-शिक्षा-बोर्ड, राजस्थानम्, अजमेरम्

# पाठ्य–पुस्तक–निर्माण–समितिः

**पुस्तकम्** – काव्यशास्त्रालोकः (प्रथमो भागः)
कनिष्ठोपाध्याय–कक्षायै स्वीकृतं पाठ्यपुस्तकम्


**संयोजकः** – **डॉ. सत्यनारायण शर्मा, प्रोफेसर, भाषाविज्ञानम्**
राजकीय–महाराज–आचार्य–संस्कृतमहाविद्यालयः, जयपुरम्

**लेखकगणः** –

1. रामानुजपाण्डेयः, प्राध्यापकः, साहित्यशास्त्रम्
प्रभारी, प्रशिक्षण–प्रकोष्ठः
निदेशालयः, संस्कृत–शिक्षा, राजस्थानम्, जयपुरम्

2. डॉ. चन्द्रप्रकाश शर्मा, प्राचार्यः
राजकीय–महाराज–वरिष्ठोपाध्याय–संस्कृत–विद्यालयः, जयपुरम्

## शब्दद्वयम्

पाठ्यपुस्तकमिदं विद्यार्थिनां कृते क्रमबद्ध-अध्ययन-पुष्टीकरण-समीक्षा-आगामिस्वाध्यायानाम् आधारः विद्यते। विषयवस्तु-शिक्षणविधीनां दृष्ट्या विद्यालयीय-पाठ्यपुस्तकानां स्तरम् अत्यन्तं महत्त्वपूर्णं भवति। पाठ्यपुस्तकानि कदापि स्थावराणि वा महिमामण्डनकारकाणि न भवेयुः। अद्यापि पाठ्यपुस्तकं शिक्षण-अधिगम-प्रक्रियायाः एकम् अनिवार्यम् उपकरणं विद्यते। यस्य वयम् उपेक्षां कर्तुं नैव शक्नुमः।

विगतवर्षेषु माध्यमिक-शिक्षा-बोर्ड-राजस्थानस्य भाषागत-सांस्कृतिकस्थितीनां प्रतिनिधित्वस्य अभावः अनुभूयते स्म। एतत् दृष्टिगोचरं कृत्वा राज्यसर्वकारेण नवमी/प्रवेशिका-कक्षातः द्वादशी/वरिष्ठोपाध्याय-कक्षापर्यन्तम् अध्ययनरतानां विद्यार्थिनां कृते माध्यमिक-शिक्षा-बोर्ड-राजस्थान-अजमेरद्वारा स्वकीयं पाठ्यक्रमं संचालयितुं निर्णयः कृतः।

तदनुसारं बोर्डद्वारा शिक्षणसत्र-२०१६-२०१७तः नवमी/पूर्वप्रवेशिका-एकादशी/कनिष्ठोपाध्याय-कक्षाणां पाठ्यपुस्तकानि निर्धारित-पाठ्यक्रमानुसारं प्रस्तुतानि। आशासे यत् एतानि पुस्तकानि विद्यार्थिषु मौलिक-चिन्तन-मनन-स्वाध्याय-अभिव्यक्तीनाम् अवसरान् समुद्पादयिष्यन्ति।

**प्रो.बी.एल.चौधरी**
**अध्यक्षः**
**माध्यमिक-शिक्षा-बोर्ड-राजस्थान-अजमेरम्**

## प्रस्तावना

''संस्कृतभाषा'' न केवलं सर्वासां भाषाणां जननी अस्ति, अपि तु जननी इव सर्वेषां जनानां कृते संस्कारान् प्रदाय पालनं पोषणञ्चापि करोति । वस्तुत: इयमेव तादृशी भाषा अस्ति या मानवानां कृते षोडशसंस्काराणां माध्यमेन सर्वविधगुणान् प्रदाय संस्कृतिमपि शिक्षयति । इयं संस्कृतभाषा न केवलं देवानां भाषा आसीत् अस्ति च, अपि तु सामान्यजनानां भाषा अपि आसीत् अस्ति च । वैदिकसंस्कृतेन सह लौकिकसंस्कृतस्य अपि विशालसंस्कृतवाङ्मयम् इदानीमपि संसारस्य अन्यभाषाणाम् अपेक्षया विशालमस्ति । यद्यपि भारतदेशे आक्रमणकारिणाम् आक्रमणेन संस्कृतसाहित्यस्य विशाल: ग्रन्थराशि: नष्ट: सञ्जात:, तथापि अवशिष्टग्रन्थानां विषये कवि: रामधारी सिंहदिनकर: वदति यत् संस्कृतग्रन्थानाम् यद्यपि ६०प्रतिशतं भाग: आक्रमणकारिभि: नाशित: तथापि अवशिष्टभाग: अपि अन्यभाषाभण्डारम् अतिशेते ।

न केवलं सङ्ख्यादृष्ट्या ज्ञानदृष्ट्या च, अपि तु सङ्गणकादियन्त्रेषु एतस्या: भाषाया: उपयोगितादृष्ट्या तु इत्थं प्रतीयते यत् वैज्ञानिकरीत्या प्रारम्भत एव एतस्या: भाषाया: सृजनं कृतमस्ति । एतदपि आश्चर्यजनकमेव प्रतीयते यत् अस्यां भाषायां यावन्तोऽपि ग्रन्था: सन्ति, तावन्तोऽपि कवय:, महाकवय:, लेखका: विद्वांसश्च सन्ति । न केवलं संयोगोऽयमपि तु ईश्वरीययोजनानुसारमेव सर्वं सञ्जातमिति अनुभूयते ।

संस्कृतं न केवलं वाङ्मयस्य अपि तु सामान्यजनानामपि प्रारम्भत एव व्यावहारिकी भाषाऽऽसीत् इत्यस्मात् कारणादेव ''साहित्यं समाजस्य दर्पण:'' इति उच्यते । अर्थात् समाजस्य सर्वविधकार्याणां प्रतिबिम्बवत् दिग्दर्शनं साहित्यरूपिदर्पणे एव जायते । अर्थात् यदा संस्कृतभाषायां ग्रन्थानां रचना भवति स्म तदा सम्पूर्णसमाजस्य व्यवहार-भाषाऽपि संस्कृतमेव आसीत् । वर्त्तमानेऽपि संस्कृतस्य व्यावहारिकरूपं सार्वत्रिकरूपेण दृश्यमानमस्ति । न केवलं व्यावहारिकभाषारूपेण अपि तु मातृभाषारूपेणापि संस्कृतभाषाया: पुनर्नवप्रतिष्ठा जायमाना अस्ति । ''नासा'' इति अन्तरिक्ष-अनुसंधानकेन्द्रेणापि संस्कृतभाषां प्रति स्वीय-विचारा: प्रकटिता: यत् संस्कृतमेव भविष्यत्काले वैज्ञानिकानां विज्ञानभाषा भविता ।

मीमांसाशब्दै: अस्माभि: सर्वै: संस्कृतस्य अध्ययनमध्यापनञ्च विधाय भविष्यकालार्थं पूर्वसिद्धतां कृत्वा सज्जितै: भवितव्यम् । संस्कृतेनैव संस्कृते: संरक्षणं संस्काराणाञ्च प्रबलतया जागरणं कर्तुं शक्यते ।

## उद्देशकथनम्

''साहित्यशास्त्रम्'' इत्यस्य ''काव्यशास्त्रालोक:'' इति नाम्ना प्रस्तूयमानेऽस्मिन् पाठ्यपुस्तके कनिष्ठ-उपाध्यायकक्षाया: विद्यार्थिनां कृते काव्यविधात्मकं ज्ञानं सुलभतया सरलतया च प्राप्तं भवेत्, एतदर्थमेव पण्डितजयदेवविरचित: ''चन्द्रालोक:'' इत्यस्य प्रथममयूखात् पञ्चममयूखस्य पञ्चाशत् कारिकापर्यन्तं भाग: सङ्कलितो वर्त्तते । एतस्य अध्ययनेन काव्यतत्त्वानां ज्ञानं छात्रै: सुगमतया प्राप्तं भवेत् । एतदर्थमेव प्रत्येकमपि कारिकामवलम्ब्य प्रसङ्ग-अन्वय-पदार्थ-हिन्दी-अर्थानाञ्च समावेश: कृतो विद्यते । सहैव व्याख्यान्तर्गतं पर्यायपदानि, भावार्थ: विशेषांशाश्च प्रदत्ता: । न केवलमेतावदेव अपि तु आवश्यकतानुसारं छात्राणां बोधनाय यथास्थानं विशेषव्याख्यानमपि प्रदत्तमस्ति ।

अस्मिन्नेव पाठ्यपुस्तके विद्यार्थिभ्य: महाकाव्यपरिचयदृष्ट्या कविकुलगुरुमहाकविकालिदासस्य 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्ग: सङ्कलितो विद्यते । अत्र च प्रारम्भे महाकविकालिदासस्य तस्य कृतित्वस्य च संक्षिप्तपरिचयेन सह प्रथमसर्गस्य कथासारोऽपि लिखित: अस्ति। पुनश्च प्रथमसर्गस्थानां श्लोकानां सम्यक्तया ज्ञानाय प्रसङ्ग:, मूलश्लोक:, अन्वय:, पदार्था: हिन्दी-अर्थश्चेति विषया: प्रदत्ता: विद्यन्ते । एतदतिरिच्य व्याख्याभागे पर्यायपदानि, भावार्थ:, छन्द: अलङ्कारश्चेति बिन्दव: समाविष्टा: सन्ति । आवश्यकतानुसारं यथास्थानं विशेषांशाश्चापि प्रदत्ता: सन्ति ।

अन्ते चास्मिन् पाठ्यपुस्तके विद्यार्थिभ्य: नाट्यविधानां सहजतया ज्ञानप्राप्तये महाकविभासविरचितं ''स्वप्नवासवदत्तम्'' इति प्रसिद्धं नाटकं सङ्कलितमस्ति । अत्र च हिन्दी-अनुवादेन सह प्रत्येकमपि श्लोक: प्रसङ्ग-अन्वय-पदार्थ-हिन्दी-अर्थसहितश्च सुसज्जित: कृतो विद्यते । पुनश्च व्याख्याभागेऽपि पर्यायपदानि-भावार्थ-छन्द-अलङ्कार-विशेषांशाश्च प्रदत्ता: सन्ति । नाटकस्य महाकविभासस्य तस्य कृतित्वस्य च परिचयोऽपि प्रदत्त: ।

एवं प्रकारेण सरलसंस्कृतभाषया लिखितं पाठ्यपुस्तकमिदं राजस्थान-माध्यमिक-शिक्षामण्डलस्य नूतन - पाठ्यक्रमम् अनुसृत्य संसाधितम् अस्माभि: । अस्मिन्नुपक्रमे माध्यमिक-शिक्षामण्डलस्य सर्वानपि निर्देशान् तदन्तर्गतानि उद्देश्यानि च परिपूरयितुं प्रयास: कृत: अस्ति ।

**संयोजक:**

**डॉ. सत्यनारायण शर्मा, प्रोफेसर, भाषाविज्ञानम्**
राजकीय-महाराज-आचार्य-संस्कृतमहाविद्यालय:
जयपुरम्

# विषय– साहित्यशास्त्रम्

समय : 3 घण्टे | पूर्णांकाः 100

| क्र.सं. | | अधिगम–क्षेत्रम् | अंकभारः | |
|---|---|---|---|---|
| 1. | चन्द्रालोक : 1 तः 5 मयूखस्य 50 श्लोकपर्यन्तम् | | | 50 |
| | 1. | प्रथम–मयूख–सम्बन्धि–प्रश्नाः | 7 | |
| | 2. | द्वितीय–मयूख–सम्बन्धि–प्रश्नाः | 15 | |
| | 3. | तृतीय–मयूख–सम्बन्धि–प्रश्नाः | 5 | |
| | 4. | चतुर्थ–मयूख–सम्बन्धि–प्रश्नाः | 8 | |
| | 5. | पंचम–मयूख–सम्बन्धि–प्रश्नाः | 15 | |
| 2. | 'रघुवंशम्' प्रथमः सर्गः | | | 20 |
| | सन्दर्भः, प्रसंगः, अन्वयः, व्याख्या, भावार्थश्च। | | 10 | |
| | विषयवस्तु–सम्बन्धि–प्रश्नाः | | 10 | |
| 3. | स्वप्नवासवदत्तम् (नाटकम्) | | | 30 |
| | सन्दर्भः, प्रसंगः, अन्वयः, व्याख्या, भावार्थश्च। | | 10 | |
| | विषयवस्तु–सम्बन्धि–प्रश्नाः | | 10 | |
| | नाटक–पात्र–परिचयः | | 5 | |
| | कविपरिचयः | | 5 | |

निर्धारित–पुस्तकम् –

काव्यशास्त्रालोकः (प्रथमो भागः) – माध्यमिक शिक्षा बोर्ड द्वारा प्रकाशित

# विषयानुक्रमाणिका

प्रस्तावना

उद्देश्यकथनम्

चन्द्रालोकः 1–71

**प्रथमो मयूखः** 4–13

मङ्गलाचरणादिकम्, काव्यबीजनिरूपणम्, काव्यलक्षणविमर्शः, मम्मटमतखण्डनम्, शब्दलक्षणम्, शब्दभेदप्रदर्शनम्, रूढभेदादिदिग्दर्शनम्, यौगिकभेदकथनम्, योगरूढभेदनिरूपणम्, पदवाक्यपरिभाषा, खण्डवाक्यकथनम्, वाक्यकदम्बकप्रदर्शनम्, ग्रन्थकर्तुः परिचयपूर्वकं मयूख-सम्पन्नता।
अभ्यासप्रश्नाः

**द्वितीयो मयूखः** 14–35

दोषलक्षणविमर्शः, श्रुतिकटुदोषः, च्युतसंस्कृतिदोषः, अप्रयुक्तदोषः, असमर्थदोषः, निहतार्थदोषः, अनुचितार्थदोषः, निरर्थकदोषः, अवाचकदोषः, त्रिविधाऽश्लीलदोषाः, सन्दिग्धदोषः, अप्रतीतदोषः, शिथिलदोषः, ग्राम्यदोषः, नेयार्थदोषः, क्लिष्टत्वदोषः, अविमृष्टविधेयांशदोषः, विरुद्धमतिकृत् दोषः, असङ्गतदोषः, प्रतिकूलाक्षरत्वदोषः, उपहतलुप्तविसर्गादिदोषः, कुसन्धिविसन्धिदोषः, हतवृत्तदोषः, न्यूनाधिकदोषः, कथितदोषः, विकृतदोषः, पतत्प्रकर्षदोषः, समाप्तपुनरात्तदोषः, अर्धान्तरपदापेक्षिदोषः, अभवन्मतयोगदोषः, अस्थानस्थसमासदोषः, सङ्कीर्णदोषः, भग्नप्रक्रमदोषः, अमतार्थान्तरदोषः, अपुष्टार्थदोषः, कष्टदोषः, व्याहतदोषः, दुष्क्रमग्राम्यसन्दिग्धदोषाः, अनौचित्यदोषः, विरुद्धदोषः, सामान्यपरिवृत्तिदोषः, विशेषपरिवृत्तिदोषः, सहचराचारुविरुद्धान्योऽन्यसङ्गतिदोषाः, दोषाश्रयाः दोषाङ्कुशाश्च।
अभ्यासप्रश्नाः

**तृतीयो मयूखः** 36–41

अक्षरसंहतिलक्षणम्, शोभालक्षणम्, अभिमानलक्षणम्, हेतुलक्षणम्, प्रतिषेधलक्षणम्, निरुक्तलक्षणम्, मिथ्याध्यवसायलक्षणम्, सिद्धिलक्षणम्, युक्तिलक्षणम्, कार्यलक्षणम्, उपादेयता उपसंहारश्च।
अभ्यासप्रश्नाः

**चतुर्थो मयूखः** 42–48

श्लेषगुणनिरूपणम्, प्रसादगुणनिरूपणम्, समतागुणनिरूपणम्, समाधिगुणनिरूपणम्, माधुर्यगुणनिरूपणम्, ओजोगुणनिरूपणम्, सौकुमार्यगुणनिरूपणम्, उदारतागुणनिरूपणम्, कान्त्यर्थव्यक्त्योरुक्तगुणान्तर्भावकथनं भूषणनिरूपणञ्च।
अभ्यासप्रश्नाः

**पञ्चमो मयूखः** 49–71

अलङ्कार-लक्षणम्, छेकानुप्रासः, वृत्त्यनुप्रासः, लाटानुप्रासः, स्फुटानुप्रासः, अर्थानुप्रासः, पुनरुक्तप्रतीकाशः, यमकालङ्कारः, चित्रालङ्कारः, अनन्वयालङ्कारः, उपमेयोपमा, प्रतीपोपमा, ललितोपमा, स्तबकोपमा, सम्पूर्णोपमा, रूपकालङ्कारः, सोपाधिरूपकम्, सादृश्यरूपकम्, आभासरूपकम्, रूपितरूपकम्, परिणामालङ्कारः, उल्लेखालङ्कारः, अपह्नुतिः, पर्यस्तापह्नुतिः, भ्रान्तापह्नुतिः, छेकापह्नुतिः, कैतवापह्नुतिः, उत्प्रेक्षालङ्कारः, गूढोत्प्रेक्षा, स्मृतिभ्रान्तिसन्देहाः, मीलितम्, सामान्यम्, उन्मीलितम्, अनुमानम्, अर्थापत्तिः, काव्यलिङ्गम्, परिकरालङ्कारः, परिकराङ्कुरः, अक्रमातिशयोक्तिः, अत्यन्तातिशयोक्तिः, चपलातिशयोक्तिः, सम्बन्धातिशयोक्तिः, भेदकातिशयोक्तिः, रूपकातिशयोक्तिः, प्रौढोक्तिः, सम्भावनालङ्कारः, प्रहर्षणालङ्कारः विषादनालङ्कारश्च।

अभ्यासप्रश्नाः

रघुवंशमहाकाव्यम् (प्रथमसर्गः) 72–134

स्वप्नवासवदत्तम् 135–234

# चन्द्रालोकः

# प्रस्तावना

''कविर्मनीषी परिभू: स्वयंभू:'' शुक्लयजुर्वेदस्य मन्त्रपंक्तिरियं 'कवि'रिति शब्दस्य व्यापकतां महिमातिशयं सर्वज्ञताञ्च समुद्घाटयति। ''कवयतीति कवि:'' तस्य कर्म वा काव्यं तथा च कवते श्लोकान् ग्रथते सर्वं जानाति वर्णयतीति कवि:। एवं-विधेषु क्रान्तद्रष्टृषु कविषु प्रथमगणना 'आदिकवि'रिति नाम्ना महर्षे: वाल्मीके: तथा च द्वितीयस्तम्भरूपेण महर्षिवेदव्यास: प्रतिष्ठित:। संस्कृतकाव्यकाराणां महतीयं परम्परा आदिकविवाल्मीकित: रेवाप्रसादद्विवेदीपर्यन्तं सततं प्रवहमानास्ति। काव्यस्य समाजोपदेशभूमिकासामर्थ्यम् आनन्दाभिव्यञ्जनां च संवीक्ष्य कवय: अनुभूतवन्त: यत् काव्यनिर्माणसम्बन्धिनां सिद्धान्तानां लक्षणानाञ्च संविधानम् आवश्यकम्। अस्यामपेक्षायां प्रथम: आचार्य: भरतमुनि: ''नाट्यशास्त्रम्'' प्रणीतवान्। इत्थं संस्कृतसाहित्यसर्जनपरम्परायां सरणिद्वयं जातम्, एकत: काव्यरचना, अपरत: काव्यरचनानियामका: लाक्षणिकग्रन्थानां रचना इति। तत्र काव्यरचनाकारास्तु कवय: लाक्षणिकग्रन्थानां प्रणेतार: आचार्या: इति संज्ञा-संज्ञिता: बभूवु:। लक्षणग्रन्थकर्तृषु प्रथमोऽयम् आचार्य: भरतमुनि: काव्यलक्षणं प्रतिपादितवान् यत् –

**मृदुललितपदाढ्यं गूढशब्दार्थहीनं**
**जनपदसुखबोध्यं युक्तिमन्नृत्ययोग्यम्।**
**बहुकृतरसमार्गं सन्धिसन्धानयुक्तं**
**भवति च शुभकाव्यं नाटकप्रेक्षणीयम्॥**

तदनु वेदव्यासोऽग्निपुराणे, भामहश्च काव्यालङ्कारे, दण्डी च काव्यादर्शे, आनन्दवर्धन: ध्वन्यालोके कुन्तकश्च स्वकीये 'वक्रोक्तिजीवितम्' इति काव्ये स्व-स्वकाव्यस्वरूपाणि प्रस्थापितवन्त:। काव्यप्रकाशकार: आचार्यमम्मट: तथा च साहित्यदर्पणकार: विश्वनाथ: क्षेत्रेऽस्मिन् प्रतिष्ठितौ अभूताम्। काव्यसिद्धान्तप्रतिष्ठापकै: एतै: स्व-स्वमतानि तु स्थापितानि एव, परं स्वपूर्ववर्तीनां मतानां खण्डनमपि कृतम्। काव्यसिद्धान्तनिरूपणक्रमेऽस्मिन् आचार्या: काव्यलक्षणानि, काव्यप्रयोजनानि, काव्यहेतूनां, काव्योत्कर्षकाणाम्, अङ्गाङ्गितत्त्वानां विवेचनं च कृतवन्त:।

अस्यामेव आचार्यपरम्परायां द्वादशीशताब्द्यां जयदेव: सञ्जात:, येन ''चन्द्रालोक:'' इत्याख्यलक्षणग्रन्थ: विरचित:। आचार्योऽयं 'पीयूषवर्ष:' इत्युपनाम्नापि सुप्रसिद्ध:। चन्द्रस्य आलोक इव काव्योपयोगिनां विषयाणां प्रकाश: यस्मिन्निति चन्द्रालोक:। ग्रन्थेऽस्मिन् दशसु मयूखेषु काव्यतत्त्वानां लक्ष्यलक्षणसंयुतं प्रतिपादनं सरलतया कृतम्। ग्रन्थेऽस्मिन् ३५० कारिका: सन्ति। ग्रन्थस्य प्रथमे एव मयूखे जयदेव: वाग्विचारप्रसङ्गे स्वसम्मतं काव्यलक्षणं प्रतिपादयति –

**निर्दोषा लक्षणवती सरीतिर्गुणभूषणा:।**
**सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक्॥**

ततश्च काव्यलक्षणप्रसङ्गे एव प्रस्तुतानि काव्यतत्त्वानि यथाक्रमं ग्रन्थे विवेचयति। प्रकरणेऽस्मिन् जयदेव:

काव्यप्रकाशकारस्य मम्मटस्य काव्यलक्षणमपि आक्षिपत् यत् –

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।**
**असौ न मन्यते कस्मादनुष्णमनलङ्कृती॥**

संस्कृतवाङ्मयस्य ये विद्वांसः सिद्धान्तग्रन्थान् रचयन्ति ते तु आचार्याः ये च काव्यानि विरचयन्ति ते कवयः कथ्यन्ते। आचार्यः जयदेवः तु रामायणकथामाधारीकृत्य 'प्रसन्नराघवः' इति सप्ताङ्कपरिमितं नाटकमपि रचितवान्। यस्य प्रभावः श्रीगोस्वामितुलसीदासविरचिते भारतजनगणमनकण्ठहारभूते 'श्रीरामचरितमानसे' विशेषेण दृश्यते।

जयदेवनाम्ना अन्येऽपि सुरभारतीसमुपासकाः सञ्जाताः, तेषु एकतमोऽस्ति गीतगोविन्दरचयिता अपरश्च तत्त्वचिन्तामण्यालोककर्ता च। चन्द्रालोककारः जयदेवस्तु 'पीयूषवर्षः' उपाख्येन संज्ञितः तथा च स्वग्रन्थस्य प्रतिमयूखान्ते आत्मपरिचयमूलकं पद्यं ''महादेवः सत्रप्रमुख......।'' प्रस्तुतवान्। विदर्भस्य कुण्डिनपुरवास्तव्योऽयं कौण्डिन्यगोत्रोत्पन्नः मर्यादापुरुषोत्तमश्रीरामस्य परमः भक्तः जयदेवः आचार्योऽपि कविरपि तथा आन्वीक्षिकी शास्त्रकुशलोऽपि आसीत्। साहित्यशास्त्रसिद्धान्तप्रवेशाय जयदेवकृतग्रन्थोऽयं 'चन्द्रालोकः' प्रवेशद्वारमस्ति। तस्मादेव सरलतया सुखबोधाय चन्द्रालोकः अन्यतमं वैलक्षण्ययुतम् अस्ति।

कुवलयानन्दकारः अप्पयदीक्षितस्तु अस्य प्रतिष्ठायां लिखितवान् –

**चन्द्रालोको विजयतां शरदागमसम्भवः।**
**रम्यः कुवलयानन्दो यत्प्रसादादभूदयम्॥**
**येषां चन्द्रालोके दृश्यन्ते लक्ष्यलक्षणश्लोकाः।**
**प्रायस्त एव तेषामितरेषां त्वभिनवा विरच्यन्ते॥**

**॥ इति शम्॥**

# 'चन्द्रालोकः'
## प्रथमो मयूखः

**''चन्द्रालोकः'' इति लक्षणग्रन्थस्य रचनाकार्यं निर्विघ्नं सम्पन्नं स्यादिति मङ्गलकामनया जयदेवः वाग्देवीवन्दनां ग्रन्थादौ प्रस्तौति –**

**उच्चैरस्यति मन्दतामरसतां जाग्रत्कलङ्कैरव-**
**ध्वसं हस्तयते च या सुमनसामुल्लासिनी मानसे।**
**दुष्टोद्यन्मदनाशनार्चिरमला लोकत्रयीदर्शिका**
**सा नेत्रत्रितयीव खण्डपरशोर्वाग्देवता दीव्यतु॥१॥**

**अन्वयः** – या मन्दताम् अरसताम् उच्चैः अस्यति, या च जाग्रत्कलङ्कैः रवध्वंसं हस्तयते, सुमनसां मानसे उल्लासिनी, दुष्टोद्यन्मदनाशनार्चिः अमला लोकत्रयीदर्शिका, सा वाग्देवता खण्डपरशोः नेत्रत्रितयी इव दीव्यतु।

**व्याख्या** – या = वाग्देवी सरस्वती, मन्दताम् = अल्पज्ञताम्, अरसताम् = रसहीनताम्, आनन्दाभावम्, उच्चैः = सम्यक्प्रकारेण, अस्यति = निवारयति, या = वाग्देवी, जाग्रत्कलङ्कैः = समुत्पन्नदोषैः, रवध्वंसं = वचनमूकतां, हस्तयते = दूरी करोति, सुमनसां = विदुषां, मानसे = अन्तः करणे, उल्लासिनी = आनन्ददायिनी, दुष्टोद्यन्मदनाशनार्चिः = दुर्जनगर्वविनाशदक्षा, अमला = निर्मला, लोकत्रयीदर्शिका = भुवनत्रयप्रकाशिका, सा वाग्देवता = एवं मङ्गलकारि-वागीश्वरी सरस्वती, खण्डपरशोः = शिवस्य, नेत्रत्रितयी इव = सूर्यचन्द्राग्निरूपं लोचनत्रयमिव, दीव्यतु = अन्तःकरणे प्रकाशताम्।

मङ्गलाचरणेऽस्मिन् वाग्देवी नेत्रत्रितयी इव उपमिता अत एव श्लिष्टपदैरेतैः नेत्रत्रयीपक्षेऽपि अर्थवाचकतास्ति–

भगवतः शिवस्य त्रीणि नेत्राणि सन्ति, दक्षिणनेत्रं सूर्यः, तामरसानां = कमलानां, मन्दतां = अविकासं, उच्चैः = शीघ्रं, अस्यति = अपसारयति, सरोजानि विकासयति इत्यर्थः, वामनेत्रं चन्द्रः कैरवध्वंसं = कुमुदसङ्कोचम् अपहरति, तृतीयं नेत्रम् अग्निरूपं येन दुरात्मोद्यतः कामदेवः भस्मीभूतः। एवं द्व्यर्थकोऽयं श्लोकः शब्दश्लेषानुप्राणितः पूर्णोपमालङ्कारयुक्तश्च। अत्र पीयूषवर्षी जयदेवकविः शिवस्य नेत्रत्रयेण वाग्देवतायाः सादृश्यं प्रतिपादयन् सरस्वत्या महिमातिशयं प्रकटयति।

**भावार्थः** – या वाग्देवी बुद्धिमन्दतां नीरसतां च हरति, दोषान् निवार्य शास्त्रार्थकौशलं ददाति, दुष्टानां गर्वं नाशयति, काव्यरसिकान् च आनन्दयति या च कुन्देन्दुतुषारहारधवला स्वोपासकानां कृते कृत्याकृत्यपथप्रदर्शिकास्ति। सा सरस्वती शिवस्य नेत्रत्रयी इव नित्यमन्तःकरणे विराजताम्।

**शिवस्य नेत्रत्रयीपक्षे** – या सूर्यरूपेण सरोजानि, चन्द्ररूपेण च कुमुदान् विकासयति, या अग्निरूपेण विषमनेत्रेण कामदेवं ज्वालयति, देवानां हृदयं च आनन्दयति, सत्वस्वरूपा या सर्वेषां कृते कर्तव्यमुपदिशति, शिवस्य सा नेत्रत्रयी सर्वदा भक्तानामन्तःकरणे विराजताम्। इति।

**विशेषः – छन्दः** – शार्दूलविक्रीडितम्।

**अलङ्कारः** – शब्दश्लेषचमत्कारयुक्तः पूर्णोपमालङ्कारः।

**हिन्दी अर्थ** – इस श्लोक के दो अर्थ हैं – एक सरस्वती के पक्ष में और दूसरा भगवान शिव के नेत्रत्रय के पक्ष में।

**सरस्वती के पक्ष में** –

जो सरस्वती मतिमन्दता और नीरसता को दूर करती है तथा शास्त्रों के अनभ्यास के कारण विद्वत्सभा में हुए मूकतारूप पराजय कलङ्क का विनाश कर देती है। जो विद्वानों के अन्तःकरण में स्फुरित होने वाली तथा दुष्टों के गर्वरूप मद का नाश करने वाली है। निर्मल होने से तीनों लोकों को प्रकाशित करने वाली वह सरस्वती देवी विद्वानों के अन्तःकरण में सदा विलास करती रहे।

**शिव के नेत्रत्रय के पक्ष में** – त्रिनेत्र शिव का सूर्यरूप दक्षिणनेत्र कमलों को खिलाता है, दूसरा चन्द्ररूप नेत्र रात्रि में कैरव की कलाओं को विकसित करता है तथा तृतीय अग्निरूप नेत्र दुष्ट कामदेव का विनाश कर देता है। इस प्रकार देवों के अन्तःकरण में आनन्ददाता एवं तीनों लोकों के पदार्थों को प्रत्यक्ष की तरह दिखाने वाले भगवान सदाशिव के तीनों नेत्र भक्तों के अन्तःकरण में विराजमान हों।

**अत्र ग्रन्थकारः स्वस्य स्वग्रन्थस्य च नामकरणसार्थकतां प्रतिपादयन् साधिकारं संवादशैल्यां सम्बोधयति** –

**हंहो चिन्मयचित्तचन्द्रमणयः संवर्धयध्वं रसान्,**
**रे रे स्वैरिणि निर्विचारकविते मास्मत्प्रकाशीभव।**
**उल्लासाय विचारवीचिनिचयालङ्कारवारां निधेः,**
**चन्द्रालोकमयं स्वयं वितनुते पीयूषवर्षः कृती॥२॥**

**अन्वयः** – हं हो चिन्मयचित्तचन्द्रमणयः रसान् संवर्धयध्वं, रे रे स्वैरिणि निर्विचारकविते! अस्मत् मा प्रकाशीभव, विचारवीचिनिचयालङ्कारवारां निधेः उल्लासाय अयं कृती पीयूषवर्षः स्वयं चन्द्रालोकं वितनुते।

**व्याख्या** – हम् = अनुनयपूर्वकं साधिकारं च, हो = भो सम्बोधनार्थे, चिन्मयानि = चित्प्रचुराणि यानि, चित्तानि = अन्तःकरणानि तान्येव, चन्द्रमणयः = चन्द्रकान्तशिलामणयः, तत्सम्बुद्धौ हे चिन्मयचित्तमणयः चन्द्रकान्तमणि – तुल्य–विशदस्वरूप–हृदययुक्ताः हे सहृदयाः, रसान् = काव्यरसान्, संवर्धयध्वम् = रसाभिव्यञ्जनां पोषयत इत्याशयः, रे रे स्वैरिणि = हे स्वच्छन्दचारिणि, निर्विचारकविते = औचित्यविचारवर्जिते कविते, अस्मत् मा प्रकाशीभव = अस्मात्सकाशात् निःसर निर्विचारकवितां कवयितुम् अहं न इच्छामि इति भावः, विचारवीचिनिचयालङ्कारवारां निधेः – विचाराः = भावना एव, वीचयः = तरङ्गाः तासां निचयः = समूहः, यस्य स तादृशो योऽलङ्कार एव वारांनिधिः = समुद्रः तस्य, उल्लासाय = प्रसाराय, वा अयं = एष प्रस्तुतः, कृती = कुशलः, पीयूषवर्षः = जयदेवकविः, स्वयं = साक्षात्, चन्द्रालोकः = इत्याख्यं ग्रन्थं, वितनुते = विरचयति।

**भावार्थः** – हे चन्द्रकान्तमणितुल्याः कवयः रसाभिव्यञ्जनां कुरुत। रे शास्त्रसिद्धान्तरहिते कविते! न अत्र समुत्पन्ना भव। औचित्यतरङ्गयुक्तस्य अलङ्कारसागरस्य उत्कर्षाय चन्द्रसदृशः पीयूषवर्षः इति उपाख्यः शास्त्रज्ञः कविः जयदेवः स्वयं चन्द्रालोकनामकं ग्रन्थं रचयति।

**विशेषः** – अत्र ग्रन्थकारः ग्रन्थस्य विषयं काव्यतत्त्वविवेचनं प्रयोजनं स्वकीयग्रन्थस्य प्रकरणविभाजकानाम् उल्लासानां च नामसार्थकतां साधिकारं प्रतिपादयति।

**छन्दः** – शार्दूलविक्रीडितम्।

**हिन्दी अर्थ** – हे चन्द्रकान्त मणियों के समान आत्मप्रकाशित बुद्धि युक्त कवियों! आप सरस काव्य रचना करें और हे सिद्धान्तहीन! स्वेच्छाचारिणि कविते! मुझमें तेरा प्रकाश न हो, क्योंकि काव्यार्थ भावना रूप तरङ्ग–समूह से सुशोभित अलङ्कार रूप सागर की पुष्टि के लिये 'पीयूषवर्ष' उपाख्य यह जयदेव कवि चन्द्रालोक नामक काव्यसिद्धान्तलक्षणग्रन्थ का निर्माण कर रहा है।

**चन्द्रालोकस्य प्रयोजनं प्रमाणयन् जयदेवः काव्यकर्मप्रवृत्तान् कवीन् स्वग्रन्थं प्रति आकर्षति –**

**युक्त्यास्वाद्यलसद्रसैकवसतिः साहित्यसारस्वत-**
**क्षीराम्भोधिरगाधतामुपदधत्सेव्यः समाश्रीयताम्।**
**श्रीरस्मादुपदेशकौशलमयं पीयूषमस्माज्जग-**
**ज्जाग्रद्भासुरपद्मकेसरयशः शीतांशुरस्माद् बुधाः ।।३ ।।**

**अन्वयः** – हे बुधाः! अगाधताम् उपदधत् युक्त्यास्वाद्यलसद्रसैकवसतिः साहित्यसारस्वतक्षीराम्भोधिः सेव्यः। अस्मात् श्रीः, अस्मात् उपदेशकौशलमयं पीयूषम्, अस्मात् जगज्जाग्रद्भासुरपद्मकेसरयशः शीतांशु समाश्रीयताम्।

**व्याख्या** – हे बुधाः! = अयि पण्डिताः!, अगाधताम् = गूढाशयताम्, उपदधत् = बिभ्रत्, युक्तिभिः = उपायैः, आस्वाद्याः = आस्वादयितुं योग्याः, लसन्तः = शोभयमानाः, ये रसाः = शृङ्गारादयः, तेषामेका = अद्वितीया, वसतिः = वासस्थानं, साहित्यम् = साहित्यशास्त्रं, सारस्वतं = वाङ्मयसाहित्यं, तदेव क्षीरं = दुग्धं, तस्य अम्भोधिः = समुद्रः, सेव्यः = सेवनीयः, अस्मात् = ग्रन्थरूपात् क्षीरसागरात्, श्रीः = लक्ष्मीः, समाश्रीयताम् = लभताम्, उपदेशकौशलमयम् = तत्वज्ञाननैपुण्यस्वरूपं, जगति = संसारे, जाग्रत् = विकसितं, भासुरं = देदीप्यमानं, पद्मकेसरवत् = कमलकिञ्जल्कवद् यद् यशः = कीर्तिः, तद्रूपो यः शीतांशुः = शीतरश्मिः चन्द्रः स समाश्रीयताम्। एतद्ग्रन्थमन्थनात् निर्मलं यशो लप्स्यते इति भावः।

**भावार्थः** – हे बुधाः! चन्द्रालोकनामा ग्रन्थः रसावबोधकः गम्भीरः पठनीयश्चास्ति। ग्रन्थोऽयं क्षीरसागरवदस्ति। यथा सागरमन्थनसमये क्षीरसागरात् लक्ष्मीः सुधाचन्द्रमाश्च समुपलब्धाः तथैव अस्य ग्रन्थस्य पठनेन वैभवम् उपदेशामृतं यशश्च सम्प्राप्यते। अत एव ग्रन्थोऽयं सेवनीयः।

**विशेषः – छन्दः** – पद्येऽस्मिन् शार्दूलविक्रीडितम् वृत्तम्।

**हिन्दी अर्थ** – हे काव्यमर्मज्ञों! चन्द्रालोक नामक यह ग्रन्थ गम्भीर, रस बोधक और युक्ति युक्त होने से आस्वाद्य एवं पठनीय है। यह ग्रन्थ क्षीरसागर के समान है। इसके अध्ययन से लक्ष्मी, व्याख्यानकौशल, तत्त्वज्ञान, काव्यरसामृत तथा निर्मल यश प्राप्त करें।

काव्यरचना से धन, ज्ञान, प्रतिष्ठा व आनन्दप्राप्ति सुनिश्चित है।

**जयदेवः द्वादशशताब्द्यां सञ्जातः एतत्पूर्वम् अनेके लक्षणग्रन्थकाराः अभवन्। ग्रन्थारम्भे जयदेवः त्रिषु मङ्गलपद्येषु साधिकारं गर्वोक्तिम् उक्तवान् परम् अधुना स पूर्वाचार्यान् प्रति विनम्रतां प्रदर्शयति –**

**तं पूर्वाचार्य सूर्योक्तिज्योतिः स्तोमोद्गमं स्तुमः।**
**यं प्रस्तूय प्रकाशन्ते मद्गुणास्त्रसरेणवः ।। ४ ।।**

**अन्वयः** – (वयं) तं पूर्वाचार्य – सूर्योक्ति–ज्योतिः, स्तोमोद्गमं स्तुमः, यं प्रस्तूय मद्गुणाः त्रसरेणवः इव प्रकाशन्ते।

**व्याख्या** – तं = सर्वलोकप्रसिद्धं, पूर्वे = प्राचीनाः, ये आचार्याः = भरतानन्दवर्धनमम्मटादयो ग्रन्थकाराः, ते सूर्या इव तेषामुक्तयः = वचांसि तानि एव, ज्योतींषि = प्रकाशा: तेषां स्तोमः = समूहपुञ्जः तस्य य उद्गमः = उद्भव–स्थानं, तं पूर्वाचार्य–सूर्योक्ति ज्योतिस्तोमोद्गमं, स्तुमः = नुमः, यं प्रस्तूय = सम्यगाश्रित्य, मद्गुणाः = मदीया गुणाः, त्रसरेणवः = सूक्ष्मतमधूलिकणसदृशाः, इव = यथा, प्रकाशन्ते = प्रदीप्यन्ते।

**भावार्थः** – यथा सूर्योदये सति सूक्ष्मधूलिकणाः गवाक्षादिमार्गेण तत्किरणेषु प्रकाशन्ते तथैव मम गुणा अपि पूर्वेषामाचार्याणां ग्रन्थाधारेणैव प्रकाशिताः भवन्ति तानहं प्रणमामि। पद्येऽस्मिन् जयदेवः पूर्वाचार्यान् प्रति कृतज्ञतां ज्ञापयति।

**हिन्दी अर्थ** – सूर्य के समान प्रकाशमान प्राचीन आचार्यों के उक्तिरूप ज्योतिसमूह को प्रणाम करता हूँ जिनकी प्रकाशधारा में मेरे ग्रन्थ के प्रकरण धूलिकणों के समान प्रकाशित होते हैं।

**काव्याङ्गानां तत्त्वप्रतिपादने पूर्वाचार्यैः सह वैमत्यं भवितुं शक्यते परं तद् मूलस्वरूपस्थापनायै न तु विरोधकरणाय एवं पूर्वाचार्यै सह अविरोधं प्रकटयति –**

**नाशङ्कनीयमेतेषां मतमेतेन दूष्यते।**
**किन्तु चक्षुर्मृगाक्षीणां कज्जलेनेव भूष्यते॥५॥**

**अन्वयः** – एतेन एतेषां मतं दूष्यते इति न आशङ्कनीयं किन्तु मृगाक्षीणां चक्षुः कज्जलेन इव भूष्यते।

**व्याख्या** – एतेन = मम ग्रन्थेन, चन्द्रालोकेन मया वा, एतेषां = पूर्वाचार्याणां, मतं = सिद्धान्तः, दूष्यते = खण्डयते इत्येवं न आशङ्कनीयम् = न संशयितव्यं, किन्तु = परन्तु, मृगाक्षीणां = रमणीनां, चक्षुः = दृष्टिः नयनं वा, कज्जलेन इव = अञ्जनेन यथा, भूष्यते = अलङ्क्रियते।

**भावार्थः** – मम ग्रन्थेन चन्द्रालोकेन पूर्वाचार्याणां सिद्धान्तेषु छिद्रान्वेषणं क्रियते, इत्याशङ्का नैव करणीया, किन्तु यथा कज्जलेन रमणीनां नेत्रयोः सौन्दर्यवृद्धिः क्रियते तथैव मम ग्रन्थेनापि तत्त्वान्वेषणं एव विधीयते।

**हिन्दी अर्थ** – मेरे इस ग्रन्थ के द्वारा पूर्व प्रतिष्ठित आचार्यों के मत का खण्डन किया जा रहा है यह आशङ्का निराधार है अपितु जिस प्रकार अञ्जन (काजल) से कामिनियों की नेत्र शोभा बढ़ती है उसी प्रकार काव्य-तत्त्वों के मूल स्वरूपज्ञान हेतु यह परिष्कारयुक्त प्रयासमात्र है।

**कवितायाः लेखनं कार्यम् अस्ति, कार्यं कारणं विना न भवति। अतः ग्रन्थकारः कवितायाः उत्पत्तेः यत् कारणं तत्प्रतिपादयति –**

**प्रतिभैव श्रुताभ्याससहिता कवितां प्रति।**
**हेतुर्मृदम्बुसम्बद्धा बीजमाला लतामिव॥६॥**

**अन्वयः** – लतां प्रति मृदम्बु – सम्बद्धा बीजमाला इव कवितां प्रति श्रुताभ्यास-सहिता प्रतिभा एव हेतुः।

**व्याख्या** – लतां प्रति = वल्लरीं प्रति, मृद् = मृतिका, अम्बु = जलं, ताभ्यां सम्बद्धा = संगता, बीजमाला = बीजपंक्तिः, इव = यथा, कवितां प्रति = काव्यं प्रति, श्रुताभ्यासः = श्रुतं = शास्त्रम्, अभ्यासः = परिशीलनं, सहिता = युक्ता, प्रतिभा = नवनवोन्मेषशालिनी बुद्धिः, विशिष्टा क्षमता एव हेतुः = कारणम्।

**भावार्थः** – यथा मृतिकया जलेन च सम्मिलिता बीजपंक्तिः लतां वृक्षं पादपं वा उत्पादयति तथैव शास्त्राभ्यास-परिष्कृता प्रतिभा एव काव्यनिर्माणं करोति।

**विशेषः** – पृथक् – पृथक् रूपेण न तु जलं न मृतिका न च बीजाः लताम् उत्पादयन्ति अपितु सम्मिलितानि त्रीणि तत्त्वानि लतायाः उत्पतौ कारणं भवन्ति तथैव न केवलं शास्त्रज्ञानं, न अभ्यासः न च केवला प्रतिभा अपितु त्रीणि एव सम्मिलितानि कवितायाः उत्पत्तौ कारणानि भवन्ति।

**हिन्दी** – वृक्ष की उत्पत्ति का कारण वह बीज है जो मिट्टी पानी में मिल जावे, उसी प्रकार कविता की उत्पत्ति में शास्त्रज्ञान व अभ्यास युक्त प्रतिभा ही कारण है।

**किं काव्यस्वरूपम्? इत्यपेक्षायां जयदेवः प्रतिपादयति यत् कीदृशी वाक् काव्यप्रवृत्तिनिमित्तं भवति–**

**निर्दोषा लक्षणवती सरीतिर्गुणभूषणा।**
**सालङ्काररसानेकवृत्तिर्वाक्काव्यनामभाक्॥७॥**

**अन्वयः** – निर्दोषा, लक्षणवती, सरीतिः, गुणभूषणा, सालङ्काररसानेकवृत्तिः, वाक् काव्यनामभाक् भवति।

**व्याख्या** – निर्दोषा = काव्यदोषरहिता, लक्षणवती = लक्षणसहिता, अक्षरसंहति – शोभादीनि तैः युक्ता, सरीतिः = काव्यरीतिभिः सहिता, गुणभूषणा = श्लेषादिभिः काव्यगुणैः विभूषिता, सालङ्काररसा = अलङ्काररससम्पन्ना, अनेकवृत्तिः = शब्दार्थनाट्यवृत्तिभिः सहिता, वाक् = उक्तविशेषणविशिष्टा वाणी, काव्यनामभाक् = काव्यपदप्रवृत्तिनिमित्तं भवति।

**भावार्थः** – काव्यदोषरहिता शोभादिलक्षणसहिता, वैदर्भीप्रभृतिरीतियुक्ता, श्लेषप्रसादादिगुणैः विभूषिता, अलङ्कारमयी रसपूर्णा बहुविधवृत्तिभिः समन्विता च वाणी काव्यम् उच्यते।

पीयूषवर्षः जयदेवोऽत्र सर्वेषां काव्यतत्त्वानाम् उल्लेखं कृतवान् एवञ्च विधिनिषेधाभ्यां दोषान् निषिध्य गुणालङ्काररसरीतीः काव्याङ्गतया स्वीकृतवान्।

**हिन्दी अर्थ** – आगे कहे जाने वाले पद-पदांश, वाक्यार्थ और रसगत काव्यदोषों से रहित, वक्ष्यमाण लक्षणों से युक्त, पाञ्चाली, लाटी, गौडी, वैदर्भी नामक काव्य रीतियों से विभूषित, शब्दार्थगत अलङ्कारों से चमत्कृत, शृङ्गारादि रसों से सुशोभित तथा अभिधा, लक्षणा और व्यञ्जना वृत्तियों से सम्बद्ध वाक्य को काव्य कहते हैं।

**काव्यलक्षणप्रसङ्गेऽस्मिन् जयदेवः स्वकीयं काव्यलक्षणं प्रस्तूय पूर्वाचार्यस्य काव्यप्रकाशकारस्य आचार्यमम्मटस्य मतं नामोल्लेखं विना एव खण्डयति –**

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।**
**असौ न मन्यते कस्मादनुष्णमनलं कृती॥ ८॥**

**अन्वयः** – यः अनलङ्कृती शब्दार्थौ काव्यम् अङ्गीकरोति असौ कृती अनलं कस्मात् अनुष्णं न मन्यते।

**व्याख्या** – यः = यः कोऽपि मम्मटाचार्यः, अनलङ्कृती = अलङ्काररहितौ, शब्दार्थौ = वाच्य-वाचकौ, काव्यं = कविकर्म, अङ्गीकरोति = स्वीकरोति, असौ कृती = एष कुशलः पण्डितः, अनुष्णं = ताप रहितम्, अनलम् = अग्निं, कस्मात् = कस्मात् कारणात्, न मन्यते = कथं न स्वीकरोति।

**भावार्थः** – काव्यप्रकाशे आचार्यमम्मटः काव्यलक्षणप्रसङ्गे 'तद्दोषौ शब्दार्थौ सगुणौ अनलङ्कृती पुनः क्वापि' अस्याशयः शब्दार्थौ दोषरहितौ गुणसहितौ तथा च सर्वत्र सालङ्कारौ परं यत्र कुत्रचित् अनलङ्कृतौ अपि शब्दार्थौ काव्यम्। चन्द्रालोककारः जयदेवः अत्र अनलङ्कृती पुनः क्वापि इत्यस्य खण्डनं कुर्वन् व्यङ्ग्यप्रहारं करोति यद् यथा अग्निः कथमपि शीतलतां न धारयति तथैव अनलङ्कृतौ शब्दार्थौ काव्यसाधकौ भवितुं न शक्येते।

**हिन्दी अर्थ** – जो अलङ्कार रहित शब्दार्थ को काव्य मानता है, वह विद्वान् अग्नि को तापरहित क्यों नहीं मानता? जिस प्रकार आग से अनुष्णत्व का होना सर्वथा असंभव है, वैसे ही अलङ्कार रहित शब्दार्थ में काव्यत्व का होना भी सर्वथा अस्वाभाविक है।

**काव्यलक्षणप्रसङ्गे शब्दनिष्ठतां प्रकारान्तरेण उक्त्वा जयदेवः यथाक्रमं शब्दविवेचनं प्रस्तौति –**

**विभक्त्युत्पत्तये योग्यः शास्त्रीयः शब्द इष्यते।**
**रूढयौगिकतन्मिश्रैः प्रभेदैः स पुनस्त्रिधा॥ ९॥**

**अन्वयः** – विभक्ति उत्पत्तये योग्यः शास्त्रीयः शब्दः इष्यते। सः पुनः रूढ-यौगिक-तन्मिश्रैः प्रभेदैः त्रिधा भवति।

**व्याख्या** – विभक्तीनां = सुप्तिङन्तरूपाणाम् उत्पत्तये = प्रादुर्भावाय, योग्यः = योग्यतामापन्नः, शास्त्रीयः = व्याकरणशास्त्रनिष्पन्नः, शब्दः = पदम्, इष्यते = स्वीक्रियते, सःपुनः = व्याकरणशास्त्रनिष्पन्नः, स एव शब्दः रूढयौगिकतन्मिश्रैः = रूढः यौगिकः योगरूढश्च इति प्रभेदैः त्रिधा = त्रिविधः भवति।

**भावार्थः** – व्याकरणशास्त्रमनुसृत्य 'अपदं न प्रयुञ्जीत' तथा च 'सुप्तिङन्तं पदम्' एवं शब्दानुशासनसंस्कारितः शब्दः प्रयोगयोग्यो भवति। स शब्दः रूढः यौगिकः योगरूढश्च इति त्रिप्रकारको भवति।

सुबादिभिः संज्ञासर्वनामविशेषणशब्दाः तिङादिभिश्च क्रियापदानि निर्मीयन्ते।

**रूढः** – येषु प्रकृतिप्रत्यययोः स्पष्टभेदः न भवति, नियतः वर्णसमुदायः नियतार्थ-बोधको भवति। यथा मणिः रत्नं नूपुर, डित्थः।

**यौगिकः** – प्रकृतिप्रत्यययोः संयोगात् निष्पन्नः शब्दः यत्र द्वयोः अवयवयोः योगः भवति। यथा कृ+तृच् = कर्त्ता।

**योगरूढः** – शब्दस्तु यौगिकः, परं नियतार्थे रूढो भवति यथा पङ्के जातं पङ्कजं शब्दोऽयं कमलार्थे रूढः।

**हिन्दी अर्थ** – शास्त्र से सम्बन्ध रखने वाले, सुबन्त तथा तिङन्तविभक्ति का रूपधारण करने की योग्यता वाले वर्णसमुदाय को शब्द कहते हैं। वह शब्द रूढ, यौगिक और योगरूढ भेद से तीन प्रकार का माना गया है।

**शब्दप्रकारेषु प्रथमोऽस्ति रूढः। इदानीं रूढशब्दस्य उपभेदान् प्रदर्शयति –**

**अव्यक्तयोगनिर्योगयोगाभासैस्त्रिधादिमः ।**
**ते च वृक्षादिभूवादिमण्डपाद्या यथाक्रमम्॥१०॥**

**अन्वयः** – आदिमः अव्यक्तयोग-निर्योग – योगाभासैः त्रिधा। ते च यथाक्रमं वृक्षादि-भूवादि-मण्डपाः सन्ति।

**व्याख्या** – आदिमः = आद्यः, प्रथमः, रूढशब्दः, अव्यक्तयोगः – निर्योग-योगाभासैः = अव्यक्त-योगाख्येन निर्योगाख्येन, योगाभासेन च, त्रिधाः = त्रिप्रकारको भवति, तेषां क्रमेणोदाहरणानि, वृक्षादि – भूवादि-मण्डपाद्याः = वृक्षादयश्च भूवादयश्च मण्डपाद्याश्चेति।

**भावार्थः** – यत्र प्रकृतिप्रत्ययादिरूपाणां योगः न प्रतीयते, स रूढशब्दः। **अव्यक्तयोगः** – अव्यक्तयोगः। यथा वृक्षः वृश्चति निवारयति आतपम् इति वृक्षः परं पत्ररहिते वृक्षे आतपनिवारणसामर्थ्यं नास्ति तथापि स वृक्ष एव। इत्थं वृक्षशब्दे व्युत्पत्तिलभ्यः अर्थयोगो विद्यते किन्तु व्यवहारे न प्रतीयते, तस्मादव्यक्तयोगः।

**निर्योगः** – यस्मिन् प्रकृतिप्रत्यययोः व्युत्पत्तिलभ्यः अर्थ एव न विद्यते यथा भूवादयो, भूश्च वाश्च इति भूवौ तौ आदौ येषां ते भूवादयः, अत्र भू-सत्तायां, वा – गतिगन्धनयोः इति उभयोः धात्वोः स्व-स्व अर्थः वर्तते। अनयोः व्युत्पत्तिलभ्यः अर्थः नास्त्येव।

**योगाभासः** – यत्र प्रकृतिप्रत्यययोः अवास्तविकी प्रतीतिः, योगस्य प्रतीति भ्रमो वा भवति, यथा मण्डपाद्याः मण्डं पिबति इति मण्डपः अर्थात् तण्डुलप्रवाहस्य पानकर्त्ता, परं शब्दोऽयं गृहनिकुञ्जार्थे प्रयुज्यते।

एवमेव कुशलः कुशान् लाति इति कुशलः परम् एषः शब्दः दक्षः इत्यर्थेऽस्ति।

**हिन्दी अर्थ** – आदिम = प्रथम रूढ शब्द अव्यक्त योग, निर्योग और योगाभास भेद से तीन प्रकार का होता है। इनके क्रमशः उदाहरण हैं – वृक्ष आदि शब्द, भू आदि शब्द तथा मण्डप आदि शब्द।

**इदानीं यथाक्रमं यौगिकशब्दस्य भेदान् प्रदर्शयति –**

**शुद्ध – तन्मूलसम्भिन्न – प्रभेदैर्यौगिकस्त्रिधा।**
**ते च भ्रान्तिस्फुरत्कान्ति – कौन्तेयादिस्वरूपिणः॥११॥**

**अन्वयः** – यौगिकः (अपि शब्दः) शुद्ध-तन्मूल-सम्भिन्न प्रभेदैः त्रिधा भवति। ते च भ्रान्ति-स्फुरत्कान्ति-कौन्तेय आदि स्वरूपिणः (सन्ति)।

**व्याख्या** – यौगिकः = यौगिकशब्दोऽपि, शुद्धः = शुद्धयौगिकः, तन्मूलः = यौगिकमूल-यौगिकः, सम्भिन्नः = सम्भिन्न-यौगिकश्चेति प्रभेदैः = भेदैः, त्रिधा = त्रिप्रकारको भवति, ते = भेदाश्च, भ्रान्ति-स्फुरत्कान्ति-कौन्तेयादि, स्वरूपिणः = (क्रमशः उदाहरणानि) भ्रान्तिस्फुरत्कान्तिकौन्तेयादयः स्वरूपाणि येषां सन्ति इति।

**भावार्थः** – **शुद्धयौगिकः** – प्रकृतिप्रत्यययोः योगेन यत्रार्थबोधो जायते, स शुद्धयौगिकः शब्दः। उदाहरणम् – यथा भ्रान्तिः भ्रम् धातोः चलनम् अनवस्थानं चेति अर्थद्वयम् अत्र क्तिन् प्रत्यये सति उभयो योगेन निष्पन्नः भ्रान्तिशब्दः भ्रम्धातोः अर्थं स्पष्टं प्रकटयति।

**यौगिकमूलयौगिकः** – यौगिकः (शब्दः) मूले यस्य सः यौगिकमूलः। यौगिकमूलश्च असौ यौगिकः इति यौगिकमूल-यौगिकः। द्वयोः यौगिकशब्दयोः योगेन एव सम्पद्यते। यथा स्फुरत्कान्तिशब्दः स्फुरन्ती कान्तिः यस्य सः स्फुरत्कान्तिः। अस्मिन् शब्दे द्वयोः शुद्धयौगिकशब्दयोः समासः विद्यते।

**सम्भिन्नयौगिकः** – यत्र यौगिकः शब्दः पुनः प्रत्यये न सम्भिद्यते स सम्भिन्नयौगिकः शब्दः उच्यते। यथा कौन्तेयः,

कुन्तीशब्द: राजविशेषस्य सञ्ज्ञावाचक: ततश्च प्रत्यययोगात् निष्पन्न: कुन्तीशब्द वा यौगिक:, यौगिकस्य कुन्तीशब्दस्य पुन: ढक् प्रत्ययेन सम्भेदनात् सम्पन्न: कौन्तेय: शब्द: सम्भिन्नयौगिक:।

**हिन्दी अर्थ** – यौगिक शब्द भी शुद्धयौगिक, यौगिकमूल–यौगिक तथा संभिन्नयौगिक भेद से तीन प्रकार के होते हैं। क्रमश: इनके उदाहरण हैं – भ्रान्ति, स्फुरत्कान्ति तथा कौन्तेय शब्द।

**तयो: रूढस्य यौगिकस्य च मिश्रणरूप: शब्द: तन्मिश्र:, इदानीं तस्य तन्मिश्रस्य ( योगरूढस्य रूढयौगिकस्य वा ) परिचयं प्रस्तौति –**

**तन्मिश्रोऽन्योन्यसामान्यविशेषपरिवर्तनात् ।**
**नीरधि: पङ्कजं सौधं सागरो भूरुह: शशी ॥१२॥**
**क्षीरनीरधिराकाशपङ्कजं तेन सिध्यति।**

**अन्वय:** – अन्योन्यसामान्यविशेष परिवर्त्तनात् तन्मिश्र: (भवति) तेन नीरधि: पङ्कजं, सौधं, सागर:, भूरुह:, शशी, क्षीरनीरधि: आकाशपङ्कजं सिध्यति।

**व्याख्या** – अन्योऽन्यं = परस्परं, सामान्यविशेषयो: यत् परिवर्तनं = विनिमय: तस्मात् अन्योन्यसामान्यविशेषपरिवर्तनात्, तन्मिश्र: = योगरूढ:, रूढयौगिक: वा भवति, तेन = एवं प्रकारेण क्रमश: नीरधि:, पङ्कजं, सौधं, सागरो, भूरुह: शशी, क्षीरनिधि: आकाशपङ्कजमित्युदाहरणानि सन्ति।

**भावार्थ:** – यत्र शब्द: स्वकीयं सामान्यार्थं विहाय विशेषार्थं बोधयति, यथा – नीरधि: नीराणि दधातीति नीरधि:, अनया व्युत्पत्त्या ये सरोवरतडागादय: जलानि धारयन्ति तेऽपि वाच्या: परं शब्दोऽयं समुद्ररूपे विशेषार्थेऽस्ति। एवमेव पङ्के जातं पङ्कजम् अपि कमलरूपे विशेषार्थे एव प्रवर्तते। एवमेव सौधं सुधया अनुलिप्तं सौधशब्दोऽपि राजभवनरूपेऽर्थेऽस्ति। तथैव सागर:, भूरुह:, शशी।

यत्र विशेषार्थं विहाय शब्द: सामान्यार्थे प्रवर्तते, यथा – क्षीरनीरधि: अत्र यदि विशेषार्थस्य ग्रहणं क्रियते तर्हि क्षीरशब्द: दुग्ध वाचक: परमत्र स्वविशेषार्थं विहाय समुद्रमात्रम् अर्थं बोधयति।

''आकाशपङ्कजम्'' इत्यत्र पङ्कजशब्द: स्वविशेषार्थं कमलं विहाय चन्द्रार्थे प्रवर्तते।

**हिन्दी अर्थ** – तन्मिश्र (योगरूढ) भी सामान्य और विशेष धर्मों के परिवर्तन के कारण कहीं सामान्य अर्थ छोड़कर विशेष अर्थ के बोध में ओर कहीं विशेष अर्थ को छोड़कर सामान्य अर्थ के बोध में कहीं सामान्य एवं विशेष रूप दोनों अर्थों को छोड़कर बोध की प्रतीति से तीन प्रकार का होता है। नीरधि, पङ्कज, सौध, सागर, भूरुह और शशी ये शब्द सामान्य अर्थ को छोड़कर विशेष अर्थ के बोधस्थल के उदाहरण हैं।

**शब्दप्रकारम् उक्त्वा इदानीं पदवाक्यलक्षणं प्रतिपादयति –**

**विभक्त्यन्तं पदं वाक्यं तद्व्यूहोऽर्थसमाप्तित: ॥१३॥**
**युक्तार्थानां तां च विना खण्डवाक्यं स इष्यते।**
**वाक्यं च खण्डवाक्यं च पदमेकमपि क्वचित् ॥१४॥**

**अन्वय:** – विभक्त्यन्तं पदम्, अर्थसमाप्तित: तद्व्यूह: वाक्यं युक्तार्थतां तां च विना स: खण्डवाक्यम् इष्यते। क्वचित् एकम् अपि पदं वाक्यं खण्डवाक्यं च इष्यते।

**व्याख्या** – विभक्ति: = सुप्तिङ्रूपा, अन्ते = अवसाने यस्य तत् विभक्त्यन्तं = सुबन्तं तिङन्तं वा पदं भवति। अर्थसमाप्तित: = अर्थसमाप्तौ तेषां व्यूह: = पदसमूहो वाक्यं कथ्यते, युक्तार्थानां = सम्बद्धार्थप्रतिपादकानां, स: = समूह:, तां विना = अर्थं समाप्तिं विना, खण्डवाक्यं = एतत् नाम्ना इष्यते = इष्टं भवति। क्वचित् = कुत्रापि, एकं = केवलमात्रपदं, वाक्यं खण्डवाक्यं च भवति।

**भावार्थः** – सुबन्तं तिङन्तं शब्दस्वरूपं पदमुच्यते। विशिष्टार्थबोधकः पदसमूहः वाक्यं भवति। अपूर्णार्थस्य वाचकः पदसमूहः खण्डवाक्यम् उच्यते, यत्र कुत्रचित् पूर्णार्थबोधकः एकमपि पदं वाक्यं तथा अपूर्णार्थबोधकः खण्डवाक्यम् उच्यते।

**विशेषः**– राम+सु – रामः इति सुबन्तम् अतः पदमस्ति।

गम्+तिप् – गच्छति इति तिबन्तम् अतः पदमस्ति।

रामः गच्छति – वाक्यमस्ति यतोहि अर्थपूर्णतास्ति।

राज्ञः पुरुषः – पूर्णार्थरहितः पदसमूहः अत एव खण्डवाक्यम्।

**हिन्दी अर्थ** – जिस शब्द के अन्त में सुप् तिङ् रूप विभक्ति लगी हो, उस सुबन्त अथवा तिङन्त शब्द को पद कहते हैं। पदों के समूहों की जहाँ अर्थ की समाप्ति होती है, उन पद समूहों को वाक्य कहते हैं।

परस्पर सम्बद्ध अर्थ का प्रतिपादन करने वाले पद समूह को अर्थ की समाप्ति के न होने के कारण खण्ड वाक्य कहते हैं। कहीं एकपद को भी वाक्य तथा खण्ड–वाक्य कहते हैं।

**एकम् अपि पदं वाक्यं खण्डवाक्यं च भवति इति उदाहरति तेन सह महावाक्यस्वरूपं प्रस्तौति –**

**धूमवत्त्वादिति यथा देवेत्यामन्त्रणं यथा।**
**वाक्यान्येकार्थ विश्रान्तान्याहुर्वाक्यकदम्बकम्॥ १५॥**

**अन्वयः** – यथा धूमवत्वाद् इति यथा देव इति आमन्त्रणम् एकार्थं विश्रान्तानि वाक्यानि वाक्यकदम्बकम् आहुः।

**व्याख्या** – क्वचित् एकं पदं वाक्यं खण्डवाक्यं च भवति इत्युदाहरति – यथा = येन प्रकारेण, धूमवत्त्वात् = धूमवतो भावो धूमवत्त्वं तस्माद् धूमवत्त्वादिति, पूर्णार्थबोधनात् वाक्यस्योदाहरणं, देव! = हे देव इति आमन्त्रणं = सम्बोधनं, खण्डवाक्यस्योदाहरणम्, एकार्थविश्रान्तानि = एकार्थतात्पर्यकाणि, वाक्यानि = पदानि, वाक्यकदम्बकं = वाक्यानां समूहः इत्युच्यते।

**भावार्थः** – हे देव! इति खण्डवाक्यं तथा च एकस्मिन्नेव सन्दर्भे प्रस्तुतानाम् अनेकेषां वाक्यानां समूहः वाक्यकदम्बकं महावाक्यं वा कथ्यते।

**विशेषः** – प्रसङ्गविशेषे, परस्परसंवादे प्रश्नोत्तरे च एकम् अपि पदं वाक्यं भवति यथा वक्ता–पर्वतो अग्निमान् – श्रोता – कथम्? वक्ता – धूमवत्वात्।

**हिन्दी अर्थ** – यथा धूमवत्वात् यह पञ्चम्यन्त एक पद भी पूर्णार्थ वाचक आकांक्षा पूरी करने वाला है अतः वाक्य है तथा हे देव! यह सम्बोधन विभक्ति पद का पद आकांक्षा पूरी नहीं करता, आगे और कुछ कहा जाना शेष है अतः खण्डवाक्य है। एक ही अर्थसन्दर्भ में उपनिबद्ध अनेक वाक्य ''वाक्यकदम्बक'' कहलाता है किसे महावाक्य या प्रबन्ध भी कहते है।

**अथ चन्द्रालोककारः जयदेवः प्रथम–मयूखान्ते आत्मपरिचयं प्रस्तौति –**

**महादेवः सत्रप्रमुखमखविद्यैकचतुरः**
**सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ।**
**अनेनाऽसावाद्यः सुकविजयदेवेन रचिते**
**चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः॥**

**अन्वयः** – सत्रप्रमुखमखविद्यैकचतुरः महादेवः, तद्भक्तिप्रणिहितमतिः, सुमित्रा (च) यस्य पितरौ (आस्ताम्) अनेन सुकविजयदेवेन रचिते चन्द्रालोके असौ आद्यः मयूखः सुमनसः चिरं सुखयतु।

**व्याख्या** – अथ ग्रन्थकर्ता जयदेवः कविः स्वपरिचयपूर्वकं प्रथममयूखसमाप्तिं निर्दिशति – **महादेवः इति।** सत्राणि = अनेकदिनसाध्याः यज्ञाः प्रमुखानि = प्रधानानि येषां ते तथाभूता ये मखाः = यज्ञाः तेषां या विद्याः = श्रौत–स्मार्त–कर्मकाण्डरूपाः तस्याम् एकचतुरः परमप्रवीणः इति सत्र प्रमुखमखविधैकचतुरः महादेवः = महादेवनामा तथा

तस्य महादेवस्य भक्तौ = सेवायां प्रणिहितमतिः – प्रकर्षेण निहिता = स्थापिता, मतिः = बुद्धिः यस्याः सा तद्भक्तिप्रणिहितमतिः = पतिव्रता, सुमित्रा = सुमित्रा नाम्नी च यस्य = जयदेवकवेः, पितरौ = माता च पिता च पितरौ = जननी – जनकौ (आस्ताम्)। अनेन = तेन, सुकविजयदेवेन = सुकविश्चासौ जयदेवः सुकविजयदेवः तेन सुकविजयदेवेन रचिते = प्रणीते, चन्द्रालोके – चन्द्रस्यालोक इव आलोको यस्मिन् स चन्द्रालोकः, तस्मिन् चन्द्रालोके = चन्द्रालोकाख्ये ग्रन्थे, असौ = एषः, आद्यः = प्रथमः, इति मयूखः = किरणः, सुमनसः = पण्डितान् देवांश्च चिरं = चिरकालं, सुखयतु = प्रीणयतु।

**भावार्थः** – अखण्डयज्ञसाधनापारायणः महादेवः यस्य पिता तथा च पतिव्रतधर्मपारायणा सुमित्रा यस्य माता वर्तते। तेन (मया ग्रन्थकारेण) सुकविना जयदेवेन विरचिते चन्द्रालोकनामके ग्रन्थे अयं प्रथमो मयूखः काव्यरसिकान् सुचिरम् आह्लादयतु।

**हिन्दी अर्थ** – अखण्डयज्ञों की सततसाधना में परायण महादेव जिनके पिता तथा पतिभक्तिपरायणा सुमित्रा जिनकी माता हैं। ऐसे पीयूषवर्षी सुकवि जयदेव विरचित चन्द्रालोक नामक ग्रन्थ का यह प्रथम मयूख काव्यरसिकों को आनन्दित करे।

**इति पीयूषवर्षेण श्री जयदेवेन विरचिते चन्द्रालोके वाग्विचारो नाम प्रथमो मयूखः समाप्तः।**

## अभ्यास-प्रश्नाः

### बहु-विकल्पात्मकाः प्रश्नाः –

१. चन्द्रालोकस्य रचनाकारोऽस्ति –
(क) मम्मटः (ख) विश्वनाथः
(ग) जयदेवः (घ) कालिदासः ( )

२. ग्रन्थादौ कस्य स्तुतिः कृता?
(क) श्रीकृष्णस्य (ख) इन्द्रस्य
(ग) वाग्देव्याः (घ) बृहस्पतेः ( )

३. जयदेवः केन उपाख्येन प्रसिद्धोऽस्ति –
(क) कविराजोपनाम्ना (ख) चक्रधरनाम्ना
(ग) पीयूषवर्षोपनाम्ना (घ) मार्तण्डनाम्ना ( )

४. चन्द्रालोके प्रकरणविभाजनमस्ति –
(क) अध्यायेषु (ख) परिच्छेदेषु
(ग) सर्गेषु (घ) मयूखेषु ( )

५. चन्द्रालोकस्य प्रथम-मयूखस्य नाम अस्ति –
(क) रसः (ख) दोषः
(ग) गुणः (घ) वाग्विचारः ( )

६. ''सुमित्रा तद्भक्तिप्रणिहितमतिः यस्य पितरौ'' अत्र ''तद्'' शब्दस्य अर्थोऽस्ति –
(क) जयदेवः (ख) महादेवः
(ग) मम्मटः (घ) सुमित्रा ( )

७. ''अङ्गीकरोति यः काव्यम्'' इत्यत्र ''यः'' शब्दः कं सङ्केतयति –

(क) विश्वनाथम् (ख) मम्मटम्

(ग) सरस्वतीम् (घ) महादेवम् ( )

८. ''रूढयौगिकतन्मिश्रैः प्रभेदैः पुनस्त्रिधा'' इत्यत्र तन्मिश्रस्य अर्थोऽस्ति –

(क) योगरूढः (ख) रूढः

(ग) यौगिकः (घ) वाक्यम् ( )

**अतिलघूत्तरात्मकाः प्रश्नाः –**

१. शब्दस्य परिभाषा लेखनीया।

२. शब्दभेदाः लेखनीया।

३. रूढशब्दभेदाः कति? के च ते?

४. यौगिकशब्दभेदाः लेखनीयाः।

५. योगरूढशब्दः कतिविधः?

**लघूत्तरात्मकः प्रश्नाः –**

१. काव्योत्पत्तिकारणं किम्?

२. खण्डवाक्यं, वाक्यं वाक्यकदम्बकं च किं भवति?

३. चन्द्रालोकस्य मङ्गलाचरणं पद्यं लिखत।

४. मयूखसमाप्तिश्लोकं लिखत।

**निबन्धात्मकाः प्रश्नाः –**

१. शब्दभेदाः सविस्तरं सोदाहरणं लेखनीयाः।

२. किं काव्यलक्षणम्?

३. अङ्गीकरोति यः काव्यं .................... श्लोकस्य सप्रसङ्गं व्याख्या कार्या।

४. प्रथमे मयूखे प्रतिपादितानां विषयाणामनुक्रमणिका लेखनीया।

# द्वितीयो मयूखः

## अथ दोषाः

**काव्यलक्षणप्रसङ्गे जयदेवः ''निर्दोषालक्षणवती'' इति प्रतिपादितवान्। अधुना यथाप्रसङ्गं दोषस्वरूपं, तेषां नामानि लक्षणोदाहरणानि च प्रदर्शयति –**

**स्याच्चेतो विशता येन सक्षता रमणीयता।**
**शब्देऽर्थे च कृतोन्मेषं दोषमुद्घोषयन्ति तम्॥१॥**

**अन्वयः** – चेतः विशता येन रमणीयता सक्षता स्यात् शब्दे अर्थे च कृतोन्मेषं तं दोषम् उद्घोषयन्ति।

**व्याख्या** – चेतः = अन्तःकरणं, विशता = प्रविशता, येन = शब्दार्थपदवाक्यगतत्वेन, रमणीयता = काव्यसौन्दर्यं, सक्षता = विनष्टा, स्यात् = भवेत्, शब्दे = वाचके, अर्थे = वाच्ये, कृतोन्मेषं = विहिताविर्भावं, तं = त्याज्यं तं, दोषं = काव्यदूषणम्, उद्घोषयन्ति = कथयन्ति।

**भावार्थः** – मानसे प्रविशता येन काव्यसौन्दर्यं विनिष्टं भवति, काव्यमर्मज्ञाः तं दोषं कथयन्ति। दोषः काव्यशरीरस्य शब्दे अर्थे च सम्भवति।

**विशेषः** – शब्दार्थौ काव्यस्य शरीरं, तेन दोषाः काव्यशरीरस्य शब्दे अर्थे च प्रकटीभवन्ति। अत एव शब्ददोषाः अर्थदोषाः च ज्ञायन्ते। यथा मानवशरीरशोभाविघातकाः काणत्वखञ्जनत्वादयः शरीरदोषाः तथैव काव्यशोभाविघातकाः काव्यदोषाः उच्यन्ते। दोषकारणं शब्दं निवार्य तत्स्थाने पर्यायशब्दप्रयोगे कृते यदि दोषनिवारणं भवति तदा पददोषः चेत् न भवति तदा अर्थदोषो भवति।

**हिन्दी अर्थ** – हृदय में प्रवेश करते ही जिनसे काव्य की रमणीयता नष्ट हो जाती हो, ऐसे शब्द और अर्थ में उत्पन्न होने वाले काव्यसौन्दर्य अपकर्षक तत्त्वों को दोष कहते हैं।

**दोषलक्षणम् उक्त्वा तेषां नामोल्लेखपूर्वकं लक्षणोदाहरणानि प्रस्तौति, तस्मिन् क्रमे श्रुतिकटुः च्युतसंस्कृतिश्च –**

**भवेच्छ्रुतिकटुवर्णः श्रवणोद्वेजने पटुः।**
**संविन्दते व्याकरणविरुद्धं च्युतसंस्कृतिः॥२॥**

**अन्वयः**– श्रवणोद्वेजने पटुः वर्णः श्रुतिकटुः भवेत्। व्याकरणविरुद्धं च्युतसंस्कृतिः संविन्दते।

**व्याख्या** – श्रवणोद्वेजने – श्रवणयोः = कर्णयोः, उद्वेजने = क्लेशने, पटुः = समर्थः, वर्णः = शब्दः, श्रुतिकटुः = एतन्नामकदोषः। व्याकरणविरुद्धं = व्याकरणनियमरहितं, च्युतसंस्कृतिः = इत्याख्यः, संविन्दते = जानन्ति।

श्रुतौ कटुः श्रुतिकटुः।

**भावार्थः** – कर्णकटुवर्णानां प्रयोगेण श्रुतिकटुदोषो भवति, अस्मिन् लक्षणे एव ''भवेच्छ्रुति'' इति पदे चकारः,

छकारः, रेफश्च संयुक्तरूपेण प्रयुक्ताः तस्मादत्र श्रुतिकटुदोषः। व्याकरणनियमरहितानां पदानां प्रयोगे च्युतसंस्कृतिदोषः, अस्मिन् लक्षणे ''संविन्दते'' इत्यस्य सम् उपसर्गपूर्वकं विद् धातोः अकर्मकदशायाम् आत्मनेपदं व्याकरणसम्मतम् परमत्र सकर्मकदशायामपि आत्मनेपदं व्याकरणविरुद्धमस्ति। अत एव अत्र च्युतसंस्कृतिदोषः।

**हिन्दी अर्थ – श्रुतिकटु दोष** – सुनने में कर्कशता उत्पन्न करने वाले वर्ण से श्रुतिकटु दोष होता है, जैसे इसी श्लोक में ''भवेच्छ्रुति'' इस पद में चकार, छकार व रकार के मिल जाने से कानों में कटुता की प्रतीति होती है। अतः यह श्रुतिकटु दोष है।

**च्युतसंस्कृति दोष** – व्याकरण के नियम के विरुद्ध पद का प्रयोग च्युतसंस्कृति दोष माना जाता है। जैसे इसी पद्य में संविन्दते यह पद व्याकरण से अशुद्ध है क्योंकि परस्मैपदी विद्-धातु के सम् उपसर्ग लगाने पर अकर्मक होने पर वह आत्मनेपदी बनता है यहाँ वह सकर्मक है फिर भी उसका आत्मनेपदी प्रयोग किया है जो नियम विरुद्ध होने से च्युतसंस्कृति दोष है।

**अथ अस्मिन् क्रमे श्लोकद्वयेन अप्रयुक्तम्, असमर्थं निहतार्थं च दोषत्रयं क्रमशः निरूपयति –**

**अप्रयुक्तं दैवतादिशब्दे पुल्लिङ्गतादिकम्।**
**असमर्थं तु हन्त्यादेः प्रयोगो गमनादिषु॥३॥**
**स हन्ति हन्त कान्तारे कान्तः कुटिलकुन्तलः।**
**निहतार्थं लोहितादौ शोणितादिप्रयोगतः॥४॥**

**अन्वयः** – दैवत आदि शब्दे पुल्लिङ्गतादिकम् अप्रयुक्तम्। हन्त्यादेः गमनादिषु प्रयोगः असमर्थम् यथा हन्त! कुटिल कुन्तलः सः कान्तः कान्तारे हन्ति। लोहितादौ शोणितादि प्रयोगतः निहतार्थम्॥

**व्याख्या** – दैवतादिशब्दे = दैवतं आदिर्यस्य सः देवतादिः, स चासौ शब्दश्च दैवतादिशब्दः तस्मिन् दैवतादिशब्दे, पुल्लिङ्गतादिकम् = पुल्लिङ्गतादि प्रयोगः आदिना पद्मादिशब्देऽपि अप्रयुक्तत्वं = तन्नामको दोषो भवति गमनादिषु = गमनादि अर्थेषु, हन्त्यादेः = हन् प्रभृतिधातोः, प्रयोगः = व्यवहारः, असमर्थम् = असमर्थनामादोषः, यथा – कुटिलाः कुन्तला यस्य सः कुटिलकुन्तलः = वक्रकेशी, कुटिलाः = वक्राः, कुन्तलाः = केशाः यस्य सः, कान्तः = प्रियतमः, कान्तारे = गहने वने हन्ति = गच्छति।

लोहितादौ = रागार्थवाचकेलोहितशब्दे, शोणितादिप्रयोगतः = रुधिरादिशब्दप्रयोगात्, निहतार्थम् = निहतार्थदोषो भवति।

**भावार्थः** – न प्रयुक्तम् इति अप्रयुक्तं कविभिः अप्रयुक्तः शास्त्रसम्मतोऽपि शब्दः चेत् प्रयुज्यते तर्हि अप्रयुक्तनामा दोषः, 'दैवतम्' शब्दः 'दैवतानि पुंसि वा' नियमेन तु पुल्लिङ्गेऽस्ति परं कविप्रयोगप्रवाहे नपुंसकलिङ्गे एव प्रयुक्तः अतोऽधुना चेत् पुंसि प्रयुज्यते तर्हि अप्रयुक्तनामदोषः।

अभीष्टम् अर्थं प्रकटयितुम् असमर्थस्य पदस्य प्रयोगेण असमर्थनाम दोषो भवति यथा हन्ति इत्युदाहरणे हन्ति गमनार्थबोधने असमर्थः।

उभयार्थवाचकः शब्दः यदि अप्रसिद्धेऽर्थे प्रयुज्यते तर्हि निहतार्थदोषः। यथा शोणितशब्दः (लोहितार्थे) रागार्थे अप्रसिद्धः रुधिरार्थे च प्रसिद्धः। शब्दोऽयं अप्रसिद्धार्थे रागार्थे प्रयुज्यते चेत् निहतार्थनामको दोषः।

लोहितशब्दः रक्तवर्णवाचकः। अतः यदि शोणितशब्दः लोहितस्य स्थाने रागार्थाय प्रयुज्यते तर्हि निहतार्थ नामको दोषः।

**हिन्दी अर्थ – अप्रयुक्त**– दैवत आदि शब्दों का पुल्लिङ्ग में प्रयोग करना अप्रयुक्त दोष है। अप्रयुक्त यद्यपि ''दैवतानि पुंसि वा'' इस नियम से तो इस शब्द का पुल्लिङ्ग तथा नपुंसकलिङ्ग में प्रयोग नियमसम्मत है परन्तु कवियों द्वारा यह शब्द पुल्लिङ्ग में प्रयुक्त नहीं किया गया। अतः ''यद्यपि शुद्धं लोकविरुद्धं नाचरणीयम्'' के अनुसार दैवत शब्द का

पुल्लिङ्ग– प्रयोग अप्रयुक्त दोष है। इसका प्रयोग नपुंसकलिङ्ग में ही उचित है। इसी प्रकार ''वा पुंसि पद्मम्'' नियम से पद्म शब्द नपुंसक व पुल्लिङ्ग में उभयलिङ्गी है परन्तु कवि प्रयोगप्रवाह में केवल नपुंसकलिङ्ग में इसका प्रयोग हुआ अब यदि पुल्लिङ्ग में प्रयोग करते हैं तो अप्रयुक्त दोष होगा।

**असमर्थ** – ''हन् हिंसागत्योः'' नियम से हन् धातु का हिंसा तथा गति अर्थ में प्रयोग हो सकता है परन्तु अप्रचलित होने के कारण हन् धातु गमन अर्थ का बोध कराने में असमर्थ है।

उदाहरण – हाय! घुँघराले केशों वाला वह प्रियतम गहन वन में जा रहा है। यहाँ हन्ति शब्द ''जा रहा हैं'' अर्थ को बताने में असमर्थ है।

**निहतार्थ** – एक शब्द के दो अर्थ हो एक लोक व्यवहार में प्रयुक्त होने से प्रसिद्ध तथा दूसरा अर्थ अप्रसिद्ध हो यदि उस शब्द का अप्रसिद्ध अर्थ में प्रयोग किया जाता है तो निहतार्थ दोष होगा। जैसे लोहित शब्द का प्रसिद्ध अर्थ लाल रंग है तथा शोणित अर्थ अप्रसिद्ध है, अतः लोहित शब्द का शोणित अर्थ में प्रयोग निहतार्थ नामक दोष होगा।

**अथ अनुचितार्थदोषं निरूपयति –**

**व्यनक्त्यनुचितार्थं यत् पदमाहुस्तदेव तत्।**
**इयमद्भुतशाख्यग्रकेलिकौतुकवानरी ॥ ५॥**

**अन्वयः** – यत् पदम् अनुचितार्थं व्यनक्ति (विद्वान्सः) तत् (पदम्) एव तत् (अनुचितार्थदोषम्) आहुः। (यथा) इयं अद्भुतशाखी अग्रकेलिकौतुक–वानरी (वर्तते)।

**व्याख्या** – यत् पदम् = शब्दः, अनुचितार्थम् = हीनार्थं, व्यनक्ति = प्रकटयति, तदेव = अनुचितार्थबोधकं पदं, तत् = अनुचितार्थम्, आहुः = कथयन्ति। तदुदाहरणम् – इयं = नायिका, अद्भुतः = अद्भुतरसः स एव शाखी = वृक्षः, तस्याग्रे = उपरितने भागे, या केलिः = क्रीडा तस्याः कौतुकम् = कुतूहलं यस्याः सा चासौ वानरी = मर्कटी च इति।

**भावार्थः** – यत् पदम् अनुचितम् अर्थं प्रकटयति, विद्वान्सः तत् पदम् अनुचितार्थं कथयन्ति। अत्र नायिकायाः वानरीरूपकथनाद् अनुचितः अर्थः प्रतीयते। अतोऽत्र अनुचितार्थः दोषः।

**हिन्दी अर्थ** – जो पद अनुचित अर्थ का बोध कराता है उसे अनुचितार्थदोष कहते हैं। उदा० यह नायिका अद्भुत रस रूपी वृक्ष के अग्रभाग पर क्रीडा करने वाली वानरी है। यहाँ पर नायिका के लिये वानरी पद का प्रयोग अनुचित है अतः अनुचितार्थ दोष है।

**अधुना निरर्थकम् अवाचकं चेति दोषद्वयं निरूपयति –**

**निरर्थकं तु–हीत्यादि पूरणैकप्रयोजनम्।**
**अर्थे विदधदित्यादौ दधदाद्यमवाचकम्॥६॥**
**धत्ते नभस्तलं भास्वानरुणं तरुणैः करैः।**
**एकाक्षरं विना भू–भ्रूक्ष्मादिकं खतलावित्॥७॥**

**अन्वयः**– पूरण एक प्रयोजनं तु–हि इत्यादि निरर्थकम्। विदधद् इत्यादौ अर्थे दधद् आद्यम् अवाचकम्। यथा भास्वान् तरूणैः करैः नभस्तलम् अरुणं धत्ते। इत्यमेव भू भ्रू क्ष्मादिकम् एकाक्षरं विना खतलादिवत्।

**व्याख्या** – पूरणैकप्रयोजनं = पादाक्षरभरणमात्रं, तुहीत्यादिपदं यस्मिन् तत् = तु हि इत्यादि, आदि पदेन च एवादीनां ग्रहणं, निरर्थकं = निर्गतः, दूरीभूतः अर्थः प्रयोजनं यस्मात् तत् निरर्थकम्। विदधद् इत्यादौ अर्थे आद्य दधद् इति यत् पदं प्रयुज्यते तद् अवाचकम् = अवाचकाख्यं नाम दूषणं ज्ञेयम्। यथा भास्वान् = सूर्यः, तरुणैः = देदीप्यमानैः करैः = किरणैः, नभस्तलम् = आकाशम्, अरुणं = रक्तवर्णतां, धत्ते = करोति भूपदं भ्रूपदं क्ष्मापदं चेत्यादिकं विना = विहाय, खतलादिवत् = आकाशार्थे खतलशब्दस्य प्रयोगो अवाचकत्वम्।

**भावार्थः**– वि–उपसर्गयोगे एव धा – धातु करणार्थे प्रयुज्यते, परम् अत्र वि–उपसर्गं विनैव धा–धातुः प्रयुक्तः। धत्ते

इति क्रियापदं विधत्ते इत्यर्थस्य वाचकं नास्ति। भू-भ्रू-क्ष्मा पदैः सह तलपटलादियोगात् भूतलं भ्रूयुगं क्ष्मातलं युज्यते परम् एवमेव अन्यै पदैः सह यथा खतलं खपटलम् अवाचकदोषमयानि जायन्ते।

यत्र काव्ये छन्दपादपूर्तिकरणाय ''तु हि च'' इत्यादि पदानां प्रयोगः क्रियते तत्र निरर्थकनामा दोषः।

**हिन्दी अर्थ** – जिस उपसर्गपूर्वक जो धातु जिस अर्थ का वाचक है, उस उपसर्ग के बिना उस अर्थ में उस धातु का प्रयोग करना अवाचक दोष होता है। जैसे – विपूर्वक धा-धातु का अर्थ 'करना' है। यदि इसी अर्थ में उपसर्ग रहित केवल धा-धातु का प्रयोग किया जाय तो उक्त दोष होता है। सूर्य अपने प्रमुख किरणों से आकाश को लाल बना देता है। एक अक्षर वाले भू, भ्रू, क्ष्मा आदि पदों के अतिरिक्त खतल आदि के तुल्य पद अवाचक दोष के उदाहरण हैं। जहाँ काव्य में अशक्तता के कारण तु, हि, च, ननु, खलु का प्रयोग किया जाये वहाँ निरर्थकनामक दोष होता है।

**अश्लीलं दोषं प्रतिपादयति –**

**अश्लीलं त्रिविधं व्रीडाजुगुप्साऽमङ्गलात्मना।**
**आह्लादसाधनं वायुः कान्तानाशे भवेत् कथम्॥ ८॥**

**अन्वयः** – अश्लीलं व्रीडा-जुगुप्सा-अमङ्गल आत्मना त्रिविधम् (भवति) यथा कान्तानाशे वायुः आह्लाद-साधनं कथं भवेत्?

**व्याख्या** – अश्लीलम् = अशिष्टम्, असभ्यं वा, व्रीडाजुगुप्साऽमङ्गलात्मना – व्रीडा = लज्जा, जुगुप्सा= घृणा च, अमङ्गलम् = अशुभं च आत्मा यस्य सः तेन तथा भूतेन हेतुना व्रीडाश्लीलं जुगुप्साश्लीलम् अमङ्गलाश्लीलं च, त्रिविधं = त्रिप्रकारकं भवति। क्रमेणोदाहरति – कान्तानाशे = प्रियामरणे, वायुः = मलयानिलः, आह्लादसाधनम् = आनन्दकारणम्, कथं = केन प्रकारेण भवेत् = स्यात्।

**भावार्थः** – न श्लीलम् इति अश्लीलम् इत्थम् असभ्यार्थबोधकः दोषः अश्लीलम्। तद् अश्लीलं त्रिविधं लज्जाश्लीलं, घृणाश्लीलम्, अमङ्गलाश्लीलं च। उदाहरणेऽस्मिन् –

साधनशब्दः पुरुषलिङ्गस्य वाचकात् व्रीडां लज्जां जनयति वायुपदं च अपानवायुरूपस्य अर्थस्य प्रतीतिवशाद् घृणां जनयति तथा च कान्तानाशे (अर्थात् प्रियामरणे) अत्र नाश-पदम् अशुभं बोधयति। इत्थं त्रिविधम् अश्लीलं भवति।

**विशेष** – दोषोऽयम् इदानीन्तने न केवलं साहित्ये अपितु लोक-व्यवहारे विज्ञापनवाक्येषु च विशेषेण दृश्यते। अत एव सर्वत्र परिष्कारोऽपेक्षितः।

**हिन्दी अर्थ** – असभ्य या अशिष्ट अर्थ बोधक पद को अश्लील कहते हैं। वह अश्लील व्रीडाजनक जुगुप्सा तथा अमङ्गल जनक होने से तीन प्रकार का है। क्रमशः उदाहरण जैसे प्रिया का नाश होने पर यह शीतल-मन्द-सुरभित समीर आनन्ददायक कैसे हो सकता है? यहाँ साधन शब्द पुरुष जननेन्द्रिय वाचक होने से लज्जा जनक, वायु पद अपान वायुबोधक होने से घृणाकारक तथा नाश शब्द अशुभ भाव को व्यक्त करने से अमङ्गल अश्लील का वाचक है।

**श्लोकेऽस्मिन् सन्दिग्धम् अप्रतीतं च दोषं निरूपयति –**

**स्याद् द्व्यर्थमिह सन्दिग्धं नद्यां यान्ति पतत्त्रिणः।**
**स्यादप्रतीतं शास्त्रैकगम्यं वीताऽनुमादिवत्॥ ९॥**

**अन्वयः** – इह द्व्यर्थं सन्दिग्धं स्यात् (उदाहरणं) यथा पतत्त्रिणः नद्यां यान्ति। शास्त्रैकगम्यम् अप्रतीतं स्याद् (यथा) वीतानुमादिवत्।

**व्याख्या** – इह = काव्ये, द्व्यर्थम् = अर्थद्वयस्य वाचकं पदं, सन्दिग्धम् = सन्दिग्धाख्यं दूषणम्। अनेकार्थबोधजनकत्वं सन्दिग्धत्वम् इति यथा पतत्त्रिणः = पक्षिणः नद्यां = नदीक्षेत्रे वा नद्यां = न स्वर्गे यान्ति = गच्छन्ति।

शास्त्रैकेगम्यं = शास्त्रविशेषे बोध्यं, तादृशं पदम्, अप्रतीतं = तत् नामकं दूषणं यथा वीतानुमादिवत् = वीत

च अनुमावीतानुमा तद्वत् वीतानुमादिवत् अनुमानप्रमाणप्रसङ्गे वीतानुमानम् इति भेदप्रदर्शनं सांख्यशास्त्रे एव प्रसिद्धं सर्वेषां कृते अस्य प्रतीति: कथमपि न भवति तस्मादत्र अप्रतीतत्वम्।

**भावार्थ:** – यदा द्वयर्थकस्य पदस्य प्रयोगात् अभीष्टार्थविषये द्वैधता भवति तदा सन्दिग्धनामको दोष:। यथा 'नद्यां' अस्य पदस्य सप्तमी एकवचने – नदी तटे नदीक्षेत्रे वा तथा न द्यां स्वर्गे न इति अर्थविषयिकी सन्दिग्धास्ति।

एकशास्त्रमात्रप्रयुक्तस्य परिभाषापदस्य प्रयोगे सति तस्य अर्थप्रतीति: न जायते तस्माद् अप्रतीतत्वं दोषो भवति।

**हिन्दी अर्थ** – काव्य में दो या दो से अधिक अर्थ के बोधक शब्दों का प्रयोग होने से संदिग्ध दोष होता है। जैसे 'नद्यां यान्ति पतत्रिण:' इस पद्य के नद्यां पद में नदी शब्द का सप्तमी एकवचन ''नदी पर'' का तथा न द्यां इस द्वितीयान्त द्यां से स्वर्ग को नहीं जाते है। इस प्रकार के अर्थ में सन्दिग्धवाचक के कारण सन्दिग्ध दोष है।

केवल शास्त्रविशेष के पारिभाषिक शब्द की सभी के लिये सहज प्रतीति नहीं होती। अत: ऐसे शब्द प्रयोग से अप्रतीतत्व दोष होता है। जैसे 'वीमानुमा' शब्द केवल सांख्यशास्त्र में अनुमान प्रमाण भेदों का बोधक है जो सर्वजन बोधाय नहीं है। अत: सभी के लिये सहज प्रतीति नहीं होने के कारण यहाँ अप्रतीत दोष है।

**अथ शिथिलं ग्राम्यं च दोषम् उदाहरणै: निरूपयति –**

**शिथिलं शयने लिल्ये मच्चित्तं ते शशिश्रियि।**
**मस्तपिष्टकटीलोष्टगल्लादि ग्राम्यमुच्यते ॥१०॥**

**अन्वय:**– शशिश्रियि ते शयने मच्चित्तं लिल्ये। (शिथिलं) मस्त–पिष्ट–कटी–लोष्ट–गल्लादि (पदानि) ग्राम्यम् उच्यते।

**व्याख्या**– यस्यां पदरचनायां काव्यकर्मज्ञा: शैथिल्यम् अनुभवन्ति तत्रैव शिथिलं नाम दोष:, शिथिलपदानां प्रयोगात् शिथिलनामा दोष:, पदानां शैथिल्यमित्याशय:। शशिश्रियि = शशि सदृशे, ते=तव, शयने= शय्यायां पर्यङ्के वा मच्चित्तं= मे मन:, लिल्ये= अलीयत। यद्यपि पदानां शैथिल्यादि निर्णये तु श्रवणमेव प्रमाणम् अत्रापि पदानां संग्रथने कविना शैथिल्यं प्रदर्शितम् इति शैथिल्यदोष:।

ग्राम्यदोषमाह– ग्राम्यपदानां काव्ये प्रयोग: ग्राम्यदोषं प्रकटयति।

ग्राम्यम् = ग्रामे भव ग्राम्यम् = अशिष्टहृदयचमत्कारजनकत्वं ग्राम्यत्वमिति। मस्तपिष्टकटीलोष्टगल्लादि = मस्तं पिष्टं कटी लोष्टं गल्ल: आदिर्यस्य तत् पदं ग्राम्यम्= तन्नामक: दोष: उच्यते।

**भावार्थ:**– येषां पदानां श्रवणे शैथिल्यम् अनुभूयते तानि पदानि शिथिलानि उच्यन्ते। तादृशां पदानां प्रयोग: शिथिलदोष–कारको भवति। शयने लिल्ये अस्मिन् उदाहरणे पदशैथिल्यम् अस्ति तस्मादत्र शिथिलदोषोऽस्ति। अशिष्टजनमनोरमा: शब्दा: ग्राम्या: उच्यन्ते। मस्त–पिष्ट इत्यादय: शब्दा: सभ्यजनै: न प्रयुज्यन्ते, तस्मादत्र ग्राम्यदोष:।

**हिन्दी अर्थ – शिथिलत्व दोष** – जहाँ पदों की रचना अत्यन्त ढीली–ढाली प्रतीत होती है वहाँ शिथिल दोष होता है। जैसे चन्द्रमा के समान स्वच्छ तेरे पलंग में मेरा मन लीन हो गया। यहाँ पदों की रचना सुनने में अत्यन्त शिथिल प्रतीत होती है। अत: यहाँ शिथिलत्व दोष है।

**ग्राम्यत्व दोष** – जहाँ मस्त–मस्ती, पिष्ट =पिसान्, कटी = कमर, लोष्ट = ढेला, गल्ल = गाल आदि ग्रामीणों को आनन्द देने वाले शब्दों का प्रयोग किया जाय, वहाँ ग्राम्य दोष हुआ करता है। गाँवों में प्रसिद्ध या ग्रामीणों को आनन्द देने वाले पद ग्राम्य पद कहे जाते हैं॥

**कल्पनाजन्य: अन्य: नेय: अर्थ: यस्मिन् इति तत् नेयार्थं निरूपयति–**

**नेयार्थं लक्षणात्यन्तप्रसरादमनोहरम्।**
**हिमांशोर्हारधिक्कारजागरे यामिका: करा: ॥११॥**

**अन्वय:**– लक्षणात्यन्तप्रसराद् अमनोहरं नेयार्थम्। (यथा) हिमांशो: करा: हार–धिक्कार–जागरे यामिका:(सन्ति)।

**व्याख्या**– लक्षणा अत्यन्तप्रसरात्, लक्षणाया: अत्यन्तं प्रसर: लक्षणात्यन्तप्रसर: तस्मादिति लक्षणात्यन्तप्रसरात्

लक्षणा = मुख्यार्थबाधे अन्यार्थबोधिका द्वितीया शब्दशक्तिः तस्याः लक्षणायाः अत्यन्तम् = अत्यधिकं, प्रसरः = विस्तारः, प्रयोगः लक्षणायाः अत्यधिकविस्ताराद् अमनोहरम् = असुन्दरम्, अरमणीयं नेयार्थम्।

उदाहरणम् – हिमांशोः = चन्द्रस्य, कराः = किरणाः हारधिक्कारजागरे = हारेण = कामिनी मुक्ताहारेण यो धिक्कारः = तिरस्कारः तेन चन्द्रस्य, जागरः = जागरणं तस्मिन् हारधिक्कार जागरे, यामिकाः = प्रहरिणः सन्ति।

**भावार्थः**– लक्षणायाः अस्वाभाविकप्रयोगाद् यत्र अर्थसौन्दर्यं विनश्यति तत्र नेयार्थनामकः काव्यदोषः। रात्रौ चन्द्रः किमर्थं जागर्ति? इति अपेक्षया अस्वाभाविकः कल्पितश्च अर्थोऽयं यत् कामिनीमुक्ताहारः चन्द्र किरणापेक्षया अधिको मनोहरः। अतः तेन तिरस्कृता एव चन्द्रकिरणाः जागरणं कुर्वन्ति – इति लक्षणाजन्यकल्पनायाः अप्राकृतो विस्तारः।

**हिन्दी अर्थ** – जहाँ लक्षणा के अस्वाभाविक विस्तार द्वारा अर्थ की कल्पना की जाये वहाँ नेयार्थ नामक दोष होता है। यहाँ चन्द्रमा के रात्रिजागरण के कारण कामिनी मुक्ताहार के सौन्दर्य से चन्द्रमा का तिरस्कृत होना है। अतः यह अस्वाभाविक लाक्षणिक अर्थ कल्पना के कारण नेयार्थदोष है।

**अथ क्लिष्टनामकं दोषं निरूपयति–**

**क्लिष्टमर्थो यदीयोऽर्थश्रेणिनिःश्रेणिमृच्छति।**
**हरिप्रियापितृवधूप्रवाह–प्रतिमं वचः॥ १२॥**

**अन्वयः**– यदीयः अर्थः अर्थश्रेणिनिः श्रेणिम् ऋच्छति तत् क्लिष्टम्। (उदाहरणम् यथा) हरिप्रिया– पितृवधूप्रवाहप्रतिमं (ते) वचः (अस्ति)।

**व्याख्या**– यदीयः= यत् सम्बन्धी, अर्थः = वाच्यार्थः, अर्थश्रेणिः निःश्रेणिम् = अर्थानां श्रेणिः इति अर्थश्रेणिः अर्थश्रेण्याः निःश्रेणिः इति अर्थश्रेणिनिः श्रेणिः ताम् अर्थश्रेणिनिः श्रेणिम् =अविच्छिन्नसोपानपंक्तिवदर्थपरम्पराम्, ऋच्छति = गच्छति, प्राप्नोति वा, तत् क्लिष्टं = क्लिष्टनामा दोषः भवति। उदाहरति – हरेः प्रिया हरिप्रिया। हरिप्रियायाः पिता हरिप्रियापिता हरिप्रियापितुः वध्वाः प्रवाहः हरिप्रियापितृवधूप्रवाहः, हरिप्रियापितृवधूप्रवाहेण प्रतिमम् इति हरिप्रियापितृवधूप्रवाहप्रतिमं हरिः = विष्णु, विष्णुप्रिया = लक्ष्मीः, लक्ष्मीपिता = समुद्रः, समुद्रवधूः = गङ्गा गङ्गायाः प्रवाहप्रतिमं = गङ्गाजलधारासदृशं ते वचः = तव वाणी, अस्याशयः तववचनं गङ्गाजलधारावदस्ति।

**भावार्थः** – यत्र अत्यल्पम् अर्थं प्रकटयितुम् अनेकशब्दानां शृंखलाबन्धनं क्रियते, तत्र क्लिष्टनामकः काव्यदोषः भवति। उदाहरणेऽस्मिन् – 'गङ्गाजलवत्' इति अर्थं प्रकटयितुं शृंखलाबद्धा अर्थपरम्परा नियोजिता। यथा हरिप्रिया पितृवधूप्रवाहः इति परं तात्पर्योऽस्ति। गङ्गाप्रवाहः इति।

**हिन्दी अर्थ** – जहाँ छोटे से तात्पर्य के लिये ऐसे दीर्घ समस्त पद का प्रयोग किया जाये जिसमें शृंखला कड़ियों की तरह एकशब्द का दूसरे शब्द से, दूसरे का तीसरे से लम्बे क्रम तक परस्पर अर्थ सम्बद्ध परम्परा का अन्त में एक या दो शब्द का तात्पर्य हो वहाँ क्लिष्टनामक दोष होता है। जैसे हरिप्रिया – में सुदीर्घ अर्थपरम्परा का अन्तिम अर्थ 'गङ्गाप्रवाह' है।

**अथ अविमृष्ट – विधेयांश दोषं निरूपयति –**

**अविमृष्ट–विधेयांशः समासपिहिते विधौ।**
**विशन्ति विशिखप्रायाः कटाक्षाः कामिनां हृदि॥१३॥**

**अन्वयः** – विधौ समासपिहिते (सति) अविमृष्ट–विधेयांशः। यथा विशिखप्रायाः कटाक्षाः कामिनां हृदि विशन्ति।

**व्याख्या** – विधौ = विधेयपदे, समासपिहिते = समासेन समावृत्ते (सति) अविमृष्टविधेयांशः – न विमृष्टः इति अविमृष्टः = विर्मशरहितः अविचारितः वा अविमृष्टः विधेयांशः यस्मिन् सः अविमृष्टविधेयाशः = एतन्नामको दोषः। उदाहरति – विशिखप्रायाः = बाणतुल्याः कटाक्षाः = नारीणां वक्रदृष्ट्यः, कामिनां = कामुकानां, मदनातुराणां, हृदि = हृदये, विशन्ति = प्रविशन्ति।

**भावार्थः** – वाक्यस्य विधेयांशभागस्य समासमध्ये नियोजनात् अविमृष्टविधेयांशनामा दोषः सञ्जायते। अत्र विशिखवत्

प्रविशन्ति इत्यर्थ अपेक्षित:। अत्र विशिखपदं वाक्ये विधेयभूतं प्रयुक्तं किन्तु प्राय: शब्देन सह समासकारणात् तस्य प्राधान्यं गुणीभूतम्। तस्मादत्र अविमृष्टविधेयांशदोष:।

**विशेष:** – वाक्यस्य भागद्वयम् – उद्देश्य: विधेयश्च। यस्य विषये कथ्यते स उद्देश्य: तथा च उद्देश्यविषये यदुच्यते स: विधेय:। विधेयभागस्य समासयुक्ते सति तस्य वैशिष्ट्यं गौणत्वं प्राप्नोति। अत्रापि विशिखप्राया:इति समासेन अविमृष्टविधेयांश दोष:।

**हिन्दी अर्थ** – जहाँ वाक्य का विधेय भाग सामासिक नियोजन के कारण स्वतन्त्र नहीं रहे वहाँ अविमृष्टविधेयांश दोष होता है। यहाँ बाण की तरह प्रवेश करना विधेयांश है जिसका प्राय: शब्द के साथ समास हो जाने के कारण कथनीय तात्पर्य गौण हो गया।

**अथ विरुद्धमतिकृत् नामकम् अन्यसङ्गताख्यं च काव्यदोषं निरूपयति –**

**अपराधीन इत्यादि विरुद्धमतिकृन्मतम्।**
**अन्यसङ्गतमुत्तुङ्गहारशोभिपयोधरौ ॥ १४॥**

**अन्वय:** – अपराधीन इत्यादि विरुद्धमतिकृत् मतम्। उत्तुङ्गहारशोभिपयोधरौ (इति) अन्यसङ्गतं (मतम्)।

**व्याख्या** – एकस्मिन्नेव पदे परस्परविरुद्धस्य अर्थद्वयस्य प्रतीति: नाम विरुद्धमतिकृत् दोष: इत्याशय:। यथा अपराधीन इत्यादि परस्य अधीन: पराधीन: न परस्य अधीन: इति अपराधीन: स्वतन्त्र अपरस्य अधीन: अपराधीन: परतन्त्र: इति अत्र अपराधीन शब्दस्य उभौ अपि अर्थौ स्वतन्त्र: परतन्त्रश्च परस्पर – विरुद्धौ स्त:।

अन्यसङ्गतम् – अन्येन सङ्गतम् इति अन्यसङ्गतं, पदस्य अन्वय: येन सह अपेक्षित: तद् विहाय अन्येन सह सङ्गतत्वम् इत्याशय:।''उत्तुङ्गहरिशोभिपयोधरौ' उदाहरणेऽस्मिन् उत्तुङ्ग पदस्य अन्वय: पयोधरेण सह विवक्षित: परन्तु इह हारपदेन सह प्रतीयते।

**भावार्थ:** – एकस्मिन् एव पदे विरुद्धार्थानां प्रतीति: यथा अपराधीन: न पराधीन: – स्वतन्त्र: तथा अपरस्य अधीन: परतन्त्र: इत्थम् एकस्य एव शब्दस्य विरुद्धार्थौ स्त:।

अन्यसङ्गते दोषे नाम्ना एव शब्द: अन्येन सह अन्वित: प्रतीयते यथा उत्तुङ्गशब्द: पयोधरयो: विशेषणं परमत्र हारशब्देन सह अन्वित:।

**हिन्दी अर्थ – विरुद्धमतिकृत् दोष** – वक्ता की इच्छा के विरुद्ध बुद्धि उत्पन्न करने वाले को विरुद्धमतिकृत् दोष कहते हैं। जैसे वह दूसरे के अधीन नहीं है इस अर्थ की प्रतीति के लिए प्रयुक्त अपराधीन से अपर (अन्य) के अधीन इस विरुद्ध अर्थ की प्रतीति होती है जो वक्ता की इच्छा के विरुद्ध है। अत: यहाँ उक्त दोष है।

**अन्यसङ्गत दोष** – इसी प्रकार जहाँ अभिप्रेत पद का किसी अन्य पद के साथ सम्बन्ध ज्ञान हो वहाँ अन्यसङ्गत दोष होता है। जैसे 'उत्तुङ्गहारशोभिपयोधरौ' उस कामिनी के हार से शोभित उन्नत पयोधर है। यहाँ उत्तुङ्गपद का पयोधरपद के साथ सम्बन्ध कवि को अभिप्रेत है, किन्तु समास में उत्तुङ्गपद तथा पयोधरपद के बीच में हारशोभिपद रखने से उत्तुङ्गपद का हार के साथ सम्बन्ध हो जाता है। अत: यह अन्यसङ्गत का उदाहरण है। समास करने से असली ज्ञान में सन्देह का हो जाना ही दोषत्व के प्रति कारण है। यहाँ लक्षण की परिभाषा नहीं दी गयी है, किन्तु केवल उदाहरण से दोष का लक्षण निकाला गया है।

**अथ पदगतान् विंशतिदोषान् उक्त्वा वाक्यदोषान् निरूपयति – प्रथमं प्रतिकूलाक्षरं दोषं प्रतिपादयति–**

**रसाद्यनुचिते वर्णे प्रतिकूलाक्षरं विदु:।**
**न मामङ्गद! जानासि रावणं रणदारुणम्॥१५॥**

**अन्वय:** – वर्णे रसाद्यनुचिते (सति) प्रतिकूलाक्षरं विदु:। (यथा) अङ्गद! रणदारुणं रावणं मां न जानासि।

**व्याख्या** – प्रतिकूलानि अक्षराणि यस्मिन् तत् प्रतिकूलाक्षरम्। वर्णै: = अक्षरे:, रसाद्यनुचिते = रसभावानुकूलानां

वर्णानां प्रयोगाभावे, प्रतिकूलाक्षरं = प्रतिकूलाख्यं दूषणं विदुः = जानन्ति। उदाहरणम् – हे अङ्गद! = बालिपुत्र!, रणे = संग्रामे, दारुणं = भयङ्करं, मां रावणं = दशाननं, न जानासि = नावगच्छसि।

**भावार्थः** – कस्मिन् रसे के वर्णाः उचिताः? इत्यपेक्षायां शृङ्गारे करुणे च कोमलवर्णाः उचिताः। वीर–बीभत्स–रौद्रेषु च कठोरवर्णाः प्रयोक्तव्याः। अत्र ''न मां'' उदाहरणेऽस्मिन् वीररसप्रसङ्गः। अत एव कठोरवर्णाः प्रयोक्तव्याः। परम् अत्र वीररसप्रतिकूलानां वर्णानां प्रयोगाद् अत्र प्रतिकूलाक्षरनामकः काव्यदोषः विद्यते।

**हिन्दी अर्थ** – कविता में अक्षर हमेशा रस के अनुकूल रखे जाते हैं, जिनसे उस रस की पुष्टि होती है। यदि भिन्न रस के पोषक अक्षर रखे जाते हैं तो प्रतिपाद्य रस की पुष्टि में बाधा पहुँचाने से दोष होता है। शृङ्गार रस में कोमल, मधुर एवं प्रसाद गुण वाले वर्ण होने चाहिए और वीर रस में ओजस्वी, विकट, संयुक्त एवं कर्कश वर्णों का होना जरूरी है। इसके विपरीत यदि शृङ्गार में मधुर एवं कोमल अक्षर न हों, ओजस्वी एवं कर्कश अक्षर हों तथा वीर रस में विकट वर्ण न हों अपितु कोमल, मधुर वर्ण हो तो प्रतिकूलाक्षर दोष होता है। जैसे – हे अङ्गद! तू रण में भयङ्कर मुझ रावण को नहीं जानता है। अतः तुम इस प्रकार बक रहे हो। यहाँ वीर रस के वर्णन में उसके अनुकूल ओजस्वी वर्ण नहीं हैं, किन्तु शृङ्गाररस के समुचित कोमलवर्णों का विन्यास किया गया है। अतः यहाँ प्रतिकूलाक्षर दोष है॥

**उपहत विसर्गः, लुप्तविसर्गः, कुसन्धिः, विसन्धिः च एतेषां चतुर्णां दोषाणां प्रतिपादनं श्लोकेऽस्मिन् करोति–**

**यस्मिनुपहतो लुप्तो विसर्ग इह तत्तथा।**
**कुसन्धिः पटवागच्छ विसन्धिर्नृपती इमौ॥ १६॥**

**अन्वयः** – यस्मिन् विसर्गः उपहतः इह यस्मिन् विसर्गः लुप्तः तत् तथा कुसन्धिः (यथा) पटवागच्छ। विसन्धिः (यथा) नृपती इमौ।

**व्याख्या** – यस्मिन् = वाक्ये काव्ये वा, विसर्गः = विसर्जनीयः, उपहतः = उत्वं प्राप्तः, लुप्तः = लोपं प्राप्तः, इह दोषकथने, तथा = तेनैव प्रकारेण, तत् = तत् नामकं दूषणं भवति। कुसन्धिः = सन्धिवैरूप्यम्। यथा – पटवागच्छ = हे पटो! = दक्ष! त्वमत्र आगच्छेति पदे सन्धौ अश्लीलतास्ति। विसन्धिः = सन्ध्यभावः, नृपती इमौ, इत्यत्र सन्धि न कृतः।

**भावार्थः** – यत्र विसर्गस्य उत्वादिकं तत्र उपहतविसर्गनामदोषः यत्र च विसर्गस्य लोपः तत्र लुप्तविसर्गनामको दोषः। अत्र 'उपहतो लुप्तो' उपहतविसर्गस्योदाहरणं तथा विसर्ग इह तत्तथा इति लुप्तविसर्गस्योदाहरणम्।

कुसन्धिः = कुत्सितः सन्धिः, यस्मिन् सन्धौ कृते पदस्वरूपमेव परिवर्तितमेव प्रतीयते यथा पटो–आगच्छ पटवागच्छ, इति विसन्धिः = सन्धेः अभावः यथा नृपती इमौ एवं पौनः पुन्येन कृतः प्रयोगः दोषरूप एव।

**हिन्दी अर्थ** – जहाँ विसर्ग को उकार होकर ओकार हो जाय अथवा विसर्ग का लोप हो जाय तो वहाँ उपहत विसर्ग दोष होता है। अर्थात् जहाँ विसर्ग को ओकार हो जाता है, वहाँ उपहत–विसर्ग और जहाँ विसर्ग का लोप हो जावे वहाँ लुप्त–विसर्ग दोष हो जाता है। जैसे श्लोक के प्रथम चरण में विसर्ग को ओकार हो गया – उपहतो लुप्तो विसर्गः है। द्वितीय चरण में 'विसर्ग इह तत्तथा' में विसर्ग का लोप हो गया है।

इसी प्रकार कुसन्धि और विसन्धि दो दोष है। यहाँ सन्धिद्वारा और क्लिष्टता होवे वहाँ कुसन्धि दोष होता है। जैसे 'हे पटो! आगच्छ' इस अश्लीलता वाक्य में पटवागच्छ ऐसी सन्धि करने पर अश्लीलता और क्लिष्टता दोष आ गया है। अतः यह कुसन्धि का उदाहरण है। जहाँ सन्धि न की गयी हो वह विसन्धि का उदाहरण है। जैसे 'नृपती इमौ' यहाँ प्रकृतिभाव होकर सन्धि नहीं हुई है। अतः विसन्धि है।

**अथ हतवृत्तम् इति छन्दो दोषं निरूपयति –**

**हतवृत्तमनुक्तोऽपि छन्दोदोषश्चकास्ति चेत्।**
**विशाललोचने पश्याम्बरं तारातरङ्गितम्॥ १७॥**

**अन्वयः** – अनुक्तः अपि चेत् छन्दोदोषः चकास्ति (तदा) हतवृत्तम्। (यथा) विशाललोचने तारातरङ्गितम् अम्बरं पश्य।

**व्याख्या** – अनुक्तः अपि = छन्दोलक्षणमनुसरति, लक्षणत्रुटिः नास्ति, तथापि चेत् = यदि छन्दोदोषः = वृत्तदोषः, श्रवणदोषः चकास्ति = भासते, तदा हतवृत्तं = हतं = दूषितं, विकृतं वा वृत्तं = छन्दः, तत् हतवृत्तं दूषणं भवति। विशाललोचने अस्मिन् पद्ये अनुष्टुब् लक्षणं तु सुसङ्गतं तथापि पश्याम्बरम् इत्यत्र यति भङ्गवशात् श्रवणे व्यवधानं प्रतीयते तस्माद् लक्षणानुसरणेऽपि अश्रव्यमस्ति।

**भावार्थः** – यस्यां पद्यपंक्तौ छन्दोलक्षणं सम्यगस्ति परं यतिभङ्गवशात् श्रवणे व्यवधानम् उद्वेजनं प्रतीयते, तदा हतवृत्तनामा दोषः भवति। उदाहरणेऽस्मिन् अनुष्टुब्लक्षणमनुसृत्य गणनास्ति परम् अष्टमे वर्णे पश्याम्बरम् इत्यत्र यतिविरामं कर्तुं न शक्यते। तस्मादत्र हतवृत्तनामकः दोषः।

**हिन्दी अर्थ** – जिस पद्य में छन्द के लक्षणानुसार मात्रा संख्या आदि हो परन्तु अश्रव्यता के कारण दोष प्रतीत होता हो वहाँ हतवृत्त नामक दोष होता है। प्रस्तुत उदाहरण ''विशाललोचने'' में तृतीय चरण के आठवें वर्ण पर यतिगत विराम करने में बाधा उत्पन्न होती है अतः यहाँ हतवृत्त दोष है।

**न्यूनम् अधिकं च दोषं प्रतिपादयति –**

**न्यूनं त्वत्खड्गसम्भूतयशः पुष्पं नभस्तटम्।**
**अधिकं भवतः शत्रून् दशत्यसिलताफणी॥ १८॥**

**अन्वयः** – न्यूनं (यथा) त्वत्खड्ग-सम्भूतयशः पुष्पं नभस्तटम्। अधिकम् (यथा) असिलताफणी भवतः शत्रून् दशति।

**व्याख्या** – वर्णनीये विषये अपेक्षितपदस्य अभावः न्यूनता कथ्यते इयमेव न्यूनता न्यूनदोषः भवति। यथा कस्यचित् नृपस्य प्रशंसायां कवेः कथनं यद् राजन्! त्वत् खड्गः = तव असिः, तेन सम्भूतः यशः = कीर्तिरेव, पुष्पं = कुसुमं, यस्य तत् त्वत्खड्गसम्भूतयशः पुष्पं, नभस्तटं = आकाशप्रान्तम् अस्ति तव कीर्तिः आकाशपर्यन्तं व्याप्तास्ति। अत्र रूपकालङ्कारेण नभो रूपं तटं, यशोरूपाणि पुष्पाणि, परमत्र खड्गरूपा लता न कथिता। इत्थम् अपेक्षितमपि लतापदं न प्रयुक्तं तस्माद् न्यूननामा काव्यदोषः।

एतद्विपरीतं यत्र वर्णनीये विषये अनपेक्षितस्य पदस्य प्रयोगः यदि क्रियते तद् आधिक्यम् उच्यते। यथा – अत्रापि कस्यचित् नृपस्य खड्गस्य प्रभावः वर्णितः। हे राजन्! भवतः = तव, असिलता = खड्गवल्ली, सैव फणी = सर्पः, भवतः = तव, शत्रून् = रिपून्, दशति = दशनं करोति। अत्र असिफणी इत्येव वक्तुम् उचितम्, असिलता पदेऽस्मिन् लतापदम् अनपेक्षितं तस्मादधिकपदत्वदोषः।

**भावार्थः** – वर्णनीये विषये अपेक्षितस्य पदस्य अभावः न्यूनपदत्वदोषः। यथा ''त्वत्खड्ग'' इत्यत्र लता पदमपेक्षितम्। एतद्विपरीतं यत्र वर्णनीये विषये अनपेक्षितस्य पदस्य प्रयोगः क्रियते यथा ''असिलताफणी'' इत्यत्र लतापदं अनपेक्षितं तस्माद् अधिकपदत्वदोषः।

**हिन्दी अर्थ – न्यूनपदत्वदोष** – न्यून नामक दोष वहाँ होता है जहाँ अपेक्षित पद न कहा जाय। जैसे – आपके खड्ग में उत्पन्न कीर्तिरूपी पुष्प से आकाश व्याप्त है। यहाँ यश में पुष्प का आरोप तो किया किन्तु खड्ग में लता का आरोप नहीं किया, यह न्यूनता है। यहाँ जब यश को पुष्प बताया गया तब खड्ग को लता बनाना अभीष्ट था। इस रूपक के अभाव से यहाँ न्यूनत्व दोष है।

**अधिकपदत्वदोष** – अधिक दोष वहाँ होता है जहाँ अनपेक्षित पद कहा गया हो। जैसे – खड्ग लता रूपी सर्प आपके शत्रुओं को काटता है। यहाँ खड्ग में सर्प का आरोप करना उचित है, किन्तु कवि ने पहले उसमें अनपेक्षित लता का आरोप कर अनन्तर उसमें सर्प का आरोप किया। यहाँ खड्ग में लता का आरोप सर्वथा अप्रासङ्गिक है। अतः यहाँ अधिक दोष है।

**कथितं विकृतं च दोषं निरूपयति –**

**कथितं पुनरुक्ता वाक् श्यामाब्जश्यामलोचना।**
**विकृतं दूरविकृतैरैयरुः कुञ्जराः पुरम्॥ १९॥**

**अन्वयः** – पुनरुक्ता वाक् – कथितं यथा श्यामाब्जश्यामलोचना। दूरविकृतैः (पदैः) विकृतम्। (यथा) कुञ्जराः पुरम् ऐयरुः।

**व्याख्या** – पुनः उक्ता इति पुनरुक्ता = भूयो भाषिता वाक् = वाणी, कथितं = कथितनामधेयं दूषणम् उदाहरणम् = श्यामाब्जलोचना = नीलकमलनी तुल्यलोचना अत्र श्यामपदस्य पुनः कथनम् तस्माद् पुनरुक्तत्वादत्र कथितनामा काव्यदोषः।

विकृतदोषमाह – दूरविकृतैः = अत्यधिकधातुप्रत्ययादि विनिष्पन्नैः पदैः विकृतं = विकृताख्यं दूषणं भवति। उदाहरणं – कुञ्जराः = गजाः, पुरं = नगरम्, ऐयरुः = प्राप्ताः, आगताः। अत्र 'ऐयरु' पदम् अनेकप्रत्ययादि निष्पन्नमिति विकृतत्त्वम्। अत्र महद् व्याकरणात्मकविवरणम् अपेक्षते, तच्च – ऋ धातो लुङि झि प्रत्यये, आडागमे श्लौ द्वित्वे ऋकारस्य अत्वे, अभ्यासस्य इत्वे इयङि झेः जुसादेशे, गुणे आटौ वृद्धौ रुत्वे विसर्गे च ऐयरुः इति पदं सिद्ध्यति।

**भावार्थः – कथितदोषः** – कथितस्य पदस्य पुनः कथनेन अयं दोषः।''श्यामाब्ज श्यामलोचना'' उदाहरणेऽस्मिन् श्यामशब्दः पुनः कथितः।

**विकृतदोषः** – यस्य पदस्य व्युत्पत्तिप्रक्रियायाम् अतिविस्तृतं व्याकरणविश्लेषणं भवति स विकृतदोषः यथा ऐयरुः समागताः पदस्य निष्पत्ति विवरणं सुदीर्घमस्ति।

**हिन्दी अर्थ – कथित दोष** – कथित दोष उसे कहते हैं जहाँ शब्द की आवृत्ति (पुनरुक्ति) की गयी हो। जैसे – श्यामाब्जश्यामलोचना नीलकमल के समान नील नेत्रवाली नायिका। यहाँ नीलार्थक श्याम शब्द उसी अर्थ में दो बार आया है, अत: यहाँ कथित दोष है।

**विकृत दोष** – विकृत दोष उसे कहते हैं, जहाँ व्याकरण के अनेक सूत्रों द्वारा बने हुए शब्द का प्रयोग किया जाय। जैसे – ऐयरुः। यह जुहोत्यादि गण के गत्यर्थक ऋ धातु के लुङ् लकार में प्रथम पुरुष के बहुवचन का रूप है। जहाँ अर्थ ज्ञान में विलम्ब होना दूषणता का कारण है।

**अथ पतत्प्रकर्षदोषं प्रतिपादयति –**

**पतत्प्रकर्षहीनाऽनुप्रासादित्वे यथोत्तरम्।**
**गम्भीरारम्भदम्भोलिपाणिरेष समागतः॥ २०॥**

**अन्वयः** – यथोत्तरं हीनानुप्रासादित्वे पतत्प्रकर्षम्। (यथा) गम्भीरारम्भ दम्भोलिः पाणिः एषः समागतः।

**व्याख्या** – यथोत्तरम् = उत्तरोत्तरम्, हीनाः = रहिताः, अनुप्रासादयः = अनुप्रासालङ्कारप्रभृतयः, यस्मिन् तत् हीनानुप्रासादि तस्य भावस्तत्वं तस्मिन् हीनानुप्रासादित्वे, पतत्प्रकर्षं – पतन् = ह्रसन्, प्रकर्षः = रचनातिशयो यस्मिन् तद् वाक्यं पतत्प्रकर्षं तन्नामको दोषो भवति। उदाहरणम् – एषः = पुरो वर्तमानः, गम्भीरारम्भदम्भोलिपाणिः = गम्भीरः = धीरः, आरम्भः = उपक्रमः यस्य सः गम्भीरारम्भः दम्भोलि = वज्रं पाणौ यस्य दम्भोलिपाणिः, गम्भीरारम्भश्चासौ दम्भोलिपाणिश्चेति गम्भीरारम्भदम्भोलिपाणिः = गम्भीरारम्भकरवज्रहस्तः पुरन्दरः समागतः = उपस्थितः।

**भावार्थः** – यत्र प्रारम्भे तु अनुप्रासस्य यमकस्य वा प्रकर्षः प्रदर्श्यते परम् अनन्तरम् उत्तरोत्तरं च अपकर्षः तत्र पतत्प्रकर्षनामकः काव्यदोषः भवति।''गम्भीरारम्भ'' उदाहरणेऽस्मिन् आरम्भे तु मकारभकारयोः अनुप्रासः उत्कर्षेण दृश्यते परम् अनन्तरं तस्य अभावः दृश्यते। तस्मादत्र पतत्प्रकर्षनामा काव्यदोषः वर्तते।

**हिन्दी अर्थ** – ''उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः'' के अनुसार कविता के प्रारम्भ में तो अनुप्रासादि अलङ्कारों का

उत्कर्ष  हो जो उत्तरोत्तर गिरता जाय। जैसे ''गम्भीरारम्भ:'' के तृतीय चरण में म्भ का चमत्कारी प्रभाव था परन्तु चतुर्थ चरण में उसका सर्वथा अभाव हो गया। अत: यहाँ पतत्प्रकर्ष दोष है।

**अथ समाप्तपुनरात्तं दोषं प्रतिपादयति –**

**समाप्तपुनरात्तं स्यादेष पीयूषभाजनम्।**
**नेत्रानन्दी तुषारांशुरुदेत्यम्बुधिबान्धव:॥ २१॥**

**अन्वय:** – पीयूषभाजनं नेत्रानन्दी एष तुषारांशु:, अम्बुधिबान्धव: उदेति (इति) समाप्तपुरात्तं स्यात्।

**व्याख्या** – समाप्तं च पुनरात्तं च इति समाप्तपुनरात्तम् = अवशेषितगृहीतं, तत् पुनर्गृहीतम् इत्यर्थ:। वाक्यं परिसमाप्य पुन: अन्यपदयोजनं समाप्तपुनरात्तम्। पीयूषभाजनम् = अमृतपात्रं, नेत्रानन्दी = नयनानन्दकर:, एष: = अयं, तुषारांशु: = शीतलकिरण:, चन्द्रमा, अम्बुधिबान्धव: = समुद्रबन्धु:, उदेति = उदयं प्राप्नोति। अत्र ''उदेति'' क्रियानन्तरं अम्बुधिबान्धव इति पुनरनुसन्धानादत्र समाप्तपुनरात्तं नामकं दोष: वर्तते।

**भावार्थ:** – वाक्यार्थस्य क्रियापदेन समाप्तिं कृत्वा पुन: अन्यपदस्य योजनात् समाप्तपुनरात्तनामको दोष:।

अत्र 'पीयूषभाजनम्' नेत्रानन्दी तुषारांशु: उदेति इति वाक्यं समाप्तं परम् अग्रे अम्बुधिबान्धव: इति विशेषण–पदं प्रयुक्तम्। अत एव अत्र समाप्तपुनरात्त नामकदोष:।

**हिन्दी अर्थ** – जहाँ विशेष्य वाचक पद की क्रिया में अन्वय हो जाने पर आकांक्षा समाप्त हो गई हो, किन्तु इसी वाक्य में पुन: कुछ और जोड़ दिया जाय वहां समाप्तपुनरात्त दोष होता है। जैसे – अमृतपात्र, नयनसुखकारी, शीतलकिरणों वाला चन्द्रमा उदित हो रहा है, इस वाक्य में पुन: समुद्रबन्धु जोड़ने से यह दोष हुआ है।

**अथ अर्धान्तरपदापेक्षिदोषं निरूपयति –**

**अर्थान्तरपदापेक्षि क्रीडानृत्येषु सस्मितम्।**
**मोघारम्भं स्तुम: शम्भुमर्धरम्भोरुविग्रहम्॥ २२॥**

**अन्वय:** – अर्थान्तरपदापेक्षि क्रीडानृत्येषु मोघारम्भं सस्मितम्, अर्धरम्भोरु–विग्रहं शम्भुं स्तुम: (वयम्)।

**व्याख्या** – अर्थान्तरपदापेक्षि – श्लोकस्य अर्धभाग: श्लोकार्धं ततश्च पूर्वार्धम् उत्तरार्धं च। पूर्वार्द्धं प्रति उत्तरार्धम् अर्धान्तरम् एष च उत्तरार्धं प्रति पूर्वार्द्धं अर्धान्तरम् अर्धान्तरे पदं इति अर्धान्तरपदम्। अर्धान्तरपदम् अपेक्षते इति तत् – अर्धान्तरपदापेक्षि।

यत्र श्लोके पूर्वार्धस्य सुसंगतये अन्वयबोधाय वा उत्तरार्धपदानाम् अपेक्षा तथा उत्तरार्धस्य बोधाय पूर्वार्द्धपदानां अपेक्षाभवति तत्र अर्धान्तरपदापेक्षि नामको दोष:।

**उदाहरणम्** – अन्यत् अर्धमर्धान्तरं पार्वतीरूपं तत्र यत् पदं = चरणं, तदपेक्षन्ते इति अर्थान्तरापेक्षिणी तानि च क्रीडा नृत्यानि चेति अर्थान्तरपदापेक्षिक्रीडानृत्यानि तेषु मोघारम्भं मोघ: निष्फल:, आरम्भ: = उपक्रमो यस्य स तं मोघारम्भं = निष्फलप्रयासं अत: सस्मितं = मन्दहास्ययुतम्, अर्धरम्भोरुविग्रहम् = अर्धनारीश्वरं, शम्भुं = शिवं स्तुम: = प्रणमाम:।

**भावार्थ:** – यत्र पूर्वार्धस्य तात्पर्यं ज्ञातुम् उत्तरार्धस्य पदस्य अपेक्षा भवति तथा च उत्तरार्धस्य तात्पर्यं ज्ञातुं पूर्वार्धस्य पदस्य अपेक्षा भवति तत्र दोषोऽयं भवति। अत्र पूर्वार्धस्य अर्धान्तरपदापेक्षिपदस्य तात्पर्यज्ञानाय उत्तरार्धस्य अर्धरम्भोरुविग्रहम् इति पदस्य अपेक्षास्ति। एवमेव सस्मितम् इत्यस्य सुसंगतये मोघारम्भं इति पदस्य अपेक्षा वर्तते।

**हिन्दी अर्थ** – अर्धान्तरपदापेक्षि उसको कहते हैं, जहाँ कविता में पूर्वार्ध का भाग अपने उत्तरार्द्ध के पदों की तथा उत्तरार्द्ध का भाग अपने पूर्वार्द्ध के पदों की अपेक्षा रखता हो। जैसे  – उक्त श्लोक में ही अर्धान्तरपदापेक्षि पूर्वार्द्धपद अपने उत्तरार्धगत अर्धरम्भोरुविग्रह की अपेक्षा करता है। इसी प्रकार पूर्वार्धभाग का सस्मित पद भी उत्तरभागस्थ

मोघारम्भ के बिना असम्बद्ध सा मालूम पड़ता है। इसलिए उक्त दोष है।

**अभवन्मतयोगं दोषं निरूपयति –**

**अभवन्मतयोगः स्यान्न चेदभिमतोऽन्वयः।**
**येन बद्धोऽम्बुधिर्यस्य रामस्यानुचरा वयम्॥ २३॥**

**अन्वयः** – अभिमतः अन्वयः चेत् न (तदा) अभवन्मतयोगः स्यात्। (यथा) येन अम्बुधिः बद्धः, यस्य रामस्य वयम् अनुचराः।

**व्याख्या** – अभिमतः = अभीष्टः, समुचितः विवक्षितः वा, अन्वयः = पदानां परस्परयोगः, चेत् = यदि, न = न भवेत्, तर्हि = अभवन्मतयोगः दोषः।

उदाहरति – येन = रामेण, अम्बुधिः = समुद्रः, बद्धः = सेतुबन्धनद्वारा नियन्त्रितः, यस्य = रामस्य, वयं = सर्वे वानराः, अनुचराः = सेवकाः स्मः।

**भावार्थः** – यत्र समुचितः पदसम्बन्धः न भवति तत्र अभवन्मतयोगनामकः दोषः जायते।

अत्र येन रामेण समुद्रः नियन्त्रितः वयं तस्य अनुचराः स्मः। इति अभिमतम् अस्ति। श्लोकेऽस्मिन् यस्य पदम् अभिमतं नास्ति।

**हिन्दी अर्थ** – जहाँ पदों का योग समुचित नहीं हो, जैसे – जिस राम ने समुद्र तट पर सेतुबन्धन किया और जिस राम के हम अनुचर हैं। यहाँ पूर्व वाक्य के यत् पद के साथ उत्तरवाक्य का यत् (यस्य) पद अभीष्ट नहीं है यहाँ आकांक्षा निवृत्ति हेतु तस्य का प्रयोग समुचित था।

**अथ अस्थानस्थसमास – दोषं निरूपयति –**

**द्विषां सम्पदमाच्छिद्य यः शत्रून् समपूरयत्।**
**अस्थानस्थसमासं न विद्वज्जनमनोरमम्॥ २४॥**

**अन्वयः** – अस्थानस्थसमासं विद्वज्जनमनोरमं न भवति। (यथा) यः द्विषां सम्पदम् आच्छिद्य शत्रून् समपूरयत्।

**व्याख्या** – अस्थाने = अयोग्ये स्थाने तिष्ठति इति अस्थानस्थः, अस्थानस्थः समासो यस्मिन् तत् अस्थानस्थसमासं = तत्नामकदूषणम्। उदाहरणं – यः = राजा, द्विषां = शत्रूणां, सम्पदम् = श्रियम्, आच्छिद्य = बलादपहृत्य, शत्रून् = रिपून्, समपूरयत् = समृद्धम्, अकरोत्, तत् न विद्वज्जनमनोरमम् = सुधीसमाजरुचिकरं न वर्तते।

**भावार्थः** – वीररसप्रसङ्गे दीर्घसमासप्रयोगः शोभते, परमत्र तस्मिन् प्रसङ्गे तु न कृतः अपितु विद्वज्जनमनोरमम्। अत्र समासस्य अपेक्षा नास्ति तथापि समासः विहितः।

**विशेषः** – काव्यशास्त्रे वीरबीभत्सरौद्रेषु रसेषु सामासिकपदप्रयोगः अपेक्षितः। परमत्र न कृतः तेनहेतुना ''द्विषां सम्पदम्'' पद्येऽस्मिन् अयं दोषः।

**हिन्दी अर्थ** – जहाँ प्रसङ्गानुकूल दीर्घसमास की आवश्यकता हो वहाँ प्रयोग न करना तथा आवश्यकता नहीं हो वहाँ समास प्रयोग करना अस्थानस्थसमास दोष है।

यहाँ वीररसोचित वर्णन में समास अपेक्षित था जो नहीं किया गया तथा सामान्य वर्णन में सामासिकपद का प्रयोग किया गया है।

**अथ श्लोकद्वयेन संकीर्णनामकं दोषं निरूपयति –**

**मिथः पृथग्वाक्यपदैः संकीर्णं यत्तदेव तत्।**
**वक्त्रेण भ्राजते रात्रिः कान्ता चन्द्रेण राजते॥ २५॥**
**ब्रह्माण्डं त्वद्यशः पूर-गर्भितं भूमिभूषण।**
**आकर्ण्य पयः पूर्णसुवर्णकलशायते॥ २६॥**

**अन्वयः** – पृथग्वाक्यपदैः मिथः यत् सङ्कीर्णं तद् एव तत् (सङ्कीर्णनामकदोषः) (उदाहरणं) रात्रिः चन्द्रेणभ्राजते, कान्ता (च) वक्त्रेण राजते।

**व्याख्या** – पृथग्वाक्यपदैः = वाक्यानि च पदानि चेति वाक्यपदानि पृथक्वाक्यपदानि, तैः पृथक्वाक्यपदैः, मिथः = परस्परम्, अन्योऽन्यं, यत् सङ्कीर्णं = यत् सम्मिश्रितं व्याप्तं वा तद् एव तत् = तत् एष सङ्कीर्णदोष – नाम्ना ज्ञायते। स च द्विधा – पदसङ्कीर्णः वाक्यसङ्कीर्णश्चेति। पदसङ्कीर्ण एकस्मिन् वाक्ये अन्यवाक्यस्य पदप्रवेशात्। वाक्यसङ्कीर्णः एकस्मिन् वाक्ये अन्यवाक्यस्य प्रवेशात् च। यथा वक्त्रेण इति पदप्रयोगः द्वितीये वाक्ये अपेक्षितः तथा च चन्द्रेण इति पदप्रयोगः प्रथमे वाक्ये अपेक्षितः किन्तु प्रथमवाक्यस्यास्य पदं द्वितीये वाक्ये एवं द्वितीयवाक्यस्य पदं प्रथमे वाक्ये परस्परं सम्मिश्रितम्।

वाक्य सङ्कीर्णम् – हे भूमिभूषण! = हे राजन्!, आकर्णय = श्रुणु, तव = भवतः, यशः पूरैः = कीर्ति निचयैः, गर्भितं = व्याप्तं, ब्रह्माण्डं = भुवनकोशः, पयः पूर्णः = जलेन परिपूर्णः, सुवर्णकलशः = काञ्चनघटः, स इवाचरति = अनुकरोति, अत्र "आकणर्य" इति वाक्यान्तरं प्रविष्टम्।

**भावार्थः** – यस्मिन् वाक्ये, अन्यवाक्यस्य पदं, वाक्यं वा प्रविष्टं भवति तत्र सङ्कीर्णनामकः काव्यदोषः भवति। द्विविधोऽयं दोषः, पदसङ्कीर्णः वाक्यसङ्कीर्णश्चेति।

**हिन्दी अर्थ** – जिस वाक्य में दूसरे वाक्य का पद या वाक्य सम्मिश्रित हो जाय वह सङ्कीर्ण दोष होता है। यह पद सङ्कीर्ण तथा वाक्यसङ्कीर्ण दो प्रकार का होता है – यहाँ चन्द्रमा तथा वक्त्रेण पदों का वाक्यान्तर में प्रवेश हो जाने से उक्त दोष हुआ।

**अथ भग्नप्रक्रमं दोषं निरूपयति –**

**भग्नप्रक्रममारब्ध-शब्दनिर्वाह-हीनता ।**
**अक्रमः कृष्ण पूज्यन्ते त्वामनभ्यर्च्य देवताः॥ २७॥**

**अन्वयः** – आरब्धशब्दनिर्वाहहीनता भग्नप्रक्रमम् (उच्यते)। (यथा) कृष्ण! त्वाम् अनभ्यर्च्य देवताः पूज्यन्ते (इति) अक्रमः।

**व्याख्या** – भग्नः प्रारम्भ क्रमः यस्मिन् तत् भग्नप्रक्रमम्। आरब्धशब्दनिर्वाहहीनता – आरब्धशब्दस्य निर्वाहः इति आरब्धशब्दनिर्वाहः तेन हीनः इति आरब्धशब्दनिर्वाहहीनः तस्य भावः इति आरब्धशब्दनिर्वाहहीनता प्रारम्भे प्रयुक्तस्य शब्दस्य क्रमनिर्वाहाऽभावः।

यथा – हे कृष्ण! त्वाम् अनभ्यर्च्य = अपूजयित्वा देवताः पूज्यन्ते। अत्र वाक्ये अर्च् धातुः पूजनार्थे प्रयुक्तः पुनः अस्मिन् एव अर्थे पूज् धातुः प्रयुक्तः। यदि प्रारम्भे अर्च् धातुः प्रयुक्तः तर्हि अग्रेऽपि समानार्थे अस्या एव प्रयोगः उचितः।

**भावार्थः** – येन क्रियापदेन वाक्यस्य आरम्भः क्रियते तस्मिन्नर्थे तेनैव पदेन उपसंहारः स्यात्। यदि एवं न क्रियते तर्हि दोषोऽयं भवति। यथा पूजनार्थे प्रारम्भे तु पूज्-धातुः अग्रे च अर्च् धातुः प्रयुक्तः।

**हिन्दी अर्थ** – भग्नप्रक्रम दोष वहाँ हुआ करता है जहाँ उपक्रम में जिस धातु का प्रयोग किया गया हो, अन्त में उपसंहार में उसका प्रयोग न किया जाय। जैसे – हे कृष्ण! आरम्भ में आपकी आराधना न करके अन्य देवताओं की जो पूजा की जाती है वह अक्रम है।

**अथ अमतार्थान्तरनामकं दोषं निरूपयति –**

**अमतार्थान्तरं मुख्येऽमुख्येनार्थे विरोधकृत्।**
**त्यक्तहारमुरः कृत्वा शोकेनालिङ्गिताऽङ्गना॥ २८॥**

**अन्वयः** – मुख्ये अर्थे अमुख्येन विरोधकृत् अमतार्थान्तरम्। (यथा) उरः त्यक्तहारं कृत्वा अङ्गना शोकेन आलिङ्गिता।

**व्याख्या** – मुख्ये = प्रधाने, अर्थे = वाच्ये, अमुख्येन = अप्रधानेन, अन्येनार्थेन, विरोधकृत् = विरोधं करोति इति,

विरुद्धवाक्यम् अमतार्थान्तरं भवति। यथा – उर: = वक्ष:स्थलं, त्यक्तहारम् = अपसारितमुक्ताहारं, कृत्वा = विधाय, अङ्गना = कामिनी, शोकेन = वियोगदु:खेन, आलिङ्गिता = आश्लिष्टा।

**भावार्थ:** – यत्र मुख्यस्य अर्थस्य अमुख्येन अर्थेन सह विरोध: स्यात् तत्र अमतार्थान्तरनामा दोष:। उदाहरणेऽस्मिन् कामिनी शोकाकुला इति मुख्योऽर्थ: तथापि आलिङ्गिता इत्यत्र शृङ्गारकरुणयो: उभयो विरोधाद् इह अमतार्थान्तरदोषोऽस्ति।

**हिन्दी अर्थ** – अमतार्थान्तर दोष वहाँ होता है जहाँ मुख्य रस का अमुख्य रस के साथ विरोध होता है। जैसे – नायिका गले से मुक्ताहार आदि आभूषणों को उतार शोक से व्याकुल हो गयी। यह करुण रस का उदाहरण है। यहाँ पर ''अशोकेन'' ऐसा पदच्छेद करने से करुणरस के विरोधी शृंगाररस की प्रतीति इस प्रकार होती है – शोकरहित (आनन्दित) नायक ने या अशोक नामक नायक ने रति के समय कण्टकरूप मुक्ताहार को हटा कर नायिका का दृढ आलिङ्गन किया, यह कवि को अभिमत नहीं है। अत: यहाँ अमतार्थान्तर दोष है।

**इदानीम् अर्थदोषनिरूपणक्रमे प्रथमम् अपुष्टार्थं निरूपयति –**

**अपुष्टार्थो विशेष्ये चेन्न विशेषो विशेषणात्।**
**विशन्ति हृदयं कान्ताकटाक्षा: खञ्जनत्विष:॥ २९॥**

**अन्वय:** – चेत् विशेष्ये विशेषणात् विशेष: न (स्यात् तर्हि) अपुष्टार्थ:। (यथा) खञ्जनत्विष: कान्ताकटाक्षा: हृदयं विशन्ति।

**व्याख्या**– चेत्= यदि , विशेष्ये = वर्ण्यविषये, विशेषणात् = विशेषणपदप्रयोगात्, विशेष: = वैशिष्ट्यं, न = न स्यात् तर्हि अपुष्टार्थ: अर्थदोष:। यथा– खञ्जनत्विष: = खञ्जनसमानकान्तय: , कान्ताकटाक्षा: = नायिकादृष्टय:, हृदयम् = चित्तम्, विशन्ति = प्रविशन्ति।

**भावार्थ:** – यदि विशेषणपदेन विशेष्यस्य (वर्ण्यविषयस्य) वैशिष्ट्यं न जायते तदा अपुष्टार्थ: दोष:। उदाहरणेऽस्मिन् 'खञ्जनत्विष:' इति विशेषणपदेन वर्ण्यविषयस्य 'कान्ताकटाक्षस्य' वैशिष्ट्यं न वर्धते।

विशेषणपदं यदि विशेष्यं वर्ण्यविषयं वा न पुष्णाति तर्हि अपुष्टार्थनामको दोष:। अत्र 'खञ्जनत्विष:' इति विशेषणपदं कान्ताकटाक्षस्य हृदयप्रवेशतीव्रतां न उद्घाटयति तस्मादत्र अपुष्टार्थ: दोष:।

**हिन्दी अर्थ** – अपुष्टार्थ दोष वहाँ होता है जहाँ विशेष्य में विशेषण से किसी प्रकार की विशेषता प्रतीत न होती हो। जैसे, खञ्जरीट पक्षी के समान कान्ति वाले कान्ताओं के कटाक्ष–हृदय में घुसते हैं। यहाँ खञ्जनत्विष: इस विशेषण से कान्ताकटाक्ष रूप विशेष्य में कोई विशेषता प्रतीत नहीं होती। इसलिए यहाँ अपुष्टार्थ दोष है। यदि कटाक्षों में तीक्ष्णता का प्रतिपादन शरत्सन्निभा: (बाण के सदृश) कोई विशेषण होता तो कटाक्ष हृदय में घुसते हैं, इस अर्थ की पुष्टि होती है।

**अथ श्लोकार्धेन कष्टनामकं दोषं निरूपयति–**

**कष्ट: स्पष्टावबोधार्थमक्षमो वाच्यसन्निभ:।**

**अन्वय:**– वाचि असन्निभ: स्पष्टावबोधार्थम् अक्षम: (अर्थ:) कष्ट:।

**व्याख्या** – वाचि = वचने, असन्निभ: = अविद्यमान इव, स्पष्टावबोधार्थम् = स्फुटप्रतीत्यर्थम् , अक्षम: = असमर्थ: स्यात् तदा कष्ट: = कष्टत्वदोषो भवति।

**भावार्थ:** – विद्यमानोऽपि अर्थ: स्पष्टतया न बोधयति, अत: स अविद्यमान इव प्रतीयते तस्मादेव कष्टनामक: अर्थदोष:। अत्र 'वाच्यसन्निभ:' ''वाण्यां सम्यक्तया न भासते'' इति अभीष्टार्थस्य स्पष्टविद्यमानता नास्ति।

**हिन्दी अर्थ** – कष्टत्व दोष का स्वरूप यह है कि जो अर्थ शब्दों में रहता हुआ भी न रहते हुए के समान हो और उक्त कारण से ही स्फुट अर्थ की प्रतीति न करता हो वह कष्टार्थ कहलाता है। जैसे – **वाच्यसन्निभ:** = वाणी में अच्छी

तरह न भासने वाला'' यह अभीष्ट अर्थ शीघ्र प्रतीत नहीं होता, किन्तु कष्ट से जाना जाता है। वाच्यसन्निभः = वाच्य के सदृश यह अर्थ शीघ्र प्रतीत होता है।

**अथ व्याहतदोषं पुनरुक्तदोषं च निरूपयति–**

**व्याहतश्चेद्विरोधः स्यान्मिथः पूर्वापरार्थयोः॥ ३०॥**
**सहस्रपत्रमित्रं ते वक्त्रं केनोपमीयते।**
**कुतस्तत्रोपमा यत्र पुनरुक्तः सुधाकरः॥ ३१॥**

**अन्वयः** – पूर्व–अपर–अर्थयोः चेत् मिथः विरोधः स्यात् (तर्हि) व्याहतः (दोषः भवति) यथा– सहस्रपत्रमित्रं ते वक्त्रं केनोपमीयते। तत्र उपमा कुतः यत्र सुधाकरः पुनरुक्तः (भवति)

**व्याख्या**– पूर्वापरार्थयो : = पूर्वश्च अपरश्च इति पूर्वापरौ, पूर्वापरौ च तौ अर्थौ = पूर्वापरार्थौ, तयो = पूर्वापरार्थयोः = प्रथमद्वितीयार्थयोः, चेत् = यदि, मिथः = परस्परं, विरोधः = व्याघातः, स्यात् = भवति, तर्हि व्याहतनामकः अर्थदोषः।

सहस्रपत्रमित्रं = कमलतुल्यं ते = तव, वक्त्रं = मुखं, केनोपमीयते = केन समानीक्रियते। अत्र मुखं पूर्वं तु कमलतुल्यम् उक्तं, द्वितीये वाक्ये च तत्सदृशाभावः प्रदर्शितः इति पूर्ववाक्यस्य, उत्तरवाक्य च परस्परविरोधः। अत्र पुनरुक्तोऽपि लक्षित उदाहृतश्च। तत्र = मुख विषये, उपमा = सादृश्यं उपमानं, कुतः = कस्मात् कथं स्यात्, यत्र = यस्मिन् मुखे, सुधाकरः = चन्द्रः, पुनरुक्तः = व्यर्थः। अत्र ''कुतस्तत्रोपमा'' इत्युक्त्वा पुनः चन्द्रोऽपि व्यर्थः इत्युक्तः, तस्मादत्र पुनरुक्तदोषः।

**भावार्थः**– सामान्यरूपेण दोषोऽयं वदतोव्याघातनाम्नापि उच्यते। अत्रापि मुखस्य उपमानं कमलमुक्तं पुनश्च उपमानाभावः। पूर्वं तु मुखं कमलवद् उक्तम् अनन्तरं केनापि सहतुलना न संभवा। पुनरुक्तः – उक्तः अपि अर्थः यत्र पुनः उच्यते स पुनरुक्तदोषः।

उदाहरणम्– कुतस्तत्रोपमा यत्र पुनरुक्तः सुधाकरः॥ ३१॥

अत्र पुनरुक्तस्य समीचीनम् उदाहरणं सम्पूर्णश्लोक एव अस्ति – यत् च

सहस्रपत्रमित्रं ते वक्त्रं केनोपमीयते।

कुतस्तत्रोपमा यत्र पुनरुक्तः सुधाकरः॥

अत्र केनोपमीयते तथा कुतस्तत्रोपमा समानार्थस्य पुनः कथनमेवास्ति तस्मादत्र पुनरुक्तः।

**विशेषः** – 'सहस्रपत्रमित्रं' इति श्लोकार्धं व्याहतदोषम् उदाहरणमपि – परं सहस्रपत्रमित्रं ते....... सुधाकरः सम्पूर्णश्लोकः पुनरुक्तस्य उदाहरणम्।

**हिन्दी अर्थ** – पूर्व और उत्तर कथन में जहाँ परस्पर विरोध मालूम पड़े वहाँ व्याहत दोष होता है। तात्पर्य यह है कि किसी का प्रथम उत्कर्ष कह कर बाद में अपकर्ष कहा जाय अथवा पहले अपकर्ष कहकर अनन्तर उत्कर्ष कहा जाय तो दो प्रकार का अव्याहत दोष होता है।

कमल के तुल्य तुम्हारे मुख की उपमा किससे दी जा सकती है (अर्थात् किसी से नहीं) वहाँ उपमा कैसे हो सकती है? जहाँ चन्द्रमा व्यर्थ है।

पुनरुक्त का अर्थ है किसी बात को कहकर पुनः कहना। उदाहरण में पहले कहा जा चुका है कि वहाँ उपमा कैसे हो सकती है, जिससे बात समाप्त हो गयी, पर पुनः कहा गया, जहाँ चन्द्रमा भी व्यर्थ है इससे पुनरुक्ति हो गयी जो पुनरुक्तत्व नामक अर्थ दोष है।

**अथ उदाहरणमुखैः दोषत्रयं निरूपयति–**

**दुष्क्रम–ग्राम्य–सन्दिग्धास्त्रयो दोषाः क्रमादमी।**
**त्वद्भक्तः कृष्ण! गच्छेयं नरकं स्वर्गमेव वा॥ ३२॥**

**एकं मे चुम्बनं देहि तव दास्यामि कञ्चुकम्।**
**ब्रूत किं सेव्यतां चन्द्रमुखीचन्द्रकिरीटयोः॥ ३३॥**

**अन्वयः**– दुष्क्रम–ग्राम्य–सन्दिग्धाः अमी त्रयः दोषाः क्रमात्–कृष्ण! त्वद्भक्तः (अहं) नरकं स्वर्गमेव वा गच्छेयम्। मे एकं चुम्बनं देहि, तव कञ्चुकं दास्यामि। ब्रूत चन्द्रमुखीचन्द्रकिरीटयोः किं सेव्यताम्?

**व्याख्या – दुष्क्रमः** = लोकविरूद्धः शास्त्रविरूद्धश्च क्रम दुष्क्रमः कथ्यते। उदाहरणम् – अत्र स्वर्गपदं पूर्वं वक्तव्यं नरकपदं च तदन्तरम् । **ग्राम्यदोषः** – अशिष्टवचनानां व्यवहारे प्रयोगः ग्राम्यदोषः– 'एकं मे' अत्र चुम्बनस्य स्पष्टयाचनात् कञ्चुकस्य च स्पष्टदानकथनात् अत्र अशिष्टता असभ्यता च अनुभूयते तस्मादत्र ग्राम्यदोषः ।

**सन्दिग्धदोषः** – प्रकरणस्य ज्ञानं विना निश्चयः कर्तुं न शक्यते, तस्यां दशायां संदिग्धदोषः स्यात्। 'ब्रूत किं' उदाहरणेऽस्मिन् वक्ता पृच्छति यत् मया किं करणीयं चन्द्रमुखीसेवनं = कामिन्या सह विलासः अथवा चन्द्रमौलिशिवस्य भक्तिः?

इत्यत्र वक्ता मदनातुरोऽस्ति अथवा शिवभक्तोऽस्ति इति ज्ञानं नास्ति। तद् ज्ञानं विना निर्णयविषये सन्दिग्धतास्ति। तस्मादत्र सन्दिग्धमस्ति?

**भावार्थः** – लोकशास्त्रविरुद्धात् दुष्क्रमः।
अशिष्टव्यवहारवचनात् ग्राम्यः।
प्रकरणज्ञानं विना अनिर्णयावस्था सन्दिग्धः।

**हिन्दी अर्थ** – दुष्क्रम, ग्राम्य और सन्दिग्ध ये तीन दोष हैं। मूल में इनकी परिभाषा नहीं दी गयी है, फिर भी इनका तात्पर्य है जहाँ लोक और शास्त्र से विपरीत क्रम वर्णन किया गया हो वहाँ दुष्क्रम जहाँ ग्रामीण व्यवहारोचित शब्दों का प्रयोग किया गया हो वहाँ ग्राम्य और जहाँ वक्ता के भावार्थ समझने में सन्देह हो सन्दिग्ध दोष होता है।

**दुष्क्रम का उदाहरण** – हे कृष्ण! मैं आपका भक्त हूँ, नरक जाऊँ या स्वर्ग। यहाँ भगवद्भक्त की सर्वप्रथम स्वर्ग गमन की आकांक्षा होनी चाहिए, नरक गमन की तो कथा ही दूर है। इस तरह का वर्णन लोक और शास्त्र दोनों के विरुद्ध है। अतः यहाँ दुष्क्रम दोष है।

**ग्राम्य का उदाहरण** – हे प्रिय! एक बार मुझे चुम्बन करा दो, मैं तुझे कुञ्चुकी (चोली) दूँगा। यहाँ ग्रामीण नायक ने चातुर्य के बिना ही नायिका से सीधे–सीधे स्पष्ट रूप से कह दिया कि मुझे चुम्बन दे दो, मैं तुम्हें चोली दूँगा। इस लिए यहाँ ग्राम्य दोष है। इस तरह का प्रयोग प्रायः ग्रामीण लोग ही किया करते हैं।

**सन्दिग्ध दोष का उदाहरण** – कहिए, चन्द्रमुखी (चन्द्रमा के समान आह्लाद जनक मुख वाली नायिका) और चन्द्रमौलि (शिवजी) में से किसकी आराधना की जाय? चन्द्रमुखी की या चन्द्रशेखर की। यहाँ जब तक यह नहीं जाना जा सकता कि उक्त वाक्य का वक्ता श्रृंगार रस का प्रेमी है अथवा शान्तरस का, तब तक किसकी सेवा की जाय, यह निश्चित रूप से नहीं कहा जा सकता। वक्ता के निश्चित न होने से सन्देह होता है कि उसे शान्तरस इष्ट है या शृङ्गार रस। यह उद्देश्य के निश्चय का अभाव ही दूषकता का बीज है।

**अथ अनौचित्यदोषं विरूद्धदोषं च निरूपयति–**

**अनौचित्यं कीर्तिलतां तरङ्गयति यः सदा।**
**प्रसिद्ध्या विद्यया वाऽपि विरुद्धं द्विविधं मतम्॥ ३४॥**
**न्यस्तेयं पश्य कन्दर्प–प्रताप–धवलद्युतिः।**
**केतकी शेखरे शम्भोर्धत्ते चन्द्रकलातुलाम्॥ ३५॥**

**अन्वयः** – यः सदा कीर्तिलतां तरङ्गयति (इति) अनौचित्यम्। प्रसिद्ध्या विद्यया वा विरूद्धम् अपि द्विविधम्। यथा (क्रमशः) पश्य इयं कन्दर्पधवलद्युतिः न्यस्ता। शम्भोः शेखरे केतकी चन्द्रकलातुलां धत्ते।

**व्याख्या**– उचितभावः औचित्यं, न औचित्यम् अनौचित्यं, यः = यः जनः, सदा= सर्वदा, कीर्तिलतां = यशोवल्लरीं

तरङ्गयति = तरङ्गितां करोति। प्रसिद्ध्या = कविसम्प्रदाय प्रसिद्ध्या, विद्यया = शास्त्रेण वा यद् विरुद्धं तद् द्विविधं= द्विप्रकारकं, प्रसिद्धिविरुद्धं विद्याविरुद्धं चेति मतम् = इष्टम्। उदाहरणं – प्रसिद्धिविरुद्धम् इयं = पुरोदृश्यमाना , एषा वर्ण्यमाना, कन्दर्पस्य = कामदेवस्य, पश्य = विलोकय , यः प्रतापः =विक्रमः तस्य धवला = श्वेता चासौ द्युतिः = कान्तिश्चेति, कन्दर्पप्रतापधवलद्युतिः, न्यस्ता= स्थापिता, विद्याविरुद्धं – शम्भोः = शिवस्य, शेखरे = मस्तके, केतकी = केतकीपुष्पं, चन्द्रकलातुलां = शशिकलासमतां, धत्ते= दधाति।

**भावार्थः – अनौचित्यम्** – अनुचितसम्बन्धवर्णनात् अनौचित्यनामकः दोषः तरङ्गसम्बन्धः जलेन सहास्ति लतातु पल्लविता भवति, परम् अत्र 'कीर्तिलता तरङ्गयति' इति अनुचितवर्णनात् अनौचित्यनामकः दोषः।

**प्रसिद्धिविरुद्धम्** – यत् वर्णनं कविसम्प्रदायसिद्धान्तविरुद्धं तत् प्रसिद्धिविरुद्धं कविसमयख्यातौ प्रतापस्य वर्णः रक्तः परमत्र 'धवलद्युतिः' श्वेतवर्णः वा उक्तः तस्माद् दोषोऽयम् अस्ति। विद्याविरुद्धं – शास्त्रसिद्धान्तविरुद्धं वर्णनं, शास्त्रानुसारेण शिवस्य अर्चनायां केतकीपुष्पं निषिद्धं परमत्र 'शम्भोः शेखरे केतकी' इति वर्णनं विद्याविरुद्धं, पौराणिकमते केतकी शिवशापग्रस्तास्ति यत् शिवार्चने केतक्याः प्रयोगः न भविष्यति।

**हिन्दी अर्थ – अनौचित्यदोष** – अनौचित्य दोष वहाँ होता है, जहाँ किसी वस्तु का सम्बन्ध किसी अयोग्य वस्तु के साथ दिखाया गया हो। जैसे – जो हमेशा कीर्तिलता को तरङ्गयुक्त करता है अर्थात् उसे पल्लवित करता है। यहाँ लता के साथ तरङ्ग का सम्बन्ध दिखाना अनुचित है, क्योंकि तरङ्ग का सम्बन्ध जलाशयों में ही दिखाना समुचित है।

लोकख्याति अथवा शास्त्र के विरुद्ध वर्णन किये जाने पर विरुद्ध दोष दो प्रकार का होता है – प्रसिद्धिविरुद्ध और विद्याविरुद्ध।

प्रसिद्धि विरुद्ध अनौचित्य का उदाहरण – देखो यह कामदेव के प्रताप की श्वेत कान्ति सामने वर्तमान है। यहाँ प्रताप का श्वेतवर्णन कवि प्रसिद्धि के विरुद्ध है। कवियों ने प्रताप का रंग लाल माना है।

विद्या विरुद्ध अनौचित्य का उदाहरण – भगवान् शङ्कर के मस्तक पर केतकी का पुष्प चन्द्रमा की कला के समान सुशोभित हो रहा है। केतकी का पुष्प भगवान् शङ्कर की पूजा में पुराण के द्वारा वर्जित है। अतः यह पुराण विद्या विरुद्ध दोष है।

**अथ सामान्य परिवृत्तिदोषं विशेषपरिवृत्तिदोषं च निरूपयति–**

**सामान्य-परिवृत्तिः स्यात्कुण्डलच्छविविग्रहा।**
**विशेषपरिवृत्तिः स्याद्वनिता मम चेतसि॥ ३६॥**

**अन्वयः**– कुण्डलछविविग्रहा (इति) सामान्यपरिवृत्तिः स्यात्। वनिता मम चेतसि (इति) विशेषपरिवृत्तिः स्यात्।

**व्याख्या**– सामान्यपरिवृत्तिः= सामान्यस्य परिवृत्तिः इति सामान्यपरिवृत्तिः, परिवृत्तिः= परिवर्तनं, विशेषेण परिवर्तनम् इति। यथा कुण्डलछविविग्रहा = कुण्डलस्य छविः इव विग्रहो यस्याः सा कुण्डलछविविग्रहा, कुण्डलं= कर्णाभूषणं, छविः= कान्तिः , विग्रहः = शरीरम्।

**विशेषपरिवृत्ति** : – विशेषस्य परिवृत्तिः इति विशेषपरिवृत्तिः सामान्येन परिवर्तनम्। वनिता = कामिनी, मम = नायकस्य, चेतसि= हृदये।

**भावार्थः** – यत्र विवक्षानुकूलस्य सामान्यपदस्य स्थाने विशेषार्थकं पदं प्रयुज्यते तदा सामान्यपरिवृत्तिनामकः दोषः। यथा – वक्तुम् इच्छा विवक्षा । अत्र कामिनीशरीरं स्वर्णवत् दीप्तम् अस्ति इति (वक्तुम् इच्छा) विवक्षा अस्ति परं सामान्यपदस्थाने अत्र स्वर्णनिर्मितः कुण्डलशब्दप्रयुक्तः।

**विशेषपरिवृतिः** – यत्र विशेषार्थकस्य पदस्य स्थाने सामान्यार्थकस्य पदस्य प्रयोगः क्रियते तदा विशेष परिवृत्तिः । यथा 'वनिता मम चेतसि' अत्र वनितायाः नामोल्लेखः विशेषेण प्रयोक्तव्यः।

**हिन्दी अर्थ** – इसमें उदाहरण मात्र दिये गये हैं, परिभाषा नहीं। संकेत के लिए सार्थक नाम देकर काम चलाया गया है। जहाँ सामान्य अर्थ बोधक पद की आवश्यकता हो वहाँ विशेष अर्थ बोधक पद का प्रयोग करना सामान्यवृत्ति,

और जहाँ विशेष अर्थ बोधक पद का प्रयोग करना विशेष परिवृत्ति दोष होता है। जैसे कुण्डल की कान्ति के समान शरीर वाली कान्ता। यहाँ कवि को अभिप्रेत है, सुवर्ण के समान कान्ति वाली कान्ता, परन्तु इस वर्णन के लिए सुवर्ण वाचक सामान्य पद का प्रयोग न करके विशेषार्थ बोधक कुण्डल पद का प्रयोग किया गया है। अतः यहाँ सामान्य परिवृत्ति दोष है।

विशेष परिवृत्ति का उदाहरण – 'वनिता मम चेतसि' स्त्री मेरे मन में है। यहाँ स्त्री विशेष अर्थ बोधक अपनी प्रियतमा का नाम लेना उचित था, वह न लेकर सामान्य स्त्री वाचक पद का प्रयोग किया गया है, सब स्त्रियाँ प्रिय हो नहीं सकती। अतः यहाँ विशेष परिवृत्ति है।

**अथ सहचराचारुदोषं विरुद्धान्योन्यसङ्गतिदोषं च प्रतिपादयति–**

**द्वौ स्तः सहचराऽचारुविरुद्धान्योन्यसंगती।**
**ध्वाङ्क्षाः सन्तश्च तनयं स्वं परञ्च न जानते॥ ३७॥**
**सरोजनेत्र ! पुत्रस्य मुखेन्दुमवलोकय।**
**पालयिष्यति ते गोत्रमसौ नरपुरन्दरः॥ ३८॥**

**अन्वयः** – सहचराचारु- विरुद्धान्योन्यसंगती द्वौ (दोषौ) स्तः। (सहचराऽचारुदोषो यथा) ध्वाङ्क्षाः सन्तः च स्वं परं च तनयं न जानते। (विरुद्धान्योन्यसङ्गतिदोषो यथा) सरोजनेत्र! पुत्रस्य मुखेन्दुम् अवलोकय असौ नरपुरन्दरः ते गोत्रं पालयिष्यति।

**व्याख्या–** सहचराचारुः, सहचरश्च असौ अचारुश्चेति सहचराऽचारुः। सहचरति इति सहचरः। न चारुः इति अचारूः, ध्वाङ्क्षाः = काकाः, सन्तः = सज्जनाः च स्वं = स्वकीयं, परं = परकीयं, तनयं = पुत्रं, न जानते = न विदन्ति, भेदं न कुर्वन्ति।

विरुद्धान्योन्यसङ्गतिः – विरुद्धा अन्योन्यसङ्गतिः यस्मिन् इति विरुद्धान्योन्यसङ्गतिः। सरोजनेत्र = हे कमलनयन! पुत्रस्य = सुतस्य, मुखेन्दुं = वदनचन्द्रम्, अवलोकय = पश्य, असौ = सः पुत्रः, नरपुरन्दरः = नरेन्द्रः, ते = तव, गोत्रं = राज्यं कुलं वा, पालयिष्यति = रक्षिष्यति।

**भावार्थः** – ययोः पदार्थयोः साहचर्यवर्णने विषमता प्रतीयते अशोभनीयता वा यथा अत्र एकतस्तु काकः द्वितीयतः सज्जनाः द्वयोः साहचर्यवर्णनम् अशोभनं तस्मादत्र सहचराऽचारुः। यत्र परस्परविरुद्धयोः द्वयोः अर्थयोः सङ्गतिः वर्ण्यते तत्र विरुद्धान्योऽन्यसङ्गतिदोषः। अत्र सरोजनेत्रयोः तथा च पुरन्दरगोत्रयोः सङ्गतिः वर्णिता परम् एते परस्परं विरुद्धे स्त यतोहि चन्द्रः सरोजं न विकासयति , पुरन्दरश्च गोत्रपालकः न अपितु गोत्रः = पर्वतः तस्य पक्षछेदकः।

**हिन्दी अर्थ** – जहाँ बेमेल दो वस्तुओं के साहचर्य का वर्णन किया जाय तथा परस्पर विरुद्ध दो पदार्थों का एक साथ वर्णन किया जाय वहाँ क्रमशः दो दोष होते हैं – सहचराचारु और अन्योन्य सङ्गति। जैसे – कौवे और सत्पुरुष अपनी या पराई सन्तान में तनिक भी भेदभाव नहीं रखते दोनों को समान दृष्टि से देखते हैं। इसका आशय यह है कि सज्जन तो समस्त वसुधा को अपना कुटुम्ब समझते हैं और कौवे अज्ञानवश कोकिल के बच्चों को अपना बच्चा समझ कर पालन–पोषण करते हैं। यहाँ कौआ और सज्जन इन बेमेल वस्तुओं के साहचर्य का वर्णन करने से उक्त दोष होता है।

प्रसिद्धि है कि कौवे कोकिल के बच्चों का पालन–पोषण करते हैं। कोयल अपना परिश्रम बचाने के लिए अपने बच्चों को कौवे के घोंसले में रख आती है और कौआ उन्हें अपने बच्चे समझ कर पालता है। जब उनको पंख जम जाते हैं तब वे उड़ जाते हैं। इसीलिए कोयल का एक नाम परभृत् भी है।

विरुद्धान्योन्यसंगति का उदाहरण देखिये – हे कमल के समान आँख वाले पुरुष! अपने पुत्र के मुखकमल को देखो, मनुष्यों में इन्द्र के सदृश तुम्हारा पुत्र तेरे गोत्र का पालन करेगा। उक्त उदाहरण में सरोज नेत्र और मुखेन्दु पर तथा 'पुरन्दरो गोत्रं पालयिष्यति' इस वाक्य में प्रयुक्त पद परस्पर विरुद्ध हैं क्योंकि चन्द्रोदय होने पर कमल

मुकुलित हो जाते हैं और पुरन्दर इन्द्र गोत्र का पालन नहीं करता, प्रत्युत वह गोत्र पर्वत का भेदन ही करता है। अतः यहाँ विरुद्धान्योन्यसंगति दोष है।

**अथ दोषान् विविच्य दोषाश्रयान् निर्दिशति । यद्यपि शब्देऽर्थे च कृतोन्मेषम् इति दोषलक्षणप्रसङ्गे प्रतिपादितवान्–**

**पदे तदंशे वाक्यांशे वाक्ये वाक्यकदम्बके।**
**यथानुसारमभ्यूहेद्दोषान् शब्दार्थसम्भवान् ॥ ३९॥**

**अन्वयः** – शब्दार्थसम्भवान् दोषान् पदे तदंशे वाक्यकदम्बके, वाक्ये वाक्यांशे च यथानुसारम् अभ्यूहेत्।

**व्याख्या–** 'शब्दार्थौ काव्यस्य शरीरम्' अतः काव्यशरीरे दोषाः कुत्र कुत्र सम्भवन्ति इति निर्दिशति– शब्दश्च अर्थश्च इति शब्दार्थौ। शब्दार्थाभ्यां सम्भवः = जन्म येषां ते शब्दार्थसम्भवाः तान् शब्दार्थसम्भवान् = काव्यशरीरसमुत्पन्नान्, दोषान् = काव्यदोषान्, पदे = सुबन्त–तिङन्त रूपे वर्णसमूहे, तदंशे = पदांशे, वाक्यांशे = वाक्यभागे खण्डवाक्ये च, वाक्ये = पद समूहे, वाक्यकदम्बके = महावाक्ये काव्यप्रबन्धे वा, यथानुसारम् = लक्षणानुसारम्, अभ्यूहेत् = जानीयात् विचारयेत् वा।

**भावार्थः** – काव्यदोषाः काव्यशरीरे शब्दार्थयोः सम्भवन्ति। तेषु शब्दगताः दोषाः पञ्चधा सन्ति। पददोषाः पदांशदोषाः वाक्यदोषाः वाक्यांशदोषाः, काव्यप्रबन्धदोषाः च इति। अर्थनिहिताः दोषाः तु अर्थे एव सम्भवन्ति। इत्थं तेषां दोषाणां विभाजनम् एवं कर्तुं शक्यते – श्रुतिकटुदोषाद् आरभ्य अन्यसङ्गतिदोषपर्यन्ताः विंशतिदोषाः पद–पदांशं – वाक्य–वाक्यांशनिष्ठाः ज्ञातव्याः। प्रतिकूलाक्षराद् आरभ्य अमतार्थान्तरपर्यन्ताः अष्टादशदोषाः वाक्यमात्रगताः सन्ति। अपुष्टार्थाद् अन्योऽन्यसङ्गतिपर्यन्तं च चतुर्दशदोषाः अर्थगताः सन्ति।

**हिन्दी अर्थ** – इस प्रकार दोषों को कहकर अब उनके आश्रयों को कहते है। शब्द एवं अर्थ में रहने वाले दोष क्रमशः पद, पदांश, वाक्य, वाक्यांश और महावाक्य इन पाँच स्थानों में रहते हैं और अर्थ दोष केवल अर्थ में समझना चाहिए। अर्थात् शब्दनिष्ठ दोष पूर्वोक्त पाँच स्थानों में रहते है तथा अर्थ दोष केवल एकमात्र अर्थ में ही रहते हैं।

**काव्यदोषान् विविच्य जयदेवः दोषाणां निवारकं दोषाङ्कुशं प्रतिपादयति–**

**दोषमापतितं स्वान्ते प्रसरन्तं विशृङ्खलम्।**
**निवारयति यस्त्रेधा दोषाङ्कुशमुशन्ति तम्॥ ४०॥**

**अन्वयः** – यः स्वान्ते आपतितं विशृङ्खलं प्रसरन्तं दोषं त्रेधा निवारयति तं दोषाङ्कुशम् उशन्ति।

**व्याख्या** – यः = प्रसङ्गेऽस्मिन् निरूप्यमाणे दोषनिवारक इति स्वान्ते = चित्ते आपतितम् = उपस्थितं, ज्ञातं वा, विशृङ्खलम् = अनियन्त्रितं, प्रसरन्तं = विकसन्तं, व्याप्नुवन्तं, वा दोषं काव्यशोभा अपकर्षकं, त्रेधा = त्रिभिः प्रकारैः, निवारयति = दूरीकरोति अपसारयति वा, तं = दोषनिवारकं, दोषाङ्कुशं = दोषाणाम् अङ्कुशं = दोषनियन्त्रकं, दोषनिवारकं वा उशन्ति = कथयन्ति।

**भावार्थ** :– दोषाः काव्यरसिकानां चित्तम् उद्वेजयन्ति अनियन्त्रितरूपेण च प्रसरन्ति। तान् काव्यदोषान् यः त्रिधा निवारयति तस्य दोषनिवारकस्य दोषाङ्कुशस्य प्रतिपादनं क्रियते।

**हिन्दी अर्थ** – दोषाङ्कुश उसे कहते हैं जो मन में उत्पन्न और बेधड़क बढ़ने वाले दोष को तीन प्रकार से निवारण करे। दोषों का अङ्कुश निवारक यह इसका यौगिक अर्थ है।

**दोषाङ्कुशेन दोषाणां निवारणं कथं भवति? इति निर्दिशति –**

**दोषे गुणत्वं तनुते दोषत्वं वा निरस्यति।**
**भवन्तमथवा दोषं नयत्यत्याज्यतामसौ॥ ४१॥**

**अन्वयः** – असौ दोषे गुणत्वं तनुते दोषत्वं वा निरस्यति अथवा भवन्तं दोषम् अत्याज्यतां नयति।

**व्याख्याः** – दोषाङ्कुशः कथं दोषनिवारणं करोति? इति त्रैविध्यं प्रतिपादयति– असौ = दोषाङ्कुशः दोषनियन्त्रकः वा,

दोषगुणत्वं तनुते = दोषस्य गुणरूपतां प्रकटयति, दोषत्वं वा निरस्यति = दोषभावम् एव निवारयति, अथवा = यद्वा, भवन्तं दोषम् अत्याज्यतां नयति= जायमानं वर्तमानं विद्यमानं दोषम् अपरिहार्यतां प्रापयति।

**भावार्थः** – दोषाङ्कुशः त्रिधा दोषनिवारणं करोति। तत्र क्वचिद् दोषो गुणरूपतां प्राप्नोति। क्वचिद् दोषो निर्दोषतां प्राप्नोति। क्वचिद् दोषो ग्राह्यतां प्राप्नोति। इत्थं दोषाङ्कुशेन दोषः गुणरूपे, दोषाभावरूपे ग्राह्यरूपे च भवति।

**हिन्दी अर्थ** – वह दोष गुण का आरोप करता है, दोष को निर्दोष बना देता है और आये हुए दोषों को उपादेय बना देता है।

**इदानीम् उदाहरणमुखैः दोषाङ्कुशं प्रस्तौति** –

**मुखं चन्द्रश्रियं धत्ते श्वेतश्मश्रुकराङ्कुरैः।**
**अत्र हास्यरसोद्देशे ग्राम्यत्वं गुणतां गतम्॥ ४२॥**
**तव दुग्धाब्धिसम्भूतेः कथं जाता कलङ्किता।**
**कवीनां समयाद्विद्याविरुद्धोऽदोषतां गतः॥ ४३॥**
**दधार गौरी हृदये देवं हिमकराङ्कितम्।**
**अत्र श्लेषोदयान्नैव त्याज्यं हीति निरर्थकम्॥ ४४॥**

**अन्वयः** – १. मुखं श्वेत-श्मश्रुकराङ्कुरैः चन्द्रश्रियं धत्ते। अत्र हास्यरसोद्देशे ग्राम्यत्वं गुणतां गतम्।

२. (अयि चन्द्र!) दुग्धाब्धिसम्भूतेः तव कलङ्किता कथं जाता। (इत्यत्र) विद्याविरुद्धः कवीनां समयाद् अदोषतां गतः।

३. गौरी हिमकराङ्कितं देवं हृदये दधार। अत्र श्लेषोदयाद् हि इति निरर्थकं नैव त्याज्यम्।

**व्याख्या** – (१) दोषस्य गुणरूपता – मुखं = वृद्धवदनं, श्वेतश्मश्रुकराङ्कुरैः = शुभ्रश्मश्रुरूपकिरणप्ररोहैः, चन्द्रश्रियम् = चन्द्रशोभां, धत्ते = धारयति। अत्र = अस्मिन् उदाहरणे, हास्यरसोद्देशे = हास्यरसप्रसङ्गे, ग्राम्यत्वं = ग्राम्यदोषो , गुणतां गतं = गुणत्वं प्राप्नोति।

**भावार्थः** – अत्र वृद्धमुखस्य चन्द्रसादृश्यं तथा च श्वेतश्मश्रूणां चन्द्रकिरणसादृश्यकल्पना ग्राम्यजनोचिता एव वर्तते परमत्र हास्यरसस्य पुष्टिः विधीयते तस्माद् दोषोऽयं गुणत्वं प्राप्नोति।

**व्याख्या**- (२) दोषनिवारणं -(दोषस्य निर्दोषता) – दुग्धाब्धिसम्भूतेः = क्षीरसागरसञ्जातस्य, तव = ते चन्द्रस्य, कलङ्किता = कलङ्कित्वं, कथं = केन प्रकारेण, जाता = अभवत्।

**भावार्थः** – क्षीरसागरात् समुत्पन्नः चन्द्रमाः निष्कलङ्कोऽस्ति परमत्र सकलङ्कः वर्णितः। तस्मादत्र विद्याविरुद्धनामकः काव्यदोषो विद्यते, किन्तु कवीनां समये कविसम्प्रदाये तु चन्द्रः सकलङ्क एव वर्णितः, अत एव दोषत्वं नास्ति। इत्थम् एव दोषोऽपि निर्दोषतां गतः।

**व्याख्या** – (३) दोषस्य ग्राह्यता – गौरी = नायिका, हि = अव्ययपदं, मकराङ्कितं = मकरेण अङ्कितं तं मकरध्वजं, कामदेवम् अथवा गौरी = पार्वती, हिमकराङ्कितं अर्थात् हिमकरेण अङ्कितं चन्द्रशेखरं शिवं, हृदये = मनसि, दधार = अधारयत्, धृतवती।

**भावार्थः** – अत्र 'हि' इति प्रयोगः नायिका पक्षे तु निरर्थको भूत्वा 'निरर्थकदोषस्य' उदाहरणमस्ति। परं पार्वतिपक्षे श्लेषोदयात् 'हि' इति पदं कथमपि नैव त्याज्यम् अपितु ग्राह्यम् अस्ति।

**हिन्दी अर्थ** – ग्राम्य दोष हास्य रस में गुण बन जाता है। इसका उदाहरण 'मुखं चन्द्र' यह पद्य है – सफेद दाढ़ी-मूछों के बाल रूपी किरणों से वृद्ध मनुष्य का मुख चन्द्रमा के समान सुशोभित हो रहा है। सफेद दाढ़ी-मूँछों के केशों को चन्द्रमा की किरण समान बतलाना ग्रामीण मनुष्यों की कल्पना है, अतः यहाँ ग्राम्य दोष है, क्योंकि हास्य रस की पुष्टि ग्राम्यदोष द्वारा अधिक होती है। अतः यहाँ ग्राम्यदोष हास्य रस में अनुकूल होने के कारण गुण बन जाता है।

विद्या विरुद्ध दोष कवियों के संकेतित वर्णन में दोषाभाव को प्राप्त हो जाता है। इसका उदाहरण – 'तव

दुग्धाब्धि' यह पद्य है। हे चन्द्रमा! क्षीरसागर से उत्पन्न होने पर भी तुझ में कलङ्क कहाँ से आ गया, क्योंकि पुराणों के अनुसार क्षीरसागर में उत्पन्न चन्द्रमा निष्कलङ्क है। इस पुराण प्रसिद्धि के विरुद्ध वर्णन करना, विद्याविरुद्ध दोष होता है। किन्तु कवि सम्प्रदाय में चन्द्रमा सकलङ्क माना जाता है। अतः उक्तवर्णन पुराण विरुद्ध होते हुए भी कविसमयानुसार दोष नहीं होता। इसलिए यह दोष यहाँ दोषाभावरूप में परिणत हो जाता है।

यहाँ श्लेष अलङ्कार के कारण पार्वती तथा गौराङ्गी नायिका इन दो पक्षों में पृथक् -पृथक् अर्थ होता है। इसमें मूल कारण "हि" पद है, नायिका पक्ष में – गौरी – पार्वती ने हिमकर – चन्द्रमा से अङ्कित देव महादेव – शिव को धारण किया। यहाँ नायिका पक्ष में हि पद निरर्थक दोष से दुष्ट होने पर भी पार्वतीपक्ष में हिमकर अर्थ निकलने के कारण उसके बिना श्लेषालङ्कार नहीं हो सकता। अतः यहाँ निरर्थकदोष अत्याज्य माना गया है।

**इत्थं दोषनिरूपणं कृत्वा द्वितीयमयूखसमाप्तिं करोति –**

**महादेवः सत्रप्रमुखमखविद्यैकचतुरः**
**सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ।**
**द्वितीयस्तेनासौ सुकविजयदेवेन रचिते**
**चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः॥**

अत्र 'द्वितीयः तेन असौ' इति एव विशेषः।

**इति पीयूषवर्षेण श्रीजयदेवेन विरचिते चन्द्रालोके दोषनिरूपणनामको द्वितीयो मयूखः समाप्तः।**

## अभ्यास-प्रश्नाः

**बहुविकल्पात्मकाः प्रश्नाः –**

१. काव्यशोभाविघातको भवति –
(क) गुणः (ख) रसः
(ग) अलङ्कारः (घ) दोषः ( )

२. श्रवणोद्वेजने भवति –
(क) श्रुतिकटुः (ख) अप्रयुक्तम्
(ग) असमर्थम् (घ) निहतार्थम् ( )

३. "स हन्ति हन्त कान्तारे कान्तः कुटिलकुन्तलः" अत्र हन्ति शब्दस्यार्थोऽस्ति –
(क) मारयति (ख) वसति
(ग) पश्यति (घ) गच्छति ( )

४. अश्लीलं कति विधम्?
(क) चतुर्विधम् (ख) त्रिविधम्
(ग) एकविधम् (घ) द्विविधम् ( )

५. लक्षणात्यन्तप्रसरादमनोहरं भवति –
(क) निरर्थकम् (ख) असमर्थम्
(ग) सन्दिग्धम् (घ) नेयार्थम् ( )

**अतिलघूत्तरात्मकाः प्रश्नाः –**

१. दोषस्य लक्षणं लिखत।
२. दोषः कुत्र-कुत्र सम्भवति?
३. क्लिष्टदोषं प्रतिपादयत।
४. व्याहतदोषं प्रतिपादयत।

**लघूत्तरात्मकाः प्रश्नाः -**

१. अधोलिखित-दोषाणां लक्षणानि सोदाहरणानि लिखत।

(क) निहतार्थदोषः (ख) असमर्थदोषः
(ग) सन्दिग्धदोषः (घ) हतवृत्तदोषः
(ङ) विसर्गगतदोषः (च) सन्धिगतदोषः
(छ) विरुद्धदोषः (ज) अप्रयुक्तदोषः

**निबन्धात्मकाः प्रश्नाः -**

१. दोषलक्षणं प्रतिपाद्य केषाञ्चन विंशतिः दोषाणां नामानि लेख्यानि।
२. दोषाङ्कुशं सभेदं सोदाहरणं च विवेचयत।
३. यथेच्छम् एकादशदोषाणां लक्षणानि विलिख्य उदाहरणेषु सङ्गतिः कार्या।
४. निम्नलिखितेषु वाक्येषु विद्यमानं दोषम् उद्घाट्य सङ्गतिपूर्वकं लक्षणं लिखत।

(क) इयमद्भुतशाख्यग्रकेलिकौतुकवानरी।
(ख) आह्लादसाधनं वायुः कान्तानाशे भवेत् कथम्।
(ग) हरिप्रियापितृवधूप्रवाहप्रतिमं वचः।
(घ) न मामङ्गद! जानासि रावणं रणदारुणम्।
(ङ) विशाललोचने! पश्याम्बरं तारातरङ्गितम्।
(च) गम्भीरारम्भदम्भोलिपाणिरेष समागतः।
(छ) त्यक्तहारमुरः कृत्वा शोकेनालिङ्गिताऽङ्गना।
(ज) सहस्रपत्रमित्रं ते वक्त्रं केनोपमीयते।
(झ) ब्रूत! किं सेव्यतां चन्द्रमुखीचन्द्रकिरीटयोः।
(ञ) केतकी शेखरे शम्भोर्धत्ते चन्द्रकलातुलाम्।

# तृतीयो मयूखः

## अथ लक्षणानि

**काव्यलक्षणप्रसङ्गे जयदेवः 'निर्दोषा लक्षणवती' इति उक्त्वा प्रथमं दोषान् प्रतिपादितवान्। इदानीं यथाक्रमं लक्षणानि निरूपयति–**

**अल्पाक्षरा विचित्रार्थख्यातिरक्षरसंहतिः।**
**उषाकान्तेनानुगतः शूरः शौरिरयं पुनः॥ १॥**

**अन्वयः** – अल्पाक्षरा विचित्रार्थख्यातिः अक्षरसंहतिः। (यथा) – उषाकान्तेन अनुगतः अयं शौरिः पुनः शूरः।

**व्याख्या** – अल्पाक्षरा = स्वल्पसंख्यकवर्णा परिमितवर्णा वा, विचित्रार्थख्यातिः = चमत्कारजनकार्थप्रकाशनम्, अक्षरसंहतिः = वर्णसंघातः एतन्नामकं लक्षणं भवति। यथा – उषाकान्तेन = अनिरुद्धेन, अनुगतः = अनुयातः, अयं शौरिः = एषः श्रीकृष्णः, पुनः = मुहुरपि, शूरः = वीरः।

**भावार्थः** – अल्पैः एव अक्षरैः यत्र अधिकाधिकस्य चमत्कारजनकस्यार्थस्य अभिव्यक्तिः विधीयते तत्र अक्षरसंहति नाम लक्षणम्। ''उषाकान्तेन'' इति एकेनैव पदेन उषाऽनिरुद्धयोः परिणयप्रसङ्गघटनायाः अभिव्यञ्जना सञ्जायते, तेनैव सह ''शौरिः'' पदेन ज्ञायते यत् ''शूरः'' श्रीकृष्णस्य पितामह आसीत्, तस्य अपत्यं श्रीकृष्णोऽपि स्वयमेव वीरोऽस्ति।

इत्थम् अत्र 'उषाकान्तेन' इति विशेषणपदं श्रीमद्भागवतपुराणस्य तां महतीं कथां स्मारयति यस्यां बाणासुर-कन्यायाः उषायाः, तस्याः सख्युः चित्रलेखायाः, अनिरुद्धस्य श्रीकृष्णस्य च चरित्रचित्रणं भवति।

**विशेषः** – कवीनां काव्येषु 'अर्थगौरवम्' इति वैशिष्ट्यम् अक्षरसंहतिलक्षणेन एव आयाति। हिन्दीभाषायाः 'बिहारी सतसई' इत्यस्य प्रणेतुः 'बिहारी' विषये 'घटेऽपि सागरः' (गागर में सागर) इत्युपाधिः 'अक्षरसंहतिः' इति वैशिष्ट्यपदेन एव अधिगतः।

**हिन्दी अर्थ** – जहाँ कम शब्दों में विस्तृत सन्दर्भपरक चमत्कारयुक्त अर्थ की प्रतीति हो वह 'अक्षरसंहति' नामक लक्षण का चमत्कार है। यहाँ 'उषाकान्तेन' इस पदमात्र से श्रीकृष्ण और बाणासुर के संग्राम की घटना का स्मरण होता है, जिसके फलस्वरूप श्रीकृष्णपौत्र अनिरुद्ध और बाणासुर की पुत्री उषा का प्रणय संस्कार हुआ।

**अथ शोभा-नामकं लक्षणं निरूपयति –**

**शोभा ख्यातोऽपि यद्दोषो गुणकीर्त्या निषिध्यते।**
**मुधा निन्दन्ति संसारं कंसारिर्यत्र पूज्यते॥ २॥**

**अन्वयः** – ख्यातः अपि यद् दोषः पदं गुणकीर्त्या निषिध्यते (सा) शोभा। (यथा) यत्र कंसारिः पूज्यते (तं) संसारं मुधा निन्दन्ति।

**व्याख्या** – ख्यातः अपि = प्रसिद्धः अपि, विश्रुतः अपि, दोषः = दूषणं, हीनता वा, गुणकीर्त्या = गुणवर्णनेन, निषिध्यते = निवार्यते, सा शोभा = एतन्नामकं लक्षणं भवति।

**यथा** – यत्र = यस्मिन् संसारे, कंसारिः = भगवान् श्रीकृष्णः, पूज्यते = अर्च्यते, (तं) संसारं = विश्वं लोकं, मुधा = व्यर्थमेव, निन्दन्ति = गर्हयन्ति, तिरस्कुर्वन्ति।

**भावार्थः** – प्रसिद्धदोषस्य अपि यत्र गुणवर्णनेन निवारणं क्रियते तत्र शोभानामकं लक्षणं भवति। लोकोऽयं असारः, क्षणभङ्गुरः, बन्धनोऽपकारकश्च एवं जना संसारविषये उपदिशन्ति निन्दन्ति च। परं तेषां दोषाणां निवारणं श्रीकृष्णस्य पूजनेन भवति। यत्र योगेश्वरः कृष्णः तत्र श्रीःविजयोभूतिः अस्मिन् एव संसारे प्राप्यते।

**हिन्दी अर्थ** – जहाँ अत्यन्त प्रसिद्ध दोष का निवारण किसी गुण की स्थापना से कर दिया जाये वहाँ शोभा नामक लक्षण होता है। संसार के बारे में सभी लोग असार, क्षणभङ्गुर, दुःखमय जन्म-मरण बन्धन कारक कह कर निन्दा करते हैं, परन्तु योगेश्वर वासुदेव की यदि अर्चना करें तो ये दोष नहीं रह सकते। इस प्रकार दोषों का निवारण गुणवर्णन से किया गया है अतः शोभा नामक लक्षण है।

**अथ अभिमानलक्षणं निरूपयति –**

**अभिमानो विचारश्चेदूहितार्थनिषेधकृत्।**
**इन्दुर्यदि कथं तीव्रः सूर्यो यदि कथं निशि॥ ३॥**

**अन्वयः** – ऊहितार्थनिषेधकृद् विचारः चेत् अभिमानः। (यथा) यदि इन्दुः कथं तीव्रः? यदि सूर्यः निशि कथम्?

**व्याख्या** – ऊहितार्थनिषेधकृत् = ऊहितः = उत्प्रेक्षितः, कल्पितश्चासौ अर्थश्चेति ऊहितार्थः, तस्य निषेधः प्रतिषेधं करोति इति ऊहितार्थनिषेधकृत् = कल्पितार्थप्रतिषेधकर्ता, विचारः = अभिप्रायः विवेको वा, चेत्, अभिमानः = अभिमाननामकं लक्षणं भवति। यथा – यदि, इन्दुः = चन्द्रः (तर्हि) कथं = कस्मात् कारणात्, तीव्रः = तीक्ष्णः, तापजनकः प्रतीयते, यदि, सूर्यः = रविः (तर्हि) निशि = रात्रौ कथं भासते?

**भावार्थः** – आत्मना वितर्कितस्य अर्थस्य वितर्केणैव प्रतिषेधः यदि क्रियते तदा अभिमाननामकं लक्षणं भवति। 'इन्दुर्यदि' उदाहरणेऽस्मिन् – विरहिणी नायिका रात्रिकाले चन्द्रं दृष्ट्वा मनसि प्रियवियोगजन्यदुःखसन्तप्ता विचारयति यत् चन्द्रस्तु शीतलो भवति परम् एष तु सन्तापयति अतः नास्ति चन्द्रः, परम् इदानीं निशास्ति तथा सूर्यस्तु दिवसे भवति। इत्थं पूर्वं चन्द्रस्य खण्डनं ततः सूर्यस्यापि तर्कपूर्वकं खण्डनं करोति।

**हिन्दी अर्थ** – यदि विचार में आई हुई कल्पना का युक्तिपूर्वक खण्डन किया जाये तो अभिमान नामक लक्षण होता है। यहाँ विरहिणी नायिका ने पहले चन्द्रमा का खण्डन किया क्योंकि चन्द्रमा अमृतवर्षी होता है यह तो सन्तप्त कर रहा है, परन्तु यह सूर्य भी नहीं हो सकता क्योंकि वर्तमान में रात है।

**अथ हेतुलक्षणं निरूपयति –**

**हेतुस्त्यक्त्वा बहून् पक्षान् युक्त्यैकस्यावधारणम्।**
**नेन्दुर्नार्कोऽयमौर्वाग्निः सागरादुत्थितो दहन्॥ ४॥**

**अन्वयः** – बहून् पक्षान् त्यक्त्वा (युक्त्या) एकस्य अवधारणं हेतुः। (यथा) अयं सागराद् उत्थितः दहन् न इन्दुः, न अर्कः (अपितु) और्वाग्निः।

**व्याख्या** – बहून् = विविधान् अनेकान् वा, पक्षान् = विचारान्, सिद्धान्तान् वा, त्यक्त्वा = विहाय परित्यज्य वा, युक्त्या = तर्कोपायेन, युक्तिपूर्वकं उपपत्तिपूर्वकं वा, एकस्य = एकमात्रस्य, पक्षस्य सिद्धान्तस्य वा, अवधारणं = निर्णयः, निश्चयः, हेतुः = हेतुः नाम लक्षणम्।

यथा – अयं = पुरतो दृश्यमानः, सागरात् = समुद्रात्, उत्थितः = उत्पन्नः, उदितः, दहन् = सन्तापयन्, इन्दुः = चन्द्रः, न = नास्ति, कारणम् अस्ति यद्यपि चन्द्रः सागरात् समुत्पन्नः, परं सन्तापकारको नास्ति परम् अयं तु सन्तापयति। न अर्कः = सूर्योऽपि नास्ति, सूर्यः तीव्रो भवति, परं दिवसे एव रात्रौ न, अपितु और्वाग्निः = सागरे समुत्पन्नः वडवानलः अस्ति।

**भावार्थः** – युक्तिपूर्वकम् अनेकपक्षाणां खण्डनं कृत्वा एकस्य निर्णयोऽपि तर्कपूर्वकमेव यदि क्रियते तदा हेतुः नामकं लक्षणम्। अत्र उदाहरणेऽस्मिन् युक्तिपूर्वकं "चन्द्रः नास्ति, सूर्योऽपि नास्ति अपितु वडवानलः अस्ति" इति निश्चयः कृतः।

**हिन्दी अर्थ** – युक्तिपूर्वक अनेक पक्षों की कल्पना कर उनका खण्डन करते हुए एक सिद्धान्त के निश्चय को हेतु कहते हैं। कोई विरहसन्तप्त नायिका सन्तापजनक चन्द्रमा को देखकर उसके चन्द्रमा व सूर्य होने का खण्डन करती हुई समुद्र से उत्पन्न वडवानल होने का निश्चय करती है। यहाँ चन्द्रमा व सूर्य उतना असह्य ताप कारक नहीं हो सकता- यह विरहिणी की युक्ति है।

**अथ प्रतिषेध-लक्षणं प्रतिपादयति –**

**प्रतिषेधः प्रसिद्धानां कारणानामनादरः।**
**न युद्धेन भ्रुवो स्पन्देनैव वीरा निपातिताः॥ ५॥**

**अन्वयः** – प्रसिद्धानां कारणानाम् अनादरः प्रतिषेधः। (यथा) न युद्धेन (अपितु) भ्रुवः स्पन्देन एव वीराः निपातिताः।

**व्याख्या** – प्रसिद्धानां = विख्यातानां विश्रुतानां वा, कारणानां = हेतूनां, अनादरः = तिरस्कारः त्यागो वा, प्रतिषेधः = प्रतिषेधलक्षणं भवति। वीराः = भटाः, न युद्धेन = संग्रामेण न, निपातिता = मारिता अपितु भ्रुवः स्पन्देन = कामिनीकटाक्षेण, पातिता = मारिताः।

**भावार्थः** – प्रत्येकं कार्यस्य प्रसिद्धं कारणं भवति, यदि तत् तत् कार्यस्य तत् तत् कारणं विहाय अन्यत् कारणं स्वीक्रियते तदा प्रतिषेधनामकं लक्षणम्। वीराणां मरणस्य प्रसिद्धं कारणं संग्रामः अस्ति, परमत्र तस्य निषेधं कृत्वा कामिनीकटाक्षसञ्चालनेन वीराः निपातिताः एवम् उक्तं, तस्मादत्र प्रतिषेधलक्षणम्।

**हिन्दी अर्थ** – प्रत्येक कार्य की उत्पत्ति के लोकप्रसिद्ध कारण को न मानकर अन्य कारण को स्थापित करना ही प्रतिषेध नामक लक्षण है। 'न युद्धेन' उदाहरण में वीरों के शहीद होने का लोकविश्रुत कारण युद्ध है, परन्तु यहाँ सुन्दरी की शृङ्गारिक चेष्टाओं को वीरों के मरने का कारण बताया गया है। अतः यहाँ वीर मरण के मुख्य कारण युद्ध का निषेध कर अन्य कारण कामिनी कटाक्ष की स्थापना की गई है। अतः प्रतिषेधलक्षण सुसंगत है।

**अथ निरुक्तं प्रतिपादयति –**

**निरुक्तं स्यान्निर्वचनं नाम्नः सत्यं तथानृतम्।**
**ईदृशैश्चरितै राजन्! सत्यं दोषाकरो भवान्॥ ६॥**

**अन्वयः** – नाम्नः सत्यं तथा अनृतं निर्वचनं निरुक्तं स्यात्। (यथा) राजन्! ईदृशैः चरितैः भवान् सत्यं दोषाकरः (अस्ति)।

**व्याख्या** – नाम्नः = संज्ञाशब्दस्य, अत्र बहुवचनं विवक्षितम् अतः संज्ञापदानां, सत्यं = व्याकरणसम्मतं, तथा अनृतम् = असत्यं, विवक्षाविरुद्धं, निर्वचनं = कथनं, निरुक्तम् = एतन्नामकं लक्षणम् इति। यथा – हे राजन्! = हे नृप! ईदृशैः = एतादृशैः, उचितैः, चरितैः = आचरणैः, भवान्, सत्यं = वस्तुतः, दोषाकरः = चन्द्रः (दोषा = रात्रिः – दोषा करोति इति दोषाकरः), तथा च दोषाणां = दुर्गुणानाम् आकरः = निधानम् इति दुष्कर्मकर्ता इति।

**भावार्थः** – यत्र शब्दस्य उभयविधं व्याकरणसम्मतं निर्वचनं स्यात्, तत् सत्यनिरुक्तं तथा व्याकरणसम्मतं निर्वचनं स्यात् तदा असत्यनिरुक्तं स्यात्। अत्र 'दोषाकरः' पदस्य उभयथा अर्थः सङ्घटते। हे राजन्! भवान् ईदृशैः आचरणैः दोषाकरः = दोषा (दोषा इत्यव्ययं = रात्रिं) रात्रिं करोति अर्थात् चन्द्रः तथा च दोषाणाम् आकरः निधानम् इति इत्थम् अत्र उभयविधोऽर्थः व्याकरणसम्मतोऽर्थः सिद्धः तस्मात् सत्यनिरुक्तम् अस्ति।

**हिन्दी अर्थ** – जहाँ शब्द की व्याकरणसम्मत व्युत्पत्ति हो तो सत्यनिरुक्त तथा मिथ्या निर्वचन (व्युत्पत्ति) होने पर असत्यनिरुक्त लक्षण होता है। सत्यनिरुक्तं – यथा दोषाकरः। असत्यनिरुक्तं यथा – 'राजा प्रकृतिरञ्जनात्' यहाँ रञ्जनाद् राजा निर्वचन व्याकरणसम्मत नहीं है।

**अथ मिथ्याध्यवसायलक्षणं निरूपयति –**

**स्यान्मिथ्याध्यवसायश्चेदसती साध्यसाधने।**
**चन्द्रांशुसूत्रग्रथितां नभः पुष्पस्त्रजं वह॥ ७॥**

**अन्वयः** – साध्यसाधने असती चेत् मिथ्याध्यवसायः स्यात्। (यथा) चन्द्रांशुसूत्रग्रथितां नभः पुष्पस्त्रजं वह।

**व्याख्या** – साध्यसाधने = कार्यकारणे, असती = मिथ्याभूते, चेत् = तु, मिथ्याध्यवसायनामकं लक्षणं भवति। यथा – चन्द्रांशुसूत्रग्रथिताम् = चन्द्रकिरणरूपसूत्रनिर्मितां, शशिकिरणरूपगुम्फितां, नभः पुष्पस्त्रजम् = आकाशकुसुममालां, वह = धारय।

**भावार्थः** – यत्र कारणमपि असत्यं कार्यमपि मिथ्याभूतं, कार्यकारणयोः द्वयोरेव सत्ता विद्यमानता वा नास्ति तत्र मिथ्याध्यवसायनामकं लक्षणम्। यथा – चन्द्रकिरणानां सूत्ररूपेण वर्णनं मिथ्या तथा च आकाशकुसुममालायाः वर्णनं चाऽपि मिथ्या। चन्द्रकिरणसूत्राणि, कारणं तथा आकाशपुष्पमाला च कार्यम् इति द्वयमपि असत्।

**हिन्दी अर्थ** – जहाँ कारण व कार्य दोनों ही असत् (मिथ्या) हों वहाँ मिथ्याध्यवसाय नामक लक्षण होता है। यहाँ चन्द्रमा की किरणरूपी सूत्र में गूँथी हुई आकाशपुष्पों की माला को धारण करो। यहाँ चन्द्रकिरणसूत्र व आकाशपुष्पमाला दोनों मिथ्याभूत हैं।

**अथ सिद्धिलक्षणं प्रतिपादयति –**

**सिद्धिः ख्यातेषु चेन्नाम कीर्त्यते तुल्यतोक्तये।**
**युवामेवेह विख्यातौ त्वं बलैर्जलधिर्जलैः॥ ८॥**

**अन्वयः** – तुल्यता + उक्तये ख्यातेषु नाम कीर्त्यते चेत् सिद्धिः। (यथा) इह त्वं बलैः, जलधिजलैः (इति) युवाम् एव विख्यातौ।

**व्याख्या** – तुल्यतोक्तये = समानता-कथनाय, ख्यातेषु = विश्रुतेषु, प्रसिद्धेषु लोकविदितेषु वा, नाम = अभिधानं, कीर्त्यते = कथ्यते, चेत् = तु, सिद्धिनामकं लक्षणम्। यथा – हे राजन्! इह = अस्मिन् संसारे, त्वं = भवान्, बलैः = पराक्रमैः, जलधिः = सागरः, जलैः = अपारसलिलैः, युवां = भवन्तौ (भवान् सागरश्च) विख्यातौ = प्रसिद्धौ।

**भावार्थः** – समानता प्रतिपादनाय यदि उत्कृष्टेन सह वर्णनं क्रियते तदा सिद्धिनामकं लक्षणं भवति। अत्र उदाहरणे कस्यापि नृपस्य पराक्रमवर्णनप्रसङ्गे तस्य तुलना सागरेण सह कृता।

**हिन्दी अर्थ** – किसी की समानता यदि लोकप्रसिद्ध अत्युत्कृष्ट गुणधारी के साथ की जाये तो सिद्धिनामकलक्षण होता है। प्रस्तुत उदाहरण में राजा के बल की समानता सागर के जल से की गई है। सागर में अपार जल है तो तत्साम्य के कारण राजा का बल भी अपार हो जाता है। अतः यहाँ सिद्धिनामक लक्षण है।

**अथ युक्तिलक्षणं निरूपयति –**

**युक्तिर्विशेषसिद्धिश्चेद्विचित्रार्थान्तरान्वयात्।**
**नवस्त्वं नीरदः कोऽपि स्वर्णैर्वर्षसि यन्मुहुः॥ ९॥**

**अन्वयः** – विचित्र+अर्थान्तर+अन्वयात् विशेषसिद्धिः चेत् युक्तिः। (यथा) त्वं कोऽपि नवः नीरदः (असि) यत् मुहुः स्वर्णैः वर्षसि।

**व्याख्या** – विचित्रार्थान्तरान्वयात् = चमत्कृतार्थसम्बन्धात्, विशेषसिद्धिः = विशेषप्रतिपादनं स्यात्, चेत् = तदा, युक्तिर्भवति। यथा – त्वं = हे राजन्! त्वं कोऽपि अपूर्वः, नवः = नूतनः, मेघः = जलदः, यत् त्वं स्वर्णैः = सुवर्णैः सुजलैः, मुहुः = पुनः पुनः सततं वर्षसि = वितरसि, दानं करोषि।

**भावार्थः** – यत्र उपमानापेक्षया उपमेयस्य चमत्कारपूर्णवैशिष्ट्येन वर्णनं क्रियते तत्र युक्तिः लक्षणम् अत्र उदाहरणे वर्णनीयः नृपः उपमेयः जलदः उपमानं परमत्र उपमेये वैशिष्ट्यमस्ति यत् अनवरतं स्वर्णवर्षणं करोति उपमानः मेघस्तु जलवर्षणमेव करोति। इत्थं नृपः तादृशः विचित्रमेघः यः स्वर्ण वर्षणं करोति।

**हिन्दी अर्थ** – जहाँ वर्णनीय विषय में उपमान की अपेक्षा चमत्कारपूर्ण वैशिष्ट्य वर्णित हो वहाँ युक्ति नामक लक्षण होता है। यहाँ वर्णनीय राजा को मेघ के समान नही बताया, परन्तु स्वर्ण वर्षा करने वाले मेघ के तुल्य बताया। अतः यहाँ सिद्ध नामक लक्षण है।

**अथ कार्यलक्षणं प्रतिपादयति –**

**कार्यं फलोपलम्भश्चेदव्यापाराद्वस्तुतोऽथवा।**
**असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवाम्॥ १०॥**

**अन्वयः** – व्यापाराद् अथवा वस्तुतः फलोपलम्भः चेत् कार्यम्। (यथा) असौ शीतांशुः सुभ्रुवां मानच्छेदाय उदेति।

**व्याख्या** – व्यापारात् = प्रयत्नात्, कार्यात्, अथवा = यद्वा, वस्तुतः = स्वतः एव, स्वाभाविकचेष्टया, वास्तविकचेष्ट्या वा (अन्यस्य) फलोपलम्भः = फलप्राप्तिः, चेत् = तु, कार्यं = कार्यनामकं लक्षणम्। यथा – असौ = पुरतो दृश्यमानः इति, शीतांशुः = सुधांशुः, चन्द्रः, सुभ्रुवां = कामिनीनां, मानिनीनां वा, मानच्छेदाय = मानभङ्गाय माननिवारणाय वा, उदेति = उदयं प्राप्नोति।

**भावार्थः** – यत्र अन्यस्य कार्यवशात् स्वतः एव वा अन्यस्य फलागमः स्यात् तत्र कार्यनामकं लक्षणं भवति। उदाहरणेऽस्मिन् चन्द्रोदयव्यापारात् कामिनीनां मानभङ्गरूपा फलप्राप्तिः तेन सह स्वत एव नायकस्य मनोरथप्राप्तिः भवति। अत्र चन्द्रोदयकारणवशात् मानिनीनां मानभङ्गः अनुरक्तनायकस्य कृते च स्वतः फलप्राप्तिः।

**हिन्दी अर्थ** – जहाँ किसी एक कार्य या उसकी चेष्टा का फल अन्यत्र स्वतः प्रतीत हो वह कार्य नामक लक्षण है। ''असौ उदेति'' इस उदाहरण में चन्द्रोदय होने से मानिनियों का मानभङ्ग तथा अनुरक्त प्रेमियों को प्रणय समागम की फलप्राप्ति होना कार्य नामक लक्षण है।

**अथ लक्षणानां निरूपणं कृत्वा, काव्ये तेषाम् उपादेयतां भव्यतां च प्रतिपादयन् उपसंहरति –**

**इत्यादि लक्षणं भूरि काव्यस्याहुर्महर्षयः।**
**स्वर्णभ्राजिष्णुभालत्वप्रभृतीव महीभुजः॥ ११॥**

**अन्वयः** – महीभुजः स्वर्ण – भ्राजिष्णुभालत्व – प्रभृति इव इत्यादि काव्यस्य भूरि लक्षणं महर्षयः आहुः।

**व्याख्या** – महीभुजः = नृपस्य, स्वर्णभ्राजिष्णुभालत्वं = स्वर्णतुल्यदेदीप्यमानललाटत्वं, तत् प्रभृति = तदादि इव, इत्यादिलक्षणं = चिह्नम् इव, काव्यस्य = साहित्यस्य, भूरि = बहु, लक्षणम् = चिह्नं, महर्षयः = भरतादयः, पूर्वाचार्याः आहुः = उक्तवन्तः।

**भावार्थः** – भवितव्यानां द्वाराणि भवन्ति सर्वत्र – यथा सामुद्रिकशास्त्रेषु मुखाकृतिविज्ञानविवेचनमस्ति, तदनुसारेण ललाटे – दिव्यता, आजानुबाहू इत्यादीनिः शरीरचिह्नानि नृपत्वं राजत्वं वा सूचयन्ति तथैव काव्येऽपि एतानि शोभादीनि लक्षणानि सन्ति, यानि काव्यस्य रससिद्धतां श्रेष्ठतां च प्रकटयन्ति।

**हिन्दी अर्थ** – सामुद्रिकशास्त्र में मानव-आकृति, मुखाकृति व ललाट की विस्तीर्ण व दिव्यता देखकर उसके राजा होने के चिह्नों को माना जाता है। उसी प्रकार काव्य में भी वर्णित शास्त्र आदि लक्षणों को काव्याचार्यों ने उत्तम काव्य का वाचक माना है।

**इदानीं तृतीयमयूखस्य समाप्तिं सूचयति –**

**महादेवः सत्रप्रमुखमखविद्यैकचतुरः**
**सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ।**
**तृतीयस्तेनासौ सुकविजयदेवेन रचिते**
**चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः॥**

अत्र तृतीयः तेन असौ इत्युक्त्वा तृतीयमयूखसमाप्तिं सूचयति।

**इति पीयूषवर्षेण श्रीजयदेवेन विरचिते चन्द्रालोके लक्षणनिरूपमो नाम तृतीयो मयूखः समाप्तः।**

## अभ्यास-प्रश्नाः

### बहुविकल्पात्मकप्रश्नाः –

१. चन्द्रालोकस्य तृतीयमयूखस्य वर्णितविषयः कः अस्ति?
(क) अलङ्काराः (ख) दोषाः
(ग) रसाः (घ) लक्षणानि ( )

२. लक्षणानां संख्या अस्ति –
(क) दश (ख) पञ्च
(ग) सप्त (घ) नव ( )

### अतिलघूत्तरात्मकाः प्रश्नाः –

१. 'मुधा निन्दन्ति संसारं कंसारिर्यत्र पूज्यते' इत्यत्र किन्नाम लक्षणम्?
२. 'युवामेवेह विख्यातौ त्वं बलैर्जलधिर्जलैः' इत्यत्र किं लक्षणम्?
३. 'इन्दुर्यदि कथं तीव्रः सूर्यो यदि कथं निशि' अत्र किं लक्षणम्?

### लघूत्तरात्मकाः प्रश्नाः –

१. युक्ति-लक्षणं सोदाहरणं निरूपयत।
२. प्रतिषेधलक्षणं निरूपयत।
३. पदानां व्याकरणसम्मतं विवेचनं कस्मिन् लक्षणे निरूप्यते?

### निबन्धात्मकाः प्रश्नाः –

१. लक्षणानां नामानि लेख्यानि।
२. "स्वर्णभ्राजिष्णुभालत्वप्रभृतीव महीभुजः" इत्यस्य भावार्थं लिखत।
३. यथेच्छं त्रयाणां लक्षणानां सोदाहरणं विवेचनं कुरुत।
४. निम्नाङ्कितानां शब्दानाम् अर्थं संस्कृते लिखत।

| | | |
|---|---|---|
| उषाकान्तेन | शौरिः | ऊहितार्थः |
| निषिध्यते | अवधारणम् | और्वाग्निः |
| दोषाकरः | साध्यसाधने | विचित्रार्थान्तरान्वयात् |
| महीभुजः | सुभ्रुवाम् | |

५. **रिक्तस्थानं पूरयत –**
(क) ...............................................ख्यातिरक्षरसंहतिः।
(ख) इत्यादि .................................... महीभुजः॥
(ग) ...............................................तथानृतम्।
(घ) हेतुस्त्यक्त्वा..................................दहन्॥
(ङ) .............................................. अनादरः।

# चतुर्थो मयूखः

## अथ गुणाः

काव्यस्वरूपनिर्धारणप्रसङ्गे जयदेवः प्रथमे मयूखे ''निर्दोषालक्षणवतीसरीतिः गुणभूषणाः'' इत्युक्तवान् अर्थात् श्लेषादिभिः काव्यगुणैः विभूषिताः एते काव्यगुणाः काव्यस्य आत्मनि रसे तथैव निवसन्ति यथा मानवोचिताः शौर्यादयः गुणाः मानवस्य आत्मनि निवसन्ति। इत्थं व्यक्तित्वप्रकाशकाः मानवगुणाः आत्मनः धर्माः सन्ति शरीरस्य न, तथैव काव्यगुणाः अपि काव्यस्य आत्मनः रसस्य एव धर्माः सन्ति। यथा शरीरमाध्यमेन तु मानवगुणानां बाह्याभिव्यक्तिः भवति तथैव काव्यगुणानाम् अपि बाह्याभिव्यक्तिः काव्यशरीरेण शब्दार्थाभ्याम् एव भवति। साम्प्रतं तान् एव काव्यगुणान् निरूपयति।

**तेषु काव्यगुणेषु प्रथमः श्लेषगुणः –**

**श्लेषो विघटमानार्थघटमानत्ववर्णनम्।**
**स तु शाब्दः सजातीयैः शब्दैर्बन्धः सुखावहः॥ १॥**
**उल्लसतनुतां नीतेऽनन्ते पुलककण्टकैः।**
**भीतया मानवत्यैव श्रियाऽऽश्लिष्टं हरिं स्तुमः॥ २॥**

**अन्वयः** – विघटमानार्थ–घटमानत्व–वर्णनं श्लेषः। सः सजातीयैः शब्दैः सुखावहः बन्धः तु शाब्दः। (उभयोः उदाहरणं यथा) पुलककण्टकैः अनन्ते उल्लसत्तनुतां नीते (सति) भीतया मानवत्या एव श्रिया आश्लिष्टं हरिं स्तुमः।

**व्याख्या** – श्लेषगुणम् आह – विघटमानार्थः = योऽर्थो न घटते इति विघटमानार्थः तादृशस्य असंभाविनः अर्थस्य = अभिधेयस्य, घटमानत्ववर्णनं = संभावित्वप्रतिपादनं, घटमानरूपेणवर्णनं श्लेषः।

सः = श्लेषगुणः, सजातीयैः = समानाकारैः, सदृशैः, शब्दैः = वाचकैः पदैः, सुखावहः = श्रवणसुखदः, बन्धः = पदरचना, तु = तावत्, शाब्दः = शब्दश्लेषः, शब्दसम्बन्धिश्लेषः।

इत्थं श्लेषगुणः द्विविधः अर्थश्लेषः शब्दश्लेषश्च इति उदाहरणं – पुलककण्टकैः = लक्ष्याः रोमाञ्चकण्टकैः, अनन्ते = शेषनागे, उल्लसत्तनुताम् = प्रकटीभवकृशतां, नीते = प्राप्ते, भीतया = भयग्रस्तया, श्रिया = लक्ष्म्या, आश्लिष्टम् = आलिङ्गितं, हरिं = विष्णुं, स्तुमः = प्रणमामः।

**भावार्थः** – यत्र समानाकारैः श्रवणसुखदैः शब्दैः पद्यरचना विधीयते तत्र शब्दश्लेषः। यथा तनुतां नीतेऽनन्ते श्रियाश्लिष्टं पुलककण्टकैः, इत्यादिभिः सदृशैः शब्दैः चमत्कारप्रतीतिः भवति।

यत्र अघटमानस्य घटमानरूपेण वर्णनं क्रियते तत्र अर्थश्लेषः यथा मानवती नायिका कदापि स्वयमेव आलिङ्गनं करोति, परम् अत्र तादृशं वर्णनं कृतं यत् अघटमानम् अपि घटितं, यतोहि मानवत्या अपि लक्ष्म्या हरिः आलिङ्गितः।

इत्थं श्लेषगुणः द्विविधः शब्दश्लेषगुणः अर्थश्लेषगुणश्च इति।

**हिन्दी अर्थ** – श्लेष दो प्रकार का होता है – एक शब्दश्लेष और दूसरा अर्थश्लेष। जहाँ असंभव अर्थ को युक्ति द्वारा संभव करके दिखाया जाय वहाँ अर्थश्लेष और जहाँ समानाकार शब्दों द्वारा चमत्कार जनक रमणीय रचना की जाये वहाँ शब्दश्लेष होता है।

**अथ प्रसादगुणं निरूपयति –**

**यस्मादन्तः स्थितः सर्वः स्वयमर्थोऽवभासते।**
**सलिलस्येव सूक्तस्य स प्रसाद इति स्मृतः॥ ३॥**

**अन्वयः** – सलिलस्य इव सूक्तस्य अन्तः स्थितः सर्वः अर्थः यस्मात् स्वयम् अवभासते सः प्रसादः इति स्मृतः।

**व्याख्या** – सलिलस्य इव = जलस्य इव, सूक्तस्य = सुभाषितस्य काव्यस्य वा अन्तः स्थितः = अन्तर्विद्यमानः, सर्वः = सकलः, समग्रः, अर्थः = आशयः, यस्मात् = यतः, अवभासते = प्रकाशते, स्पष्टतया ज्ञायते, सः = असौ, प्रसाद इति स्मृतः = प्रसादनाम्ना ज्ञायते इत्यर्थः।

**भावार्थः** – यथा निर्मलजलमध्ये पतिताः सर्वे पदार्थाः स्पष्टतया दृश्यन्ते तथैव यस्य काव्यस्य अन्तर्गतः भावः स्पष्टतया प्रतीयते स प्रसादगुणः कथ्यते। अत्र ''यस्मादन्तः'' अस्य प्रसादगुणपरिभाषापद्यस्याशयः झटिति सहजतया ज्ञायते।

**हिन्दी अर्थ** – जिस प्रकार स्वच्छ जल के अन्दर पड़ी हुई वस्तु स्पष्ट दिखाई देती है उसी प्रकार काव्य रचना का गूढ अर्थ यदि सरलता से हृदयङ्गम हो जाय तो वहाँ प्रसाद गुण होता है। प्रस्तुत श्लोक का आशय भी सहजबोध होने से प्रसाद गुणयुक्त है।

**इदानीं समतागुणं प्रतिपादयति –**

**समताऽल्पसमासत्त्वं वर्णाद्यैस्तुल्यताऽथ वा।**
**श्यामला कोमला बाला रमणं शरणं गता॥ ४॥**

**अन्वयः** – अल्पसमासत्वम् अथ वा वर्णाद्यैः तुल्यता – समता। (यथा) श्यामला कोमला बाला रमणं शरणं गता।

**व्याख्या** – अल्पसमासत्वम् = अल्पसमासस्य भावः अल्पसमासत्वं, दीर्घसमासाभावः, अथ वा = यद् वा, वर्णाद्यैः = वर्णादिगणनया, पदादि तुल्यता = समानता वा, समता नामकः गुणः स्यात्। यथा – श्यामला = यौवनमध्यस्था, कोमला = सुकुमारा, कृशाङ्गी वा, बाला = नवोढा, रमणं शरणं = पतिं आश्रयं, गता = प्राप्ता।

**भावार्थः** – यत्र समासस्य अल्पप्रयोगो भवति अथवा प्रयुक्तानां पदानां वर्णसंख्याक्रमे श्रवणसुखदा समानता भवति तत्र समतागुणः ज्ञेयः। श्लोकेऽस्मिन् श्यामला – कोमला– बाला – रमणं–शरणं गता समासरहितः विशिष्टः वर्णक्रमोऽस्ति।

**हिन्दी अर्थ** – समासों का सीमित प्रयोग या वर्ण आदि की समानता 'समता' नामक गुण कहलाता है। (उदाहरण) श्यामल एवं कोमल तरुणी मान रहित होकर शरणस्वरूप अपने पति के पास गई।

प्रकृत उदाहरण में समस्त पदों का प्रयोग न होने के कारण समास की अल्पता का प्रश्न ही नहीं उठता, अतः यह वर्णों की समानता का उदाहरण समझा जाय। तृतीय चरण के श्यामला, कोमला, बाला इन पदों में आकार की समानता तथा चतुर्थ चरण में रमणं शरणं गता में अकार का साम्य होने से तुल्यता समझी जाये।

**अथ समाधिगुणं प्रतिपादयति –**

**समाधिरर्थमहिमा लसद्धनरसात्मना।**
**स्यादन्तर्विशता येन गात्रमङ्कुरितं सताम्॥ ५॥**

**अन्वयः** – लसद्धनरसात्मना अन्तर्विशता येन सतां गात्रम् अङ्कुरितं स्यात् (सः) अर्थमहिमा समाधिः।

**व्याख्या** – लसत् = स्फुरद्, घनः = सान्द्रश्चासौ रसश्चेति लसद्घनरसः, स एव आत्मा = स्वरूपं यस्य सः तेन लसत्घनरसात्मना = प्रकाशमानविपुलरसस्वरूपेण, अन्तर्निशता = हृदयं प्रविशता, येन = अर्थमहिम्ना, सतां = सहृदयानां, काव्यरसिकानां, गात्रं = शरीरम्, अङ्कुरितं = रोमाञ्चितं, स्यात् = भवेत्, सः = असौ, अर्थमहिमा = अर्थचमत्कारः, समाधिः = समाधिनामको गुणो भवति।

**भावार्थः** – अर्थस्य महिमा समाधिः, कीदृशोऽर्थः? चमत्कारजनकः, रसप्रवाहकः, रोमाञ्चकरश्च। योऽर्थः काव्यरसिकान् चमत्करोति, आनन्दयति, रोमाञ्चितं करोति। येन अर्थेन सहृदयानां हृदयं रसाप्लावितं स्यात्। इत्थं समाधिगुणे अर्थस्य महिमा तस्मात् अर्थमहिमा एव समाधिगुणः।

**हिन्दी अर्थ** – जिस चमत्कारी अर्थ के श्रवण से सहृदयों का हृदय गद्गद् होकर उनमें आनन्दाङ्कुर का उद्गम होने लगता है, उस अर्थ के चमत्कार को समाधि कहते हैं। इस श्लोक का अर्थ चमत्कृत सा होने के कारण इसी श्लोक को उदाहरण भी समझना चाहिए।

**अथ माधुर्यगुणं प्रतिपादयति –**

**माधुर्यं पुनरुक्तस्य वैचित्र्यं चारुतावहम्।**
**वयस्य पश्य पश्यास्याश्चञ्चलं लोचनाञ्चलम्॥ ६॥**

**अन्वयः** – पुनरुक्तस्य चारुतावहं वैचित्र्यं – माधुर्यम्। (यथा) वयस्य! अस्याः चञ्चलं लोचनाञ्चलं पश्य पश्य।

**व्याख्या** – पुनः उक्तम् इति पुनरुक्तं तस्य पुनरुक्तपदस्य चारुतावहं = रमणीयतापूर्णं वैचित्र्यं = चमत्कारः विलक्षणता वा, माधुर्यम् = माधुर्यनामगुणः भवति। यथा – वयस्य = हे सखे! अस्याः = एतस्याः, नायिकायाः, चञ्चलं = चपलं, लोचनाञ्चलम् = नयनप्रान्तं, पश्य पश्य = विलोकय, विलोकय।

**भावार्थः** – यत्र पुनरुक्तपदस्य रमणीयता चमत्कारं (जनयति) प्रकटयति तत्र माधुर्यनामको गुणः स्यात्। यथा – वयस्य! पश्य, पश्य अत्र माधुर्यगुणाभिव्यञ्जकाः मधुराः, कोमलाः, वर्णाः प्रयुक्ताः तथा च तैः युक्तैः पुनरुक्तपदैः काव्यसौन्दर्याभिव्यञ्जना जाता।

**हिन्दी अर्थ** – जहाँ शब्दों की पुनरुक्ति होने पर भी रमणीयतापूर्ण वैचित्र्य प्रतीति होती हो वहाँ माधुर्य होता है। इसका उदाहरण यह है कि हे सखे! इस तरुणी के चञ्चल कटाक्षों को देखो। यहाँ पश्य और चञ्चल की पुनरुक्ति होने पर भी अर्थ में एक प्रकार की विचित्रता तथा सुन्दरता प्रतीत होती है।

**अथ ओजगुणं निरूपयति –**

**ओजः स्यात्प्रौढिरर्थस्य सङ्क्षेपो वाऽतिभूयसः।**
**रिपुं हत्वा यशः कृत्वा त्वदसिः कोशमाविशत्॥ ७॥**

**अन्वयः** – अर्थस्य प्रौढिः अतिभूयसः (अर्थस्य) सङ्क्षेपः वा – ओजः। (यथा) त्वदसिः रिपुं हत्वा यशः कृत्वा कोशम् आविशत्।

**व्याख्या** – अर्थस्य = वाच्यस्य अभिधेयस्य वा, प्रौढिः = उत्कर्षाऽधायकरूपेण वर्णनम्, ओजः = ओजो गुणः स्यात्। अयम् अर्थगत ओजोगुणः।

अतिभूयसः = अतिविस्तृतस्य, अतिमहतः वा, अर्थस्य सङ्क्षेपतः = लघुरूपता ओजोगुणः, अयं शब्दगत ओजोगुणः। उभयोरपि उदाहरणम् एकत्रैवास्ति – त्वदसि = तव खड्गः, रिपुं = शत्रुं, हत्वा = मारयित्वा यशः कृत्वा = प्रतिष्ठां विधाय, कोशं = खड्गकोशम्, आविशत् = प्रविष्टवान्।

**भावार्थः** – अविद्यमानस्यापि उत्कर्षद्योतकरूपस्य वर्णनं प्रौढिः। यत्र प्रौढार्थस्य प्रतिपादनं विधीयते तत्रार्थगतः ओजः एवञ्च यत्र सुविस्तृतोऽपि अर्थः संक्षेपेण वर्ण्यते तत्र शब्दगतः ओजः। उदाहरणेऽत्र शत्रुघातकस्तु राजा एव तथापि असिः सर्वम् अकरोत् इति अर्थगत ओजः तथा च रिपुं हत्वा यशः कृत्वा इत्यत्र विस्तृतोऽपि अर्थः संक्षेपेणैव प्रतिपादितः तस्माद् शब्दगतः ओजः।

**हिन्दी अर्थ** – हे राजन्! आपकी तलवार शत्रु को मारकर और यश को फैलाकर म्यान में घुस गई। यहाँ राजा कर्ता है तथा तलवार कारण, फिर भी उसको कर्ता कहा गया है। अत: कर्ता के अनाश्रय खड्ग को उसका आश्रय बताने के कारण अर्थगत ओज हुआ। शत्रु को मारना, यश को फैलाना आदि को थोड़े शब्दों में कहने के कारण शब्दगत ओज हुआ।

**अथ सौकुमार्यगुणं प्रतिपादयति –**

**सौकुमार्यमपारुष्यं पर्यायपरिवर्त्तनात्।**
**स कथाशेषतां यात: समालिङ्ग्य मरुत्सखम्॥ ८॥**

**अन्वय:** – पर्यायपरिवर्त्तनाद् अपारुष्यं – सौकुमार्यं (यथा) स: मरुत्सखम् आलिङ्ग्य कथाशेषतां यात:।

**व्याख्या** – पर्यायपरिवर्तनात् = मूलशब्दस्थाने पर्यायवाचक – पदस्य प्रयोगात्, अपारुष्यं = परुषं नाम कठोरं परुषस्य भाव:, पारुष्यं, पारुष्यस्य अभावो नाम अपारुष्यम् = अकठोरता, अरुक्षता रुचिकरत्वं वा, सौकुमार्यं = सौकुमार्य नाम गुण:। यथा – स: = पुरुष:, मरुत्सखम् = अग्निं, समालिङ्ग्य = समाश्लिष्य, परिष्वज्य, आलिङ्गनं कृत्वा इति कथाशेषतां = जीवनलीलासमाप्तिं, यात: = प्राप्त:।

**भावार्थ:** – यत्र पर्यायवाचकपदप्रयोगाद् यदि अशुभार्थस्य कठोरतायाश्च (पारुष्यस्य) निवारणं जायते तत्र सौकुमार्य नामको गुणो भवति।

अत्र मरणार्थे 'कथाशेषताम्' इति पर्यायपदप्रयोगात् अमङ्गलनिवारणं जातं तस्मादत्र सौकुमार्यनामको गुण:।

**हिन्दी अर्थ** – अमंगल अश्लील पद को हटाकर जहाँ उसी अर्थ का बोधक अन्य शब्द रख दिया जाय वहाँ सौकुमार्य गुण होता है। उदाहरण – वह मनुष्य अग्नि में कथाशेष हो गया। जहाँ मरणरूप अमंगल जनक अर्थ को तत्पर्यायवाची में वर्णित किया है। अत: सौकुमार्य है।

**इदानीम् उदारतागुणं निरूपयति –**

**उदारता तु वैदग्ध्यमग्राम्यत्वात् पृथङ्मता।**
**मानं मुञ्च प्रिये! किञ्चिल्लोचनान्तमुदञ्चय॥ ९॥**

**अन्वय:** – उदारता तु वैदग्ध्यम्। (सा च) अग्राम्यत्वात् पृथक् मता। (यथा) प्रिये मानं मुञ्च, किञ्चित् लोचनान्तम् उदञ्चय।

**व्याख्या** – वैदग्ध्यं = विदग्धस्य भावो वैदग्ध्यं, कुशाग्रबुद्धि: मर्मज्ञता वा, मर्मज्ञजनोचितपदानां प्रयोग: उदारता नामको गुण:।

अग्राम्यत्वात् पृथङ्मता = ग्राम्यदोषस्य अभाव: (अग्राम्यता) उदारता इति वक्तुं न शक्यते। अग्राम्यत्वात् भिन्ना। यथा – हे प्रिये मानं मुञ्च = रोषं त्यज, किञ्चित् = ईषत्, लोचनान्तं = नेत्रप्रान्तम्, उदञ्चय = उन्मीलय।

**भावार्थ:** – वाक्चातुर्यपूर्वकं पदानां प्रयोग: यदि क्रियते तर्हि उदारता नामको गुण:। यद्यपि अवैदग्ध्यं नाम ग्राम्यदोष: परं ग्राम्यदोषस्य परिहार एव उदारता नास्ति। अत्र ''मानं मुञ्च'' उदाहरणेऽस्मिन् वक्ता कथयति यत् नेत्रप्रान्तं निमीलय, प्रत्यक्षतया मां पश्यतु। एवं सवैदग्ध्यम् – इत्येव वाग्वैदग्ध्यं वाक्चातुर्यं वा। तस्मादत्र उदारतानामको गुण:।

**हिन्दी अर्थ** – चतुराई से कही गयी बात को उदारता कहते हैं। यह ग्राम्यत्व दोष का परिहार मात्र नहीं अपितु पृथक् निर्दिष्ट है। उदारता का उदाहरण – हे प्रिये अपने मान अहंकार को छोड़ो और जरा नेत्रप्रान्त को खोलो। यहाँ नेत्रप्रान्त को खोलो यह विदग्धजनोचित वाग् व्यवहार होने से उदारता गुण है।

**जयदेव: स्वाभिमतान् अष्टौ गुणान् निरूप्य कान्त्यर्थव्यक्तिगुणयो: अन्तर्भावं दर्शयन् ''अष्टौ गुणा:'' इति स्वसिद्धान्तं दृढीकरोति –**

**शृङ्गारे च प्रसादे च कान्त्यर्थव्यक्तिसङ्ग्रह:।**
**अमी दश गुणा: काव्ये पुंसि शौर्यादयो यथा॥ १०॥**

**अन्वयः** – शृङ्गारे च प्रसादे च कान्ति + अर्थव्यक्तिसङ्ग्रहः। यथा पुंसि शौर्यादयः (गुणाः भवन्ति, तथैव) काव्ये अमी दश गुणाः (भवन्ति)।

**व्याख्या** – शृङ्गारे = शृङ्गाररसे, प्रसादे = प्रसादगुणे च, कान्त्यर्थव्यक्तिसङ्ग्रहः = कान्तिश्च अर्थव्यक्तिश्च इति कान्त्यर्थव्यक्ती, तयोः संग्रहः कान्त्यर्थव्यक्तिसंग्रहः। अर्थात्, शृङ्गाररसे कान्तिगुणस्य अन्तर्भावः प्रसादगुणे च अर्थव्यक्तिगुणस्य अन्तर्भावः।

यथा पुंसि = पुरुषे, शौर्यादयः = शूरतावीरतादयो गुणाः भवन्ति तथैव काव्ये अमी दशगुणाः = श्लेषप्रसादादयः भवन्ति।

**भावार्थः** – पूर्वाचार्याणां मते दशसंख्यकाः काव्यगुणाः सन्ति, परं जयदेवमतेन अष्टौ एव गुणाः सन्ति, तेषु दशसंख्यकेषु गुणेषु कान्तिगुणः शृङ्गाररसे तथा च अर्थव्यक्तिगुणः प्रसादगुणे एव अन्तर्भवति। इत्थं जयदेव मते अष्टौ एव काव्यगुणाः सन्ति। यथा मानवस्य आत्मनि वीरताशूरतादयः गुणाः भवन्ति तथैव काव्यस्यात्मनि रसे श्लेषप्रसादादयः काव्यगुणाः निवसन्ति। इत्थं जयदेवः गुणानां रसधर्मताम् एव प्रतिपादयति।

**हिन्दी अर्थ** – इस प्रकार जयदेव के मतानुसार आठ काव्यगुण हैं। इसके अतिरिक्त स्वीकृत अन्य गुण 'कान्ति' का अन्तर्भाव शृंगाररस और अर्थव्यक्ति का प्रसाद गुण में ही अन्तर्भाव हो जाता है। जैसे शूरता, दान, दया इत्यादि मानवीय गुणधर्म हैं, उसी प्रकार श्लेष, प्रसादादि काव्यगुण काव्य के धर्म हैं।

**''पुंसि शौर्यादयो यथा'' इत्युक्त्वा जयदेवः गुणानां रसधर्मत्वं प्रतिपादितवान्। साम्प्रतं ''स्त्रीणां तिलकाद्यमिव'' इत्युक्त्वा अलङ्काराणां बाह्यधर्मत्वं निरूपयति –**

**तिलकाद्यमिव स्त्रीणां विदग्धहृदयङ्गमम्।**
**व्यतिरिक्तमलङ्कारं प्रकृतेर्भूषणं गिराम्॥ ११॥**

**अन्वयः** – स्त्रीणां प्रकृतेः व्यतिरिक्तं विदग्धहृदयङ्गमं तिलकाद्यमिव अलङ्कारं भूषणमिव गिराम् (प्रकृतेः व्यतिरिक्तं विदग्धहृदयङ्गमम्)अलङ्कारं भूषणम् (अस्ति।)

**व्याख्या** – स्त्रीणां = सुन्दरीणां, प्रकृतेः = शरीरात्, व्यतिरिक्तं = भिन्नं, विदग्धहृदयङ्गमं = मर्मज्ञहृदयसंवेद्यं, सहृदयावर्णकं वा, तिलकाद्यं = तिलकादिकम्, अलङ्कारम् = आभूषणम्, भूषणमिव = शोभाकारकमिव, गिरां = वाचां, प्रकृतेः = काव्यशरीरात्, व्यतिरिक्तं = भिन्नम्, अलङ्कारम् = अनुप्रासोपमादिकं, भूषणं = शोभासम्पादकमेव भवति।

**भावार्थः** – यथा कामिन्याः बाह्यशोभासम्पादकाः तिलकादयः शाश्वतरूपेण शरीरेण सह सम्बद्धाः न भवन्ति तथैव बाह्यरूपेण काव्यशोभासम्पादकाः उपमारूपकादयः अलङ्कारा अपि काव्यशरीरेण सह शाश्वतरूपेण सम्बद्धाः न भवन्ति। ते काव्यस्य बाह्योत्कर्षकारकाः धर्माः सन्ति।

**हिन्दी अर्थ** – जिस प्रकार स्त्रियों के शरीर में भिन्न तिलकादि अलंकार उनकी शोभा बढ़ाते हुए सहृदयों के हृदय को आनन्द देते हैं उसी तरह वाणी के शरीरकाव्य से भिन्न अनुप्रास, उपमा आदि भी सहृदय-हृदयानन्दवर्द्धक हैं। इस प्रकार गुण काव्य के धर्म हैं और अलंकार काव्य के उत्कर्षधायक होते हैं। मूल में अलंकार शब्द नपुंसक निर्दिष्ट है।

**आचार्य जयदेवेन अष्टौ एव गुणाः स्वीकृताः, परं वामनादिभिः दशगुणाः, तथा भोजराजेन चतुर्विंशतिः – गुणाः स्वीकृताः। अन्ये न्यासादयोऽपि गुणाः भवितुम् अर्हाः न वा इति शङ्कां निवारयन्ति –**

**विचित्रलक्षणो न्यासो निर्वाहः प्रौढिरौचिती।**
**शास्त्रान्तररहस्योक्तिः सङ्ग्रहो दिक् प्रदर्शिता॥ १२॥**

**अन्वयः** – न्यासः, निर्वाहः, प्रौढिः, औचिती, शास्त्रान्तररहस्योक्तिः समूहः (इति न गुणाः किन्तु) विचित्रलक्षणाः (इयं गणना मया) दिक् प्रदर्शिता।

**व्याख्या** – न्यासः, निर्वाहः, प्रौढिः, औचिती, शास्त्रान्तररहस्योक्तिः, संग्रहः इत्यादयो गुणाः सन्ति, किन्तु इमे

वैचित्र्यलक्षणः = वैचित्र्यलक्षणाः एव सन्ति। न्यासादीनाम् इयं गणना मया = जयदेवेन, दिक् प्रदर्शिता = सङ्केतः एव कृतः। परमेते गुणाः न सन्ति।

एतेषां भूषणानां संक्षिप्तपरिचयः अधः प्रस्तूयते –

1. **न्यासः** – विचित्रलक्षणः न्यासः। अर्थात् यत्र विचित्रसूत्रेण पदप्रयोगः साध्यते, तत्र न्यासः भवति। यथा – ज्योत्स्नाकरम्भमुदरम्भरयश्चकोराः। अत्र ''उदरम्भरयः'' इति प्रयोगः चान्द्रसूत्रेण सिद्धः भवति।

2. **निर्वाहः** – यत्र विकल्पः भवति, पुनरपि प्रकृतिसिद्धान्तस्य निर्वहणं क्रियते, तत्र निर्वाहः भवति। यथा – ''सोऽहमाजन्मशुद्धानाम्'' इत्यत्र विकल्पप्राप्ते सत्यपि प्रकृतिसिद्धान्तस्य निर्वहणं कृतमस्ति। अतः निर्वाहः।

3. **प्रौढिः** – यत्र लक्ष्यवाचकशब्दप्रयोगः भवति तत्र प्रौढिः भवति। यथा – ''मन्दाक्रान्ता विसृजति रसं नेक्षुयष्टिः समग्रम्''।

4. **औचिती** – यत्र योग्ये योग्ययोगप्रतिपादनं क्रियते तत्र औचिती भवति। यथा –

''वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥''

5. **शास्त्रान्तररहस्योक्तिः** – अन्यस्मिन् शास्त्रे सिद्धप्रयोगस्य अन्यत्र ग्रहणं क्रियते चेत् शास्त्रान्तररहस्योक्तिः भवति। यथा – ''ज्याकृष्टिबद्धखटकामुखपाणिपृष्ठम्'' इत्यादिकम्।

6. **सङ्ग्रहः** – शास्त्रादिपरिगणितपदार्थानाम् एकस्मिन् लक्ष्ये प्रतिपादनमेव सङ्ग्रहः उच्यते। यथा – ''शृङ्गारी गिरिजानन'' इत्यादिपद्ये शृङ्गारादीनां नवरसानां सङ्ग्रहः विद्यते।

**भावार्थः** – यद्यपि वामनादिभिः दशगुणाः तथा भोजराजेन चतुर्विंशतिः गुणाः प्रतिपादिताः परमेतेषाम् अन्तर्भावः जयदेवसम्मतेषु अष्टगुणेषु एव भवति। अन्येऽपि न्यासः निर्वाहः, प्रौढिः, औचिती, शास्त्रान्तररहस्योक्तिः, सङ्ग्रहः इत्यादिभिः नामभिः ये प्रतिपादिताः एतेऽपि गुणाः न अपितु वैचित्र्यमात्रबोधकाः सन्ति।

**हिन्दी अर्थ** – न्यास, निर्वाह, प्रौढि, औचिती, शास्त्रान्तररहस्योक्ति और संग्रह ये गुण नहीं है। किन्तु केवल वैचित्र्यमात्र के बोधक हैं।

**इदानीं चतुर्थमयूखस्य समाप्तिं सूचयति –**

**महादेवः सत्रप्रमुखमखविद्यैकचतुरः**
**सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ।**
**चतुर्थस्तेनासौ सुकविजयदेवेन रचिते**
**चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः॥**

अत्र 'चतुर्थः तेन असौ' इति एव विशेषः।

**इति जयदेवेन प्रणीतस्य चन्द्रालोकस्य गुणनिरूपणो नाम चतुर्थः मयूखः समाप्तः।**

## अभ्यास-प्रश्नाः

**बहुविकल्पात्मकाः प्रश्नाः –**

१. चन्द्रालोके कति गुणाः वर्णिताः?

(क) दश (ख) अष्टौ
(ग) त्रयः (घ) विंशतिः ( )

२. अधोलिखितेषु जयदेवमते गुणो नास्ति –

(क) प्रसादः (ख) श्लेषः

(ग) समाधिः (घ) न्यासः ( )

३. अर्थव्यक्तेः अन्तर्भावः भवति –

(क) ओजगुणे (ख) प्रसादगुणे

(ग) उदारतागुणे (घ) सर्वेषु एव ( )

**अतिलघूत्तरात्मकाः प्रश्नाः –**

चन्द्रालोकानुसारं वाक्यं सत्यम् अथवा असत्यम् इति लिखत –

१. ग्राम्यत्वदोषस्य परिहारः एव उदारता गुणः।

२. अन्तःस्थितः सर्वः अर्थः ओजगुणे स्वयम् अवभासते।

३. विघटनार्थं – घटमानत्व – वर्णनं समता।

४. अल्पसमासत्वं समाधिः।

५. शृङ्गाररसे अर्थव्यक्तिगुणस्य प्रसादे च कान्तिगुणस्य अन्तर्भावः भवति।

६. चन्द्रालोके एकादशगुणाः प्रतिपादिताः।

७. पर्यायपरिवर्तनाद् अपारुष्यं समतागुणः।

८. न्यासो निर्वाहः प्रौढिः औचिती इत्यादयः जयदेवमतेन गुणाः सन्ति।

**लघूत्तरात्मकाः प्रश्नाः –**

१. माधुर्यगुणं सोदाहरणं विवेचयत।

२. समतागुणस्य लक्षणं लिखत।

३. समाधिगुणं सोदाहरणं प्रतिपादयत।

४. चन्द्रालोके कति गुणाः वर्णिताः? नामोल्लेखं कुरुत।

५. ''पुंसि शौर्यादयो'' यथा इति प्रतिपादयत।

६. रिक्तस्थानानि पूरयत –

(क) विघटमानार्थघटमानत्व वर्णनम् ...............................

(ख) अन्तः स्थितः सर्वः अर्थः स्वयं अवभासते .......................

(ग) अल्पसमासत्वं ...............................

(घ) अर्थमहिमा ......................................

(ङ) पर्यायपरिवर्तनाद् अपारुष्यम् .....................

**निबन्धात्मकप्रश्नाः**

१. श्लेषगुणं सोदाहरणं प्रतिपादयत।

२. श्यामला कोमला बाला रमणं शरणं गता इत्यत्र को गुणः? लक्षणं विलिख्य संगतिर्विधेया।

३. 'सुखयतु मयूखः सुमनसः' पद्यं लिखित्वा भावार्थो लेख्यः।

४. गुणालङ्कारयोः भेदः विधेयः।

५. प्रत्येकं गुणस्य लक्षणबोधकः विशिष्टशब्दः लेखनीयः।

# पञ्चमो मयूखः

## अथालङ्काराः

अलङ्कारशब्दः काव्यशोभासम्पादकानाम् अनुप्रासोपमादीनां वाचकः। अलङ्काराः काव्यं तथैव भूषयन्ति यथा स्वर्णालङ्काराः हारादयः मानवशरीरस्य शोभाम् उत्कर्षयन्ति। काव्यस्वरूपनिर्धारणप्रसङ्गेऽपि जयदेवः ''सालङ्कारः'' इत्युक्तवान्। **अधुना अलङ्कारस्वरूपं प्रतिपादयति –**

**शब्दार्थयोः प्रसिद्ध्या वा कवेः प्रौढिवशेन वा।**
**हारादिवदलङ्कारः सन्निवेशो मनोहरः॥ १॥**

**अन्वयः** – कवेः प्रसिद्ध्या प्रौढिवशेन वा हारादिवत् शब्दार्थयोः मनोहरः सन्निवेशः अलङ्कारः।

**व्याख्या** – कवेः = काव्यकारस्य, प्रसिद्ध्या = परम्परया, प्रौढिवशेन = प्रगल्भकल्पनया, वा = अथवा (विकल्पार्थकम् अव्ययपदं) हारादिवत् = हारकुण्डलादिवत्, शब्दार्थयोः = वाच्यवाचकयोः, मनोहरः = रमणीयः, सन्निवेशः = निबन्धनं प्रयोगः वा, अलङ्कारः = अलङ्कारः इति कथ्यते।

**भावार्थः** – कवेः परम्परया प्रगल्भकल्पनया वा शब्दानाम् अर्थानां च रमणीयः प्रयोगः अलङ्कारः कथ्यते। अलङ्काराः काव्यस्य उत्कर्षहेतवः सन्ति। यथा मानवशरीरस्य बाह्यशोभासम्पादकाः हारकटककुण्डलादयः भवन्ति तथैव काव्यस्यापि ये शोभाकारकाः सन्ति ते अलङ्काराः उच्यन्ते। तेषु अनुप्रासादयः शब्दालङ्काराः उपमारूपकादयश्च अर्थालङ्काराः सन्ति। शब्दालङ्कारेषु अलङ्कारमूलकस्य शब्दस्य पर्यायः प्रयोक्तुं न शक्यते, परम् अर्थालङ्कारेषु अपेक्षितार्थबोधकः शब्दपर्यायोऽपि प्रयोक्तुं शक्यते।

**विशेषः** – अलङ्क्रियते अनेन इति अलङ्कारः। उक्तमपि काव्यस्य शब्दार्थौ शरीरं, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, अलङ्काराः कटककुण्डलादिवत् इति। साहित्यदर्पणकारेणापि उक्तं यत् – उत्कर्षहेतवः प्रोक्ताः गुणालङ्काररीतयः।

इत्थम् अलङ्काराः काव्योत्कर्षहेतवः सन्ति, काव्यरचनायाम् एते अपेक्षिताः। अलङ्कारसम्प्रदायपोषकाः आचार्याः तु एवमपि उक्तवन्तः यत् ''गुणालङ्काररहिता विधवेव सरस्वती।'' तथा च न कान्तमपि निर्भूषं विभाति वनिताननम्।

**हिन्दी अर्थ** – पूर्व के मयूखों में दोष, लक्षण तथा गुणों के निरूपण करने के बाद अब अलंकारों का निरूपण करते हैं। 'अलं क्रियतेऽनेनेति अलङ्कारः' इस कारणव्युत्पत्ति के अनुसार जिससे सजाया जाय उसे अलङ्कार कहते हैं। अर्थात् अलंकार शब्द शरीर शोभाजनक हार आदि की तरह काव्य शोभाधायक अनुप्रास, उपमा आदि अलंकारों का बोधक है।

**शब्दालङ्कारेषु प्रथमं छेकानुप्रासनामकम् अलङ्कारं निरूपयति –**

**स्वरव्यञ्जनसन्दोहव्यूहा-मन्दोहदोहदा ।**
**गौर्जगज्जाग्रदुत्सेका छेकानुप्रासभासुरा॥ २॥**

**अन्वयः** – स्वर-व्यञ्जन-सन्दोहव्यूहा अमन्द+ऊह – दोहदा, जगत+जाग्रत्+उत्सेका गौः छेकाऽनुप्रासभासुरा (भवति)।
**व्याख्या** – स्वराः = अच् वर्णाः अकारादयः, व्यञ्जनानि = हल्वर्णाः, ककारादीनि च, स्वरव्यञ्जनानि तेषां सन्दोहः = समूहः, तस्य व्यूहः = क्रमिकविन्यासः, आवृत्तिः इत्याशयः, स्वरव्यञ्जनसमूहावृत्तिः इत्यर्थः अमन्दो नाम अविलम्बः शीघ्रो वा, ऊहो नाम वितर्कः निर्धारणं वा, दोहा नाम दुग्धं तं ददाति इति अमन्दोहदोहदाः अविलम्बं वितर्करूपदुग्धप्रदा। अविलम्बं यस्याः स्वरूपनिर्धारणं भवति इत्यभिप्रायः। (तादृशी गौः = वाणी) जगज्जाग्रदुत्सेका = संसारे विदितोत्कर्षा, तादृशी गौः = वाणी, छेकानुप्रासभासुरा = छेकानुप्रासालङ्कारशोभिता भवति।
**भावार्थः** – यत्र स्वरव्यञ्जनसमूहस्य आवृत्तिः स्यात् तत्र छेकानुप्रासनामकः शब्दालङ्कारो भवति। स्वरव्यञ्जनसन्दोहव्यूहामन्दोहदोहदा अस्मिन् एव पदे सन्दो-मन्दो, दोह-दोह, सन्दोह-मन्दोह आदि पदेषु स्वरव्यञ्जनसमूहस्य आवृत्तिः स्पष्टमेव अविलम्बमेव च प्रतीयते।
**विशेषः** – छेकः = विदग्धजनः, चतुरो वा अनुप्रासः, अनु = एकदा कथनं तदनु कथनोत्तरं, त एव वर्णाः, प्रकर्षेण आस्यन्ते, इति सः – अनुप्रासः।

रसस्य अनुगुणं प्रकर्षेण वर्णानाम् आवृत्तिमूलकः न्यासः अनुप्रासः, छैकैः = विदग्धैः, प्रयुक्तः अनुप्रासः छेकानुप्रासः। इत्थं स्वरव्यञ्जनसमूहावृत्तिमूलकोऽयम् अनुप्रासालङ्कारस्य प्रथमो भेदः यत्र अनेकेषां स्वरव्यञ्जनानाम् एकैकवारम् आवृत्तिः भवति।

**हिन्दी अर्थ** – स्वर और व्यञ्जन के समूह की आवृत्ति से युक्त, एककालिक ज्ञान उत्पन्न कराने वाली तथा संसार में प्रसिद्ध उत्कर्षवाली वाणी छेकानुप्रास से सुशोभित होती है। अर्थात् जहाँ अनेक स्वर या अनेक व्यञ्जन की एक बार आवृत्ति की जाय वहाँ छेकानुप्रास होता है। जैसे इसी पद्य में 'स्वरव्यञ्जनसन्' इस अंश में अकाररूप स्वर की आवृत्ति। दोहव्यूहा – इस अंश में व्यञ्जनों की आवृत्ति है। दोहदोहा यहाँ स्वर और व्यञ्जन दोनों की आवृत्ति है। अतः यहाँ छेकानुप्रास है। यह पद्य स्वयं इस अलंकार का उदाहरण है।

**अथ वृत्त्यनुप्रासालङ्कारं निरूपयति –**

**आवृत्तवर्णसम्पूर्णं वृत्त्यनुप्रासवद्वचः।**
**अमन्दानन्दसन्दोह स्वच्छन्दास्पद-मन्दिरम्॥ ३॥**

**अन्वयः** – आवृत्तवर्णसम्पूर्णम् अमन्द+आनन्द+सन्दोह – स्वच्छन्द-आस्पद-मन्दिरं वचः वृत्त्यनुप्रासवद् भवति।
**व्याख्या** – आवृत्तः = पुनः पुनः, वर्णः = अकार-ककारादिः, सम्पूर्णं = परिपूर्णम्, आवृत्तवर्णपरिपूर्णम्, अमन्दः = अत्यधिकः, आनन्दः = हर्षः, सन्दोहः = समूहः, स्वच्छन्दं = स्वतन्त्रम् इति, आस्पदम् = आश्रयः निवासो वा मन्दिरं = गृहं भवनं वा, प्रचुरहर्षपुञ्जस्वतन्त्रनिवासभवनम्। तादृशः वचः = वचनं, वृत्त्यनुप्रासवद् = वृत्त्यनुप्रासयुक्तं भवति। वृत्त्यनुप्रासनामकोऽलङ्कारो भवति।
**भावार्थः** – यत्र एकस्य अनेकस्य वा वर्णस्य अनेकवारम् आवृत्तिः स्यात् सः वृत्त्यनुप्रासः भवति। रसानुगुणा वर्णरचना वृत्तिरिति। आवृत्तवर्णसम्पूर्णम् अस्मिन् पदे पूर्वार्धे वर्ण-पूर्ण इति रेफस्य णकारस्य च उत्तरार्धे च नकार-दकारयोः अनेकधा प्रयोगः कृतः। इत्थम् अनेकवर्णानाम् अनेकधा आवृत्तिः कृता। छेकानुप्रासे तु अनेकस्य एकवारम् आवृत्तिः भवति परं वृत्त्यनुप्रासे एकस्य अनेकस्य वा अनेकवारम् आवृत्तिः जायते।
**हिन्दी अर्थ** – जहाँ एक वर्ण या अनेक वर्ण की अनेक बार आवृत्ति हो वहाँ वृत्त्यनुप्रास होता है। जैसे इसी श्लोक के उत्तरार्द्ध में 'न्द' की बार-बार आवृत्ति हुई है। अतः यहाँ वृत्त्यनुप्रास है।

**अथ लाटानुप्रासालङ्कारं निरूपयति –**

**लाटानुप्रासभूर्भिन्नाभिप्राया पुनरुक्तता।**
**यत्र स्यान्न पुनः शत्रोर्गर्जितं तर्जितं जितम्॥ ४॥**

**अन्वयः** – भिन्न+अभिप्राया पुनरुक्तता लाटानुप्रासभूः (भवति)। (यथा) यत्र शत्रोः गर्जितं पुनः न स्यात् तद् जितम् जितम्।

**व्याख्या** – भिन्नाभिप्राया = भिन्नः = पूर्वकथितशब्दापेक्षया अन्यः अभिप्रायः यस्या सा भिन्नाभिप्राया = भिन्नतात्पर्या इति, पुनरुक्तता = पदानां पुनः पुनः प्रयोगता, लाटानुप्रासाभूः = तत्र लाटानुप्रासः भवति।

यत्र = यस्मिन्, पुनः = भूयः, शत्रोः = रिपोः, गर्जितं = गर्जनं, न स्यात् = न भवेत्, तत् जितम् = स विजयः, जितम् = यथार्थतया सफलम्।

**भावार्थः** – यत्र पुनरुक्तपदैः भिन्नाभिप्रायः प्रकाश्यते, सः लाटानुप्रासः। यत्र जितं जितम् इति पुनरुक्तपदं, येन विजयस्य सफलतायाः अर्थस्य प्रतीतिर्भवति।

गुजरात-प्रान्ते लाट-क्षेत्रं, लाटवासिनां प्रियोऽयम् अलङ्कारः। लाटदेशस्य कवयः अस्य प्रयोगं कृतवन्तः तस्माद् लाटजनवल्लभाद् लाटानुप्रासः उच्यते।

**हिन्दी अर्थ** – जहाँ भिन्न-भिन्न अभिप्राय के प्रकाशक पुनरुक्तपद हों वहाँ लाटानुप्रास हुआ करता है। जैसे जहाँ शत्रू पुनः न गरज सके, वही जीतना जीतना है अर्थात् सफल है।

यहाँ 'जितं जितं' यह पुनरुक्त है, किन्तु प्रथम जित पद का विजय अर्थ है और दूसरे जित पद का सफल अर्थ है। अतः दोनों पदों को भिन्नाभिप्रायक होने के कारण यहाँ लाटानुप्रास है।

**अथ स्फुटानुप्रासालङ्कारं निरूपयति –**

**श्लोकस्यार्धे तदर्धे वा वर्णावृत्तिर्यदि ध्रुवा।**
**तदा मता मतिमतां स्फुटानुप्रासता सताम्॥ ५॥**

**अन्वयः** – श्लोकस्य अर्धे तर्धे वा यदि वर्णावृत्तिः ध्रुवा – तदा मतिमतां सतां स्फुटानुप्रासता मता।

**व्याख्या** – श्लोकस्य = पद्यस्य, अर्धे = अर्धभागे, पूर्वार्धे उत्तरार्धे वा इति तस्य अर्धे इति तदर्धे = चतुर्थांशे चरणे वा, यदि वर्णावृत्तिः = यदि वर्णानां पुनः प्रयोगः वा, ध्रुवा = निश्चिता, तदा = तर्हि, मतिमतां = बुद्धिमतां, सतां = सज्जनानां, स्फुटानुप्रासता मता = स्फुटानुप्रासः स्वीकृतः। काव्यविदः तं स्फुटानुप्रासनामकम् अलङ्कारं स्वीकुर्वन्ति इति।

**भावार्थः** – सामान्यरूपेण श्लोके चत्वारः चरणाः भवति। यदि तस्य अर्धभागे चतुर्थ चरणे वा अन्ते वर्णानां निश्चिता आवृत्तिः स्यात् तदा काव्यमर्मज्ञाः स्फुटानुप्रासनामकम् अलङ्कारं स्वीकुर्वन्ति। अत्र अस्मिन् एव लक्षणे पद्ये पूर्वार्धे वा शब्दः उत्तरार्धे च ताम् इति पुनरावृत्तः। एष एव अन्त्यानुप्रासनाम्नापि ज्ञायते।

**हिन्दी अर्थ** – श्लोकों के पूर्वार्द्ध या उत्तरार्द्ध में अथवा श्लोकार्द्ध के अर्द्धभाग में प्रत्येक पाद में यदि वर्णों की आवृत्ति हो तो बुद्धिमानों ने उसे स्फुटानुप्रास कहा है। वर्णावृत्ति दो प्रकार से होती है, एक तो आदि से अन्त तक वर्णों की आवृत्ति अथवा चरणों के अन्त में उसी वर्ण का रहना दूसरी आवृत्ति मानी गयी है। जैसे इसी श्लोक के उत्तरार्द्ध में आदि से तकार-मकार की आवृत्ति प्रथम भेद का उदाहरण है। पूर्वार्द्ध और पूर्वार्द्धार्द्ध में वा शब्द का तथा उत्तरार्द्ध और उत्तरार्द्धार्द्ध में ताम् पद का साम्य दूसरे भेद का उदाहरण है। इसीलिए यहाँ स्फुटानुप्रास है।

**अथ अर्थानुप्रासं निरूपयति –**

**उपमेयोपमानादावर्थानुप्रास इष्यते।**
**चन्दनं खलु गोविन्दचरणद्वन्द्ववन्दनम्॥ ६॥**

**अन्वयः** – उपमान+उपमेय+आदौ (यदि वर्णावृत्तिः ध्रुवा तर्हि)अर्थानुप्रास इष्यते। (यथा) गोविन्दचरणद्वन्द्ववन्दनं खलु चन्दनम्।

**व्याख्या** – उपमेयं = वर्ण्यं प्रस्तुतं वा, उपमानम् = अवर्ण्यम्, अप्रस्तुतम्, उपमेयं च उपमानं चेति उपमेयोपमाने तयोः

उपमेयोपमानयोः = वर्ण्याऽवर्णयोः यदि वर्णावृत्तिः ध्रुवा नियता, तदार्थानुप्रासः = अर्थानुप्रासालङ्कारः इष्यते। उपमेयपदे उपमानपदे च वर्णसाम्येऽर्थानुप्रासालङ्कारो भवति इति भावः। यथा – गोविन्दस्य = भगवतः श्रीकृष्णस्य, चरणयोः = पादपङ्कजयोः, द्वन्द्वं = युगलं, तस्य वन्दनं = प्रणतिः इति खलु = निश्चयेन, चन्दनं = भद्रश्रीः।

**भावार्थः** – यत्र उपमानोपमेययोः वर्णावृत्तिः स्यात् तत्र अर्थानुप्रासनामकः शब्दालङ्कारो भवति। यथा – चन्दनं खलु अस्मिन् उदाहरणे गोविन्दचरणद्वन्द्ववन्दनम् इति उपमेयपदं, चन्दनम् इति उपमानपदम् अत्र उभयोरेव 'न्दनम्' इति वर्णावृत्तिः विद्यते। तस्मादत्र अर्थानुप्रासनामकोऽलङ्कारोऽस्ति।

**हिन्दी अर्थ** – जहाँ उपमेय और उपमान में यदि वर्णसाम्य हो तो वहाँ अर्थानुप्रास होता है। जैसे गोविन्द के पादपद्मद्वय की वन्दना चन्दन के समान शान्तिप्रद है। यहाँ वन्दनरूप उपमेय तथा चन्दन रूप उपमान में 'न्द' का साम्य (आवृत्ति) है। इसलिए यहाँ अर्थानुप्रास अलङ्कार है।

**अथ पुनरुक्तप्रतीकाशम् अलङ्कारं प्रस्तौति –**

**पुनरुक्तप्रतीकाशं पुनरुक्तार्थसन्निभम्।**
**अंशुकान्तं शशी कुर्वन्नम्बरान्तमुपैत्यसौ॥ ७॥**

**अन्वयः** – पुनरुक्तार्थ – सन्निभं पुनरुक्तप्रतीकाशम् (भवति)। (यथा) – असौ शशी अम्बरान्तम् अंशुकान्तं कुर्वन् उपैति।

**व्याख्या** – पुनः = भूयः, उक्तः अर्थः यस्मिन् वाक्ये तत् पुनरुक्तार्थं, पुनरुक्तार्थेन संन्निभम् = तुल्यम्, इति पुनरुक्तार्थसन्निभम् = पुनः कथितार्थसदृशम्, इति पुनरुक्तप्रतीकाशं (भवति) = पुनरुक्तप्रतीकाशनामालङ्कारः भवति।

यथा – असौ = दृश्यमानः, शशी = चन्द्रमाः, अम्बरान्तं = आकाशमध्यम्, अंशुभिः =किरणैः, कान्तं = सुन्दरं, कुर्वन् = विदधद् उपैति = आगच्छति।

**भावार्थः** – यत्र अर्थः पुनः उक्त इव प्रतीयते किन्तु वस्तुत पुनरुक्तो न भवति, पुन उक्तवद् आभास एव सञ्जायते वस्तुतस्तु अर्थभिन्नता एव भवति। यथा – अत्र अंशुकान्तम् अम्बरान्तं चेति अनयोः पदयोः वस्त्रार्थे आभासः सञ्जायते। यथा अंशुकम्, अम्बरम् इति पदम् अर्थविश्लेषणेन तद्भेदोऽपि स्फुटं ज्ञायते, अंशुभिः = किरणैः कान्तं = सुन्दरं, तथा अम्बरं = गगनमिति अस्ति।

**विशेषः** – अलङ्कारोऽयं पुनरुक्तवदाभास नाम्नापि ज्ञायते। एषः शब्दार्थोभयालङ्कारोऽस्ति।

**हिन्दी अर्थ** – जहाँ ऐसे शब्द प्रयुक्त हों, जिनका अर्थ पुनः उक्त अर्थ के समान हो वहाँ पुनरुक्त-प्रतीकाश नामक अलङ्कार होता है। जैसे वह चन्द्रमा अपनी किरणों से आकाश के मध्य भाग को कान्त-सुन्दर बनाता हुआ आ रहा है। यहाँ अंशुक तथा अम्बर ये दोनों शब्द वस्त्र वाचक होने के कारण पुनरुक्तार्थ हैं। अतः यहाँ पुनरुक्तार्थ प्रतीकाश नामक अलङ्कार है। वस्तुतः अम्बर पद आकाश वाचक है।

**अथ यमकालङ्कारं निरूपयति –**

**आवृत्तवर्णस्तवकं स्तवकन्दाङ्कुरं कवेः।**
**यमकं प्रथमा धुर्यमाधुर्यवचसो विदुः॥ ८॥**

**अन्वयः** – धुर्य-माधुर्यवचसः प्रथमाः कवेः स्तवकन्दाङ्कुरम् आवृत्तवर्णस्तवकं यमकं विदुः।

**व्याख्या** – धुर्य – माधुर्यवचसः = माधुर्यपरिपूर्ण वाचः इति। तादृशाः प्रथमाः = पूर्वाचार्याः, कवेः = काव्यकारस्य, स्तवकन्दाङ्कुरं = स्तुतिबीजप्ररोहं, कवेः प्रशंसाकारणभूतम् इति, आवृत्तवर्णस्तवकं = पुनः प्रयुक्तवर्णसमूहं, यमकं = यमकनामकम् अलङ्कारं, विदुः = कथयन्ति।

**भावार्थः** – यमकप्रयोगेण काव्यकाराः प्रशंसां लभन्ते। मधुरभाषिणः पूर्वाचार्याः कथयन्ति यत् भिन्नार्थबोधकस्य

वर्णसमूहस्य आवृत्तिः विधीयते तत्र यमकनामकः शब्दालङ्कारो भवति। अत्र मा-धुर्य माधुर्य इति वर्णसमूहस्य आवृत्तिः कृता।

**विशेषः** – शब्दस्य अथवा वर्णसमूहस्य पुनः प्रयोगे अर्थभेदे सति एव यमकं भवति। आवृत्तवर्णसमूहः सार्थको निरर्थको वा भवितुम् अर्हति। अत्र उलयोः इलयोः बवयोः नणयोः सविसर्गाऽविसर्गयोः च अभेदः मन्यते।

**हिन्दी अर्थ** – मधुरभाषी विद्वानों में श्रेष्ठ आलङ्कारिकों ने, कवि की प्रशंसा करने वाले अनेक वर्णों की आवृत्ति के समूह को अलङ्कार कहते हैं। जैसे इसी पद्य में स्तबक-स्तवक, माधुर्य-माधुर्य इन दोनों जगहों पर वर्ण समूह की आवृत्ति है। इसलिए यहाँ यमक अलङ्कार है।

इस प्रकार सार्थक और निरर्थक पदों के जोड़ों को यमक कहते हैं।

**विशिष्टाकारे स्थापिताः वर्णाः विशिष्टम् आकारं प्रकटयन्ति तन्निर्मितं चित्रम् एव चित्रकाव्यनाम्ना निरूपयति–**

**काव्यवित्प्रवरैश्चित्रं खड्गबन्धादि लक्ष्यते।**
**तेष्वाद्यमुच्यते श्लोकद्वयी सज्जनरञ्जिका॥ ९॥**
**कामिनीव भवेत्खड्गलेखा चारुकरालिका।**
**काश्मीरसेकरक्ताङ्गी शत्रुकण्ठान्तिकाश्रिता॥ १०॥**

**अन्वयः** – काव्यवित्प्रवरैः खड्गबन्धादि चित्रं लक्ष्यते। तेषु आद्यं सज्जनरञ्जिका श्लोकद्वयी उच्यते। (राजन्!) भवत्खड्गलेखा कामिनी इव चारुकरालिका काश्मीरसेकरक्ताङ्गी शत्रुकण्ठ+अन्तिक+आश्रिता।

**व्याख्या** – काव्यवित् प्रवरैः = कविश्रेष्ठैः काव्यमर्मज्ञैः वा, खड्ग इव बन्धः = रचना यस्मिन् स खड्गबन्धः, आदिपदेन पद्मबन्धादीनां ग्रहणम्। एतादृशी रचना चित्रं = चित्रालङ्कारः कथ्यते। तेषु = खड्गपद्मबन्धादिषु, सज्जनरञ्जिका = काव्यज्ञमनोविनोदिनी, आद्यं = प्रथमं, श्लोकद्वयी = द्वौ श्लोकौ खड्गबन्धात्मकौ, उच्यते = कथ्यते।

**भावार्थः** – यदा खड्ग-पद्ममुरजाद्याकारेषु वर्णविन्यासः (क्रियते) उपनिबध्यते तदा तैः विशिष्टरूपेण विन्यस्तैः वर्णैः चित्रविशेषस्य निर्माणं भवति। यदि सा चित्राकृतिः खड्गस्य तर्हि खड्गबन्ध-चित्रकाव्यं यदि पद्मस्य तर्हि पद्मबन्ध-चित्रकाव्यम् उच्यते। अत्र काव्यवित्प्रवरैः इति पद्यद्वयमेव खड्गबन्ध-चित्रस्य उदाहरणम्।

**विशेषः** – विविधपत्रिकासु बालविनोदाय अङ्कानां विशिष्टाकारक्रमः लिख्यते तेषाम् अङ्कानां योजनेन कस्यापि पशोः, पक्षिणः वस्तुनः वा निर्माणं भवति। एतस्य मूले चित्रालङ्कारस्य रचनापद्धतिरेवास्ति। चित्रालङ्कारेऽपि वर्णानां शब्दानां वा विशिष्टक्रमयोजनेन चित्रविशेषस्य निर्माणं क्रियते तदेव चित्रकाव्यं चित्रालङ्कारो वा उच्यते। चित्रालङ्कारमूले शब्दाडम्बरस्य पाण्डित्यप्रदर्शनं भवति।

**हिन्दी अर्थ** – काव्य के मर्म को जानने वाले श्रेष्ठ विद्वानों ने खड्गाकार और पद्माकार में सन्निविष्ट काव्य जहाँ हो वहाँ चित्रालङ्कार कहा है। उनमें सज्जनों के मनोरञ्जन के लिए दो श्लोकों में होने वाले पहले को खड्गबन्ध कहते हैं।

हे राजन्! सुन्दर हस्त और ललाट वाली, केसर के लेप से युक्त तथा अनुरागपूर्ण अंग वाली नायिका के समान आपकी सुन्दर, तेज, केसर के लेप की तरह अंगवाली तलवार शत्रुओं के गले के पार्श्ववर्ती प्रदेश का अवम्बन कर रही है।

**इदानीम् अर्थालङ्काराणां निरूपणक्रमे सर्वप्रथमम् उपमां निरूपयति –**

**उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।**
**हृदये खेलतोरुच्चैस्तन्वङ्गीस्तनयोरिव॥ ११॥**

**अन्वयः** – हृदये खेलतोः उच्चैः तन्वङ्गीस्तनयोः इव यत्र द्वयोः (उपमानोपमेययोः) सादृश्यलक्ष्मीः उल्लसति (तत्र) उपमा।

**व्याख्या** – हृदये = वक्षःस्थले, खेलतो = विलसतोः, शोभमानयोः समुच्छलतोः वा, उच्चैः = उच्चयोः, तन्वङ्गीस्तनयोः = सुन्दरीकुचयोः, इव = यथा, यत्र = यस्मिन् काव्ये, द्वयोः = उपमानोपमेययोः, सादृश्यलक्ष्मीः = सादृश्यशोभां, उल्लसति = विराजते, तत्र = तस्मिन् काव्ये, उपमा = उपमालङ्कारः।

**भावार्थः** – यत्र उपमानोपमेययोः समानता काव्यशोभां प्रकाशते तत्रोपमालङ्कारः भवति। अत्र अस्मिन्नेव पद्ये उपमानोपमेययोः समानता तन्वङ्गीस्तनद्वयोः इव उक्ता तस्मादत्र उपमालङ्कारः।

**विशेषः** – उपमालङ्कारे चत्वारि तत्त्वानि भवन्ति।

**उपमेयम्** – यस्य वर्णनं क्रियते तद् उपमेयम् उच्यते।

**उपमानम्** – येन सह तुलना समानता वा वर्ण्यते तद् उपमानं भवति।

**साधारणधर्मः** – द्वयोः उपमानोपमेययोः मध्ये या समानता, सः एव साधारणधर्मः।

**उपमावाचकशब्दः** – साधारणधर्मस्य बोधकाः शब्दाः।

यत्र चत्वारि तत्त्वानि भवन्ति, सा पूर्णोपमा उच्यते, परं यत्र एकस्यापि तत्त्वस्य अभावो भवति सा लुप्तोपमा भवति। अग्रे उपमेयम् उपमानं च अवलम्ब्य ये येऽपि अलङ्काराः सन्ति ते सर्वे 'उपमामूलकाः' इत्युच्यन्ते, कारणं स्पष्टं यत् तेषां मूले उपमायाः अवधारणा एव भवति।

**हिन्दी अर्थ** – सुन्दरी नायिका के वक्षःस्थल पर छलकते हुए उभरे स्तनों की तरह जहाँ उपमान और उपमेय दोनों समानता की शोभा से विकसित हों वहाँ उपमा अलङ्कार होता है।

**अथ अनन्वयालङ्कारं निरूपयति –**

**उपमानोपमेयत्वे यत्रैकस्यैव जागृतः।**
**इन्दुरिन्दुरिवेत्यादौ भवेदेवमनन्वयः॥ १२॥**

**अन्वयः** – यत्र एकस्य एव उपमानोपमेयत्वे जागृतः (तत्र) इन्दुः इन्दुः इव इत्यादौ एवम् अनन्वयः भवेत्।

**व्याख्या** – यत्र = यस्मिन् वर्णने सन्दर्भे वा, एकस्य एव = वर्ण्यमानस्य पदार्थस्य एव, उपमानोपमेयत्वे = उपमानत्वम् उपमेयत्वं च इति, जागृतः = भवतः, तत्र इन्दुः = चन्द्रः चन्द्र इव इत्यादौ = एवं विधे, एवम् = इत्थम्, अनन्वयः भवेत् = अनन्वयनामकः अलङ्कारः स्यात्।

**भावार्थः** – उपमाऽलङ्कारे उपमयेस्य तुलना उपमानेन सह क्रियते, तत्र द्वयोः उपमानोपमेययोः पृथक्-पृथक् रूपेण नामोल्लेखः भवति, परं यत्र यस्य पदार्थस्य उपमेयरूपेण वर्णनं तस्य एव उपमानरूपेण वर्णनं स्यात् तत्र अनन्वयनामकोऽलङ्कारः।

यथा ''इन्दुरिन्दुरिव'' अत्र चन्द्रः चन्द्र इव अस्ति पृथक् रूपेण उपमानं नास्ति, अर्थात् एकस्मिन् पदार्थे एव उपमानोपमेययोः द्वयोः विद्यमानतास्ति। प्रसिद्धम् अन्यद् उदाहरणं यथा गगन....।

**हिन्दी अर्थ** – जहाँ उपमान और उपमेय एक ही हो वहाँ अनन्वयालङ्कार होता है। जैसे – चन्द्रमा चन्द्रमा के ही समान है। अर्थात् इसके समान दूसरा कोई पदार्थ नहीं है। अथवा आकाश आकाश के समान है, सागर सागर के समान है, राम और रावण का युद्ध राम और रावण के ही युद्ध के समान है।

**अथ उपमेयोपमास्वरूपं निरूपयति –**

**पर्यायेण द्वयोस्तच्चेदुपमेयोपमा मता।**
**धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि॥ १३॥**

**अन्वयः** – द्वयोः पर्यायेण तत् स्यात् चेत् उपमेयोपमा मता। (हे राजन्!) त्वयि धर्मः अर्थः इव अर्थः धर्मः इव पूर्णश्रीः (अस्ति)।

**व्याख्या** – द्वयोः = भिन्नयोः पदार्थयोः, पर्यायेण = क्रमेण, तत् = उपमानत्वम् उपमेयत्वं च स्यात्, चेत् = तदा,

उपमेयोपमा अलङ्कारः। यथा हे राजन्! त्वयि = भवति, धर्मः = कृत्याकृत्यबोधः, प्रथमपुरुषार्थः, अर्थः इव = द्वितीयपुरुषार्थवत्, पूर्णश्रीः = पूर्णशोभाशाली, अर्थश्च धर्म इव पूर्णश्रीः विद्यते।

**भावार्थः** – यत्र उपमालङ्कारवद् उपमेयम् उपमानं तु वर्ण्यते पर पुनः तयोः उपमेयोपमानयोः क्रमपरिवर्तनं क्रियते यथा 'त्वयि धर्मः' उदाहरणेऽस्मिन् धर्मः उपमेयरूपेऽस्ति अर्थश्च उपमानरूपे पूर्णश्रीः समानधर्मः इव च वाचकशब्दः। पुनः द्वयोः क्रमपरिवर्तनं यद् अर्थः उपमेयरूपे धर्मश्च उपमानरूपे वर्णितः।

**हिन्दी अर्थ** – जहाँ प्रथम वाक्य उपमान अथवा उपमेय द्वितीय वाक्य में क्रम से उपमेय अथवा उपमान बना दिया जाय तो वहाँ उपमेयोपमालङ्कार होता है। जैसे हे राजन्! आपका धर्म अर्थ की तरह पूरा है और अर्थ धर्म की तरह पूर्ण है। अर्थात् आप में धर्म और अर्थ दोनों पूर्णरूप से विद्यमान हैं।

यहाँ प्रथम वाक्यस्थ उपमेय धर्म पद दूसरे वाक्य में उपमान बना दिया गया है, अतः यहाँ उपमेयोपमा अलङ्कार हुआ।

**अथ प्रतीपोपमाऽलङ्कारं निरूपयति –**

**विख्यातस्योपमानस्य यत्र स्यादुपमेयता।**
**इन्दुर्मुखमिवेत्यादौ स्यात्प्रतीपोपमा तदा॥ १४॥**

**अन्वयः** – यत्र विख्यातस्य उपमानस्य उपमेयता स्यात् तदा प्रतीपोपमा स्यात् (यथा) इन्दुः मुखमिव इत्यादौ (प्रतीपोपमा)।

**व्याख्या** – यत्र = यस्मिन् वर्णने, विख्यातस्य = प्रसिद्धस्य, काव्यपरम्परयानियतस्य, उपमानस्य = उत्कृष्टस्य, उपमेयता = उपमेयरूपेण वर्णनं, स्यात् = भवेत्, तदा = तर्हि, प्रतीपोपमालङ्कारः भवति। यथा – इन्दुः = चन्द्रः, मुखमिव = वदनमिव अस्ति।

**भावार्थः** – यत्र प्रसिद्धोपमानस्य उपमेयरूपेण वर्णनं स्यात् तत्र प्रतीपोपमाऽलङ्कारः भवति। अत्र प्रसिद्धस्य चन्द्रस्य तुलना मुखेन सह कृता।

उपमालङ्कारे तु मुखम् इन्दुः इव।
अनन्वये – मुखं मुखमिव।
प्रतीपोपमायां च – इन्दुः मुखमिव।

**हिन्दी अर्थ** – उपमानरूप से प्रसिद्ध पदार्थ को यदि उपमेय बना दिया जाये तो प्रतीपोपमा अलङ्कार होता है। जैसे चन्द्रमा मुख के समान है। यहाँ चन्द्रमा हमेशा उपमानरूप से प्रसिद्ध है। यह कहीं उपमेयत्वेन प्रसिद्ध नहीं है, वहीं यहाँ उपमेय बना दिया गया है। इसलिए यहाँ प्रतीपोपमा है।

**अथ ललितोपमां निरूपयति –**

**उपमाने तु लीलादिपदाढ्ये ललितोपमा।**
**त्वन्नेत्रयुगलं धत्ते लीलां नीलाम्बुजन्मनोः॥ १५॥**

**अन्वयः** – उपमाने लीलादिपदाढ्ये (सति) तु ललितोपमा। (यथा) त्वद्+नेत्र – युगलं नीलाम्बुजन्मनोः लीलां धत्ते।

**व्याख्या** – उपमाने तु = अप्रस्तुते तु, लीलादिपदाढ्ये = लीलादिपदयुक्ते सति, ललितोपमा = ललितोपमा नामालङ्कारो भवति। यथा – त्वन्नेत्रयुगलं = तवनयनयुग्मं, नीलाम्बुजन्मनोः = नीलकमलयोः, लीलां = शोभां, धत्ते = धारयति।

**भावार्थः** – उपमानसादृश्यं प्रदर्शयितुं यत्र लीलाशब्दः अथवा तस्य समानार्थकाः शोभादयः शब्दाः प्रयुज्यन्ते, तत्र ललितोपमा नामकोऽलङ्कारो भवति। अत्रापि "लीलां नीलाम्बुजन्मनोः" इति लीलाशब्दः प्रयुक्तः।

**हिन्दी अर्थ** – जहाँ उपमान पद के साथ लीलादि पद प्रयुक्त हो वहाँ ललितोपमा अलङ्कार होता है। जैसे तेरे दोनों नेत्र नीलकमल की शोभा धारण करते हैं। यहाँ उपमान पद नील कमल के साथ लीलापद का भी प्रयोग किया गया है। जिसका तात्पर्य है कि कामिनी के नेत्र नीलकमल के समान सुन्दर हैं।

**स्तबकः समूहः, अर्थसमूहस्य उपमां, स्तबकोपमां निरूपयति –**

**अनेकस्यार्थयुग्मस्य सादृश्यं स्तबकोपमा।**
**श्रितोऽस्मि चरणौ विष्णोर्भृङ्गस्तामरसं यथा॥ १६॥**

**अन्वयः** – यत्र अनेकस्य अर्थयुगलस्य सादृश्यं (तत्र) स्तबकोपमा भवति। (यथा) भृङ्गः तामरसं (तथा) विष्णोः चरणौ श्रितः अस्मि।

**व्याख्या** – यत्र अनेकस्य = यस्मिन् वर्णने एकाधिकस्य, अर्थयुग्मस्य = अर्थयुग्लस्य, सादृश्यं = साम्यं, तत्र स्तबकोपमा = स्तबकोपमा नामकोऽलङ्कारः। यथा – भृङ्गः = भ्रमरः, तामरसं = कमलं, (श्रयति तथैव) विष्णोः = हरेः, नारायणस्य, चरणौ = पादौ, अङ्घ्री, चरणयुगलम् इति, श्रितः अस्मिः = प्रपन्नोऽस्मि, शरणोऽस्मि।

**भावार्थः** – स्तबकः = समूहः, गुच्छः, यत्र अनेकस्य अर्थयुगलस्य (उपमेयोपमानयुगलस्य) सादृश्यं वर्ण्यते तत्र स्तबकोपमा नामालङ्कारो भवति। यथा अस्मिन् उदाहरणे एकतो विष्णुचरणौ अस्मत् पदार्थः (अहं) च उपमेययुगलं विद्यते तामरसं भृङ्गश्च उपमानयुगलं विद्यते।

**हिन्दी अर्थ** – जहाँ अनेक उपमानोपमेय द्वन्द्व की समानता वर्णित हो वहाँ स्तबकोपमा अलङ्कार होता है। जैसे जिस प्रकार भौंरा कमल का आश्रय लेता है वैसे ही मैं भगवान् विष्णु के चरणों का आश्रय लेता हूँ। यहाँ अहं पद का उपमान भृङ्ग है और चरण का उपमान तामरस है। यहाँ इस प्रकार के उपमानोपमेय द्वन्द्व से ही उपमा होती है। इसलिए इसको स्तबकोपमा कहते हैं।

**अथ सम्पूर्णोपमां निरूपयति –**

**स्यात्सम्पूर्णोपमा यत्र द्वयोरपि विधेयता।**
**पद्मानीव विनिद्राणि नेत्राण्यासन्नहर्मुखे॥ १७॥**

**अन्वयः** – यत्र द्वयोः अपि विधेयता स्यात् (तत्र) सम्पूर्णोपमा (यथा) अहर्मुखे पद्मानि इव नेत्राणि विनिद्राणि आसन्।

**व्याख्या** – यत्र = यस्मिन् वाक्ये, द्वयोः अपि = उपमानोपमेययोः, विधेयता = वर्ण्यमानता, स्यात् = भवेत्, तत्र सम्पूर्णोपमा= एतन्नामकोऽलङ्कारो भवति। यथा – अहर्मुखे = प्रभातकाले, पद्मानि इव = कमलानि इव, नेत्राणि = नयनानि, विनिद्राणि = निद्रारहितानि, विकसितानि च, आसन् = अभूवन्।

**भावार्थः** – यत्र उपमानोपमेययोः द्वयोरपि वर्ण्यमानता (विधेयरूपता) स्यात् तत्र सम्पूर्णोपमा नामकः अलङ्कारो भवति। 'पद्मानीव' उदाहरणेऽस्मिन् अपि उपमेयरूपनेत्राणां तु वर्ण्यमानता अस्ति एव परं तेन सह पद्मानामपि तथैव विधेयता (वर्ण्यमानता) अस्ति, तस्मादत्र सम्पूर्णोपमाऽलङ्कारः।

**हिन्दी अर्थ** – जहाँ उपमान और उपमेय दोनों ही वर्ण्य हों वहाँ सम्पूर्णोपमा हुआ करती है। जैसे प्रातःकाल में कमलों के समान मनुष्यों के नेत्र भी विकसित – निद्रारहित हो गये। यहाँ प्रभात काल में कमलों का खिलना तथा मनुष्यों के नेत्रों का खुलना इन दोनों का ही वर्णन प्रासंगिक है। इसलिए पूर्णोपमा है।

**अथ रूपकालङ्कारं निरूपयति –**

**यत्रोपमानचित्रेण सर्वथाप्युपरज्यते।**
**उपमेयमयी भित्तिस्तत्र रूपकमिष्यते॥ १८॥**

**अन्वयः** – यत्र उपमानचित्रेण उपमेयमयी भित्तिः सवर्था अपि उपरज्यते तत्र रूपकम् इष्यते।

**व्याख्या**- यत्र= यस्मिन् वाक्ये, उपमान-चित्रेण = अप्रस्तुतालेख्येन, उपमेयमयी भित्तिः = उपमेयरूपा भित्तिका, वर्ण्यविषयभित्तिका, सर्वथा = पूर्णरूपेण, उपरज्यते = आच्छाद्यते, तत्र रूपकं = तस्मिन् वाक्ये रूपकालङ्कारः, इष्यते = मन्यते।

**भावार्थः** - उपमानेन उपमेयस्य आवरणम् अथवा उपमेये उपमानस्य आरोपाद् रूपकं भवति। अस्मिन्नेव पद्ये उपमानपदे चित्रस्य आरोप यः उपमेयपदे च भित्तेः आरोपोऽस्ति। इत्थं द्वयोः एकरूपाद् अभेदवर्णनाद् वा रूपकालङ्कारः।

**हिन्दी अर्थ** - जहाँ उपमानरूप चित्र से उपमेय रूप चित्र सर्वथा मिला हुआ रहे (उपमान उपमेय में एकता प्रतीत होती हो) वहाँ रूपकालङ्कार होता है। जैसे इसी श्लोक में 'उपमानमेव चित्रम् उपमानचित्रं तेन' यहाँ उपमान में चित्र का आरोप और इसी तरह उपमेयरूपा उपमेयमयी यहाँ उपमेय में भित्ति का आरोप करने पर इन दोनों में एकता प्रतीत होती है। इसलिए यहाँ रूपकालङ्कार होता है।

**अथ सोपाधिरूपकालङ्कारं निरूपयति -**

**समानधर्मयुक्तसाध्यारोपात्सोपाधिरूपकम्।**
**उत्सिक्त-क्षितिभृल्लक्ष्य-पक्षच्छेदपुरन्दरः ॥ १९ ॥**

**अन्वयः**- समानधर्मयुक्तसाध्या-आरोपात्-सोपाधिरूपकम्। (यथा) - उत्सिक्त-क्षितिभृत्-लक्ष्य-पक्षच्छेदपुरन्दरः।

**व्याख्या**- समानधर्मो = सादृश्यं, तद्योगेन = तत्सम्बन्धेन, साध्यस्य = उपमानस्य, आरोपात् = व्यापनात्, सोपाधिकरूपकम् = एतन्नामाऽलङ्कारः स्याद्(यथा) उत्सिक्ताः = त्यक्तमर्यादाः मदगर्विताः पर्वताः क्षितिभृत् = राजा पर्वतश्च , तेषां लक्ष्यभूतानां पक्षाः = सहाय्या एव पक्षा पत्राणि तेषां छेदकत्वात्, पुरन्दरः = इन्द्रः भवान् अस्ति।

**भावार्थः** - यत्र सादृश्य-सम्बन्ध-प्रतिपादनपूर्वकम् उपमेये उपमानस्य आरोपः क्रियते तत्र सोपाधिकरूपकं भवति। एतदेवरूपकं साहित्यदर्पणे पारम्परिकरूपकनाम्ना निर्दिष्टम्। अत्र उदाहरणे नृपस्य इन्द्रस्य च समानधर्मता निर्दिष्टा तथा च समानधर्मेण सह उपमानभूतस्य पुरन्दरस्य आरोपः प्रस्तुतः। तस्मादत्र सोपाधिकरूपकम्।

**हिन्दी अर्थ** - जहाँ साधारण धर्म के सम्बन्ध से प्रकृत आरोप सिद्ध हो वहाँ सोपाधिकरूपक होता है। जैसे यह राजा ऊँचे ऊँचे पर्वत रूपी राजाओं के सहायकों के उच्छेदन में समर्थ है। अर्थात् जिस प्रकार इन्द्र पर्वतों के पक्ष = पँख काटने में समर्थ है वैसे ही यह राजा भी मदोन्मत्त शत्रुभूत राजाओं के सहायकों के उच्छेदन में समर्थ है।

यहाँ उत्सिक्त (उन्मत्त) साधारण धर्म क्षितिभृत् पर्वत् और शत्रुभूत राजा इन दोनों में रहने के कारण वर्णनीय राजा में इन्द्र का आरोप साध्य है। इसलिये यहाँ सोपाधिक रूपक है।

**अथ सादृश्यरूपकालङ्कारं निरूपयति -**

**पृथक्कथितसादृश्यं दृश्यं सादृश्यरूपकम्।**
**उल्लसत्पञ्चशाखस्ते राजते भुजभूरुहः॥ २०॥**

**अन्वयः**- पृथक्-कथित-सादृश्यं दृश्यं सादृश्यरूपकम्। (यथा)- उल्लसत्पञ्चशाखः ते भुजभूरुहः राजते।

**व्याख्या**-पृथक् कथितसादृश्यं= पृथक् पृथक् पदेन कथितं सादृश्यं, साम्यं यस्मिन् तत् पृथक्कथितसादृश्यं = पृथक्पदवर्णितसाम्यं, दृश्यं = रमणीयं, दर्शनीयं वा, सादृश्यरूपकम् = एतन्नामा अलङ्कारः स्यादिति। यथा हे राजन्! ते = तव, भुजभुरुहः = बाहुवृक्षः, राजते = शोभते, कीदृशः उल्लसत्पञ्चशाखः = शोभमानपञ्चप्रकाण्डः इत्यर्थः।

**भावार्थः** - यत्र उपमानोपमेययोः सादृश्यं पृथक्पदैः प्रदर्श्यते तत्र सादृश्यरूपकम् (स्यात्)। अत्र उदाहरणे भुजस्य उपमेयस्य भूरुहस्य उपमानस्य च अभेदसम्बन्धं प्रतिपाद्य तयोः सादृश्यं स्वतन्त्रपदेन कथितम्।

**हिन्दी अर्थ** - जहाँ उपमान तथा उपमेय इन दोनों का सादृश्य भिन्न-भिन्न पदों से कहा जाये वहाँ सादृश्य रूपक होता है। जैसे पाँच अँगुलिरूप शाखाओं से युक्त आपका यह हाथरूपी वृक्ष शोभा दे रहा है। यहाँ वृक्ष और शाखा का सादृश्य अलग-अलग पदों से बतलाया गया है। अतः यहाँ सादृश्य रूपक है।

**अथ रूपितरूपकालङ्कारं निरूपयति –**

**स्यादङ्गयष्टिरित्येवंविधमाभासरूपकम्।**
**अङ्गयष्टिर्धनुर्वल्लीत्यादि रूपितरूपकम्॥ २१॥**

**अन्वयः** – अङ्गयष्टिः (इति) एवं विधम् आभासरूपकं स्यात्। अङ्गयष्टिर्धनुर्वल्ली इत्यादि (च) रूपितरूपकम् (स्यात्)।

**व्याख्या** – यत्र रूपकस्य आभासमात्रं भवति तत्र आभासरूपकं मन्यते न तु पूर्णरूपकम्। यथा – अङ्गयष्टिः = अङ्गमेव यष्टिरिति, अत्र अङ्गे केवलं लम्बमानत्वं प्रकटयितुं यष्टित्वारोपः विहितः। पुनश्च अङ्गयष्टिः एव धनुर्वल्ली, इत्यत्र आरोपितेऽपि आरोपः कृतः तस्मादत्र रूपितरूपकम्।

**भावार्थः** – यत्र रूपकस्य आभासमात्रं स्यात् तत्र आभासरूपकं भवति। यथा – 'अङ्गयष्टिः धनुर्वल्ली' इत्यत्र आरोपितपदार्थस्य पुनरपि आरोपः विहितः तस्मादत्र आभासरूपकनामकः अलङ्कारोऽस्ति।

**विशेषः** – इत्थं रूपकं पञ्चधास्ति।

**हिन्दी अर्थ** – यदि इस तरह अङ्ग में छड़ी का आरोप किया जाय तो आभासरूपक होता है। इस प्रकार का आरोप चमत्कारजन्य नहीं होता है, केवल शरीर की लम्बाई को देखकर उसमें लम्बायमान यष्टि का आरोप किया गया है। अतः यहाँ रूपक केवल आभासमात्र है। इसीलिए इसे आभासरूपक कहते हैं।

जहाँ आरोपित का आरोप किया जाय वहाँ रूपितरूपक होता है। जैसे 'अङ्गयष्टि–धनुर्वल्ली' यहाँ प्रथम अंग में यष्टि का आरोप और धनु में वल्ली का आरोप कर पुनः आरोपित अङ्गयष्टि में धनुर्वल्ली का आरोप किया गया है। अतः यहाँ रूपितरूपक हुआ।

**इदानीं परिणामनामानमलङ्कारं निरूपयति –**

**परिणामोऽनयोर्यस्मिन्नभेदः पर्यवस्यति।**
**कान्तेन पृष्टा रहसि मौनमेवोतरं ददौ॥ २२॥**

**अन्वयः** – यस्मिन् अनयोः अभेदः पर्यवस्यति (तत्र) परिणामः। (यथा) कान्तेन रहसि पृष्टा मौनम् एव उत्तरं ददौ।

**व्याख्या** – यस्मिन् = यस्मिन् वर्णने, अनयोः = उपमानोपमेययोः, अभेदः = एकता, पर्यवस्यति = परिणतो भवति, तत्र परिणामनामकोऽलङ्कारो भवति। यथा – कान्तेन = प्रियेण, रहसि = एकान्ते, पृष्टा = जिज्ञासिता, मौनं = तूष्णीभावमेव, उत्तरं = प्रतिवचनं, ददौ = दत्तवती।

**भावार्थः** – यत्र उपमानोपमेययोः अभेदः परिणामरूपेण क्रियान्वयने अपि उपपद्यते तत्र परिणामालङ्कारः भवति। अत्र उत्तरे मौनत्वारोपः तच्च न स्वतः क्रियायामन्वेति, तस्योत्तररूपतयैव दानक्रियायामन्वयः।

**हिन्दी अर्थ** – जहाँ उपमान और उपमेय का अभेद परिणाम रूप में प्राप्त हो वहाँ परिणामालङ्कार होता है। जैसे नायक द्वारा एकान्त में पूछे जाने पर नायिका ने मौन ही उत्तर दिया। यहाँ उत्तर में मौन का आरोप किया गया है। मौन वस्तु शब्दप्रतिपाद्य न होने से दान क्रिया में उसका अन्वय सम्भव है। इसलिए उत्तर पद के साथ उसका अभेद भाव कर दान क्रिया में अन्वय करने से यहाँ परिणाम अलंकार हुआ।

**अथ उल्लेखालङ्कारं निरूपयति –**

**बहुभिर्बहुधोल्लेखादेकस्योल्लेखिता मता।**
**स्त्रीभिः कामः प्रियैश्चन्द्रः कालः शत्रुभिरैक्षि सः॥ २३॥**

**अन्वयः** – बहुभिः एकस्य बहुधा उल्लेखाद् उल्लेखिता मता (यथा) सः स्त्रीभिः कामः, प्रियैः चन्द्रः, शत्रुभिः कालः (च) ऐक्षि।

**व्याख्या** – बहुभि: – अनेकै:, एकस्य = उपमेयभूतस्य, वर्णनीयस्य, बहुधा = विविधप्रकारेण, उल्लेखात् = वर्णनात्, उल्लेखिता मता = उल्लेखाऽलङ्कारता स्वीकृता। यथा स: = वर्णनीयो नृप:, स्त्रीभि: = अङ्गनाभि:, काम: = कामदेव: ऐक्षि = दृष्ट:, प्रियै: = प्रियजनै: बन्धुभि: वा, चन्द्र: = शशी, शत्रुभि: = रिपुभि:, काल: = यम: मृत्युर्वा इति, ऐक्षि = दृष्ट:।

**भावार्थ:** – एकस्य एव वर्णनीयस्य अनेकै: जनै: अनेकप्रकारेण वर्णनं चेत् उल्लेखाऽलङ्कारो भवति। अत्र एक एव नृप: स्त्रीभि: प्रियजनै: शत्रुभिश्च विविधरूपेण काम:, चन्द्र: कालरूपश्च अवलोकित:।

**हिन्दी अर्थ** – यदि एक वस्तु का अनेकों द्वारा अनेक प्रकार से वर्णन किया जाय तो उल्लेखितालङ्कार होता है। जैसे – वर्णनीय राजा के सामने आने पर युवतियों ने उसके लोकोत्तर सौन्दर्य के कारण कामदेव की तरह, बन्धुओं ने आनन्द देने के कारण चन्द्रमा की तरह और शत्रुओं ने भय देने के कारण काल की तरह देखा। यहाँ राजा रूप एक ही वस्तु को अनेकों ने अनेक प्रकार से देखा। अत: यहाँ उल्लेखितालङ्कार है।

**इदानीम् अपह्नुतिं निरूपयति –**

**अतथ्यमारोपयितुं तथ्यापास्तिरपह्नुति:।**
**नायं सुधांशु: किं तर्हि व्योमगङ्गासरोरुहम्॥ २४॥**

**अन्वय:** – अतथ्यम् आरोपयितुं तथ्य+अपास्ति: अपह्नुति:। (यथा) अयं सुधांशु: न, किं तर्हि? व्योमगङ्गासरोरुहम्।

**व्याख्या** – अतथ्यम् = असत्यम्, आरोपयितुं = स्थापयितुं, तथ्यस्य = सत्यस्य, अपास्ति: = निषेध: (तर्हि) अपह्नुति: = अपह्नुतिनामकोऽलङ्कार:। यथा – अयं = पुरो दृश्यमान:, सुधांशु: = चन्द्रमा:, न = नास्ति, किं तर्हि? = तर्हि किमस्ति? इति प्रश्न:। तदुत्तरं = व्योमगङ्गासरोरुहम् = आकाशगङ्गाकुसुमम् इति।

**भावार्थ:** – असत्यस्य आरोपणाय यदि सत्यस्य निषेधो विधीयते तर्हि अपह्नुतिनामकोऽलङ्कारो भवति। उदाहरणेऽस्मिन् आकाशे चन्द्रं दृष्ट्वा तस्य तु निषेध: कृत: एवञ्च आकाशगङ्गाकमलमस्ति इति असत्यस्य स्थापना कृता तस्मादत्र अपह्नुतिनामकोऽलङ्कारोऽस्ति।

**हिन्दी अर्थ** – जहाँ असत्य वस्तु का आरोप करने के लिए सत्य वस्तु का निषेध किया जाय वहाँ अपह्नुति अलङ्कार होता है। जैसे चन्द्रमा को देखकर कोई कहता है कि यह चन्द्रमा नहीं है, किन्तु आकाश गंगा में खिला हुआ कमल है। यहाँ सत्य वस्तु चन्द्रमा में असत्य वस्तु आकाश गंगा के कमल का ओराप करने के लिए उसका निषेध किया गया है। इसलिये यहाँ अपह्नुति अलङ्कार हुआ।

**अथ पर्यस्तापह्नुतिं प्रस्तौति –**

**पर्यस्तापह्नुतिर्यत्र धर्ममात्रं निषिध्यते।**
**नायं सुधांशु: किं तर्हि सुधांशु प्रेयसीमुखम्॥ २५॥**

**अन्वय:** – यत्र धर्ममात्रं निषिध्यते (तत्र) पर्यस्तापह्नुति:। (यथा) अयं सुधांशु: न, तर्हि किम्? प्रेयसीमुखं सुधांशु:।

**व्याख्या** – यत्र = यस्मिन् सन्दर्भे, धर्ममात्रं = भावमात्रं, निषिध्यते = निरस्यते, तत्र पर्यस्तापह्नुति: = एतन्नामक: अलङ्कारो भवति। यथा – अयं सुधांशु: न = अयं चन्द्र: नास्ति तर्हि किम्? प्रेयसीवदनं = प्रियामुखं, सुधांशु: = चन्द्रमा: विद्यते।

**भावार्थ:** – यत्र धर्मस्याधारे विद्यमाने सति धर्मस्य निषेधो भवति तत्र पर्यस्तापह्नुति–नामकोऽलङ्कार:। यथा अयम् आकाशे चन्द्रमा: नास्ति अपितु प्रियामुखं चन्द्रमा वर्तते।

**हिन्दी अर्थ** – जहाँ धर्मी के रहते हुए भी केवल उसके धर्ममात्र का निषेध किया जाय वहाँ पर्यस्तापह्नुति अलङ्कार होता है। जैसे – यह चन्द्रमा नहीं है, किन्तु प्रियतमा का मुख ही चन्द्रमा है। यहाँ वास्तविक चन्द्रमा के चन्द्रत्व का निषेधपूर्वक उसका प्रियतमा के मुख में आरोप किया गया है। अत: यहाँ पर्यस्तापह्नुति अलङ्कार है।

**अथ भ्रान्तापह्नुतिं प्रतिपादयति –**

**भ्रान्तापह्नुतिरन्यस्य शङ्कया तथ्यनिर्णये।**
**शरीरं तव सोत्कम्पं ज्वरः किं न सखि! स्मरः॥ २६॥**

**अन्वयः** – अन्यस्य शङ्कया तथ्यनिर्णये (सति) भ्रान्तापह्नुतिः। (यथा) सखि! तव शरीरं सोत्कम्पं (वर्तते), किं ज्वरः? न, स्मरः (अस्ति)।

**व्याख्या** – अन्यस्य = पदार्थान्तरस्य अन्यवस्तुनः वा, शङ्कया = सन्देहेन, तथ्यनिर्णये = सत्यपदार्थनिश्चये सन्देहनिवारणे वा, भ्रान्तापह्नुतिः = भ्रान्तापह्नुतिनामकोऽलङ्कारो भवति। यथा विरहतायुक्तां नायिकां वीक्ष्य कापि सखी शङ्कते – सखि! तव = ते, शरीरं = वपुः, सोत्कम्पं = कम्पयुक्तं वर्तते, किं ज्वरः? = किं तापः? एवं प्रश्ने सति नायिका सन्देहनिवारकं प्रत्युत्तरं (वदति) यत् न = ज्वरः नैव, (अपितु) स्मरः = कामः रतिरोगो वा।

**भावार्थः** – यत्र एकस्मिन् पदार्थे अन्यस्य सन्देहनिवारणं क्रियते तत्र भ्रान्तापह्नुति नामकोऽलङ्कारो भवति। उदाहरणेऽस्मिन् नायिका स्वशरीरकम्पनस्य कारणं प्रस्तौति यत् ज्वरवशात् न अपितु कामवशात् कम्पते इति।

**हिन्दी अर्थ** – एक पदार्थ में दूसरे पदार्थ की शंका उत्पन्न कर यदि वास्तविक वस्तु का निर्णय किया जाय तो उसे भ्रान्तापह्नुति कहते हैं। जैसे नायिका का काँपना देखकर कोई सखी उससे पूछती है कि क्या, तुझे जाड़ा देकर ज्वर आया है? इस पर उसका यह उत्तर है कि नहीं, सखि! यह ज्वर नहीं है, किन्तु काम की करामात है।

**अथ छेकापह्नुतिं निरूपयति –**

**छेकापह्नुतिरन्यस्य शङ्कया तथ्यनिह्नवे।**
**प्रजल्पन् मत्पदे लग्नः कान्तः किं न हि नूपुरः॥ २७॥**

**अन्वयः** – अन्यस्य शङ्कया तथ्य– निह्नवे–छेकापह्नुतिः। (यथा) प्रजल्पन् मत्पदे लग्नः। किं कान्तः? न हि, नुपुरः।

**व्याख्या** – अन्यस्य = अन्यजनस्य, शङ्कया = आशङ्कया भवेद् वा, तथ्यनिह्नवे = सत्यगोपने, छेकापह्नुतिः = इत्याख्योऽलङ्कारः। यथा – काचित् नायिका स्वसखीं प्रति स्वप्रणयवृत्तान्तं वर्णयति – प्रजल्पन् = प्रियवचनानि वदन्, मत्पदे = मम चरणे, लग्नः = पतितः, (परं काचिदन्या श्रुत्वा पृच्छति किं तव कान्तः?) किं कान्तः? = किमु प्रियतमः, न हि = नैव, नूपुरः = मञ्जीरः।

**भावार्थः** – यदा अनपेक्षितोऽपि जनः गुप्तवार्तां श‍ृणोति तदा चातुर्येण सत्यवृत्तान्तस्य गोपनं छेकापह्नुतिः भवति। अर्थात् अन्यजनस्य आशङ्कया स्ववचने चातुर्यपूर्वकं तथ्यगोपनं क्रियते तदा छेकापह्नुतिः। अत्र काचिद् नायिका प्रियसखी समक्षं स्वप्रणयवृत्तान्तं कथयति, परम् अनपेक्षिता अन्या अपि श्रुत्वा पृच्छति किं तव प्रियः चरणलग्नः? परं चातुर्येण इयं सत्यतथ्यगोपनं करोति यत् न, नूपुरः।

**विशेष** – छेकैः = विदग्धजनैः चतुरजनैः वा इयम् अपह्नुतिः क्रियते तस्मात् छेकापह्नुतिः इति नामाख्यः अलङ्कारः।

**हिन्दी अर्थ** – रहस्य की बात अन्य न जान जाये इस आशंका से जहाँ सत्य को छिपाया जाता है। वहाँ छेकापह्नुति अलङ्कार होता है। जैसे कोई नायिका अपनी नर्मसखी से कहती है कि रात में खुशामद की बातें करता हुआ क्या प्रियतम तुम्हारे पैरों पर गिरे? तब उसने उत्तर दिया कि प्रियतम नहीं नूपुर।

**अथ कैतवापह्नुतिं निरूपयति –**

**कैतवापह्नुतिर्व्यक्ते व्याजाद्यैर्निह्नवे पदैः।**
**निर्यान्ति स्मरनाराचाः कान्तादृक्पातकैतवात्॥ २८॥**

**अन्वयः** – व्याजाद्यैः पदैः निह्नवे व्यक्ते (सति) कैतवापह्नुतिः (यथा) स्मरनाराचाः कान्तादृक्पातकैतवात् निर्यान्ति।

**व्याख्या** – व्याजाद्यैः = व्याज – कपट – कैतवादिभिः, पदैः = शब्दैः, निह्नवे = गोपने, व्यक्ते = सूचिते सति, कैतवापह्नुतिः नामकोऽलङ्कारः भवति। यथा – स्मरनाराचाः = कामबाणाः कान्तादृक्पातकैतवात् कामिनीकटाक्षच्छलात् कपटाद् वा निर्यान्ति = निस्सरन्ति।

**भावार्थः** – यत्र कैतवादिशब्दप्रयोगेण सत्यगोपनं क्रियते तत्र कैतवापह्नुतिनामकोऽलङ्कारः भवति। उदाहरणेऽस्मिन् कैतवात् इति पदप्रयोगेण दृक्पातानां गोपनं कृतम्।

**हिन्दी अर्थ** – जहाँ कैतव, छल, व्याज आदि पदों से यथार्थ वस्तु का गोपन किया जाय, वहाँ कैतवापह्नुति नामक अलंकार होता है। जैसे – कामिनी के कटाक्ष के बहाने कामदेव अपने बाणों को बरसा रहा है। यहाँ कैतव पद के द्वारा कान्ता के कटाक्षों का गोपन किया है। इसलिए कैतवापह्नुति अलङ्कार है।

**अथ उत्प्रेक्षां निरूपयति –**

**उत्प्रेक्षोन्नीयते यत्र हेत्वादिर्निह्नुतिं विना।**
**त्वन्मुखीश्रीकृते नूनं पद्मैर्वैरायते शशी॥ २९॥**

**अन्वयः** – यत्र निह्नुतिं विना (एव) हेत्वादिः उन्नीयते (तत्र) उत्प्रेक्षा। (यथा) शशी त्वन्मुखीश्रीकृते नूनं पद्मैः वैरायते।

**व्याख्या** – यत्र = यस्मिन् सन्दर्भे वाक्ये वा, निह्नुतिं विना = गोपनं विना एव, तथ्य निषेधं विनैव = हेत्वादिः = कारणफलादीनि इति उन्नीयते = सम्भाव्यते, तत्र उत्प्रेक्षा = उत्प्रेक्षानामकोऽलङ्कारः, यथा – त्वन्मुखश्रीकृते = तवमुखशोभाप्राप्तये, शशी = चन्द्रः, नूनम् = सम्भावना व्यञ्जकं पदं, पद्मैः = कमलैः, वैरायते = शत्रुतां करोति।

**भावार्थः** – यस्मिन् वर्णने तथ्यनिषेधं विनैव हेतुफलादीनां सम्भावना क्रियते तत्र उत्प्रेक्षाऽलङ्कारः भवति। उदाहरणेऽस्मिन् कामिनीमुखशोभा प्राप्तिः हेतुरूपेण सम्भाविता। यद्यपि चन्द्रोदये सति कमलसङ्कोचनं स्वाभाविकं परमत्र हेतुः सम्भावना वर्णिता।

**विशेषः** – उत्प्रेक्षाऽलङ्कारसन्दर्भे एते उत्प्रेक्षावाचकाः शब्दाः भवन्ति इव, मन्ये, शङ्के, ध्रुवं, नूनं प्रायश्च।

**हिन्दी अर्थ** – निषेध के बिना ही जहाँ कारण, फल और स्वरूप (वस्तु) में अतिशय संशय किया जाय वहाँ उत्प्रेक्षा नामक अलङ्कार होता है। जैसे तेरे मुख की शोभा प्राप्त करने के लिए चन्द्रमा कमलों से शत्रुता करता है।

**अथ गूढोत्प्रेक्षां निरूपयति –**

**इवादिकपदाभावे गूढोत्प्रेक्षां प्रचक्षते।**
**त्वत्कीर्तिर्विभ्रमश्रान्ता विवेश स्वर्गनिम्नगाम्॥ ३०॥**

**अन्वयः** – इवादिकपदाऽभावे गूढोत्प्रेक्षां प्रचक्षते। यथा – त्वत्कीर्तिः विभ्रमश्रान्ता स्वर्गनिम्नगां विवेश।

**व्याख्या** – इवादिकपदाभावे = इव आदिकानां पदानाम् अभावे इति इवादिकपदाभावे, उत्प्रेक्षावाचकानां शब्दानां अभावे अपि = अनुपादाने अपि, गूढोत्प्रेक्षाम् = एतन्नाम्नीम् उत्प्रेक्षां, प्रचक्षते = कथयति। यथा – कस्यचिन्नृपस्य यशोवर्णनमिदं यत् हे राजन्! त्वत्कीर्तिः = तव यशः, विभ्रमश्रान्ता = विश्वतो भ्रमणेन परिश्रान्ता, स्वर्गनिम्नगाम् = स्वर्गनदीं, गङ्गां निवेश = प्रविष्टा।

**भावार्थः** – उत्प्रेक्षावाचकानां मन्ये, शङ्के, ध्रुवं, प्रायो इत्यादीनाम् अभावे यत्र सम्भावना क्रियते तत्र गूढोत्प्रेक्षा भवति। अत्र इवादि शब्दाः न प्रयुक्ताः।

**हिन्दी अर्थ** – जहाँ इव, मन्ये, शङ्के, ध्रुवं, प्रायः और नूनम् आदि पदों के रहने पर भी हेतु, फल, स्वरूपगत संभावना की जाये वहाँ गूढोत्प्रेक्षा होती है। जैसे – हे राजन्! आपकी कीर्ति समस्त भुवन में भ्रमण करने से श्रान्त होकर स्वर्ग गंगा में स्नान करने के निमित्त प्रविष्ट हुई। अर्थात् आपकी कीर्ति स्वर्गलोक तक पहुँच गयी।

**अत्र उदाहरणमुखैः स्मृति-भ्रान्ति-सन्देहालङ्कारान् आह –**

**स्यात्स्मृति-भ्रान्तिसन्देहैस्तदेवालङ्कृतित्रयम्।**
**पङ्कजं पश्यतस्तस्याः मुखं मे गाहते मनः॥ ३१॥**

**अयं प्रमत्तमधुपस्त्वन्मुखं वेद पङ्कजम्।**
**पङ्कजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः॥ ३२॥**

**अन्वयः** – स्मृति-भ्रान्ति-सन्देहैः तद् एव अलङ्कृतित्रयं स्यात्। (क्रमशो यथा)१. पङ्कजं पश्यतः मे मनः तस्याः मुखं गाहते। २. अयं प्रमत्तमधुपः त्वन्मुखं पङ्कजं वेद। ३. अस्माकं तु पङ्कजं वा सुधांशुः वा इति निर्णयः नास्ति।

**व्याख्या** – स्मृतिश्च भ्रान्तिश्च सन्देहश्चेति स्मृति – भ्रान्ति सन्देहाः तैरिति, तद् एव = तन्नामकमेव, अलङ्कृतित्रयम् अलङ्कारत्रयं, स्यात् = भवेत्।

**स्मृतिः** – सदृशवस्तुदर्शने तत्सदृशो अन्य-स्मरणं नाम स्मृतिः। यथा पङ्कजं = कमलं, पश्यतः = विलोकयतः, मे = मम, मनः = चित्तं, तस्याः = प्रियायाः, मुखं = वदनं, गाहते = प्रविशति, स्मरति इति।

**भ्रान्तिः** – सादृश्यवशाद् मिथ्यानिर्णयो भ्रान्तिः। यथा अयम् = एषः, प्रमत्तमधुपः = उन्मत्तभ्रमरः, तवमुखं = तववदनं, पङ्कजं = कमलं, वेद = जानाति।

**सन्देहः** – सादृश्यवशाद् द्वयोः पदार्थयोः एकस्य निर्णयाभावो नाम सन्देहः। यथा –

पङ्कजं वा = कमलं वा, सुधांशु वा = चन्द्रमाः वा, इति = एवं प्रकारेण, अस्माकं = मम, निर्णयः = निश्चयः, न = नास्ति।

**भावार्थः– स्मृतिः** – अत्र कमलं दृष्ट्वा सादृश्यवशाद् मुखस्य स्मृतिः भवति।

**भ्रान्तिः** – अत्र भ्रमरः कामिनीवदनमेव कमलं मत्वा तत्र भ्रमति।

**सन्देहः** – अत्र सादृश्यवशात् कमलमस्ति अथवा चन्द्रोऽस्ति इति द्वयोर्मध्ये निर्णयो न जातः।

**हिन्दी अर्थ** – जहाँ किसी वस्तु के देखने पर तत्सदृश पूर्व परिचित वस्त्वाकार का स्मरण हो जाय वहाँ स्मृति, भ्रम होने पर भ्रान्ति और सन्देह होने पर सन्देह – इस तरह उक्त तीन अलङ्कार होते है।

जैसे कमल को देखने पर मुझे अपनी प्रियतमा का मुख याद आता है। यहाँ कमलरूप वस्तु को देखकर तत्सदृशवस्त्वन्तर अपनी प्रियतमा के मुख की स्मृति होने से स्मृति अलङ्कार हुआ।

यह मदमत्त भ्रमर तेरे मुख को ही कमल जान रहा है। यहाँ मुख और कमल में अत्यन्त सादृश्य है। इसलिए भ्रमर को मुख में कमल की भ्रान्ति हो रही है। अतः यहाँ भ्रान्तिमान् अलङ्कार है।

कोई एक नायक अपनी प्रियतमा के मुख को देखकर कहता है – यह प्रियतमा का मुख कमल है या चन्द्रमा, इसका निश्चय नहीं कर पा रहा हूँ। यहाँ कमल और चन्द्रमा का सन्देह होने के कारण सन्देहालङ्कार है।

**अथ मीलितनामकमलङ्कारं निरूपयति –**

**मीलितं बहुसादृश्याद् भेदवच्चेन्न लक्ष्यते।**
**रसो नालक्षि लाक्षायाश्चरणे सहजारुणे॥ ३३॥**

**अन्वयः** – बहुसादृश्यात् भेदवत् न लक्ष्यते चेत् मीलितम्। (यथा) सहजारुणे चरणे लाक्षायाः रसः न अलक्षि।

**व्याख्या** – द्वयोः पदार्थयोः बहुसादृश्यात् = अत्यन्तसाम्यात्, भेदवत् = भेदरूपं, भिन्नं वा, न लक्ष्यते = न प्रतीयते, चेत् = तदा, मीलितं = मीलितनामालङ्कारो भवति। यथा – सहजारुणे = स्वभावत एव रक्ते, चरणे = कामिन्याः पादे, लाक्षायाः = अलक्तस्य, रसः = तरलरागः, न अलक्षि = न प्रतीतः, लक्षितः दृष्टो वा।

**भावार्थः** – द्वयोः पदार्थयोः अत्यधिकसाम्यवशाद् यदि तयोः पृथक् प्रतीतिः न स्यात् तर्हि मीलितनामकोऽलङ्कारो भवति। उदाहरणेऽस्मिन् चरणोऽपि रक्तवर्णो लाक्षारसश्चापि रक्तवर्ण इति सादृश्यस्य आधिक्यात् लाक्षारसस्य पृथक्प्रतीतेः अभावात् मीलितम्। अस्मिन् अलङ्कारे उपमेये एव उपमानविलीनता भवति।

**हिन्दी अर्थ** – जहाँ अत्यन्त सादृश्य के कारण उपमान की पृथक् प्रतीति न होती हो वहाँ मीलितालङ्कार होता है।

जैसे – प्रिया के स्वाभाविक अतिरिक्त चरण में लाक्षारस की रक्तिमा पृथक् प्रतीत नहीं होती। यहाँ उपमेयभूत चरणों की रक्तिमा और उपमानभूत लाक्षारस की रक्तिमा दोनों अत्यन्त सदृश हैं। इसलिए पृथक्तया प्रतीति नहीं होती। इस कारण यहाँ मीलित अलङ्कार है।

**अथ सामान्यालङ्कारं निरूपयति –**

**सामान्यं यदि सादृश्यात् भेद एव न लक्ष्यते।**
**पद्माकरप्रविष्टानां मुखं नालक्षि सुभ्रुवाम्॥ ३४॥**

**अन्वयः** – सादृश्यात् यदि भेद एव न लक्ष्यते (तर्हि) सामान्यम्। (यथा) पद्माकरप्रविष्टानां सुभ्रुवां मुखं न अलक्षि।

**व्याख्या** – सादृश्यात् = साम्यात्, यदि = यदा, भेद एव = विभेदको धर्मः, भिन्नता एव, न लक्ष्यते = न दृश्यते (तर्हि = तदा) सामान्यं = सामान्यालङ्कारो भवति। यथा – पद्माकरप्रविष्टानां = कमलदलमध्यस्थितानां, सुभ्रुवां = सुन्दरीणां, मुखं = वदनं, न आलक्षि = न दृष्टम्।

**भावार्थः** – सादृश्यवशाद् उपमानोपमेययोः द्वयोः भिन्नेऽपि सति भेदप्रतीतिः न भवति। अत्र कमलसमूहे कामिनीवदनमपि कमलवदस्ति। अतः कमलसमूहे द्वयोः मुखस्य कमलस्य च भेदप्रतीतिः न जायते।

मीलितालङ्कारेऽपि द्वयोः पदार्थयोः (उपमानोपमेययोः) अति साम्याद् भेदप्रतीतिः न भवति, परं तत्र उपमेये उपमानविलीनता भवति। सामान्यालङ्कारे तु द्वयोरेव पृथक्तया सति अपि साम्यात् पृथक्प्रतीतिः न जायते।

**हिन्दी अर्थ**– समानता के कारण जहाँ भेद की प्रतीति ही न होती हो वहाँ सामान्य अलङ्कार होता है। जैसे कमलों में प्रविष्ट कान्ताओं का मुख नहीं पहचाना गया। कमल और कान्ता मुख इन दोनों की भिन्न-भिन्न प्रतीति समानता के कारण नहीं होती। इसलिए यहाँ सामान्यालङ्कार हुआ।

**अथ उन्मीलितं निरूपयति –**

**हेतोः कुतोऽपि वैशिष्ट्यात् स्फूर्तिरुन्मीलितं मतम्।**
**लक्षितान्युदिते चन्द्रे पद्मानि च मुखानि च॥ ३५॥**

**अन्वयः** – कुतः अपि हेतोः वैशिष्ट्यात् स्फूर्तिः उन्मीलितं मतम्। (यथा) चन्द्रे उदिते पद्मानि च मुखानि च लक्षितानि।

**व्याख्या** – कुतोऽपि = कस्मादपि, हेतोः = कारणस्य, वैशिष्ट्यात् = विलक्षणत्वात्, विशिष्टधर्मत्वात् वा, स्फूर्तिः = भेदज्ञानम्, उन्मीलितम् = उन्मीलिताख्योऽलङ्कारः, मतं = मन्यते। यथा – चन्द्रे = शशिनि, चन्द्रमसि, उदिते = आविर्भूते सति, पद्मानि च = कमलानि च, मुखानि च = वदनानि च, लक्षितानि = भेदपूर्वकं दृष्टानि, ज्ञातानि।

**भावार्थः** – यत्र (कारणस्य वैशिष्ट्यात्) सदृशयोः द्वयोः पदार्थयोः उपमानोपमेययोः भेदज्ञानं कारणवैशिष्ट्यादेव भवति तत्र उन्मीलितोऽलङ्कारः। यद्यपि कमलानां कामिनीमुखानां च सादृश्यवशाद् भेदो न प्रतीयते, परं चन्द्रोदये सति कमलानि सङ्कुचन्ति, तस्मादेव तयोः भेदज्ञानं स्पष्टं जायते।

**हिन्दी अर्थ** – जहाँ अति सदृश उपमान और उपमेय में किसी कारण से भेद प्रतीति हो जाय तो वहाँ उन्मीलित अलङ्कार होता है। जैसे चन्द्रोदय हो जाने पर कमल और मुख का भेद मालूम हो गया। अर्थात् चन्द्रमा के उदय हो जाने पर जब कमल संकुचित हो जाते हैं, उस समय दोनों का भेद-ज्ञान स्वतः सिद्ध हो जाता है। इसलिए यहाँ उन्मीलितालङ्कार है।

**अथ अनुमानम् अलङ्कारं निरूपयति –**

**अनुमानं च कार्यादेः कारणाद्यवधारणम्।**
**अस्ति किञ्चिद्यदनया मां विलोक्य स्मितं मनाक्॥ ३६॥**

**अन्वयः** – कार्यादेः कारणादि+अवधारणम् च – अनुमानम्। (यथा) यत् मां विलोक्य अनया मनाक् स्मितम् (अतः) किञ्चित् अस्ति।

**व्याख्या –** कार्यादेः = निमित्ताद् कार्यं दृष्ट्वा इत्याशयः कारणाद्यवधारणं = कारणादीनां निश्चयः ज्ञानं वा, अनुमानम् = अनुमानालङ्कारो भवति। यथा यत् = यतोहि, यस्मात् कारणात्, मां = नायकं, विलोक्य = दृष्ट्वा, अनया = नायिकया, मनाक् = किञ्चित् ईषद् वा, स्मितं = मन्दहासो विहितः, अतः किञ्चित् = किमपि, अस्ति = विद्यते।

**भावार्थः –** यत्र कार्यं दृष्ट्वा कारणस्य अनुमानं क्रियते तत्र अनुमानालङ्कारोऽस्ति। उदाहरणेऽस्मिन् नायकं दृष्ट्वा नायिकायाः स्मितरूपकार्येण तस्याः मनसि प्रणयभावोऽस्ति इति अनुमीयते।

**विशेषः –** कस्यापि कार्यस्य कारणं तु अवश्यमेव भवति, अत एव कार्यं दृष्ट्वा एव कारणम् अनुमीयते। कामिन्याः मन्दहासं दृष्ट्वा एव तस्याः मनोभावः ज्ञायते, इत्येव अनुमानम्।

**हिन्दी अर्थ –** जहाँ कार्य के द्वारा कारण का अनुमान किया जाय वहाँ अनुमान अलङ्कार होता है। जैसे यह नायिका मुझे देखकर हँसी। इसलिए इसके मन में कोई बात अवश्य है। यहाँ हास्यरूप कार्य देखकर नायिका के हृद्गत् कारण विशेष का अनुमान किया जाता है। अतः यहाँ अनुमान अलङ्कार है।

**अथ अर्थापत्तिं निरूपयति –**

**अर्थापत्तिः स्वयं सिध्येत् पदार्थान्तरवर्णनम्।**
**स जितस्त्वन्मुखेन्दुः का वार्त्ता सरसीरुहाम्॥ ३७॥**

**अन्वयः –** (यत्र) पदार्थान्तरवर्णनं स्वयं सिध्येत् (तत्र) अर्थापत्तिः। (यथा) – सः इन्दुः त्वन्मुखेन जितः, (चेत्) सरसीरुहां का वार्ता?

**व्याख्या –** यत्र = यस्मिन् वाक्ये, पदार्थान्तरवर्णनम् = अन्यपदार्थज्ञानं, स्वयं = स्वतः एव, विना प्रयत्नेन, सिध्येत् = सिद्धं स्यात्, तत्र अर्थापत्तिः = इत्याख्योऽलङ्कारः। यथा – सः असौ, इन्दुः = चन्द्रः, त्वन्मुखेन = तवमुखसौन्दर्येण, जितः = पराजितः, सरसीरुहाम् = कमलानां, का वार्ता = का कथा?

**भावार्थः –** यत्र एकस्य वर्णनेन अपरस्यापि तात्पर्यबोधो जायते तत्र अर्थापत्तिः। नायिकामुखसौन्दर्येण यदि चन्द्रमाः पराजितः तर्हि कमलानि तु स्वतः पराजितानि एव इति।

**हिन्दी अर्थ –** एक पदार्थ के वर्णन करने में जहाँ दूसरे पदार्थ का वर्णन अपने आप ही सिद्ध हो जाय वहाँ अर्थापत्ति अलङ्कार होता है। जैसे हे प्रिये! तेरे मुख द्वारा जब चन्द्रमा ही जीत लिया गया तब कमलों पर विजय की बात ही क्या रह गयी, क्योंकि कमल-विजेता चन्द्रमा के जीत लेने पर कमलों पर विजय-प्राप्ति अपने आप सिद्ध हो गयी। यहाँ चन्द्र-विजय के दूसरे पदार्थ कमल-विजय का वर्णन स्वतः सिद्ध हुआ। इसलिए अर्थापत्ति अलङ्कार है।

**अथ काव्यलिङ्गं निरूपयति –**

**स्यात् काव्यलिङ्गं वागर्थो नूतनार्थसमर्थकः।**
**जितोऽसि मन्दकन्दर्प मच्चित्तेऽस्ति त्रिलोचनः॥ ३८॥**

**अन्वयः –** (यत्र) नूतनार्थसमर्थकः वागर्थः (तत्र) काव्यलिङ्गं स्यात्। (यथा) मन्दकन्दर्पः जितः असि (यतोहि) मच्चित्ते त्रिलोचनः अस्ति।

**व्याख्या –** नूतनार्थसम्पर्कः = नवीनार्थसमर्थकः बोधकः वा, वागर्थः = पदार्थो वाक्यार्थो वा, तत्र काव्यलिङ्गम् = इत्याख्योऽलङ्कारः। यथा – हे मन्दकन्दर्प! = हे मतिमन्दकामदेव! त्वं जितः अपि = विजितोऽपि, यतोहि मच्चित्ते = मम हृदये चेतसि वा, त्रिलोचनः = कामदाहकः, भगवान् शङ्करः, अस्ति = विद्यते।

**भावार्थः –** यत्र पदार्थेन वाक्यार्थेन वा नवीनार्थस्य समर्थनं क्रियते तत्र काव्यलिङ्गनामकोऽलङ्कारो भवति। अत्र त्रिलोचनशब्देन कामदेवस्य दाहनरूपो नवीनोऽर्थः अभिव्यञ्जितः तेन जितोऽसि इति समर्थितोऽस्ति।

**हिन्दी अर्थ –** जहाँ नया अर्थ बोध कराने वाला पदार्थ या वाक्यार्थ हो वहाँ काव्यलिङ्ग अलङ्कार होता है। जैसे – हे

मूढ़ कामदेव! मेरे हृदय में त्रिलोचन भगवान् रुद्र विराजमान हैं। अत: मैंने तुझे जीत लिया है। क्या तुझे यह मालूम नहीं है? यहाँ मेरे हृदय में त्रिलोचन हैं – इस वाक्य से कामदाहक शङ्कर के तृतीय अग्निमय नेत्र रूपी नये अर्थ की प्रतीति होती है। अत: यहाँ काव्यलिङ्ग अलङ्कार है। मन्मथ का विजय करना अति कठिन कार्य है। अत: उसके जीतने का उसी के विजेता भगवान् शङ्कर की भक्ति द्वारा समर्थन किया गया है। अत: यहाँ वाक्यार्थ हेतुक काव्यलिङ्ग अलङ्कार हुआ।

**अथ परिकरालङ्कारं निरूपयति –**

**अलङ्कार: परिकर: साभिप्राये विशेषणे।**
**सुधांशुकलितोत्तंसस्तापं हरतु व: शिव:॥ ३९॥**

**अन्वय:** – विशेषणे साभिप्राये (सति) परिकर: अलङ्कार:। (यथा) सुधांशुकलित+उत्तंस: शिव:, व: तापं हरतु।

**व्याख्या** – विशेषणे = विशेषणपदे, साभिप्राये = तात्पर्यविशेषणयुक्ते सति, परिकराऽलङ्कारो भवति। यथा – सुधांशु-कलितोत्तंस: = चन्द्रकल्पितशिरोभूषणम् इत्यर्थ:, शिव: = आशुतोष:, व: = युष्माकं, तापं = सन्तापं, हरतु = निवारयतु, दूरीकरोतु।

**भावार्थ:** – यदि विशेषणपदं विशेषेण प्रयोजनविशेषं साधयति तर्हि परिकरालङ्कार:। अत्र शिवस्य चन्द्रशेखर: सुधांशुकलितोत्तंस: इति विशेषणपदं तापहरणे विशेषेण समर्थ:।

**हिन्दी अर्थ** – जहाँ किसी विशेषण का प्रयोग विशेष प्रयोजन से किया जाय, वहाँ परिकरालङ्कार होता हैं। जैसे – चन्द्रशेखर भगवान् शिव आपके सन्ताप को दूर करें। अर्थात् अमृत बरसाने वाले चन्द्रमा अमृत वर्षा करें।

यहाँ 'सुधांशुकलितोत्तंस:' यह विशेषण भगवान् शङ्कर में तापशान्त करने वाली शक्ति के अस्तित्व का द्योतन करने के अभिप्राय से प्रयुक्त है। इसलिए यहाँ परिकरालङ्कार है।

**अथ परिकराङ्कुरम् अलङ्कारं निरूपयति –**

**साभिप्राये विशेष्ये तु भवेत् परिकराङ्कुर:।**
**चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुज:॥ ४०॥**

**अन्वय:** – विशेष्ये तु साभिप्राये (सति) परिकराङ्कुर: भवेत् (यथा) चतुर्भुजदेव: चतुर्णां पुरुषार्थानां दाता।

**व्याख्या** – विशेष्ये = विशेष्यपदे, साभिप्राये = तात्पर्यविशेषसहिते, प्रकृतार्थानुकूलतात्पर्ययुक्ते इत्याशय:, परिकराङ्कुर: भवेत् = एतन्नामालङ्कारो भवति। यथा – चतुर्भुज: = विष्णु:, देव: = देवता, चतुर्णां = चतु: संख्यकानां, पुरुषार्थानां = धर्मार्थकाममोक्षाणां, दाता = प्रदाता प्रदानकर्ता।

**भावार्थ:** – यत्र विशेष्यपदं प्रयोजनविशेषं साधयति तत्र परिकराङ्कुरालङ्कार: अत्र चतुर्णां पुरुषार्थानां धर्मार्थकाममोक्षाणां प्रदाने चतुर्भुज: इति विशेष्यपदम् अस्ति।

**हिन्दी अर्थ** – इसी तरह जहाँ विशेष्य का प्रयोग किसी विशेष प्रयोजन से किया गया हो वहाँ परिकराङ्कुरालङ्कार होता है। जैसे चतुर्भुज भगवान् नारायण चारों पुरुषार्थों को देने वाले हैं। यहाँ विशेष्य चतुर्भुज पद का प्रयोग इस अभिप्राय से किया गया है कि चार बाहु वाले वे एक ही समय में अपने चारों हाथों में धर्म, अर्थ, काम एवं मोक्ष दे सकें। इसलिए यहाँ परिकराङ्कुर अलङ्कार हुआ।

**अथ अक्रमातिशयोक्तिं निरूपयति –**

**अक्रमातिशयोक्तिश्चेद् युगपत्कार्यकारणे।**
**आलिङ्गन्ति समं देव! ज्यां शराश्च पराश्च ते॥ ४१॥**

**अन्वय:** – कार्य-कारणे युगपत् (चेत्) अक्रमातिशयोक्ति:। (यथा) – देव! ते शरा: च परा: च ज्यां युगपद्

आलिङ्गन्ति।

**व्याख्या** – अक्रमातिशयोक्तिं व्याचष्टे – अक्रमेति। कार्यकारणे युगपत् = एककालमेव कार्यकारणे वर्ण्येते, चेत् = तदा, अक्रमातिशयोक्तिः एतन्नामालङ्कारो भवति।

उदाहरति – आलिङ्गन्तीति। हे देव! ते = तव, शराः = बाणाः, पराः = शत्रवः, ज्यां = धनुर्गुणं, मौर्वीं भुवं च समं = युगपदेव, आलिङ्गन्ति = परिष्वजन्ते, शतपत्रच्छेदनवत् शरारोपण – शत्रुमारणकार्यकारणयोः समयः सूक्ष्मत्वान्न ज्ञायते।

**भावार्थः** – कार्य-कारणयोः युगपद् वर्णने अक्रमातिशयोक्तिनामालङ्कारो भवति। यथा आलिङ्गन्ति सममित्यादौ कारणेन सहैव कार्यमपि जातम्।

**हिन्दी अर्थ** – जहाँ कार्य और कारण एक ही समय में हों वहाँ अक्रमातिशयोक्ति होता है। जैसे – हे राजन्! आपके बाण और शत्रु एक ही समय में ज्या (प्रत्यञ्चा और भूमि) का आलिङ्गन करते हैं। अभिप्राय यह है कि प्रत्यञ्चा पर आपका बाण चढ़ाना और शत्रुओं का भूमि पर गिरना दोनों एक ही समय में होता है। यहाँ शत्रु का मरना कार्य है और प्रत्यञ्चा पर चढ़ना कारण है, इनका एक समय में होना अक्रमातिशयोक्ति है।

**अथ अत्यन्तातिशयोक्तिं निरूपयति –**

**अत्यन्तातिशयोक्तिस्तत्पौर्वापर्यव्यतिक्रमे।**
**अग्रे मानो गतः पश्चादनुनीता प्रियेण सा॥ ४२॥**

**अन्वयः** – तत्पौर्वापर्यव्यतिक्रमे अत्यन्तातिशयोक्तिः। मानः अग्रे गतः, प्रियेण सा पश्चात् अनुनीता।

**व्याख्या** – अत्यन्तातिशयोक्तिं व्याचष्टे – अत्यन्तेति। पूर्वं च अपरं चेति पूर्वापरे तयोर्भावः पौर्वापर्यं तयोः कार्यकारणयोः पौर्वापर्यं = पूर्वापरीभावः, तस्य व्यतिक्रमः = अतिलङ्घनं तस्मिन् पौर्वापर्यव्यतिक्रमे सति, अत्यन्तातिशयोक्तिः = एतन्नामालङ्कारो भवति। तथा च यत्र कार्यकारणयोः प्रसिद्धः पौर्वापर्यव्यतिक्रमस्तत्र सेति फलितार्थः।

उदाहरति – अग्र इति। मानिन्याः मानः = कोपः, अग्रे = प्रागेव, गतः = नायकं प्रति नष्टः, पश्चात् = अनन्तरं, सा = नायिका, प्रियेण = प्रियतमेन पत्या सुरतार्थम् अनुनीता = प्रार्थिता।

**भावार्थः** – यत्र कारणकार्ययोः पूर्वापरभावे व्यतिक्रमः प्रदर्श्यते तत्र अत्यन्तातिशयोक्तिनामकः अलङ्कारः स्यात्।

**हिन्दी अर्थ** – पहले कार्य होता है, बाद में कारण, यह सार्वत्रिक नियम है, किन्तु जहाँ कारण के पूर्व ही कार्य का वर्णन किया जाय वहाँ अत्यन्तातिशयोक्ति होता है। जैसे – मानिनी नायिका का मान पहले गया, पीछे उसके प्रिय पति ने उसे मनाया।

यहाँ प्रिय के द्वारा अनुनय विनयपूर्वक मानिनी को मनाना कारण है और मानिनी का अभिमान मिट जाना कार्य है। इस प्रकार कार्य के पूर्व कारण का वर्णन होना उचित है, परन्तु यहाँ उसके विपरीत वर्णन किया गया है। अतः अत्यन्तातिशयोक्ति अलङ्कार है।

**अथ चपलातिशयोक्तिं निरूपयति –**

**चपलातिशयोक्तिस्तु कार्ये हेतुप्रसक्तिजे।**
**यामीति प्रियपृष्टाया वलयोऽभवदूर्मिका॥ ४३॥**

**अन्वयः** – कार्ये हेतुप्रसक्तिजे (सति) चपलातिशयोक्तिः। (यथा) यामि इति प्रियपृष्टायाः ऊर्मिकावलयः अभवत्।

**व्याख्या** – चपलातिशयोक्तिमाह – चपलेति। हेतोः = कारणस्य, प्रसक्तिः = प्रसङ्गः उल्लेखमात्रं वा, तज्जन्ये हेतुप्रसक्तिजे कार्ये सति, चपलातिशयोक्तिः = एतन्नामालङ्कारो भवति। यत्र हेतुज्ञानमात्रेण कार्योत्पत्तिर्जायते तत्र सेति फलितार्थः।

उदाहरति – यामीति। यामि = (अहं) प्रवासं गच्छामि, प्रियेण = पत्याः, पृष्टायाः = अभिहितायाः

नायिकायाः, ऊर्मिका = अङ्गुलीयकं, वलयः = कङ्कणं, करभूषणं वा, अभवत् = अजायत।

**भावार्थः** – कारणस्य प्रसङ्गमात्रेण अत्यन्तरूपेण यत्र कार्योत्पत्तिवर्णनं क्रियते तत्र चपलातिशयोक्तिनामकोऽलङ्कारो भवति। यथा – नायकेन 'यामि' इत्युक्तेः सति नायिका सद्य एव कृशतां गता।

**हिन्दी अर्थ** – कारण के कथनमात्र से जहाँ कार्य उत्पन्न हो, वहाँ चपलातिशयोक्ति होती है। जैसे किसी नायिका के पूछने पर नायक के इस कथन मात्र से कि मैं विदेश जा रहा हूँ; उसकी अङ्गुली की अँगूठी हाथ का कड़ा बन गयी। तात्पर्य यह है कि नायक का परदेश जाना सुनने के साथ ही वह सूखकर इतनी दुबली हो गयी कि उसकी अँगूठी कड़े की तरह हाथ में आने लगी।

यहाँ पति के परदेश गमन कारण के कथन मात्र से विरहावस्था से कृशतारूप कार्य की उत्पत्ति वर्णित है। इसलिए चपलातिशयोक्ति अलङ्कार है।

**अथ सम्बन्धातिशयोक्तिं निरूपयति –**

**सम्बन्धातिशयोक्तिः स्यात्तदभावेऽपि तद्वचः।**
**पश्य सौधाग्रसंसक्तं विभाति विधुमण्डलम्॥ ४४॥**

**अन्वयः** – तदभावे अपि तद्वचः सम्बन्धातिशयोक्तिः स्यात्। (यथा) विधुमण्डलं सौधाग्रसंसक्तं विभाति।

**व्याख्या** – सम्बन्धातिशयोक्तिमाचष्टे – सम्बन्धेति। तदभावेऽपि = तस्य सम्बन्धस्य अभावे = विरहे अपि तदयोगेऽपि तस्य = सम्बन्धस्य, वचः = वचनमिति तद्वचः, सम्बन्धातिशयोक्तिः = तन्नामालङ्कारो भवति। असम्बन्धे सम्बन्ध कथनं सम्बन्धातिशयोक्तिः। उदाहरणं यथा – पश्येति। पश्य = विलोकय, विधुमण्डलं = चन्द्रमण्डलं, शशिबिम्बं वा, सौधाग्रे = हर्म्याग्रे, संसक्तं = संलग्नं (सत्) विभाति = शोभते। इति नायिकां प्रति नायकस्योक्तिः।

**भावार्थः** – यत्र द्वयोः पदार्थयोः सम्बन्धाभावेऽपि सम्बन्धकल्पनं विधीयते। तत्र सम्बन्धातिशयोक्तिरलङ्कारः भवति। यथा पश्य! राजप्रासादस्य अग्रभागे स्थितः चन्द्रः शोभते इति। अत्र चन्द्रमसः राजप्रासादस्य च सम्बन्धाभावेऽपि सम्बन्धकथनात् सम्बन्धातिशयोक्तिः।

**हिन्दी अर्थ**– असम्बन्ध में सम्बन्ध का कहना सम्बन्धातिशयोक्ति है। जैसे कोई नायक अपनी नायिका से कहता है – देखो, राजभवन की अट्टालिका के अग्रभाग में स्थित चन्द्रमा शोभा दे रहा है।

यहाँ अट्टालिका के अग्रभाग में चन्द्रमा का सम्बन्ध न रहने पर भी उसके साथ सम्बन्ध दिखाने को सम्बन्धातिशयोक्ति कहते हैं।

**अथ भेदकातिशयोक्तिं निरूपयति –**

**भेदकातिशयोक्तिश्चेदेकस्यैवान्यतोच्यते ।**
**अहो अन्यैव लावण्यलीला बालाकुचस्थले॥ ४५॥**

**अन्वयः** – एकस्य एव अन्यता उच्यते चेत् भेदकातिशयोक्तिः (यथा) अहो! बाला – कुच – स्थले लावण्य – लीला अन्या एव।

**व्याख्या** – भेदकातिशयोक्तिमाह – भेदकेति। यत्र एकस्यैव = सजातीय – पदार्थस्य, अन्यता = भिन्नता, उच्यते = कथ्यते, चेत् = तदा भेदकातिशयोक्तिः। तथाऽत्र असति भेदे लोकप्रसिद्धपदार्थापेक्षया चमत्काराभिधायकं भेदकथनं भेदकातिशयोक्तिः।

उदाहरति – अहो इति। अहो = आश्चर्यं, बालाकुचस्थले = बालायाः कुचमण्डले, अन्यैव = अपरैव, लोकप्रसिद्धेतरा, लावण्यलीला = सौन्दर्यं वर्तते। अत्र लोकेऽन्यासां नायिकानां यज्जातीयं लावण्यं तज्जातीयमेव लावण्यमस्या अपि कुचकलशे इति लोकप्रसिद्धः लावण्याभेदेऽपि बालायाः कुचलावण्यस्य भेदकथनाद्

भेदकातिशयोक्तिः।

**भावार्थः** – यत्र अभिन्नेऽपि भिन्नताकथनं भवति तत्र भेदकातिशयोक्तिरलङ्कारः। यथा कामिन्याः लावण्यं लौकिकमपि लौकिकाद् भिन्नमुक्तम्।

**हिन्दी अर्थ**– एक ही पदार्थ को भिन्न रूप से वर्णन करना अर्थात् भिन्न न होते हुए भी भिन्न कहना भेदकातिशयोक्ति अलङ्कार होता है। जैसे – बाला के कुचमण्डल की लावण्य लीला कुछ और ही है अर्थात् अलौकिक है। यहाँ कुचमण्डल पर जो लावण्य है वह लोकप्रसिद्ध लावण्य रूप पदार्थ से भिन्न नहीं है तथापि अलौकिकत्वेन उसका भिन्न वर्णन करना भेदकातिशयोक्ति है।

**अथ रूपकातिशयोक्तिं निरूपयति –**

**रूपकातिशयोक्तिश्चेद् रूप्यं रूपकमध्यगम्।**
**पश्य नीलोत्पलद्वन्द्वान्निः सरन्ति शिताः शराः॥ ४६॥**

**अन्वयः** – रूप्यं रूपकमध्यगं चेत् रूपकातिशयोक्तिः। (यथा) पश्य, नीलोत्पलद्वन्द्वात् शिताः शराः निःसरन्ति।

**व्याख्या** – रूपकातिशयोक्तिं व्याचष्टे – रूपकेति। रूप्यम् = उपमेयं, विषयो वा, रूपकमध्यगम् = उपमानमध्यगं, विषयन्तः स्थितं वा चेत्तदा रूपकातिशयोक्त्यलङ्कारः भवति।

उदाहरति – पश्येति। शिताः = तीक्ष्णा, शराः = बाणाः, नीलोत्पलद्वन्द्वात् = नीलकमलमिथुनात्, निःसरन्ति = निर्गच्छन्ति, नीलकमलसदृशकामिनी नेत्रयुगलाद् अपाङ्गदृष्ट्यो निर्यान्तीति भावः।

अत्र नेत्रकटाक्षविषययोः नीलकमलशरविषयित्वरूपेण कार्यकारणभावकथनात् रूपकवाचिनीलोत्पलशरपदाभ्यामेव रूप्यवाचिनेत्रकटाक्षप्रतीतेः रूपकातिशयोक्तिः।

**भावार्थः** – यत्र उपमानेन उपमेयस्य निगीर्णमध्यवसानं वा क्रियते तत्र रूपकातिशयोक्तिः अलङ्कारः। अत्र नीलोत्पलद्वन्द्व एव कामिन्यानेत्रनिगीर्णम्।

**हिन्दी अर्थ** – जहाँ रूप्य (उपमेय) रूपक (उपमान) के मध्य में रहे वहाँ रूपकातिशयोक्ति होती है। अर्थात् यदि उपमेय उपमान के अन्तर्गत आ जाता है तो यह रूपकातिशयोक्ति अलङ्कार होता है। जैसे देखो, नीलकमल युगल से तीक्ष्ण बाण निकल रहे हैं। यहाँ रूप्य नेत्र और कटाक्ष कमल और बाणरूपी रूपक के अन्तर्निहित है। अतः उक्त अलङ्कार है।

**अथ प्रौढोक्तिं निरूपयति –**

**प्रौढोक्तिस्तदशक्तस्य तच्छक्तत्वावकल्पनम्।**
**कलिन्दजातीररुहाः श्यामलाः सरलद्रुमाः॥ ४७॥**

**अन्वयः** – तदशक्तस्य तच्छक्तत्वाऽवकल्पनं प्रौढोक्तिः। (यथा) कलिन्दजा – तीररुहाः। सरलद्रुमाः श्यामलाः।

**व्याख्या** – प्रौढोक्ति व्याचष्टे – प्रौढोक्तिरिति। तदशक्तस्य = तत्र असमर्थस्य तच्छक्तत्वावकल्पनं = तत्र सामर्थ्यवर्णनं, प्रौढोक्तिः = प्रौढोक्तिनामालङ्कारो भवति।

उदाहरति – कलिन्दजेति। कलिन्दजायाः = यमुनायाः, तीरे = तटेः रोहन्तीति कलिन्दजातीररुहाः = यमुनातटोत्पन्नाः सरलद्रुमाः = सरलाभिधदेवदारुवृक्षाः, श्यामलाः = नीलाः भवन्ति। कालिन्दीतटोत्पन्नत्वादेषां श्यामलत्वमित्यर्थः। यमुनातटरोहस्य नैल्यजननासामर्थ्येऽपि तत्समर्थत्वप्रतिपादनात् प्रौढोक्तिः। अयमलङ्कारो नालङ्कारान्तरम् अपितु अतिशयोक्तेरेव भेद इति मम्मटाचार्यः।

**भावार्थः**– कस्मिंश्चित् कार्ये असमर्थस्य अपि पदार्थस्य सामर्थ्यवर्णनात् प्रौढोक्तिनामकोऽलङ्कारो भवति। यथा यमुनातटोत्पन्नाः सरलवृक्षा अपि देवदारु इति संज्ञिताः।

**हिन्दी अर्थ**– जो जिसमें असमर्थ है, उसको उसमें समर्थ कहना प्रौढोक्ति है। जैसे यमुना के तट पर उत्पन्न सरल वृक्ष नीले होते हैं। यहाँ यमुना के तट में यह सामर्थ्य नहीं कि वह अपने यहाँ नीले वृक्षों को उत्पन्न कर सके, फिर भी उसके नीले वृक्षों का उत्पादक कहना प्रौढोक्ति है।

**अथ सम्भावनाऽलङ्कारं निरूपयति –**

**सम्भावना यदीत्थं स्यादित्यूहोऽन्यप्रसिद्धये।**
**सिक्तं स्फटिककुम्भान्तः स्थितिश्वेतीकृतैर्जलैः॥ ४८॥**
**मौक्तिकं चेल्लतां सूते तत्पुष्पैस्ते समं यशः।**

**अन्वयः** – यदि इत्थं स्याद् इति ऊहः अन्यप्रसिद्धये (स्यात्तर्हि) सम्भावना। (यथा) – स्फटिक – कुम्भाऽन्तः स्थितिश्वेतीकृतैः जलैः सिक्तं मौक्तिकं लतां सूते (चेत्) तत्पुष्पैः समं ते यशः (स्यात्)।

**व्याख्या** – सम्भावनालङ्कारं निरूपयति – सम्भावनेति। अन्यस्य = भिन्नस्य कार्यस्य, प्रसिद्धये = प्रकाशनाय यदि चेत् इत्थम् = एवं स्यात्तदाऽन्यत् कार्यं स्यादिति यत्रोहः = तर्कस्तत्र, सम्भावना = सम्भावनानामालङ्कारः। यदीत्थं स्यात्तदा एवं स्यादित्यादितर्कबोधकपदत्वं सम्भावनात्वम्। उदाहरति – सिक्तमिति। स्फटिकस्य कुम्भः = स्फटिकमणिकलशः तस्यान्तः स्थितिः – अवस्थानं तया श्वेतीकृतैः = शिलीकृतैः, जलैः = नीरैः, सिक्तम् = अभिषिक्तं, मौक्तिकं = मुक्ता, लतां = वल्लीं, सूते = जनयति समुत्पादयति, चेत् = तदा, हे राजन्! तत्पुष्पैः = तत्कुसुमैः, समं = सदृशं, ते = तव, यशः = कीर्तिः स्यात्।

**भावार्थः** – अन्यस्य प्रसिद्धये यदि इत्थं स्यात्तर्हि एवं भवेत्। इति कथनं स्यात् तदा सम्भावना नामालङ्कारः भवति। अत्र पूर्वन्तु स्फटिकमणिकुम्भः तत्र च श्वेतजलं स्यात् तेन सिञ्चितं मुक्ताबीजं श्वेतलतामुत्पादयेत् ततश्च पुष्पाणि समुत्पन्नानि भवेयुस्तैः सह नृपस्य यशसः तुलना कृता।

**हिन्दी अर्थ** – किसी अन्य कार्य की सिद्धि के लिए ऐसा यदि हो तो ऐसा हो। इस तरह की कल्पना जहाँ की जाय वहाँ संभावना अलङ्कार होता है। जैसे एक स्फटिकमणि से बने हुए कलश में रखे हुए श्वेत जल से सींचा गया मोती यदि श्वेतलता को उत्पन्न करे और उस लता में यदि श्वेत पुष्प उत्पन्न हो तो हे राजन्! उन पुष्पों से आपके यश की तुलना हो सके। यहाँ राजा के यश का साम्य दिखाने के लिए कवि ने यदि ऐसा हो तो ऐसा हो; यह कल्पना की, इसलिए सम्भावना अलङ्कार है।

**अथ प्रहर्षणमलङ्कारं निरूपयति –**

**वाञ्छितादधिकप्राप्तिरयत्नेन प्रहर्षणम्॥ ४९॥**
**दीपमुद्द्योतयेद्यावत्तावदभ्युदितो रविः।**

**अन्वयः** – अयत्नेन वाञ्छिताद् अधिकप्राप्तिः – प्रहर्षणम्। (यथा) यावद् दीपम् उद्योतयेत् तावद् रविः अभ्युदितः।

**व्याख्या** – अयत्नेन = प्रयत्नं विनैव, वाञ्छितात् = अभिलषितात्, अधिकस्य = अतिरिक्तस्य, प्राप्तिः = अर्जनं, प्रहर्षणं = प्रहर्षणनामालङ्कारः। उदाहरति – दीपमिति। यथा दीपं = प्रदीपं, यावत् = यावत्पर्यन्तं कोऽपि उद्योतयेत् तावत् = तावत्पर्यन्तं, रविः = सूर्यः, अभ्युदितः = उदयं प्राप्तः।

**भावार्थः** – यत्र प्रयत्नं विनापि ईप्सिततमं फलं प्राप्यते तत्र प्रहर्षणालङ्कारः। यथा दीपप्रकाशेच्छुकः जनः सूर्यं प्राप्नोति।

**हिन्दी अर्थ**– जहाँ प्रयत्न किये बिना ही इच्छा से अधिक लाभ हो जाय वहाँ प्रहर्षण अलङ्कार होता है। जैसे कोई प्रकाश के लिये दीप जलाना ही चाहता था कि सूर्य उदित हो गये। यहाँ दीपक के प्रकाश की इच्छा रखने वाले पुरुष को असंख्य कोटि अधिक सूर्य का प्रकाश अपने आप ही प्राप्त हो गया। अतः यहाँ प्रहर्षण अलङ्कार है।

अथ विषादनमलङ्कारं निरूपयति –

**इष्यमाणविरूद्धार्थसम्प्राप्तिस्तु विषादनम्॥ ५०॥**
**दीपमुद्द्योतयेद्यावत्तावन्निर्वाण एव सः।**

**अन्वयः** – इष्यमाण – विरुद्धार्थ – सम्प्राप्तिः तु विषादनम्। (यथा) यावत् दीपम् उद्योतयेत् तावत् सः निर्वाण एव।

**व्याख्या** – विषादनमाचष्टे = इष्यमाणेति। इष्यतेऽसावितीष्यमाणः = ईप्सितः तस्मात् विरुद्धार्थस्य सम्प्राप्तिः = अभीष्टार्थविरुद्धलाभ इत्यर्थः। विषादनम् = विषादननामालङ्कारः।

उदाहरति – दीपमिति। यावद् दीपम् उद्योतयेत् = वर्तिकामुद्दीप्तां कुर्यात् तावत् एव सः दीपः निर्वाणः एव = शान्त एव। अत्र दीपमुद्योतयितुमभिलाषुकस्य तद्विरुद्धदीपनिर्वाणरूपार्थप्राप्तेर्विषादनालङ्कारः।

**भावार्थः** – अभीष्टस्य विपरीतप्राप्तिः भवति चेत् विषादनालङ्कारः। उदाहरणेऽस्मिन् दीपज्योतिवर्धनार्थं कृतः प्रयासः दीपनिर्वाणे सति विपरीतो जातः।

**हिन्दी अर्थ** – जहाँ इच्छा के विरुद्ध फल प्राप्ति हो वहाँ विषादन अलङ्कार होता है। जैसे – वह दीपक की ज्योति ज्यों ही तेज करने लगा त्यों ही दीपक शान्त हो गया। यहाँ इच्छा के विरुद्ध फल प्राप्ति होने से उक्त नाम का अलङ्कार होता है। यहाँ वांछित बात के विरुद्ध कार्य होने से विषादन अलङ्कार है।

## अभ्यास-प्रश्नाः

### बहुविकल्पात्मकाः प्रश्नाः –

१. काव्यस्य बाह्यशोभासम्पादकाः सन्ति –
   (क) रसाः (ख) गुणाः
   (ग) अलङ्काराः (घ) दोषाः ( )

२. पौर्वापर्यव्यतिक्रमः भवति –
   (क) उपमायां (ख) रूपके
   (ग) दृष्टान्ते (घ) अत्यन्तातिशयोक्तौ ( )

३. ''यामीति प्रिय-पृष्टाया बलयोऽभवदूर्मिका'' अत्र कोऽलङ्कारः –
   (क) चपलातिशयोक्तिः (ख) रूपकम्
   (ग) उल्लेखः (घ) परिणामः ( )

४. शब्दालङ्कारः नास्ति –
   (क) अनुप्रासालङ्कारः (ख) यमकालङ्कारः
   (ग) उपमालङ्कारः (घ) चित्रालङ्कारः ( )

### अतिलघूत्तरात्मकाः प्रश्नाः –

१. ''उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः''। अत्र 'द्वयोः' इत्यस्य कोऽर्थः।
२. ''इन्दुः इन्दुः इव'' इत्यत्र कोऽलङ्कारोऽस्ति?
३. प्रसिद्धस्य उपमानस्य उपमेयता कस्मिन् अलङ्कारे भवति?
४. रूपकालङ्कारस्य लक्षणं लिखत।
५. एकस्य अनेकैः बहुधा वर्णनं कस्मिन् अलङ्कारे भवति?
६. सत्यस्य निषेधः असत्यस्य स्थापना कस्मिन् अलङ्कारे?
७. ''अयं प्रमत्तमधुपः त्वन्मुखं वेद पङ्कजम्'' अत्र कोऽलङ्कारः?
८. कार्यं दृष्ट्वा कारणस्य ज्ञानं कस्मिन् अलङ्कारे जायते?

**लघूत्तरात्मकाः प्रश्नाः –**

१. अलङ्कारलक्षणं विवेचयत।

२. अनुप्रासः कतिविधः सविस्तरं लिखत।

३. उपमा–अलङ्कारः विवेचनीयः।

**निबन्धात्मकाः प्रश्नाः –**

१. रूपकाऽलङ्कारं सभेदं निरूपयत।

२. अतिशयोक्त्यलङ्कारं सभेदं सोदाहरणञ्च निरूपयत।

३. अधोलिखितानामलङ्काराणां लक्षणोदाहरणानि प्रदर्शनीयानि।

(क) अपह्नुतिः।

(ख) उत्प्रेक्षा।

(ग) सम्भावना।

(घ) परिणामः।

४. युग्मभेदः विवेचनीयः –

उपमा – अनन्वयः।

परिकरः – परिकराङ्कुरः।

अपह्नुतिः – अतिशयोक्तिः।

उपमा – प्रतीपोपमा।

स्मृतिः – भ्रान्तिः।

सामान्यं – मीलितम्।

अर्थापत्तिः – अनुमानम्।

# महाकविकालिदासप्रणीतं
# रघुवंशमहाकाव्यम्
(प्रथमसर्गः)

# उपमा कालिदासस्य

संस्कृतवाङ्मये महाकवीनां सुदीर्घपरम्परा अस्ति । अस्यां परम्परायाम् ''उपमा कालिदासस्य'' इति उक्तिं श्रुत्वा सर्वेषां जिह्वोपरि एकमेव नाम आगच्छति – '' कविकुलगुरुः कालिदासः '' । कविकालिदासस्य उपमालङ्कारप्रयोगनैपुण्यं सजीवमिव दृष्टिगोचरतां समायाति । प्रश्नोऽयमपि यत् केवलं कविकालिदासस्य कवितासु एव उपमानामकोऽयमलङ्कारः अस्ति अथवा अन्यत्रापि ।

यद्यपि उपमाप्रयोगः तु संस्कृतवाङ्मये बहुत्र दृश्यते तथापि कालिदासस्य विषये ''उपमा कालिदासस्य'' इत्युक्तिः तु कवियशसा लोकोक्तिषु परिवर्तिता । महाकविकालिदासेन सर्वेषाम् अलङ्काराणां, रसानां छन्दसाञ्च उपयोगः स्वग्रन्थेषु कृतः । किन्तु उपमा विषयकं नैपुण्यम् अनुपममेव । कालिदासप्रयुक्त-उपमाऽलङ्कारस्य प्रयोगे कीदृशं नैसर्गिकं माधुर्यं विद्यते । अत्र पश्यामः –

**पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिव धर्मपत्न्या ।**
**तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या ।।( रघु० २/२० )**

सा धेनुस्तयोः दम्पत्योर्मध्ये दिनरात्र्योर्मध्यगता सन्ध्येव विद्यमाना आसीत् । एवमेव रघुवंशस्य प्रारम्भः एव कालिदासेन उपमाऽलङ्कारप्रयोगेण कृतः –

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरौ वन्दे पार्वती-परमेश्वरौ ।।( रघु० ०१/०१ )**

कालिदासीयग्रन्थेषु सर्वत्र उपमाऽलङ्कारस्य अलौकिक-आभा उद्भासिता भवति । वातावरणस्य सजीवं यथार्थञ्च चित्रणं यथा कालिदासेन कृतं न तदन्येन । यथा –

**सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा ।**
**नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ।।**

अत्र इन्दुमती-स्वयंवरप्रसङ्गे स्वयंवरार्थं समागतानां राजपुत्राणां चयनोपेक्षाकारणात् म्लानमुखानां स्थितिः वर्णिता अस्ति ।

कालिदासस्य कृतिः हृदयग्राह्या न तु बुद्धिग्राह्या । अत्र तु भावपक्षस्य एव प्रबलता । आध्यात्मिक-उपमानां सौन्दर्यमपि महाकविकालिदासस्य रचनासु दृष्टिगतं भवति । यथा –

**तस्याः खुरन्यास पवित्रपांसुमपांसुलानां धुरि कीर्तनीया ।**
**मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरूवगच्छत् ।।**

अत्र च वर्णितमुपमया यत् राज्ञः दिलीपस्य पत्नी सुदक्षिणा नन्दिन्याः मार्गस्य तथैव अनुसरणं कुर्वती आसीत् यथा स्मृतयः वेदवाक्यानाम् अर्थान् अनुसरन्ति ।

एवं प्रकारेण वयं पश्यामः यत् कालिदासस्य उपमाः अनुरूपता-सरसता-अपूर्वता-विविधता-शास्त्रीयता-स्वाभाविकता-आध्यात्मिकता-व्यावहारिकतादिगुणानां कारणादेव लोकप्रियाः लोकप्रसिद्धाश्च सञ्जाताः ।अस्य कवेः उपमासु भाव-सौन्दर्यम्, अर्थ-सौन्दर्यं तथा शब्दसौन्दर्यादिकस्य दर्शनम् एकेन सहैव भवति ।

## 'रघुवंशम्' प्रथमसर्गस्य संक्षिप्तकथासारः

कविकुलगुरुः महाकविः कालिदासः न केवलं भारतदेशेऽपितु सम्पूर्णसंसारे विश्रुतः अस्ति । एतेन महाकाव्यद्वयं लिखितं – रघुवंशं कुमारसम्भवञ्च । 'रघुवंशम्' इत्यस्य महाकाव्यस्य प्रथमसर्गस्य कथासारः अत्र लिख्यते –

वैवस्वतमनोः वंशे दिलीपनामकः राजा अभूत् । तेन स्वपराक्रमेण बुद्धिनिपुणतया च सम्पूर्णपृथिवी अधिकृता । सः अतीव दयालुः, उदारः गुणशाली च आसीत् । तस्य राज्यकाले प्रजाः नियमानुसारम् आचरणं कुर्वन्ति स्म । अपराधिभ्यः समुचित-दण्डविधानमासीत् । चौर्यतस्करादिकार्यं न भवति स्म । तस्य राज्ञः दिलीपस्य अनेकाः राज्यः आसन् । परञ्च मगधवंशे उत्पन्ना सुदक्षिणा नामक राज्ञी एव राज्ञे दिलीपाय अधिका प्रिया आसीत् । राज्ञः इच्छा आसीत् यत् राज्याः सुदक्षिणायाः गर्भात् तादृश एव पुत्रः उत्पन्नः भवेत् । चिरकालात् प्रतीक्षा पश्चादपि तस्य इच्छा न सम्पूरिता । अत एव राज्ञा दिलीपेन स्वीयराज्यभारं मन्त्रिभ्यः प्रदाय स्वकुलगुरुवशिष्ठस्य आश्रमः रथारुढो भूत्वा सपत्नीकः गतः।

सन्ध्याकालीनसर्वविधक्रियापश्चात् मुनिवशिष्ठं राजा दिलीपः पत्नी सुदक्षिणा च प्रणतवन्तौ । वार्तालापप्रसङ्गे राज्ञा दिलीपेन सन्ततिविहीनतायाः स्वपीडा गुरवे निवेदिता । महर्षिणा वशिष्ठेन योगबलेन अवगतं यत् राज्ञः दिलीपस्य पुत्रः किमर्थं न सञ्जातः ? तेन सः राजा दिलीपः उक्तः यत् स्वर्गलोकात् आगमनकाले कदाचित् कामधेनोः उपेक्षा कृता । अत एव तस्याः शापकारणात् सन्ततिः न सञ्जाता । महर्षिवशिष्ठेन राजा दिलीपः आदिष्टः यत् कामधेनोः पुत्र्याः नन्दिन्याः सेवा कर्त्तव्या । तदानीमेव नन्दिनी अपि वनात् प्रत्यागता आसीत् । कुलगुरुणा वशिष्ठेन राज्ञः पत्नी सुदक्षिणा अपि नन्दिनीगोः पूजां कर्त्तुम् उक्ता । पुनश्च एतदपि उक्तं यत् यावत् नन्दिनी प्रसन्ना न भवति तावत् कालपर्यन्तं नन्दिनीगोः पृष्ठतः अनुसरणं कृत्वा सेवा कर्त्तव्या ।

तदनन्तरं महर्षिः वशिष्ठः राज्ञे शयनाय आदेशं दत्तवान् । प्रातः काले शिष्याणाम् अध्यापनध्वनिं श्रुत्वैव राजा दिलीपः सपत्नीकः जागृतः सञ्जातः ।

एवं प्रकारेण रघुवंशस्य प्रथमसर्गस्य कथा समाप्ता भवति ।

## महाकविः कालिदासः

न केवलं प्राचीनकाले अपितु वर्तमानकालेऽपि इयं संस्कृतभाषा स्वीयग्रन्थानामाधारेण स्वीयज्ञानप्रकाशेन च सम्पूर्णसंसारे एव अद्वितीया विद्यते । एतदपि सत्यमेव यत् यदा संस्कृतभाषा सार्वत्रिकरूपेण विद्यमाना आसीत् तदा भारतदेशोऽयं सर्वेषु क्षेत्रेषु प्रथमस्थाने विद्यमानः आसीत् ।

अस्यां वैदिक-लौकिकसंस्कृतभाषायाम् अनेकैः महाकविभिः अनेके ग्रन्थाः लिखिताः । एतेषां महाकवीनां चर्चाप्रसङ्गे महाकवेः कालिदासस्य नाम विश्वविश्रुतमिति वयं जानीम एव । महाकविरयं संस्कृतस्य सर्वश्रेष्ठः कविः, नाटककारः कविताकामिन्याः विलासश्च विद्यते । अयं भारतीयसाहित्यस्य सर्वश्रेष्ठः विभूतिः प्राचीनःभारतीय-अन्तरात्मनः प्रतिनिधिश्च । अस्य महाकवेः रचनासु भारतीयसंस्कृतेः प्राणतत्त्वानि सन्निहितानि सन्ति । एतस्य रचनाः शिष्टविद्वद्भ्यः सामान्यशिक्षितेभ्यश्च समानरूपेण रोचन्ते । महाकविकालिदासस्य रचनासु नवरसानां रसास्वादनं कर्त्तुं शक्यते ।

**कालिदासस्य स्थितिकालः** – संस्कृतभाषायाः महाकविभिः स्वीयजीवनवृत्त -स्थान-समयादि विषये प्रायशः अल्पमेव लिखितमुक्तञ्च । अत एव तेषां समयादिनिर्धारणक्रमे निश्चयात्मकरूपेण किमपि वक्तुं न शक्यते । इयमेव स्थितिः

महाकविकालिदासस्य विषयेऽपि विद्यते । भारतीयजनश्रुतेराधारेण कालिदासः राज्ञः विक्रमादित्यस्य नवरत्नेषु प्रमुखः आसीत् –

**धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटखर्परकालिदासाः ।**
**ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वैवररुचिर्नवविक्रमस्य ।।**

एतेन प्रमाणेन विभिन्नविद्वद्भिः कालिदासस्य स्थितिकालः षष्ठी शताब्दी ई.तः प्रारभ्य प्रथम-शताब्दीपर्यन्तम् अनुमीयते ।

**महाकविकालिदासस्य रचनाः** – यद्यपि महाकविकालिदासस्य नाम्ना अनेके ग्रन्थाः प्राप्यन्ते । पुनरपि अस्य महाकवेः सप्त रचनास्तु प्रमाणीक्रियन्ते एव । एतासां संक्षिप्तपरिचयः अत्र प्रस्तूयते –

**महाकाव्यद्वयम्** –

**( १ ) रघुवंशम्** – इदं नवदश (१९) सर्गाणां महाकाव्यमस्ति । एतेषु सर्गेषु महाकविना कालिदासेन इच्छवाकुवंशीयानां नवविंशतिः (२९) राज्ञां वर्णनं कृतमस्ति ।

**( २ ) कुमारसम्भवम्** – इदं महाकाव्यं सप्तदशं (१७) सर्गेषु विभक्तमस्ति । अस्मिन् महाकाव्ये शिव-पार्वत्योः विवाहस्य, कार्तिकेयस्य जन्मनः तेन च तारकासुरस्य हननस्य कथा वर्णिता अस्ति ।

**त्रीणिनाटकानि** –

**( १ ) मालविकाग्निमित्रम्** – इदं पञ्च-अङ्कानां नाटकमस्ति । अस्मिन् नाटके विदिशा प्रदेशस्य राज्ञः अग्निमित्रस्य मालवदेशस्य च राजकुमार्याः मालविकायाः प्रेमप्रसङ्गः परिणयश्च वर्णितः अस्ति । नाटकमिदं कालिदासस्य प्रारम्भिककृतिः मन्यते ।

**( २ ) अभिज्ञानशाकुन्तलम्** – इदं कालिदासस्य विश्वविख्यातं नाटकमस्ति । अस्मिन् अष्ट-अङ्काः सन्ति। एतेषु अङ्केषु राज्ञः दुष्यन्तस्य शकुन्तलायाश्च परिणयकथा वर्णिता अस्ति । अस्य नाटकस्य सम्बन्धे सूक्तिरियं प्रसिद्धा – " कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम् ।।" एतस्मात् कारणादेव कालिदासोऽयं विश्वकविः सञ्जातः । विश्वस्य अनेकभाषासु अस्य अनुवादः कृतः अस्ति ।

**( ३ ) विक्रमोर्वशीयम्** – इदं पञ्च-अङ्कानां नाटकमस्ति । एतस्य पञ्चाङ्केषु राज्ञः पुरुरवामहोदयस्य तथा उर्वशी अप्सरसः परिणयकथा वर्णिता अस्ति । कालिदासः सम्भवतः तात्कालिक समाजस्य अवस्थायाः चित्राकर्षणाय एतस्य नाटकस्य रचना कृता ।

**खण्डकाव्यं गीतिकाव्यञ्च** –

**( १ ) मेघदूतम्** – इदमेकं खण्डकाव्यमस्ति । अस्य भागद्वयमस्ति –

(क) पूर्वमेघः (ख) उत्तरमेघश्च । अस्मिन् खण्डकाव्ये एकस्य वियोगिनः यक्षस्य वर्णनं कृतमस्ति । स्वीयकर्त्तव्य प्रमादवशात् सः भार्यातः एकवर्षाय पृथक् भूत्वा रामगिरिपर्वते निवसति । सः रामगिरौ निवसन् मेघं दूतं मत्वा स्वीयं सन्देशं भार्यां प्रति प्रेषयति । पूर्वमेघे यक्षेण अलकापुरी पर्यन्तं गन्तुं निर्दिष्टमार्गस्य वर्णनं कृतमस्ति । उत्तरमेघे यक्षेण भार्यायै प्रदत्त-सन्देशः वर्णितः अस्ति ।

**( २ ) ऋतुसंहारः** – अस्मिन् ऋतुसंहारे गीतिकाव्ये षड्ऋतूनां मनोरमं वर्णनं कृतमस्ति ।

## महाकविकालिदासविरचितं

# ''रघुवंशम्'' महाकाव्यम्

## ( प्रथमसर्गः )

### श्लोकः १

**प्रसङ्गः** – अस्मिन् श्लोके महाकविः कालिदासः स्वीयस्य ''रघुवंशम्' इति महाकाव्यस्य निर्विघ्न लेखनकार्यसम्पन्नार्थम् इष्टदेवेभ्यः नमस्कारं कुर्वन् मङ्गलाचरणं प्रस्तौति –

**वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।१।।**

**अन्वयः** – (अहं) वागर्थौ इव संपृक्तौ जगतः पितरौ पार्वती-परमेश्वरौ वागर्थप्रतिपतये वन्दे।

**पदार्थः** – अहम् = मैं (कालिदास) । वागर्थौ = शब्द और अर्थ। इव = समान। संपृक्तौ = सम्मिलित। जगतः = संसार के। पितरौ = माता और पिता । पार्वतीपरमेश्वरौ = पार्वती और भगवान शिव। वागर्थप्रतिपत्तये = शब्द और अर्थ के सम्यक्तया ज्ञान के लिए । वन्दे = वन्दना करता हूँ ।

**हिन्दी-अर्थः** – नित्य सम्बन्ध वाले शब्द और अर्थ के समान संसार के माता-पिता पार्वती जी और भगवान शंकर को शब्द और अर्थ के सम्यक्तया ज्ञान प्राप्त करने के लिए मैं (कालिदास) प्रणाम करता हूँ।

**व्याख्या** –

**( क ) पर्यायपदानि** – अहं = कालिदासः, वागर्थौ = शब्दार्थौ, इव =सदृशं, संपृक्तौ = सम्मिलितौ, जगतः = संसारस्य, पितरौ = माता च पिता च (जननी जनकश्चेति), पार्वतीपरमेश्वरौ = भवानी शिवश्चेति, वागर्थप्रतिपत्तये = शब्दार्थयोः सम्यक् ज्ञानाय, वन्दे = नमामि।

**( ख ) भावार्थः** – शब्दार्थसदृशौ संयुक्तौ संसारस्य मातापितरौ पार्वतीं शिवञ्च अहं कालिदासः शब्दार्थयोः सम्यक् ज्ञानार्थं प्रणमामि।

**( ग ) छन्दः** – अस्मिन् श्लोके अनुष्टुप छन्दः अस्ति। अनुष्टुप् छन्दसः लक्षणमिदम् –

''श्लोके षष्ठं गुरुर्ज्ञेयं सर्वत्र लघुपञ्चमम् ।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ।।''

अर्थात् यस्य छन्दसः चतुर्षु चरणेषु पञ्चमम् अक्षरं लघु षष्ठम् अक्षरञ्च गुरुः भवतः। पुनश्च द्वितीयचरणे चतुर्थचरणे च सप्तमम् अक्षरं लघु भवति तथा प्रथमचरणे तृतीयचरणे सप्तमम् अक्षरं दीर्घं भवति, तत् छन्दः''अनुष्टुप्'' भवति।

**( घ )अलङ्कारः** – अस्मिन् श्लोके शब्दार्थयोः उपमा पार्वती परमेश्वरौ इत्यनयोः कृते प्रदत्ता अस्ति। अतः अत्र उपमा अलङ्कारः अस्ति।

**विशेषांशः** – वागर्थाविव = वागर्थौ + इव (अयादिसन्धिः)। वागर्थौ, संपृक्तौ, पितरौ पार्वतीपरमेश्वरौ – द्वितीयाविभक्तिः, द्विवचनम्। वन्दे = वन्द् धातोः (आत्मनेपदी) उ.पु., एकवचनम्।

## श्लोकः २

**प्रसङ्गः** – अस्मिन् श्लोके महाकविः कालिदासः वर्ण्यविषयस्य अपेक्षया स्वाल्पज्ञानस्य वर्णनं कृत्वा विनम्रतां प्रदर्शयति –

**क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।**
**तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ।।२।।**

**अन्वयः** – सूर्यप्रभवः वंशः क्व, अल्पविषया मतिः च क्व, दुस्तरं सागरं मोहात् उडुपेन तितीर्षुः अस्मि।

**पदार्थः** – सूर्यप्रभवः = सूर्य से समुत्पन्न । वंशः = कुल, वंश। क्व = कहाँ । दुस्तरम् = कष्ट से पार करने योग्य। सागरं = समुद्र को । मोहात् = मूर्खता के कारण । उडुपेन = छोटी नाव से । तितीर्षुः = पार करने का इच्छुक । अस्मि = हूँ ।

**हिन्दी-अर्थः** – भगवान् सूर्य से समुत्पन्न वंश कहाँ ? और अत्यन्त अल्पबुद्धि वाला मैं (कालिदास) कहाँ ? जिस प्रकार कोई व्यक्ति छोटी नौका से अपार समुद्र को पार करना चाहता है (ठीक वही स्थिति मेरी है)।

**व्याख्या** –

**( क ) पर्यायपदानि** – सूर्यप्रभवः = सूर्यात् उद्भूतः, वंशः = कुलं, क्व = कुत्र, अल्पविषया = अल्पज्ञा, मतिः = बुद्धिः, क्व = कुत्र, दुस्तरं = कष्टेन तरितुं, सागरं = समुद्रं, मोहात् = अज्ञानात्, उडुपेन = लघुनौकया, तितीर्षुः = तरितुम् इच्छुकः, अस्मि = भवामि।

**( ख ) भावार्थः** – कालिदासः वदति यत् यद्यपि महतः सूर्यवंशस्य वर्णनं कर्तुं मम सामर्थ्यं नास्ति तथापि अल्पबुद्धियुक्तः अहं तथैव प्रयत्नं करोमि यथा कश्चित् जनः लघुनौकया महत्समुद्रं तरितुमिच्छति।

**( ग ) छन्दः** – अस्मिन् श्लोके अनुष्टुप् छन्दः अस्ति। अनुष्टुप् छन्दसः लक्षणं पूर्वश्लोके दत्तम् अस्ति।

**( घ ) अलङ्कारः** – अत्र स्वीयबुद्धेः तुलना लघु-नौकया सह कृता अस्ति। अतः निदर्शना अलङ्कारः अस्ति।

**विशेषांशः** – सूर्यप्रभवः, वंशः, अल्पविषया, मतिः – प्र.वि. एकवचनम्।
दुस्तरम् – दुस् + तृ + खल् ।
उडुपेन – 'उडुपः' शब्दस्य तृतीया विभक्तिः, एकवचनम् ।
मोहात् – 'मोहः' शब्दस्य पञ्चमी विभक्तिः, एकवचनम् ।

## श्लोकः ३

**प्रसङ्गः** – अस्मिन् श्लोके महाकविः कालिदासः ''महाकाव्यरचनासामर्थ्यं मयि कुतः? इति विलिख्य स्वविनम्रतां प्रदर्शयति –

**मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम् ।**
**प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ।।३।।**

**अन्वयः** – मन्दः कवियशः प्रार्थी प्रांशुलभ्ये फले लोभात् उद्बाहुः वामनः इव उपहास्यतां गमिष्यामि।

**पदार्थः** – मन्दः = अल्पबुद्धि, मन्दमति। कवियशः प्रार्थी = काव्यनिर्माण से होने वाला यश । प्रांशुलभ्ये = उन्नत पुरुष को प्राप्य । फले = फल की ओर । लोभात् = लोभ से । उद्बाहुः = ऊपर हाथ उठाते हुए। वामनः = बौने पुरुष के समान। उपहास्यतां = उपहास से प्राप्त होना। गमिष्यामि = प्राप्त करूँगा।

**हिन्दी-अर्थ** - मैं मन्दमति, महाकवियों की कीर्ति का अभिलाषी हूँ। किन्तु लम्बे मनुष्यों के द्वारा पाने योग्य फल की ओर लोभ से ऊपर की ओर हाथ उठाकर छोटे कद वाले (वामन) पुरुष के समान उपहास्यता को प्राप्त होऊँगा - इस प्रकार के कथन से महाकवि कालिदास पुनः "विद्या ददाति विनयम्" इस उक्ति को चरितार्थ किया।

**व्याख्या** -

**(क) पर्यायपदानि** - मन्दः = अल्पबुद्धियुक्तः, कवियशः = कविभिः काव्यनिर्माणेन प्राप्तं यदिदं यशः, तत् कवियशः, प्रार्थी = इच्छुकः, प्रांशुलभ्ये = उन्नतपुरुषप्राप्तियोग्ये, फले = आम्रादिफलविषये, लोभात् = फलग्रहणभिलाषात्, उद्बाहुः = उर्ध्वहस्तः, वामनः = लघुकायपुरुषः, इव = यथा, उपहास्यताम् = उपहासविषयतां, गमिष्यामि = प्राप्स्यामि ।

**(ख) भावार्थः** - महाकविः कालिदासः स्वीयां विनम्रतां प्रदर्शयन् वदति यत् अहं मन्दमतिः महापुरुषाणां चरितयुक्तरघुवंशस्य वर्णने तथैव उपहास्यतां प्राप्स्यामि यथा कश्चित् वामनः पुरुषः लम्बमानपुरुषेण प्राप्यमाणं फलं प्राप्तुम् उर्ध्वहस्तम् उपहास्यतां प्राप्नोति।

**(ग) छन्दः** - अस्मिन् श्लोके अनुष्टुप् छन्दः अस्ति। एतस्य छन्दसः लक्षणं पूर्वश्लोके द्रष्टव्यम् ।

**(घ) अलङ्कारः** - श्लोकेऽस्मिन् 'उपमा' अलङ्कारः अस्ति।

**विशेषांशः** -

मन्दः, कवियशः, प्रार्थी - प्रथमाविभक्तिः, एकवचनम् ।

गमिष्यामि - 'गम्' धातोः लृट्लकारः, उ.पु., एकवचनम् ।

उपहास्यताम् = उप् + हस् + ण्यत् + तल् (द्वि.वि., एकवचनम्)

लोभात् = 'लोभः' शब्दः, पञ्चमी विभक्तिः, एकवचनम् ।

### श्लोकः ४

**प्रसङ्गः** - अस्मिन् श्लोके महाकविः कालिदासः सूचयति यत् रघुवंशस्य वर्णनं मम कृते अतीव सरलमस्ति, यतोहि इतः पूर्वमपि वाल्मीकिरादिकवयः सूर्यवंशस्य विषये वर्णनं कृतवन्तः सन्ति -

**अथवा कृतवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभिः ।**
**मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ।।४।।**

**अन्वयः** - अथवा पूर्वसूरिभिः कृतवाग्द्वारे अस्मिन् वंशे वज्रसमुत्कीर्णे मणौ सूत्रस्य इव मे गतिः अस्ति।

**पदार्थः** - अथवा = प्रकारान्तर से । पूर्वसूरिभिः = प्राचीन कवियों (वाल्मीकि आदि) के द्वारा । कृतवाग्द्वारे = संस्कृतवाङ्मय के विषय में कृत लेखन से महाकाव्य-निर्माण का द्वार पहले ही खोल दिया है । अस्मिन् = सूर्य से उत्पन्न होने वाले । वंशे = कुल में । वज्रसमुत्कीर्णे = मणियों में छिद्र करने वाली सूई के द्वारा ग्रन्थित । मणौ = रत्न में। सूत्रस्य इव = सूत्र (धागे) के समान। मे = मेरी। गतिः = सञ्चार। अस्ति = (सम्भव) है।

**हिन्दी-अर्थः** - अथवा वाल्मीकि आदि पूर्ववर्ती कवियों ने सूर्य-वंश को आधार बनाकर रामायण आदि काव्य लिखकर संस्कृत-वाङ्मय का अर्थात् महाकाव्य निर्माण का द्वार पहले ही खोल दिया है। अतः सूर्यवंश से सम्बन्धित महाकाव्य-निर्माण का कार्य मेरे लिए वैसे ही सम्भव हो गया है जिस प्रकार हीरे की सूई से छिद्रित मणि में धागा पिरोना सम्भव है।

**व्याख्या** -

**(क) पर्यायपदानि** - अथवा = पक्षान्तरेण, पूर्वसूरिभिः = प्राचीनकविभिः, कृतवाग्द्वारे = रामायणादिरूपवाङ्मार्गे, अस्मिन् = सूर्यप्रभवे, वंशे = कुले, वज्रसमुत्कीर्णे = मणिबेधकसूच्या विद्धे, मणौ = रत्ने, सूत्रस्य = तन्तोः, इव =

यथा, मे = मम, गतिः = सञ्चारः, अस्ति = वर्तते।

**( ख ) भावार्थः** – कविः कालिदासः महाकवीनां तल्लिखितमहाकाव्यानाञ्च परम्परायाः विषये अनुमोदनं कुर्वन् वदति यत् यथा मणिवेधकसूचीविद्धे रत्ने सूत्रस्य गतिर्भवति तथैव महर्षिवाल्मीकिरचितरामायणप्रबन्धद्वारेण सूर्यवंशेऽस्मिन् मम वाणी अवश्यमेव सञ्चरिता भविष्यति ।

**( ग ) छन्दः** – अस्मिन् श्लोके अनुष्टुप् छन्दः अस्ति। एतस्य छन्दसः लक्षणं पूर्वश्लोके द्रष्टव्यम्।

**( घ ) अलङ्कारः** – श्लोकेऽस्मिन् 'उपमा' अलङ्कारः अस्ति।

**विशेषांशः** –

कृतवाग्द्वारे = वाक् एव द्वारम् इति वाग्द्वारम् । कृतं वाग्द्वारं येन सः कृतवाग्द्वारः, तस्मिन् कृतवाग्द्वारे (सप्तमी विभक्तिः, एकवचनम्)।

पूर्वसूरिभिः = तृतीया विभक्तिः, बहुवचनम्।

वज्रसमुत्कीर्णे = वज्रेण समुत्कीर्णः इति वज्रसमुत्कीर्णः, तस्मिन् वज्रसमुत्कीर्णे (सप्तमी विभक्तिः, एकवचनम्)।

मणौ = सप्तमी विभक्तिः, एकवचनम्।

## श्लोकः ५

**प्रसङ्गः** – श्लोकेऽस्मिन् कविकुलगुरुः महाकविः कालिदासः रघुवंशिनां संस्काराः कीदृशाः इति वर्णयति –

**सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् ।**
**आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ।।५।।**

**अन्वयः** – सः अहम् आजन्मशुद्धानाम् आफलोदयकर्मणाम् आसमुद्र-क्षितीशानाम् आनाकरथवर्त्मनां (रघूणाम् अन्वयं वक्ष्ये)।

**पदार्थः** – सः = (पूर्वोक्त) वह। अहम् = मैं (कालिदास)। आजन्मशुद्धानाम् = जन्म से लेकर मृत्युपर्यन्त जिनके संस्कार तथा चरित्र शुद्ध रहे । आफलोदयकर्मणाम् = जब तक फल की प्राप्ति न हो जाय तब तक निरन्तर कर्म करने वाले । आसमुद्रक्षितीशानाम् = सागर पर्यन्त पृथ्वी पर शासन करने वाले । आनाकरथवर्त्मनाम् = स्वर्ग (आनाक) तक रथ से यात्रा करने वाले अर्थात् देवताओं की सहायता करने वाले। रघूणाम् = रघुकुल में उत्पन्न होने वालों के । अन्वय = वंश को । वक्ष्ये = कहूँगा ।

**हिन्दी-अर्थः** – पूर्वोक्त मैं कालिदास जिनके जन्म से लेकर अन्त तक संस्कार तथा चरित्र शुद्ध रहे, जब तक फल की प्राप्ति न हो जाए तब तक निरन्तर कर्म करने वाले, सागर तक पृथ्वी पर शासन करने वाले, स्वर्ग तक रथ से यात्रा करने वाले अर्थात् देवताओं की सहायता करने वाले रघुकुल में उत्पन्न होने वालों के वंश के बारे में वर्णन करूँगा ।

**व्याख्या** –

**( क ) पर्यायपदानि** – सः = पूर्वोक्तः असौ, अहम् = कालिदासः, आजन्मशुद्धानाम् = जन्मतः आरभ्य मृत्युपर्यन्तं शुद्धसंस्कारचरित्रयुक्तानाम्, आफलोदयकर्मणाम् = कर्मफलप्राप्तिपर्यन्तं कर्मकुर्वताम्, आसमुद्रक्षितीशानाम् = समुद्रपर्यन्तं पृथिव्यां शासनकर्त्तृणाम्, आनाकरथवर्त्मनाम् = स्वर्गपर्यन्तं रथेन मार्गगामिनां, रघूणाम् = रघुवंशिनां, वंशपरम्परां वर्णयिष्यामि इति।

**( ख ) भावार्थः** – कालिदासेन उक्तं यत् अहम् आजन्मशुद्धसंस्कारचरित्रवतां, कर्मफलप्राप्तिपर्यन्तं कर्मकुर्वतां, समुद्रपर्यन्तं पृथिव्यां शासनकर्त्तृणां स्वर्गपर्यन्तं रथेन मार्गगामिनां रघुवंशिनां वंशपरम्परायाः वर्णनं करिष्यामि।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । पूर्वश्लोके लक्षणं द्रष्टव्यम् ।

**विशेषांशः** – सः अहम् – कालिदासस्य विशेषणम् ।

आजन्मशुद्धानाम् – षष्ठी वि. बहुवचनम् ।
आफलोदयकर्मणाम् – षष्ठी वि. बहुवचनम् ।
आसमुद्रक्षितीशानाम्, आनाकरथवर्त्मनाम् – ष.वि. बहुवचनम् ।
'आ' समन्तात् इत्यर्थे सर्वत्र प्रयुक्तमस्ति ।

## श्लोकः ६

**प्रसङ्गः** – अस्मिन् श्लोकेऽपि रघुवंशे उत्पन्नजनानां चरित्रं वर्णयति महाकविः कालिदासः –

**यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् ।**
**यथापराधदण्डानां यथाकालप्रबोधिनाम् ।।६।।**

**अन्वयः** – यथाविधिहुताग्नीनां, यथाकामार्चितार्थिनां, यथापराधदण्डानां, यथाकालप्रबोधिनां (रघूणां वर्णनं करिष्यामि)।

**पदार्थः** – यथाविधिहुताग्नीनां = शास्त्रानुसार अग्नि में प्रतिदिन आहुति करने वाले । यथाकामार्चितार्थिनां = याचकों की इच्छानुसार दान देकर सत्कार करने वाले । यथापराधदण्डानां = दुष्टों को अपराधानुसार ही दण्ड देने वाले । यथाकालप्रबोधिनां = सदैव जागरुक रहने वाले । (रघूणां वंशपरम्परायाः वर्णनं करिष्यामि इति)।

**हिन्दी-अर्थः** – जो शास्त्रानुसार अग्नि में प्रतिदिन आहुति करने वाले, याचकों की इच्छानुसार दान देकर सत्कार करने वाले, दुष्टों को अपराध के अनुसार ही दण्ड देने वाले, सदैव जागरुक रहने वाले अर्थात् समयानुसार ही कार्य करने के लिए तत्पर रहने वाले रघुवंशियों के वंश परम्परा का मैं वर्णन करूँगा ।

**व्याख्या** –

**(क) पर्यायपदानि** – यथाविधिहुताग्नीनां = शास्त्रानुसारम् अग्नौ प्रतिदिनम् आहुतिकर्त्तॄणां, यथाकामार्चितार्थिनां = याचकानां कृते यथेष्टं दानं प्रदाय सत्कारकर्त्तॄणां, यथाकालप्रबोधिनां = सदैव कार्यतत्पराणां (रघूणां वंशपरम्परायाः वर्णनं करिष्यामि)।

**(ख) भावार्थः** – शास्त्रोक्तविधिना यज्ञकर्मकर्त्तॄणाम् अतिथिपूजकानां दुष्टजनेभ्यः अपराधानुसारमेव दण्डदातॄणां सदैव समयानुसारं प्रजापालनतत्पराणां रघूणां वंशपरम्परामहं वर्णयिष्यामि ।

**(ग) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । एतस्य छन्दसः लक्षणं पूर्वश्लोकान्तर्गते वर्णितमस्ति ।

**विशेषांशः** – यथाविधिहुताग्नीनां यथाकामार्चितार्थिनां, यथापराधदण्डानां, यथाकालप्रबोधिनाम् – षष्ठीविभक्तिः, बहुवचनम्।

## श्लोकः ७

**प्रसङ्गः** – अस्मिन् श्लोके महाकविः कालिदासः रघुवंशिनः कीदृशाः इति वर्णयति –

**त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्।**
**यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ।।७।।**

**अन्वयः** – त्यागाय सम्भृतार्थानां, सत्याय मितभाषिणां, यशसे विजिगीषूणां, प्रजायै गृहमेधिनां (रघूणाम् अन्वयं वक्ष्ये)।

**पदार्थः** – त्यागाय = त्याग (दान) के लिए । सम्भृतार्थानां = धन एकत्रित करने वालों का । सत्याय = सत्य के लिए । मितभाषिणां = कम बोलने वालों का । यशसे = यश के लिए । विजिगीषूणां = विजय प्राप्त करने वालों का । प्रजायै = प्रजा (सन्तान) के लिए । गृहमेधिनां = गार्हस्थ जीवन धारण करने वालों का ।

**हिन्दी-अर्थः** – दान देने के लिए धन एकत्रित करने वाले, सत्य भाषण के लिए कम बोलने वाले, यश के लिए विजय प्राप्त करने वाले तथा प्रजा के लिए गार्हस्थ जीवन धारण करने वाले रघुवंशियों के वंश परम्परा का मैं वर्णन करूँगा ।

**व्याख्या –**

**( क ) पर्यायपदानि** – त्यागाय = दानाय, सम्भृतार्थानां = धनसङ्ग्रहकर्तॄणां, सत्याय = यथार्थभाषणाय, मितभाषिणाम् = अल्पभाषिणां, यशसे = कीर्तिनिमित्तं, विजिगीषूणां = विजयेच्छुकानां, प्रजायै = सन्तानाय, गृहमेधिनां = गार्हस्थजीवनधारकानां (रघूणां वंशपरम्पराया: वर्णनं करिष्यामि)।

**( ख ) भावार्थ:** – दानाय धनसङ्ग्रहकर्तॄणां, यथार्थभाषणाय स्वल्पभाषिणां, यशप्राप्तये विजयेच्छुकानां तथाच सन्तानप्राप्तये गार्हस्थजीवनधारकानां रघूणां वंशपरम्पराम् (अहं कालिदास:) वर्णयिष्यामि ।

**( ग ) छन्द:** – श्लोकेऽस्मिन् अनुष्टुप् छन्द: अस्ति । एतस्य लक्षणं पूर्वश्लोके प्रदत्तमस्ति ।

**विशेषांश:** –

त्यागाय – त्याग: (पुं.) चतुर्थी विभक्ति:, एकवचनम् ।

सत्याय – सत्यम् (नपुं.) चतुर्थीविभक्ति:, एकवचनम् ।

यशसे – यश: (नपुं.) चतुर्थीविभक्ति:, एकवचनम् ।

प्रजायै – प्रजा (स्त्री.) चतुर्थीविभक्ति:, एकवचनम् ।

सम्भृतार्थानां, मितभाषिणां, विजिगीषूणां, गृहमेधिनाम् – ष.वि., एकवचनम् ।

## श्लोक: ८

**प्रसङ्ग:** – श्लोकेऽस्मिन् रघुवंशिनां गुणानां वर्णनं करोति महाकवि: कालिदास: –

**शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।**
**वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ।।८।।**

**अन्वय:** – शैशवे अभ्यस्तविद्यानां, यौवने विषयैषिणां, वार्द्धके मुनिवृत्तीनाम्, अन्ते योगेन तनुत्यजां (रघूणामन्वयं वक्ष्ये)।

**पदार्थ:** – शैशवे=शैशव अवस्था में । अभ्यस्तविद्यानां = विद्याप्राप्ति के लिए अभ्यास करने वालों का । यौवने = युवावस्था में । विषयैषिणां = संसारिकविषयों का उपभोग करने वालों का । वार्द्धके = वृद्धावस्था में । मुनिवृत्तीनां = मुनिव्रत को धारण करने वालों का । अन्ते = शरीर त्याग करने वालों का। योगेन = योग के द्धारा । तनुत्यजां = शरीर त्याग करने वालों का ।

**हिन्दी-अर्थ:** – शैशव-अवस्था में विद्या प्राप्ति के लिए अभ्यास करने वाले, युवावस्था में सांसारिक-विषयों का उपभोग करने वाले, वृद्धावस्था में मुनिव्रत को धारण करने वाले तथा अन्त में शरीर-त्याग के समय योग द्वारा शरीर-त्याग करने वाले रघुवंशियों के वंश परम्परा का वर्णन करूँगा ।

**व्याख्या –**

**( क ) पर्यायपदानि** – शैशवे = बाल्यकाले, अभ्यस्त विद्यानां = विद्याप्राप्तये अभ्यासकर्तॄणां, यौवने = युवावस्थायां, विषयैषिणां = सांसारिकविषयाणाम् उपभोगकर्तॄणां, वार्द्धके = वृद्धावस्थायां, मुनिवृत्तीनां = मुनिव्रतधारिणाम्, अन्ते = शरीरत्यागकाले, योगेन = योगसमाधिना, तनुत्यजां = देहत्यागिनाम् ।

**( ख ) भावार्थ:** – बाल्यकाले विद्याप्राप्तयेऽभ्यासकर्तॄणां, युवावस्थायां सांसारिकविषयाणाम् उपभोगकर्तॄणां, वृद्धावस्थायां मुनिव्रतधारिणां शरीरत्यागकाले च योगसमाधिना देहत्यागिनां रघूणां चरित्रस्य वर्णनं करिष्यामि ।

**( ग ) छन्द:** – श्लोकेऽस्मिन् अनुष्टुप् छन्द: अस्ति । एतस्य लक्षणं पूर्वश्लोके प्रदत्तमस्ति ।

**विशेषांश:** – शैशवे, यौवने, वार्द्धके – सप्तमी विभक्ति:, एकवचनम् । अभ्यस्तविद्यानां, विषयैषिणां, मुनिवृत्तीनाम् – षष्ठी वि. – बहुवचनम् ।

## श्लोकः ९

**प्रसङ्गः**– श्लोकेऽस्मिन् रघूणां गुणान् श्रुत्वा महाकाव्ये तन्निबद्धुं प्रेरणा मया प्राप्ता इति वर्णयति महाकविः कालिदासः–

**रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।**
**तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ।।९।।**

**अन्वयः** – तनुवाग्विभवः अपि सन् तद्गुणैः कर्णम् आगत्य चापलाय प्रचोदितः (अहं) रघूणाम् अन्वयं वक्ष्ये ।

**पदार्थः** – तनुवाग्विभवः अपि सन् = वर्णन करने की शक्ति बहुत कम होने पर भी । तद्गुणैः = रघुवंशी राजाओं के गुणों द्वारा । कर्णं = मेरे कानों के पास । आगत्य = आकर । चापलाय = चञ्चल (विना विचार किए हुए) मेरे लिए। प्रचोदितः = प्रेरित । अहं = कालिदास । रघूणां = रघुवंशियों के । अन्वयं = कुल का । वक्ष्ये = वर्णन करूँगा ।

**हिन्दी-अर्थः** – वाणी के वर्णन करने की शक्ति स्वल्प होने पर भी रघुवंशी राजाओं के गुणों का मेरे कानों के समीप आकर अर्थात् रघुवंशी राजाओं के कुल के गुणों को सुनकर बिना विचार किए हुए प्रेरित होकर मैं कवि कालिदास रघुकुल में उत्पन्न होने वालों के कुल का वर्णन करूँगा ।

**व्याख्या** –

**(क) पर्यायपदानि** – तनुवाग्विभवः = स्वल्पवाक्शक्तियुक्तः, अपि सन् = भुत्वा अपि, तद्गुणैः = रघुवंशिराज्ञां गुणैः, कर्णं = मम श्रोत्रम्, आगत्य = आगम्य, चापलाय = अविचारकाय, प्रचोदितः = प्रेरितः (अहं = कालिदासः), रघूणां = रघुवंशिराज्ञाम्, अन्वयं = वंशपरम्परायाः, वक्ष्ये = वर्णनं करिष्यामि ।

**(ख) भावार्थः** – महाकविः कालिदासः वदति यत् स्वल्पवाक्शक्तियुक्तः भूत्वा अपि रघुवंशिराज्ञां गुणान् श्रुत्वा अहं प्रेरितो भूत्वा अविचार्य एव रघुवंशे उत्पन्नमहाराजानां चरित्रं वर्णयितुम् उद्युक्तः सञ्जातः ।

**(ग) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । एतस्य छन्दसः लक्षणं पूर्वोक्त श्लोके वर्णितमस्ति ।

**विशेषांशः** –

गुणैः = तृतीया विभक्तिः, बहुवचनम् ।

आगत्य = आ+गम्+ल्यप् ।

रघूणाम् = षष्ठीविभक्तिः, बहुवचनम्।

वक्ष्ये = उत्तमपुरुषः, एकवचनम् ।

## श्लोकः १०

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः महाकाव्यस्य समीक्षकाणां विषये स्वीयं विचारं प्रकटयति –

**तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।**
**हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ।।१०।।**

**अन्वयः** – सद् असद् व्यक्तिहेतवः सन्तः तं श्रोतुम् अर्हन्ति, हि हेम्नः विशुद्धिः श्यामिका अपि वा अग्नौ संलक्ष्यते।

**पदार्थः** – सद् = गुण । असद् = अवगुण । व्यक्तिहेतवः = विचार करने वाले । सन्तः = सज्जन या विद्वान् लोग । अर्हन्ति = योग्य हैं । हि = क्योंकि । हेम्नः = सुवर्ण की । विशुद्धिः = शुद्धता । श्यामिका = दोष । अपि वा = अथवा । अग्नौ = आग में । संलक्ष्यते = देखा जाता है ।

**हिन्दी-अर्थः** – गुण-अवगुण का विचार करने वाले सज्जन लोग ही रघुवंशनामक महाकाव्य को सुनने योग्य हैं । क्योंकि सुवर्ण की शुद्धि और अशुद्धि तो आग में ही परीक्षित की जा सकती है ।

**व्याख्या** –

**(क) पर्यायपदानि** – सद् = गुणः, असद् = अवगुणः, व्यक्तिहेतवः = विचारकर्तारः, सन्तः = सज्जनाः, तं =

रघुवंशनामकग्रन्थं, श्रोतुं = श्रवणं कर्तुम्, अर्हन्ति = शक्नुवन्ति, हि = यतोहि, हेम्नः = सुवर्णस्य, विशुद्धिः = शुद्धता, श्यामिका = अशुद्धता, अपि वा = अथवा, अग्नौ = वह्नौ, एव संलक्ष्यते = ज्ञायते ।

**( ख ) भावार्थः** – यथा सुवर्णस्य शुद्धता अशुद्धता च अग्नौ परीक्ष्यते । एवमेव काव्यस्य गुणावगुणविवेककरणाय सज्जनाः विद्वांसः एव समर्थाः सन्ति ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । एतस्य छन्दसः लक्षणं पूर्वश्लोके वर्णितमस्ति ।

**( घ ) अलङ्कारः** – अत्र अर्थान्तरन्यासः अलङ्कारः अस्ति ।

**विशेषांशः** – श्रोतुम् = श्रु + तुमुन् ।

अग्नौ = 'अग्नि' शब्दः, सप्तमी विभक्तिः, एकवचनम् ।

हेम्नः = षष्ठी विभक्तिः, एकवचनम् । सत् + असत् + व्यक्तिहेतवः = सदसद्व्यक्तिहेतवः ।

## श्लोकः ११

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः रघुवंशस्य उत्पत्तिवर्णनं करोति –

**वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।**
**आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ।।११।।**

**अन्वयः** – मनीषिणां माननीयः वैवस्वतः नाम मनुः छन्दसां प्रणवः इव महीक्षिताम् आद्यः आसीत्।

**पदार्थः** – मनीषिणां = विद्वानों के (में)। माननीयः = पूज्य । वैवस्वतः = वैवस्वत नाम से प्रसिद्ध सूर्य वंश में उत्पन्न । नाम = नामक । मनुः = मनु नाम वाले । छन्दसां = वेदों के। प्रणवः = ओंकार के । इव = समान । महीक्षिताम् = राजाओं के। आद्यः = प्रथम । आसीत् = थे /हुए ।

**हिन्दी-अर्थः** – विद्वानों में पूज्य वैवस्वत नाम से प्रसिद्ध सूर्यवंश में उत्पन्न मनु नामक वेदों के ऊँकार स्वरूप राजाओं में प्रथम राजा हुए ।

**व्याख्या** –

**( क ) पर्यायपदानि** – मनीषिणां = विदुषां, माननीयः = पूज्यः, वैवस्वतः = वैवस्वतनाम्ना प्रसिद्धः सूर्यवंशी राजा मनुः, छन्दसां = वेदानां, प्रणवः = ऊँकारः, इव = सदृशः, महीक्षिताम् = महाराजानाम्, आद्यः = प्रथमः (राजा), आसीत् = अभवत्।

**( ख ) भावार्थः** – विदुषां पूज्यः वैवस्वतनाम्ना प्रसिद्धः सूर्यवंशी राजा मनुः वेदानाम् ऊँकार सदृशः महाराजानां प्रथमः राजा अभवत्।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । एतस्य छन्दसः लक्षणं पूर्वश्लोके वर्णितमस्ति ।

**( घ ) अलङ्कारः** – अत्र उपमा अलङ्कारः अस्ति ।

**विशेषांशः** – मनीषिणाम् = मनीषिन् – षष्ठीविभक्तिः, बहुवचनम्।

माननीयः = मान + अनीयर्।

छन्दसाम् = 'छन्दः' – षष्ठी विभक्तिः , बहुवचनम् ।

महीक्षिताम् = षष्ठी विभक्तिः, बहुवचनम् ।

## श्लोकः १२

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः रघुवंशे उत्पन्नस्य राज्ञः दिलीपस्य सर्वप्रथमं वर्णनं करोति –

**तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।**
**दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ।।१२।।**

**अन्वयः** – शुद्धिमति तदन्वये शुद्धिमत्तरः दिलीपः इति राजेन्दुः क्षीरनिधौ इन्दुः इव प्रसूतः।
**पदार्थः** – शुद्धिमति =अत्यन्त पवित्र। तदन्वये = उस सूर्यवंश में। शुद्धिमत्तरः = अत्यन्त पवित्र निष्कलङ्क । दिलीपः = दिलीप नाम से प्रसिद्ध। इति = इस प्रकार । राजेन्दुः = राजाओं में सर्वश्रेष्ठ । क्षीरनिधौ = क्षीरसागर में। इन्दुः = चन्द्रमा । इव = समान । प्रसूतः = उत्पन्न हुए ।
**हिन्दी-अर्थः** – अत्यन्त पवित्र उस सूर्य-वंशीय परम्परा में अत्यन्त पवित्र चरित्र वाले राजाओं में सर्वश्रेष्ठ, राजा दिलीप नामक राजा क्षीर सागर में चन्द्रमा के समान उत्पन्न हुए।
**व्याख्या** –
**( क ) पर्यायपदानि** – शुद्धिमति =दोषरहिते, तदन्वये = तस्मिन् वंशे, शुद्धिमत्तरः = अतीव पवित्रः चरित्रयुक्तः, दिलीपः इति = दिलीप नामकः राजा, राजेन्दुः = नृपेषु चन्द्रः, क्षीरनिधौ = क्षीरसागरे, इन्दुः = चन्द्रमा, इव = सदृशः (राजा), प्रसूतः = उत्पन्नः (सञ्जातः)।
**( ख ) भावार्थः** – दोषरहिते तस्मिन् वंशे अतीव पवित्रः चरित्रयुक्तः दिलीपनामक राजा, नृपेषु चन्द्र इव क्षीरसागरे चन्द्रमा सदृशः (राजा)उत्पन्नोऽभूत् ।
**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । एतस्य छन्दसः लक्षणं पूर्वश्लोके वर्णितमस्ति ।
**( घ ) अलङ्कारः** – अत्र उपमा अलङ्कारः अस्ति ।
**विशेषांशः** – शुद्धिमति, तदन्वये, क्षीरनिधौ – सप्तमी विभक्तिः, एकवचनम्।
शुद्धिमत्तरः, दिलीपः, राजेन्दुः, इन्दुः = प्रथमाविभक्तिः, एकवचनम् ।

## श्लोकः १३

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य विशेषतां प्रदर्शयति –

**व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः ।**
**आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ।।१३।।**

**अन्वयः** – व्यूढोरस्कः वृषस्कन्धः शालप्रांशुः महाभुजः आत्मकर्मक्षमं देहम् आश्रितः क्षात्रः धर्म इव (स्थितिः)।
**पदार्थः** – व्यूढोरस्कः = विशाल चौडी छाती वाले। वृषस्कन्धः = बैल के समान ऊँचे और भारी स्कन्धों वाले। शालप्रांशुः = शाल वृक्ष के समान उन्नत (ऊँचे)। महाभुजः = लम्बी-लम्बी भुजाओं वाले। आत्मकर्मक्षमं = अपने क्षत्रियोचित कर्म के अनुकूल । देहम् = शरीर को । आश्रितः = प्राप्त किए हुए । क्षात्रः = क्षत्रियजनोचित ।धर्मः इव = वीर धर्म के समान । स्थितः = स्थित हुए ।
**हिन्दी-अर्थः** – राजा दिलीप चौडी छाती वाले, बैल के समान ऊँचे और भारी कन्धों वाले, शाल वृक्ष के समान उन्नत (ऊँचे) लम्बी-लम्बी भुजाओं वाले, अपने क्षत्रियोचित कर्म के अनुकूल शरीर को प्राप्त किए हुए, क्षत्रियों से सम्बन्धित वीर-धर्म के समान स्थित हुए।
**व्याख्या** –
**( क ) पर्यायपदानि** – व्यूढोरस्कः = विपुलं वक्षस्थलं, वृषस्कन्धः = वृषभसदृशमांसलस्कन्धः, शालप्रांशुः = शालवृक्षः इव उन्नतः, महाभुजः = आजानुबाहुः, आत्मकर्मक्षमं = स्वस्य व्यापारः तदनुरूपमिति, देहं= शरीरम्, आश्रितः = प्राप्तः, क्षात्रः = क्षत्रियसम्बन्धी, धर्मः = स्वभावः, पराक्रमः इत्यर्थः, इव = यथा, स्थितः = अतिष्ठत् ।
**( ख ) भावार्थः** – विशालवक्षः, वृषभसदृशस्कन्धयुक्तः, शालवृक्ष इव उन्नतः, आजानुबाहुः स्वस्यकर्मानुकूलसामर्थ्ययुक्तशरीराश्रितः क्षत्रियधर्मसदृशः स्थितः अभूत्।
**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । एतस्य छन्दसः लक्षणं पूर्वश्लोके वर्णितमस्ति ।
**( घ ) अलङ्कारः** –अत्र उत्प्रेक्षा अलङ्कारः अस्ति ।
**विशेषांशः** – व्यूढोरस्कः, वृषस्कन्धः, शालप्रांशुः, महाभुजः – प्रथमाविभक्तिः, एकवचनम् ।

## श्लोकः १४

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य सामर्थ्यवर्णनं करोति –

**सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविना ।**
**स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना ।।१४।।**

**अन्वयः** – सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविना सर्वोन्नतेन आत्मना मेरुः इव उर्वीं क्रान्त्वा स्थितः।

**पदार्थः** – सर्वातिरिक्तसारेण = सर्वाधिक बल से युक्त। सर्वतेजोऽभिभाविना = सभी प्राणियों के तेज को अपने तेज से तिरस्कृत करने वाले। सर्वोन्नतेन = सभी लोगों से अत्यधिक उन्नत शरीर वाले। आत्मना = अपने शरीर से। मेरुः = सुमेरु पर्वत के । इव = समान। उर्वीं = पृथ्वी को । क्रान्त्वा = व्याप्त कर। स्थितः = अधीन कर लिया ।

**हिन्दी-अर्थः** – राजा दिलीप ने अपने पराक्रम, तेज और विशालकाय होने से अन्य सभी राजाओं को सुमेरु पर्वत के समान तिरस्कृत करते हुए समस्त पृथ्वी-मण्डल को अपने अधीन कर लिया।

**व्याख्या** –

**( क ) पर्यायपदानि** – सर्वातिरिक्तसारेण = सर्वाधिकबलेन, सर्वतेजोऽभिभाविना = सर्वतेजोऽभिभवकारिणा, सर्वोन्नतेन = सर्वभूतेभ्यः उन्नतः, आत्मना = आत्मनः शरीरेण, मेरुः = सुमेरुपर्वतः, इव = यथा, उर्वीं = पृथ्वीं, क्रान्त्वा = व्याप्य, स्थितः = अवस्थितः अस्ति।

**( ख ) भावार्थः** – राजा दिलीपः सुमेरुपर्वतसदृशः सर्वाधिकबलेन, सर्वतेजोऽभिभावकारिणा, सर्वभूतेभ्यः उन्नतः, आत्मनः शरीरेण च पृथ्वीं व्याप्य अवस्थितः अस्ति ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।अनुष्टुप् छन्दसः लक्षणं पूर्वश्लोकस्य व्याख्यानक्रमे प्रदत्तमस्ति।

**( घ ) अलङ्कारः** – अत्र उपमा अलङ्कारः अस्ति ।

**विशेषांशः** – सर्व+अतिरिक्तसारेण = दीर्घसन्धिः ।

सर्वतेजः + अभिभाविना = विसर्गसन्धिः ।

सर्व +उन्नतेन = गुणसन्धिः ।

## श्लोकः १५

**प्रसङ्गः** – अस्मिन् श्लोके महाकविः कालिदासः राज्ञः दिलीपस्य शरीरसामर्थ्यं बुद्धिकौशलञ्च वर्णयति –

**आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।**
**आगमैः सदृशारम्भ आरम्भ सदृशोदयः ।।१५।।**

**अन्वयः** – आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः आगमैः सदृशारम्भः आरम्भसदृशोदयः (आसीत्)।

**पदार्थः** – आकारसदृशप्रज्ञः = राजा दिलीप की जिस प्रकार की आकृति (सुन्दर और विशालकाय) थी, वैसी ही उनकी बुद्धि प्रखरता भी थी। प्रज्ञया = तीक्ष्ण बुद्धि के समान। सदृशागमः = तीक्ष्ण बुद्धि के समान शास्त्रों के ज्ञाता थे । आगमैः = शास्त्रानुकूल । सदृशारम्भः = शास्त्रानुकूल कार्य करते थे । आरम्भसदृशोदयः = कर्मानुसार ही पूर्णतया सफलता भी उनको मिलती थी ।

**हिन्दी-अर्थः** – राजा दिलीप की जिस प्रकार की आकृति थी, वैसी ही उनकी बुद्धि प्रखरता भी थी। वे तीक्ष्ण बुद्धि के समान शास्त्रों के ज्ञाता भी थे । वे शास्त्रानुकूल कार्य करते थे । अतः कर्मानुसार ही पूर्णतया सफलता भी उनको मिलती थी ।

**व्याख्या** –

**( क ) पर्यायपदानि** – आकारसदृशप्रज्ञः = आकृतिसदृशबुद्धियुक्तः , प्रज्ञया = बुद्धया, सदृशागमः = अनुरूपं

शास्त्रज्ञानम्, आगमै: = शास्त्रै:। सदृशारम्भ: = समानं कर्मं, आरम्भसदृशोदय: = कर्मानुसारं फलप्राप्ति:, इति दिलीप: आसीत्।

**( ख ) भावार्थ:** – राज्ञ: दिलीपस्य यथा आकृति: आसीत् तथैव तस्य बुद्धितीक्ष्णता अपि आसीत्। यादृशी बुद्धि: तस्य आसीत् तथैव शास्त्रपरिश्रम: तथा च शास्त्रपरिश्रमानुसारमेव कार्यारम्भ:। कार्यारम्भानुसारमेव साफल्यमपि मिलति स्म।

**( ग ) छन्द:** – श्लोकेऽस्मिन् अनुष्टुप् छन्द: अस्ति । एतस्य छन्दस: लक्षणं पूर्वश्लोके वर्णनप्रसङ्गे प्रदत्तमस्ति ।

**( घ ) अलङ्कार:** – अत्र मालोपमा नामक: अलङ्कार: अस्ति ।

**विशेषांश:** – प्रज्ञया = 'प्रज्ञा' शब्दस्य तृतीयाविभक्ति:, एकवचनम्।

सदृश + आगम: = दीर्घसन्धि: ।

आरम्भसदृश + उदय: = गुणसन्धि: ।

आगमै: = 'आगम' शब्दस्य तृतीयाविभक्ति:, बहुवचनम् ।

## श्लोक: १६

**प्रसङ्ग:** – अस्मिन् श्लोके महाकवि: कालिदास: राज्ञ: दिलीपस्य दुष्टानां कृते भयङ्करत्वं सज्जनानां कृते च मनोहरत्वं चित्रं वर्णयति –

**भीमकान्तैर्नृपगुणै: स बभूवोपजीविनाम् ।**
**अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णव: ।।१६ ।।**

**अन्वय:** – भीमकान्तै: नृपगुणै: स: उपजीविनां यादोरत्नै: अर्णव: इव अधृष्यश्च अभिगम्यश्च बभूव।

**पदार्थ:** – भीमकान्तै: = भयङ्कर तथा मनोहर । नृपगुणै: = राजाओं के तेज-प्रताप-दया-दक्षिणादि गुणों के द्वारा । स: = वह राजा दिलीप । उपजीविनां = आश्रित जनों का । यादोरत्नै: = जल-जीव तथा रत्नों के द्वारा । अर्णव: = समुद्र । इव = समान । अधृष्यश्च = दूर भागने योग्य । अभिगम्यश्च = आश्रय लेने योग्य । बभूव = हुए ।

**हिन्दी-अर्थ:** – भयङ्कर तथा मनोहर आकृतिवाले राजाओं के तेजादि गुणों से युक्त वह राजा दिलीप समुद्र के समान (जिस प्रकार समुद्र में भयङ्कर जीव-जन्तुओं के साथ रत्नों के होने से, लोग डरकर समुद्र से दूर भी भागते हैं और रत्नों को लेने के लिए उसका आश्रय भी प्राप्त करते हैं) दुष्टों के लिए भयङ्कर तथा गुणी जनों के लिए आश्रयदाता थे।

**व्याख्या** –

**( क ) पर्यायपदानि** – भीमकान्तै: = भयङ्करै: अतिमनोहरैश्च, नृपगुणै: = राज्ञ: तेजादि गुणसहितै:, स: = राजा दिलीप: । उपजीविनाम् = आश्रितजनानां (कृते), यादोरत्नै: = जलजन्तुभि: रत्नैश्च, अर्णव: = समुद्र:, इव = सदृश:, अधृष्यश्च = अनभिभवनीय:, अभिगम्यश्च = आश्रयणीयश्च, बभूव = सञ्जात:।

**( ख ) भावार्थ:** – समुद्र: यथा जलजन्तुकारणात् भयकारक: रत्नकारणाच्च आश्रयणीय: भवति तथैव राजा दिलीप: अपि दुष्टानां कृते भयकारक: सज्जनानां कृते च आश्रयणीय: सञ्जात:।

**( ग ) छन्द:** – श्लोकेऽस्मिन् अनुष्टुप् छन्द: अस्ति । अस्य छन्दस: लक्षणं पूर्वश्लोकस्य वर्णनप्रसङ्गे प्रदत्तमस्ति ।

**( घ ) अलङ्कार:** – अत्र उपमा अलङ्कार: अस्ति ।

**विशेषांश:** – भीमकान्तै:, नृपगुणै: = तृतीयाविभक्ति:, बहुवचनम् ।

बभूव + उपजीविनाम् = षष्ठीविभक्ति:, बहुवचनम् ।

यादोरत्नै: + इव + अर्णव: । अधृष्यश्च + अभिगम्यश्च ।

## श्लोकः १७

**प्रसङ्गः** – अस्मिन् श्लोके महाकविः कालिदासः राज्ञः दिलीपस्य शासनव्यवस्थां प्रशंसति –

**रेखामात्रमपि क्षुण्णादा मनोर्वर्त्मनः परम् ।**
**न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ।।१७।।**

**अन्वयः** – नियन्तुः तस्य नेमिवृत्तयः प्रजाः आ मनोः क्षुण्णात् वर्त्मनः परं रेखामात्रमपि न व्यतीयुः।

**पदार्थः** – नियन्तुः = नियन्त्रण करने वाले शासक अथवा सारथि के समान। तस्य = राजा दिलीप की । नेमिवृत्तयः = रथ के पहिए की रेखा । प्रजाः = प्रजा जनों ने । आ मनोः = मनु के नियमों का । क्षुण्णात् = अभ्यस्त होने के कारण । वर्त्मनः = मार्ग से । परम् = अधिक । रेखामात्रमपि = किञ्चित् मात्र भी । न = नहीं । व्यतीयुः = उल्लंघन करती थी।

**हिन्दी-अर्थः** – जिस प्रकार नियन्त्रण करने वाले कुशल शासक (सारथि) द्वारा चलाये गए रथ के पहिये जरा भी लीक से इधर-उधर नहीं हो पाते, उसी प्रकार सुयोग्य शासक राजा दिलीप द्वारा शासित प्रजा किञ्चिन्मात्र भी भगवान् मनु के आचार-परम्परा के नियमों का उल्लंघन नहीं करती थी ।

**व्याख्या** –

**( क ) पर्यायपदानि** – नियन्तुः = नियामकस्य, तस्य = राज्ञः दिलीपस्य, नेमिवृत्तयः = रथचक्ररेखाणां, प्रजाः = लोकाः(प्रजाजनाः), आ मनोः = मनुमारभ्य, क्षुण्णात् = अभ्यस्तात्, वर्त्मनः = आचारपद्धतेः, मार्गाञ्च, परम् = अधिकं । रेखामात्रमपि = रेखाचिह्निमपि, न = नहि, व्यतीयुः = परितत्यजुः।

**( ख ) भावार्थः** – यथा कुशलरथनियामकस्य रथस्य चक्ररेखाः पूर्वोदितमार्गात् किञ्चिदपि इतस्ततः न भवति, तथैव कुशलशासकेन दिलीपेन पालिताः प्रजाः अपि मनुमारभ्य अभ्यस्तात् सदाचारमार्गात् किञ्चिन्मात्रमपि इतस्ततः न भवन्ति स्म।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य छन्दसः लक्षणं पूर्वश्लोकस्य व्याख्यानप्रसङ्गे प्रदत्तमस्ति।

**विशेषांशः** – नियन्तुः = नि + यम् + तृच् – नियन्तृ – षष्ठी विभक्तिः, एकवचनम् ।

क्षुण्णात् = क्षुद् धातुः + क्त प्रत्ययः – पञ्चमीविभक्तिः, एकवचनम्।

## श्लोकः १८

**प्रसङ्गः** – महाकविः कालिदासः अस्मिन् श्लोके राज्ञः दिलीपस्य प्रजाकल्याणकारिकार्यं वर्णितवान् –

**प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।**
**सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।।१८।।**

**अन्वयः** – सः प्रजानां भूत्यर्थम् एव ताभ्यः बलिम् अग्रहीत्, हि रविः सहस्रगुणम् उत्स्रष्टुम् रसम् आदत्ते।

**पदार्थः** – सः =वह राजा दिलीप । प्रजानां = प्रजा के । भूत्यर्थं = कल्याण के लिए । ताभ्यः = उन प्रजाओं से । बलिम् = आय का छठा भाग कर के रूप में । अग्रहीत् = लेते थे । हि = जिस प्रकार । रविः = सूर्य । सहस्रगुणम् = हजार गुणा से भी अधिक । उत्स्रष्टुम् = देने के लिए । रसम् = जल को । आदत्ते = ग्रहण करते हैं ।

**हिन्दी-अर्थः** – जिस प्रकार सूर्य अपनी किरणों से पृथ्वी से जल लेकर हजार गुणा से भी अधिक वृष्टि करता है, उसी प्रकार राजा दिलीप भी अपनी प्रजा जनों से आय का षष्ठांश कर के रूप में लेकर उसे प्रजा के कल्याणकारी कार्यों में ही लगा देते थे ।

**व्याख्या** –

**( क ) पर्यायपदानि** – सः = राजा दिलीपः, प्रजानां = लोकानां, भूत्यर्थं = कल्याणार्थं, ताभ्यः = प्रजाजनेभ्यः, बलिं

= षष्ठांशरूपकरम्, अग्रहीत् = गृहीतवान्, हि = यतः, रविः = सूर्यः, सहस्रगुणं = सहस्रगुणाधिकम्, उत्स्रष्टुं = दातुं, रसं = जलम्, आदत्ते = गृह्णाति।

**( ख ) भावार्थः** – यथा सूर्यः पृथ्वीतः जलं गृहीत्वा सहस्रगुणाधिकं वर्षां करोति तथैव राजा दिलीपः प्रजाकल्याणार्थमेव करं गृहीत्वा सहस्रगुणं ददाति स्म अर्थात् स्वकीयभोगविलासार्थं न स्वीकरोति स्म।

**( ग ) छन्दः** – अस्मिन् श्लोके अनुष्टुप् छन्दः अस्ति। अस्य छन्दसः लक्षणं पूर्वश्लोकस्य व्याख्यानप्रसङ्गे प्रदत्तमस्ति।

**( घ ) अलङ्कारः** –अत्र अर्थान्तरन्यासः अलङ्कारः अस्ति ।

**विशेषांशः** – रविः = भानुर्हसः सहस्रांशुस्तपन् सविता रविः इत्यमरः।

प्रजानाम् = षष्ठीविभक्तिः , बहुवचनम् ।

उत्स्रष्टुम् = उत् + सृज् + तुमुन् ।

रसम् = रस्यते आस्वाद्यते इति रसः।

## श्लोकः १९

**प्रसङ्गः** – महाकविः कालिदासः अस्मिन् श्लोके राज्ञः दिलीपस्य बुद्धिमत्तायाः पराक्रमस्य च वर्णनं करोति –

**सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम् ।**
**शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता ।।१९।।**

**अन्वयः** – तस्य सेना परिच्छदः बभूव अर्थसाधनं द्वयमेव शास्त्रेषु अकुण्ठिता बुद्धिः धनुषि आतता मौर्वी च।

**पदार्थः** – तस्य = राजा दिलीप की। सेना = चतुरङ्गिणी सेना अर्थात् रथ, हाथी, घोडा तथा पैदल, इन चार अङ्गों से परिपूर्ण। परिच्छदः = उपकरण । बभूव = थी । अर्थसाधनं = प्रयोजन की पूर्ति के साधन । द्वयं = दूसरी । शास्त्रेषु = सम्पूर्ण शास्त्रावगाहिनी । अकुण्ठिता = अत्यन्त कठिन विषय में भी प्रवेश करने वाली । बुद्धिः = प्रज्ञा। धनुषि = धनुष पर । आतता = चढी हुई । मौर्वी = धनुष की डोरी ।

**हिन्दी-अर्थः** – राजा दिलीप की विशाल चतुरङ्गिणी सेना तो केवल राज्याङ्ग के रूप में शोभा मात्र थी । उनके प्रयोजन की पूर्ति तो दो बातों से ही प्रमाणित हो जाती थी – एक तो सम्पूर्ण शास्त्रावगाहिनी अर्थात् अत्यन्त कठिन विषयों में भी प्रवेश करने वाली प्रज्ञा और दूसरी धनुष पर चढ़ी हुई डोरी।

**व्याख्या** –

**( क ) पर्यायपदानि** – तस्य = राज्ञः दिलीपस्य, सेना = चतुरङ्गबलं, परिच्छदः = उपकरणं, बभूव = सञ्जातम्, अर्थसाधनं = प्रयोजनपूर्तिसाधनं, द्वयमेव = द्वितीयमेव, शास्त्रेषु = आगमेषु नीतिशास्त्रेषु च, अकुण्ठिता = अव्याहता, बुद्धिः = मतिः, धनुषि = चापे, आतता = आरोपिता, मौर्वी च = ज्या च।

**( ख ) भावार्थः** – राज्ञः दिलीपस्य सैन्यं तु छत्रचामरादिवत् शोभार्थमेव आसीत्, किन्तु नीतिशास्त्रानुसारिणी बुद्धिः सज्यं धनुः च इति द्वयमपि सम्पूर्णप्रयोजनसाधकमभूत्।

**( ग ) छन्दः** – अस्मिन् श्लोके अनुष्टुप् छन्दः अस्ति । अस्य छन्दसः लक्षणं पूर्वश्लोके प्रदत्तव्याख्याने लिखितमस्ति।

**विशेषांशः** – बुद्धिः = बुध्यते अनया इति बुद्धिः ।

आतता = आ +तन् +क्त + टाप् (स्त्री.)।

परिच्छदः = परिच्छाद्यते अनेन इति परिच्छदः ।

## श्लोकः २०

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य राज्यसञ्चालनं वर्णयति –

**तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च ।**
**फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव ।।२०।।**

**अन्वयः** – संवृतमन्त्रस्य गूढाकारेङ्गितस्य च तस्य प्रारम्भाः प्राक्तनाः संस्काराः इव फलानुमेयाः आसन् ।

**पदार्थः** – संवृतमन्त्रस्य = मन्त्रणा को सभी प्रकार से गुप्त रखने वाले । गूढाकारेङ्गितस्य = हर्ष, शोक, क्रोधादि मानसिकविचारों को गुप्त रखने वाले । तस्य = राजा दिलीप के । प्रारम्भाः = साम, दान, दण्ड और भेदादि उपाय । प्राक्तनाः = पूर्व जन्म के । संस्काराः इव = संस्कारों के समान । फलानुयेमाः = फलादेय से ही जाने जाते थे ।

**हिन्दी-अर्थः** – मन्त्रणा को सभी प्रकार से गुप्त रखने वाले, हर्षादि मानसिक विचारों को गुप्त रखने वाला राजा दिलीप के साम, दान, दण्ड और भेदादि उपाय पूर्व जन्म के संस्कारों के समान फलोदय होने के पश्चात् ही जाने जाते थे ।

**व्याख्या** –

**( क ) पर्यायपदानि** – संवृतमन्त्रस्य = गुप्तविचारयुक्तस्य, गूढाकारेङ्गितस्य च = गुप्तविचारचेष्टितस्य, तस्य = राज्ञः दिलीपस्य, प्रारम्भाः = सामाद्युपायप्रयोगाः, प्राक्तनाः = पूर्वजन्मभवाः, संस्काराः = पूर्वजन्मसंस्काराः, इव = समानं, फलानुयेमाः = कार्यानुमेयाः आसन्।

**( ख ) भावार्थः** – गुप्तविचारयुक्तस्य इंगितचेष्टितस्य च तस्य राज्ञः दिलीपस्य सामाद्युपायप्रयोगाः पूर्वजन्मभवाः संस्काराः तथैव कार्यफलसदृशाः उदिताः आसन् ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य छन्दसः लक्षणं पूर्वश्लोके वर्णितमस्ति ।

**विशेषांशः** – प्रारम्भाः = प्रारभ्यन्ते इति।

संस्काराः = संस्क्रियन्ते इति ।

## श्लोकः २१

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य त्यागपूर्वकोपभोगस्य वर्णनं करोति –

**जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः ।**
**अगृध्नुरादददे सोऽर्थमसक्तः सुखमन्वभूत् ।।२१।।**

**अन्वयः** – सः अत्रस्तः (सन्) आत्मनं जुगोप अनातुरः (सन्) धर्मं भेजे अगृध्नुः (सन्) अर्थम् आददे आसक्तः (सन्) सुखम् अन्वभूत् ।

**पदार्थः** – सः = राजा दिलीप । अत्रस्तः = नीडर होकर । आत्मानम् = अपनी । जुगोप = रक्षा करते थे । अनातुरः = नीरोग होकर । धर्मं = धर्म को । भेजे = सेवा करते थे । अगृध्नुः = लोभ-लालच छोड़कर । अर्थं = धन को । आददे = सङ्गृहीत करते थे। असक्तः = आसक्तिरहित । सुखं = सांसारिक सुखों का । अन्वभूत् = अनुभव करते थे ।

**हिन्दी-अर्थः** – वह राजा दिलीप निर्भीक होकर अपनी रक्षा करते थे । नीरोग होकर धर्म की सेवा करते थे । लोभ-लालच छोडकर धन का सङ्ग्रह करते थे तथा आसक्ति रहित होकर सांसारिक-सुखों का अनुभव करते थे।

**व्याख्या** –

**( क ) पर्यायपदानि** – सः = राजा दिलीपः, अत्रस्तः = अभीतः, आत्मानम् = स्वशरीरं, जुगोप = रक्षितवान्, अनातुरः = अरुग्णः (सन्), धर्मं = पुण्यं, भेजे = सेवन्ते स्म, अगृध्नुः = लोभरहितः, अर्थं = धनम्, आददे = स्वीकृतवान्, असक्तः = आसक्तिरहितः, सुखम् = आनन्दम्, अन्वभूत् = अनुभूतवान्।

**( ख ) भावार्थः** – राजा दिलीपः निर्भीको भूत्वा शरीरं रक्षितवान्, नीरोगो भूत्वा धर्मस्य पालनं करोति स्म । पुनश्च लोभं विनैव अर्थात् अलुब्धो भूत्वा आनन्दम् अनुभवति स्म।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य छन्दसः लक्षणं पूर्वश्लोके द्रष्टव्यम् ।

**विशेषांशः** – अत्रस्तः = न त्रस्तः – नञ् समासः।

अनातुरः = न आतुरः ।

अगृध्नुः = न गृध्नुः ।

असक्तः = न सक्तः – नञ् समासः ।

## श्लोकः २२

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य गुणानां वर्णनं करोति –

**ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः ।**
**गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ।।२२।।**

**अन्वयः** – ज्ञाने मौनं, शक्तौ क्षमा, त्यागे श्लाघाविपर्ययः तस्या गुणाः गुणानुबन्धित्वात् सप्रसवा इव (अभूवन्)।

**पदार्थः** – ज्ञाने = अन्यों की तथ्यों की जानकारी होने पर भी । मौनं = चुप रहना । शक्तौ = शत्रु से युद्ध सामर्थ्य होने पर भी । क्षमा = क्षमा करना । त्यागे = दान देकर भी । श्लाघाविपर्ययः = आत्मप्रशंसा न करना । तस्य = राजा दिलीप के । गुणाः = गुण । गुणानुबन्धित्वात् = अपने विरोधी गुणों के साथ मिले हुए रहने के कारण । सप्रसवा = सहोदर भाई के समान । अभूवन् = हुए अथवा जान पड़ते थे ।

**हिन्दी-अर्थः** – दूसरे के तथ्यों को जानकर भी चुप रहना, शत्रु से बदला लेने का सामर्थ्य रहते हुए भी क्षमा करना तथा दान देकर भी आत्मप्रशंसा न करना, इस प्रकार राजा दिलीप के ज्ञानादि गुण अपने विरुद्ध गुणों के साथ रहने के कारण सहोदर भाई जैसे जान पड़ते थे।

**व्याख्या** –

**( क ) पर्यायपदानि** – ज्ञाने = परवृत्तान्तज्ञानेऽपि, मौनं = मौनावलम्बनं, शक्तौ = सामर्थ्येऽपि, क्षमा = क्षमाकरणं, त्यागे = दाने सत्यपि, श्लाघाविपर्ययः = आत्मप्रशंसायाः, तस्य = राज्ञः दिलीपस्य, गुणानुबन्धित्वात् = ज्ञानादयगुणैः मौनादिभिः विरुद्धैः सहचारित्वात्, सप्रसवा = सहोदराः, इव = सदृशाः (अभूवन्)।

**( ख ) भावार्थः** – परवृत्तान्तं ज्ञात्वा अपि मौनावलम्बनं , सामर्थ्येऽपि क्षमाकरणं, त्यागं कृत्वा अपि आत्मप्रशंसातः दूरे स्थितिः इत्यादयः राज्ञः दिलीपस्य गुणाः परस्परं विरुद्धाः सन्तोऽपि सोदरा इव निवसन्ति स्म।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य छन्दसः लक्षणं पूर्वश्लोकस्य व्याख्यायां द्रष्टव्यम् ।

**विशेषांशः** –

ज्ञानम् = ज्ञा + ल्युट् (अन्)।

शक्तौ = शक् + क्तिन् – शक्तिः – सप्तमी वि., एकवचनम् ।

त्यागः = त्यज् + घञ् ।

सप्रसवाः = समानः प्रसवो जन्मस्थानं येषां ते सप्रसवाः ।

## श्लोकः २३

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य सांसारिकविमुखतां ज्ञानगम्भीरताञ्च वर्णयति –

**अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ।**
**तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना ।।२३।।**

**अन्वयः** – विषयैः अनाकृष्टस्य विद्यानां पारदृश्वनः धर्मरतेः तस्य जरसा विना वृद्धत्वम् आसीत्।

**पदार्थः** – विषयैः = सांसारिक-विषयों से । अनाकृष्टस्य = दूर रहने वाले । विद्यानां = वेदवेदाङ्गादि विद्याओं के । पारदृश्वनः = विज्ञ । धर्मरतेः = धर्मानुरागी । तस्य = राजा दिलीप के (ने)। जरसा विना = वृद्धावस्था के बिना ही । वृद्धत्वम् = वृद्धों जैसी ज्ञानगम्भीरता । आसीत् = प्राप्त कर लिया था ।

**हिन्दी-अर्थः** – सांसारिक-भोग्य वस्तुओं से दूर रहने वाले, वेदवेदांगादि के ज्ञाता, धर्मानुरागी राजा दिलीप यौवन में ही इतने ज्ञान – सम्पन्न हो गये थे कि वृद्धावस्था के बिना भी उन्होंने वृद्धों जैसी गम्भीरता को प्राप्त कर लिया था अर्थात् ज्ञान-वृद्ध प्रतीत होते थे ।

**व्याख्या** –

**( क ) पर्यायपदानि** – विषयैः = शब्दादिभिः, अनाकृष्टस्य = आसक्तिरहितस्य, विद्यानां = वेदवेदाङ्गादिविद्यानां, पारदृश्वनः = विज्ञः, धर्मरतेः = धर्मानुरागिणः, तस्य = राज्ञः दिलीपस्य, जरसा = वृद्धावस्थया, विना = अन्तरेण, वृद्धत्वम् = ज्ञानवृद्धत्वम्, आसीत् = प्राप्तवान् ।

**( ख ) भावार्थः** – युवावस्थायां भूत्वा अपि राजा दिलीपः धर्मानुरागी सन् विषयरागादनासक्तः वेदवेदाङ्गादिविद्यानां ज्ञाता सन्, वृद्धावस्थां विना अपि ज्ञानवृद्धत्वं प्राप्तवान् आसीत्।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य छन्दसः लक्षणं पूर्वश्लोके दत्तमस्ति ।

**विशेषांशः** – अनाकृष्टः = आकृष्टः न भवति इति अनाकृष्टः – अनासक्तः।

जरसा = जीर्यते अनया इति जरा ।

पारदृश्वनः = पारं दृष्टवान् इति पारदृश्वा तस्य पारदृश्वनः । 'पार' उपपदपूर्वकं 'दृश्' धातोः 'क्वनिप्' प्रत्ययः – पारदृश्वन् – षष्ठीविभक्तिः, एकवचनम् ।

## श्लोकः २४

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य पितृत्वं प्रजाभ्यः वर्णयति –

**प्रजानां विनयाधानाद्रक्षणाद् भरणादपि ।**
**स पिता पितरस्तासां केवलं जन्महेतवः ।।२४।।**

**अन्वयः** – प्रजानां विनयाधानात् रक्षणात् भरणात् अपि सः पिता (अभूत्) तासां पितरः (तु) केवलं जन्महेतवः (अभूवन्)।

**पदार्थः** – प्रजानां = प्रजा-जनों की । विनयाधानात् = सदाचार-शिक्षण करने के कारण । रक्षणात् = चोरों और आपत्तियों से रक्षा करने के कारण । भरणात् = अन्नादि से भरण-पोषण करने के कारण । सः = वह राजा दिलीप । पिता = जनक के समान । अभूत् = थे । तासां = उन प्रजाजनों के । पितरः = जनक /पिता तो । केवलं = नाममात्र के लिए । जन्महेतवः = जन्म देने के कारण । (पितरः अभूवन् = पिता थे) ।

**हिन्दी-अर्थः** – प्रजा-जनों को सदाचार-आदि की शिक्षा देने के कारण, चोरों तथा आपत्तियों से रक्षा करने के कारण, अन्नजलादि से भरण-पोषण करने के कारण वह राजा दिलीप प्रजा-जनों के लिए पितृतुल्य थे । पिता कहे जाने वाले लोग तो केवल जन्म देने के कारण पिता थे।

**व्याख्या** –

**( क ) पर्यायपदानि** – प्रजानां = जनानां , विनयाधानात् = सन्मार्गे (सदाचार) प्रर्वत्तनात्, रक्षणात् = चौरादिभ्यः त्राणात् विपत्तिनिवारणाच्च, भरणात् = अन्नजलादिभिः पालन-पोषणात्, अपि, सः = राजा दिलीपः, पिता = पालकः, अभूत् = आसीत्, तासां = प्रजानां, पितरः = जनकाः, तु, केवलं = नाममात्रमेव, जन्महेतवः = जन्मदातारः (एव आसन्)।

**( ख ) भावार्थः** – वस्तुतः राजा दिलीप एव प्रजानां सदाचारप्रर्वत्तनात्, विपत्तिनिवारणात्, पालन-पोषणाच्च पिता आसीत्। प्रजाजनानां पितरस्तु केवलं जन्मदातारः आसन्।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य छन्दसः लक्षणं पूर्वश्लोके व्याख्याक्रमे प्रदत्तमस्ति ।

**विशेषांशः** – पिता – पाति रक्षति इति पिता – पा +तृच्।

## श्लोकः २५

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य अर्थः कामश्च द्वयमपि धर्मयुक्तम् आसीत् इति वर्णयति –

**स्थित्यै दण्डयतो दण्ड्यान्परिणेतुः प्रसूतये ।**
**अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः ।।२५।।**

**अन्वयः** – दण्ड्यान् एव स्थित्यै दण्डयतः प्रसूतये परिणेतुः मनीषिणः तस्य अर्थकामौ अपि धर्मः एव आस्ताम्।

**पदार्थः** – दण्ड्यान् = अपराधियों के अपराधानुसार । एव = ही । स्थित्यै = लोक मर्यादा की रक्षा करने के लिए । दण्डयतः = दण्ड देते थे । प्रसूयते = अविच्छिन्न वंश परम्परा के लिए । परिणेतुः = विवाह करने वाले । मनीषिणः = विद्वान् । तस्य = राजा दिलीप के । अर्थकामौ = अर्थ और काम । अपि धर्मः एव = धर्म द्वारा नियन्त्रित ही । आस्ताम् = थे।

**हिन्दी-अर्थः** – लोक मर्यादा की रक्षा के लिए अपराधियों को अपराधानुसार दण्ड देते थे । अविच्छिन्न वंश परम्परा के लिए विवाह करने वाले बुद्धिमान् राजा दिलीप का अर्थ और काम भी धर्म नियन्त्रित ही था।

**व्याख्या** –

**( क ) पर्यायपदानि** – दण्ड्यान् = अपराधिनः, एव = निश्चितं, स्थित्यै = लोकप्रतिष्ठायै, दण्डयतः = शिक्षयतः, प्रसूयते = सन्तानाय, एव, परिणेतुः = विवाहितस्य, मनीषिणः = पण्डितस्य, तस्य = राज्ञः दिलीपस्य, अर्थकामौ = अर्थपुरुषार्थः कामपुरुषार्थश्च, अपि धर्मः = धर्मनियन्त्रितौ, एव, आस्ताम् = अभूताम्।

**( ख ) भावार्थः** – अपराधिनाम् अपराधानुसारं लोकप्रतिष्ठायै दण्डदानात्, सन्तानेच्छया एव विवाहसंस्कारकारणात् तस्य राज्ञः दिलीपस्य अर्थकामौ अपि धर्मनियन्त्रितौ आस्ताम्।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य छन्दसः लक्षणं पूर्वश्लोके प्रदत्तमस्ति ।

**विशेषांशः** – अर्थकामौ = अर्थश्च कामश्च। मनीषी – विद्वान् विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः । धीरो मनीषी इत्यमरः।

## श्लोकः २६

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य देवेन्द्रस्य च सहयोगभावनां वर्णयति –

**दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।**
**संपद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ।।२६।।**

**अन्वयः** – सः यज्ञाय गां दुदोह मघवा सस्याय दिवं (दुदोह) एवम् उभौ सम्पद्विनिमयेन भुवनद्वयं दधतुः।

**पदार्थः** – सः = राजा दिलीप । यज्ञाय = यज्ञ करने के लिए । गां = पृथ्वी को । दुदोह = दुहता था । मघवा = इन्द्र । सस्याय = अन्न की वृद्धि के लिए । दिवं = स्वर्ग को । दुदोह = दुहता था । उभौ = इन्द्र और दिलीप । सम्पद्विनिमयेन = आपस में अपनी- अपनी सम्पत्ति का आदान-प्रदान करके । भुवनद्वयं = स्वर्गलोक और मृत्युलोक का । दधतुः = पालन-पोषण करते थे।

**हिन्दी-अर्थः** – राजा दिलीप यज्ञ करने के लिए पृथ्वी का दोहन करते थे अर्थात् प्रजा से कर प्राप्त कर यज्ञ करते थे । इसी प्रकार इन्द्र अन्न की वृद्धि के लिए स्वर्ग का दोहन करते थे । इस प्रकार इन्द्र और राजा दिलीप आपस में अपनी-अपनी सम्पत्ति का आदान-प्रदान करके मृत्युलोक तथा स्वर्गलोक का पालन-पोषण करते थे।

**व्याख्या** –

**( क ) पर्यायपदानि** – सः = राजा दिलीपः, यज्ञाय = यज्ञं कर्तुं, गां = पृथ्वीं, दुदोह = अदुहत्, मघवा = इन्द्रः, सस्याय = धान्याय, दिवं = स्वर्गं, एवम् , उभौ = इन्द्रदिलीपौ, सम्पद् = सस्यवृष्टिरूपस्य, विनिमयः = परस्परम्

आदान-प्रदानं, भुवनयो: = स्वर्गभूलोकयो:, द्वयं = द्वयस्यापि, दधतु: = पालनं पोषणं च कुरुत:।

**( ख ) भावार्थः** - राजा दिलीप: प्रजाभ्य: करं गृहीत्वा यज्ञान् करोति स्म । पुनश्च इन्द्र: वर्षणद्वारा धान्यादिकस्य संवर्धनं करोति स्म । एवं प्रकारेण द्वौ अपि परस्परं सहयोगभावनया कार्याणि कुरुत: स्म।

**( ग ) छन्दः** - श्लोकेऽस्मिन् अनुष्टुप् छन्द: अस्ति । अस्य छन्दस: लक्षणं पूर्वश्लोकस्य व्याख्याप्रसङ्गे स्पष्टं कृतमस्ति ।

**विशेषांशः** - शस्याय = शस्यते इति शस्यम् । शस् +यत् । चतुर्थीवि., एकवचनम्।

## श्लोकः २७

**प्रसङ्गः** - श्लोकेऽस्मिन् महाकवि: कालिदास: राज्ञ: दिलीपस्य राज्ये चौर्य-तस्कर कार्याणामभाव: आसीदिति वर्णयति -

**न किलानुययुस्तस्य राजानो रक्षितुर्यशः।**
**व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता ।।२७।।**

**अन्वयः** - राजान: रक्षितु: तस्य यश: न अनुययु: किल यत् परस्वेभ्य: व्यावृत्ता तस्करता श्रुतौ स्थिता।

**पदार्थः** - राजान: = अन्य राजा गण । रक्षितु: = भय के कारणों से रक्षा करने वाले । तस्य = राजा दिलीप के । यश: = यश का । न = नहीं । अनुययु: = अनुकरण किया । किल यत् = क्योंकि निश्चय ही । परस्वेभ्य: = किसी के धन को। व्यावृत्ता = पृथक् कर । तस्करता = चोरी-तस्करादि । श्रुतौ = सुनने में ही । स्थिता = प्रवृत्त नहीं होते थे।

**हिन्दी-अर्थः** - अन्य राजा गण भय के कारणों से रक्षा करने वाले उस राजा दिलीप के यश का अनुकरण नहीं किया। क्योंकि राजा दिलीप के राज्य में चोरी-तस्कर आदि शब्द केवल सुनने में ही आते थे । कोई भी धनादि का अपहरण नहीं करता था ।

**व्याख्या** -

**( क ) पर्यायपदानि** - राजान: = अन्ये भूपाला:, रक्षितु: = पालयितु:, तस्य = राज्ञ: दिलीपस्य, यश: = कीर्तिं, न = नहि, अनुययु: = अनुकृतवन्त:, किल = खलु, यत् = यस्मात् कारणात्, परस्वेभ्य: = अन्येषां धनेभ्य:, व्यावृत्ता = पृथक्करणं, तस्करता = चौर्यं, श्रुतौ = श्रवणे, स्थिता = प्रवृत्ता ।

**( ख ) भावार्थः** - भयत्रातु: राज्ञ: दिलीपस्य कीर्तिम् अन्ये भूपाला: न अनुकृतवन्त: । पुनश्च दिलीपस्य राज्ये चौर्यं केवलं श्रवणे एव न तु कश्चित् कस्यापि धनं चोरयति स्म ।

**( ग ) छन्दः** - श्लोकेऽस्मिन् अनुष्टुप् छन्द: अस्ति । अस्य छन्दस: लक्षणं पूर्वश्लोकस्य व्याख्याप्रसङ्गे स्पष्टं कृतमस्ति ।

**विशेषांशः** - श्रुति: = श्रु + क्तिन् । रक्षिता = रक्ष + तृच् - षष्ठीवि., एकवचनम्।

## श्लोकः २८

**प्रसङ्गः** - श्लोकेऽस्मिन् महाकवि: कालिदास: राज्ञ: दिलीप: सज्जनप्रिय: आसीदिति वर्णयति -

**द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधम् ।**
**त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरक्षता ।।२८।।**

**अन्वयः** - शिष्ट: द्वेष्य: अपि आर्त्तस्य औषधं यथा तस्य सम्मत: । दुष्ट: प्रिय: अपि उरगक्षता उङ्गुलि इव त्याज्य: आसीत्।

**पदार्थः** - शिष्ट: = सज्जन । द्वेष्य: अपि = शत्रु होने पर भी। आर्त्तस्य = रोगी को । औषधं = औषधि के । यथा =

समान । तस्य = राजा दिलीप को । सम्मतः = अभीष्ट । दुष्टः = दुष्ट । प्रियः = प्रिय । अपि = भी । उरगक्षता = साँप द्वारा डसी गई । अङ्गुलि इव = अंगुली के समान । त्याज्य = त्याग करने योग्य । आसीत् = थे ।

**हिन्दी-अर्थः** – शत्रु होने पर भी सज्जन पुरुष राजा दिलीप को वैसे ही प्रिय थे, जिस प्रकार रोगी को कटु औषधि और दुष्ट प्रिय बन्धु होने पर भी त्याज्य उसी प्रकार होते हैं जिस प्रकार साँप द्वारा डसी हुई अंगुली होती है ।

**व्याख्या** –

**( क ) पर्यायपदानि** – शिष्टः = सज्जनः, द्वेष्यः = शत्रुः अपि, आर्त्तस्य = रोगिणः, औषधं = भेषजः, यथा = इव, तस्य = राज्ञः दिलीपस्य, सम्मतः = अभीष्टः, दुष्टः = दुर्जनः, प्रियः = प्रेमी, अपि, उरगक्षता = सर्पदष्टा, अङ्गुलि = हस्ताङ्गुलिः, इव = यथा, त्याज्यः = त्यक्तुं योग्यः, आसीत् = भवति इति।

**( ख ) भावार्थः** – यथा रोगार्त्तस्य द्वेष्यमपि कटु–औषधं प्रियं भवति तथैव दिलीपस्य शिष्टपुरुषः शत्रुरपि प्रियः, दुष्टः बन्धुरपि सर्पदष्ट–अङ्गुलीव त्याज्यो भवति।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य छन्दसः लक्षणं पूर्वश्लोकस्य व्याख्याप्रसङ्गे प्रदत्तमस्ति।

**विशेषांशः** – आर्त्तः = आ + ऋ + क्त ।

सम्मतः = सम् + मन् + क्त ।

## श्लोकः २९

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य परोपकारितां वर्णयति –

**तं वेध विदधे नूनं महाभूतसमाधिना ।**

**तथा हि सर्वे तस्यासन् परार्थैकफला गुणाः ।।२९।।**

**अन्वयः** – नूनं वेधाः तं महाभूतसमाधिना विदधे, तथाहि तस्य सर्वे गुणाः परार्थैकफलाः आसन् ।

**पदार्थः** – नूनं = निश्चय ही । वेधाः = सृष्टिकारक ब्रह्मा ने । तं = उस राजा दिलीप को । महाभूतसमाधिना = पंचभूतों का निर्माण करने वाली सामग्री से । विदधे = बनाया । तथाहि = क्योंकि । तस्य = उस राजा दिलीप के । सर्वे गुणाः = सभी गुण । परार्थैकफलाः = दूसरों के प्रयोजन के लिए ही । आसन् = थे।

**हिन्दी-अर्थः** – निश्चय ही सृष्टि निर्माणकर्त्ता ब्रह्मा ने जिन सामग्रियों से पंचमहाभूतों का निर्माण किया, उन सामग्रियों से ही राजा दिलीप को बनाया था । इसी कारण से उनके सम्पूर्ण गुणों का फल परोपकार के लिए ही था ।

**व्याख्या** –

**( क ) पर्यायपदानि** – नूनं = ध्रुवं, वेधाः = प्रजापतिः ब्रह्मा, तं = राजानं दिलीपं, महाभूतसमाधिना = महाभूतकारणसामग्र्या, विदधे = विरचितवान्, तथाहि = यतः, तस्य = राज्ञः दिलीपस्य, सर्वे गुणाः = सम्पूर्णाः दयादाक्षिण्यादयः गुणाः, परार्थैकफलाः = परप्रयोजनकाः, आसन् = अभूवन् ।

**( ख ) भावार्थः** – सृष्टिकर्त्ता यथा कारणसामग्र्या पृथ्वी–आदिमहाभूतपञ्चकानां निर्माणं कृतवान्, तथैव कारणसामग्र्या राजानं दिलीपमपि सृष्टवान् । अत एव राज्ञः दिलीपस्य सर्वे गुणाः विश्वहिताय परोपकाराय चैव आसन् ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** – समाधिः – सम् +आ+धा+कि ।

विदधे = वि +धा +लिट् – प्र.पु., एकवचनम् ।

## श्लोकः ३०

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य चक्रवर्तित्वं वर्णयति –

**स वेलावप्रवलयां परिखीकृतसागराम् ।**

**अनन्यशासनामुर्वीं शशासैकपुरीमिव ।।३०।।**

**अन्वयः** – सः वेलावप्रवलयां परिखीकृतसागराम् अनन्यशासनाम् उर्वीम् एकपुरीम् इव शशास।

**पदार्थः** – सः = वह राजा दिलीप । वेलावप्रवलयां = समुद्रतटरूपी रक्षा दीवार से सुसज्जित । परिखीकृतसागरां = समुद्ररूपी चारों तरफ से खाई वाली । अनन्यशासनां = दूसरे राजा के द्वारा शासन न की जाती हुई । उर्वीं = पृथ्वी को । एकपुरीमिव = एकनगरी के समान। शशास = शासन किया ।

**हिन्दी-अर्थः** – वह राजा दिलीप समुद्र के तट रूपी रक्षा दीवार से सुसज्जित तथा सागर रूपी चारों तरफ की खाई – वाली, दूसरे राजाओं के शासन से रहित सारी पृथ्वी का शासन एक नगरी के समान करते थे।

**व्याख्या** –

**( क ) पर्यायपदानि** – सः = राजा दिलीपः, वेलावप्रवलयां = समुद्रतटप्राकारवेष्टनां, परिखीकृतसागरां = दुर्गवेष्टनीकृतसमुद्राम्, अनन्यशासनाम् = अन्यशासनरहिताम्, उर्वीं = पृथ्वीम्, एकपुरीमिव = एकनगरीमिव, शशास = शासितवान्।

**( ख ) भावार्थः** – सः राजा दिलीपः समुद्रतटप्राकारवेष्टनां दुर्गवेष्टनीकृतसमुद्राम् अन्यशासनरहिताम् उर्वीम् एकपुरीमिव शासितवान्।

**( ग ) छन्दः** – अस्मिन् श्लोके अनुष्टुप् छन्दः अस्ति । अनुष्टुप् छन्दसः लक्षणं पूर्ववर्णितश्लोके प्रदत्तम् अस्ति ।

**विशेषांशः** – वेलावप्रवलयाम् = द्वितीया विभक्तिः, एकवचनम्।

एवमेव – परिखीकृतसागराम्, अनन्यशासनाम्, उर्वीम् ।

## श्लोकः ३१

**प्रसङ्गः** – अस्मिन् श्लोके महाकविः कालिदासः राज्ञः दिलीपस्य पत्नीं सुदक्षिणां वर्णयति –

**तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।**
**पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा।।३१।।**

**अन्वयः** – तस्य मगधवंशजा दाक्षिण्यरूढेन नाम्ना अध्वरस्य दक्षिणा इव सुदक्षिणा इति पत्नी आसीत्।

**पदार्थः** – तस्य = उस राजा दिलीप की। मगधवंशजा = मगध कुल में उत्पन्न । दाक्षिण्यरूढेन = दाक्षिण्य आदि गुणों से प्रसिद्ध । नाम्ना = नाम से । (प्रसिद्ध) । अध्वरस्य = यज्ञ की । दक्षिणा इव = दक्षिणा के समान। सुदक्षिणा = सुदक्षिणा नाम से प्रसिद्ध । पत्नी = भार्या । आसीत् = थी।

**हिन्दी-अर्थः** – यज्ञ की पत्नी दक्षिणा के समान मगध वंश में उत्पन्न दया-दाक्षिण्य आदि के कारण प्रसिद्ध सुदक्षिणा नाम वाली राजा दिलीप की पत्नी थी।

**व्याख्या** –

**( क ) पर्यायपदानि** – तस्य = राज्ञः दिलीपस्य, मगधवंशजा = मगधवंशोद्भवा, दाक्षिण्यरूढेन = दाक्षिण्यादिगुणैः, नाम्ना = अभिधानेन, अध्वरस्य = यज्ञस्य, दक्षिणा = एतन्नामनी, इव = यथा, सुदक्षिणा = सुदक्षिणा इति नाम्ना प्रसिद्धा, पत्नी = भार्या, आसीत् = अभूत्।

**( ख ) भावार्थः** – राज्ञः दिलीपस्य मगधकुलोत्पन्ना दाक्षिण्यादिगुणयुक्तराज्ञः हृदयनिवासिनी सुदक्षिणा नाम पत्नी आसीत्।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । एतस्य लक्षणं पूर्वश्लोके वर्णितमस्ति ।

**( घ ) अलङ्कारः** – अस्मिन् श्लोके उपमा अलंकारः अस्ति ।

## श्लोक: ३२

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकवि: कालिदास: वर्णयति यत् राज्ञ: दिलीपस्य यद्यपि अनेका: पत्न्य: आसन् तथापि सुदक्षिणा एव प्रियतमा आसीत् –

**कलत्रवन्तमात्मानमवरोधे महत्यपि।**
**यथा मेने मनस्विन्या लक्ष्म्या च वसुधाधिप:।।३२।।**

**अन्वयः** – वसुधाधिप: महति अवरोधे (सति) अपि मनस्विन्या तया लक्ष्म्या च आत्मनं कलत्रवन्त्रं मेने।

**पदार्थः** – वसुधाधिप: = पृथ्वी की रक्षा करने वाला । महति = अधिक । अवरोधे = राजा की अनेक रानियों के। सत्यपि = रहते हुए भी । मनस्विन्या = पति की इच्छा का अनुसरण करने वाली । तया = उस सुदक्षिणा से । लक्ष्म्या च = तथा राजलक्ष्मी से । आत्मानं = अपने को । कलत्रवन्तं = स्त्रीवाला । मेने = मानते थे।

**हिन्दी-अर्थः** – वह राजा दिलीप अन्त:पुर में अनेक रानियों के होते हुए भी, पति की इच्छा का अनुसरण करने वाली सुदक्षिणा तथा राज्यलक्ष्मी से ही अपने को पत्नीयुक्त मानते थे।

**व्याख्या** –

**(क) पर्यायपदानि** – वसुधाधिप: = पृथ्वीपालक:, महति = अधिके, अवरोधे = अन्त:पुरवर्गे, सत्यपि = वर्तमानेऽपि, मनस्विन्या = दृढचित्तया, तया = सुदक्षिणया, लक्ष्म्या च = राजलक्ष्म्या, च, आत्मानं = स्व, कलत्रवन्तं = भार्यावन्तं, मेने = मन्यते स्म।

**(ख) भावार्थः** – यद्यपि दिलीपस्य अन्त:पुरे अनेका: पत्न्य: आसन् तथापि स सुदक्षिणया राजलक्ष्म्या चैवात्मानं भार्यावन्तं मनुते स्म।

**(ग) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्द: अस्ति । एतस्य लक्षणं पूर्वश्लोके प्रदत्तमस्ति ।

## श्लोक: ३३

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकवि: कालिदास: राज्ञ: दिलीपस्य पुत्रप्राप्ते: इच्छां वर्णयति –

**तस्यामात्मानुरूपायामात्मजन्मसमुत्सुक:।**
**विलम्बितफलैः कालं स निनाय मनोरथै:।।३३।।**

**अन्वयः** – स: आत्मानुरूपायां तस्याम् (सुदक्षिणायाम्) आत्मजन्मसमुत्सुक: (सन्) विलम्बितफलै: मनोरथै: कालं निनाय।

**पदार्थः** – स: = राजा दिलीप । आत्मानुरूपायां = अपने अनुरूप । तस्यां = उस पत्नी सुदक्षिणा में । आत्मजन्मसमुत्सुक: = पुत्र प्राप्त करने के इच्छुक । विलम्बितफलै: = देर से प्राप्त । मनोरथै: = पुत्र प्राप्ति रूपी मनोरथ से । कालं = समय को । निनाय = व्यतीत किया।

**हिन्दी-अर्थः** – वह राजा दिलीप स्वानुरूप पत्नी सुदक्षिणा में अपने समान पुत्र की अभिलाषा करते हुए देर से प्राप्त होने वाले मनोरथों से युक्त बहुत समय व्यतीत किया।

**व्याख्या** –

**(क) पर्यायपदानि** – स: = राजा दिलीप:, आत्मानुरूपायां = आत्मसमानायां, तस्यां = सुदक्षिणायाम्, आत्मजन्मसमुत्सुक: = पुत्रेच्छुक:, (सन् = भूत्वा), विलम्बितफलै: = चिरकालप्रतीक्षापेक्षै:, मनोरथै: = आशाभि:, कालं = समयं , निनाय = यापितवान्।

**(ख) भावार्थः** – स: राजा दिलीप: स्वभार्यायां सुदक्षिणायाम् आत्मसमानपुत्राभिलाषी भूत्वा अत्यन्ताशाभि: बहुकालपर्यन्तं प्रतीक्षां कृतवान्।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य छन्दसः लक्षणं पूर्वश्लोकस्य व्याख्यानक्रमे प्रदत्तमस्ति ।
**विशेषांशः** – मनोरथैः = मनसः रथाः मनोरथाः, तैः (ष. तत्पुरुषः) ।
विलम्बितफलैः = विलम्बितं फलं येषां ते विलम्बितफलाः, तैः विलम्बितफलैः ।

## श्लोकः ३४

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य सन्तानप्राप्तये कृतकर्मणां वर्णनं करोति –

**सन्तानार्थाय विधये स्वभुजादवतारिता।**
**तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे।।३४।।**

**अन्वयः** – तेन सन्तानार्थाय विधये स्वभुजात् अवतारिता जगतः गुर्वी धूः सचिवेषु निचिक्षिपे।
**पदार्थः** – तेन = उन राजा दिलीप के द्वारा । सन्तानार्थाय = पुत्र प्राप्ति के लिए । विधये = अनुष्ठान करने के निमित्त। स्वभुजात् = अपनी भुजा से । अवतारिता = उतारा हुआ । जगतः = संसार का । गुर्वी = महान् । धूः = भार या बोझ। सचिवेषु = मन्त्रियों के ऊपर । निचिक्षिपे = रख दिया।
**हिन्दी-अर्थः** – उन राजा दिलीप के द्वारा सन्तान प्राप्ति के लिए अनुष्ठान करने हेतु पृथ्वी का भार अपनी भुजाओं से उतार कर मन्त्रियों को सौंप दिया गया।
**व्याख्या** –
**( क ) पर्यायपदानि** – तेन = राज्ञा दिलीपेन, सन्तानार्थाय = पुत्रप्रयोजनाय, विधये = अनुष्ठानाय, स्वभुजात् = निजबाहोः, अवतारिता = अवरोपिता, जगतः = लोकस्य, गुर्वी = महान्, धूः = भारः, सचिवेषु = मन्त्रिवर्गेषु, निचिक्षिपे = निहिता।
**( ख ) भावार्थः** – राज्ञा दिलीपेन पुत्र-प्राप्त्यर्थम् अनुष्ठानं कर्त्तुं राज्यभारः अमात्यानां कृते प्रदत्तः।
**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अनुष्टुप् छन्दसः लक्षणं पूर्वश्लोके प्रदत्तमस्ति ।
**विशेषांशः** – सन्तानार्थाय = सन्तानः अर्थः प्रयोजनं यस्य सः सन्तानार्थः तस्मै ।
विधये = वि+धा+किः – चतुर्थीवि., एकवचनम्।
अवतारिता = अव+तृ+णिच्+क्त+टाप् (स्त्री.)।
गुर्वी = गुरु + ङीष् ।

## श्लोकः ३५

**प्रसङ्गः** – अस्मिन् श्लोके महाकविः कालिदासः राज्ञः दिलीपस्य पुत्रकामनायै गुरोः वशिष्ठस्य समीपे गमनं वर्णयति–

**अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया।**
**तौ दम्पती वशिष्ठस्य गुरोर्जग्मतुराश्रमम्।।३५।।**

**अन्वयः** – अथ प्रयतौ तौ दम्पती पुत्रकाम्यया विधातारं अभ्यर्च्य गुरोः वशिष्ठस्य आश्रमं जग्मतुः।
**पदार्थः** – अथ = उसके बाद (मन्त्रियों के लिए राज्यभार सौंपकर)। प्रयतौ = पवित्र होकर। तौ दम्पती = उन दोनों पति-पत्नी सुदक्षिणा और दिलीप । पुत्रकाम्यया = पुत्र की कामना से । विधातारं = ब्रह्मा जी की । अभ्यर्च्य = पूजा कर । गुरोः = अपने कुलगुरु । वशिष्ठस्य = वशिष्ठजी के । आश्रमं = आश्रम को । जग्मतुः = प्रस्थान किया ।
**हिन्दी-अर्थः** – उसके बाद मन्त्रियों पर राज्य का भार सौंपकर, राजा दिलीप और सुदक्षिणा दोनों पवित्र होकर पुत्र की कामना से ब्रह्मा जी की अच्छी प्रकार से पूजा कर अपने कुलगुरु वशिष्ठ जी के आश्रम की ओर प्रस्थान किया।
**व्याख्या** –
**( क ) पर्यायपदानि** – अथ = अनन्तरं, प्रयतौ = पवित्रौ, तौ = सुदक्षिणादिलीपौ, दम्पती = जायापती, पुत्रकाम्यया

= पुत्रेच्छया, विधातारं = ब्रह्मदेवम्, अभ्यर्च्य = सम्पूज्य, गुरोः = कुलगुरोः, वशिष्ठस्य = वशिष्ठनामधेयमहर्षेः, आश्रमं = पर्णकुटीरं, जग्मतुः = प्रस्थितवन्तौ।

**( ख ) भावार्थः** – ततः परं पवित्रौ भूत्वा तौ द्वौ सुदक्षिणादिलीपौ पुत्रेच्छया ब्रह्मदेवं सम्पूज्य कुलगुरोः वशिष्ठस्य आश्रमं प्रस्थितवन्तौ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।अस्य छन्दसः लक्षणं पूर्वश्लोकस्य व्याख्यानप्रसङ्गे प्रदत्तमस्ति।

**विशेषांशः** – अभ्यर्च्य = अभि + अर्च + क्त्वा (ल्यप्)।

दम्पती = जाया च पतिश्च ।

## श्लोकः ३६

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य तस्य भार्यायाः सुदक्षिणायाश्च गुरोः आश्रमगमनं वर्णयति –

**स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ।**
**प्रावृषेण्यं पयोवाहं विद्युदैरावताविव।।३६।।**

**अन्वयः** – स्निग्धगम्भीरनिर्घोषम् एकं स्यन्दनं प्रावृषेण्यं पयोवाहं विद्युदैरावतौ इव आस्थितौ (तौ) जग्मतुः।

**पदार्थः** – स्निग्धगम्भीरनिर्घोषं = मधुर और गम्भीर शब्द करने वाले ।एकं = एक ही ।स्यन्दनं = रथ पर ।प्रावृषेण्यं = वर्षा काल में होने वाले । पयोवाहं = बादलों पर । विद्युदैरावतौ = विद्युत् और ऐरावत । इव = के समान । आस्थितौ = चढे हुए । तौ जग्मतुः = उन दोनों ने प्रस्थान किया ।

**हिन्दी-अर्थः** – मधुर और गम्भीर शब्द करने वाले एक ही रथ पर आरुढ होकर उन दोनों सुदक्षिणा और दिलीप ने वर्षा-काल में विद्यमान बादलों पर आरुढ विद्युत् और ऐरावत के समान गुरु आश्रम के लिए प्रस्थान किया।

**व्याख्या** –

**( क ) पर्यायपदानि** – स्निग्धगम्भीरनिर्घोषं = मधुरगम्भीर-शब्दयुक्तं, एकं स्यन्दनं = एकमेव रथं, प्रावृषेण्यं = वर्षाकालिकं, पयोवाहं = मेघं, विद्युदैरावतौ इव = तडिदैरावतौ, आस्थितौ = आरुढौ, (भूत्वा तौ प्रस्थितौ )।

**( ख ) भावार्थः** – मधुरगम्भीरशब्दयुक्तम् एकमेव रथमारुह्य तौ सुदक्षिणादिलीपौ वर्षाकाले विद्यमानमेघेषु विद्युदैरावतौ इव गुरोः वशिष्ठस्याश्रमं प्रस्थितवन्तौ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।एतस्य छन्दसः लक्षणं पूर्वश्लोकस्य व्याख्यानप्रसङ्गे प्रदत्तमस्ति।

**( घ ) अलङ्कारः** – अत्र उपमा अलङ्कारः अस्ति ।

## श्लोकः ३७

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य सैन्यं विना गुरोः वशिष्ठस्य आश्रमप्रस्थानं वर्णयति –

**मा भूदाश्रमपीडेति परिमेयपुरः सरौ।**
**अनुभावविशेषात्तु सेनापरिवृताविव।।३७।।**

**अन्वयः** – आश्रमपीडा मा भूत् इति परिमेयपुरः सरौ अनुभावविशेषात् तु सेनापरिवृत्तौ इव।

**पदार्थः** – आश्रमपीडा = आश्रम के निवासी जनों के कार्य में बाधा । मा भूत् = न हो । इति = इसलिए । परिमेयपुरः सरौ = अल्प संख्या में सेवकों को ही साथ में लिए हुए ।अनुभावविशेषात् = अपने प्रताप तथा तेज से । तु = तो । सेनापरिवृत्तौ = बडी भारी सेना से घिरे हुए ।इव = समान।

**हिन्दी-अर्थः** – आश्रम के निवासी जनों के कार्य में बाधा न हो, इसलिए राजा दिलीप ने अल्प संख्या में ही सेवकों को साथ लिया । फिर भी अपने प्रताप और तेज से वे बड़ी भारी सेना से घिरे हुए प्रतीत हो रहे थे।

**व्याख्या –**

**( क ) पर्यायपदानि** – आश्रमपीडा = आश्रमबाधा, मा भूत् = मास्तु, इति = अस्मात्, कारणात्, परिमेयपुरः सरौ = परिमितसेवकौ, अनुभावविशेषात् = तेजादिप्रभावविशेषात्, सेनापरिवृत्तौ = सैन्ययुतौ, इव = सदृशम्।

**( ख ) भावार्थः** – आश्रमनिवासिनां कृते पीडा न भवेत् इति विचिन्त्य तौ सुदक्षिणादिलीपौ अल्पसेवकान् नीतवन्तौ । पुनरपि तेजादिप्रभावविशेषात् तौ सैन्ययुतौ इव प्रतीयेते स्म।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**( घ ) अलङ्कारः** – अत्र उत्प्रेक्षा अलङ्कारः अस्ति ।

**विशेषांशः** – सेनया परिवृत्तौ सेनापरिवृत्तौ । विशेषः च असौ अनुभावः इति अनुभावविशेषः।

## श्लोकः ३८

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य मार्गसुखानुभूतेः वर्णनं करोति –

**सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः।**
**पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः।।३८।।**

**अन्वयः** – सुखस्पर्शैः शालानिर्यासगन्धिभिः पुष्परेणूत्किरैः आधूतवनराजिभिः वातैः सेव्यमानौ (तौ जग्मतुः)।

**पदार्थः** – सुखस्पर्शैः = स्पर्श से सुख देने वाली । शालनिर्यास- गन्धिभिः = शाल नामक वृक्ष से निकलने वाले गोंद से सुगन्धित । पुष्परेणूत्किरैः = फूलों के पराग को फैलाने वाली । आधूतवनराजिभिः = धीरे-धीरे वन वृक्षों को कँपाने वाली । वातैः = हवाओं से । सेव्यमानौ = सेवा प्राप्त करते हुए।

**हिन्दी-अर्थः** – स्पर्शमात्र से ही सुखप्रदायक, शालवृक्षों के गोंद से सुगन्धित तथा पुष्पों के पराग से परिपूर्ण, वन वृक्षों को धीरे-धीरे कँपाने वाली हवाओं ने मार्ग में जाते हुए सुदक्षिणा और दिलीप को सेवा प्रदान की।

**व्याख्या –**

**( क ) पर्यायपदानि** – सुखस्पर्शैः = प्रियस्पर्शैः, शालनिर्यासगन्धिभिः = शालतरुप्रसूतगन्धिभिः, पुष्परेणूत्किरैः = कुसुमपरागकणैः, आधूतवनराजिभिः = किञ्चितकम्पितवनवृक्षैः, वातैः = पवनैः, सेव्यमानौ = परिचर्यमाणौ (तौ जग्मतुः)।

**( ख ) भावार्थः** – प्रियस्पर्शैः शालतरुप्रसूतगन्धिभिः कुसुमपरागकणैः किञ्चितकम्पितवनवृक्षैः पवनैः परिचर्यमाणौ तौ आश्रमं गच्छन्तौ आस्ताम् ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य लक्षणं पूर्वश्लोकै वर्णितम् ।

**विशेषांशः** – सेव्यमानौ = सेव् + शानच (प्रथमावि., द्विवचनम्)।

सुखस्पर्शैः = सुखः स्पर्शः येषां ते सुखस्पर्शः, तैः सुखस्पर्शैः ।

## श्लोकः ३९

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य आश्रमगमनमार्गं वर्णयति –

**मनोऽभिरामाः श्रृण्वन्तौ रथनेमिस्वनोन्मुखैः।**
**षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः।।३९।।**

**अन्वयः** – रथनेमिस्वनोन्मुखैः शिखण्डिभिः द्विधा भिन्नाः षड्जसंवादिनीः मनोभिरामाः केकाः श्रृणवन्तौ (तौ जग्मतुः)।

**पदार्थः** – रथनेमिस्वनोन्मुखैः = रथ के पहियों की ध्वनि सुनकर ऊपर मुख उठाये हुए । शिखण्डिभिः = मयूरों के द्वारा । द्विधाभिन्नाः = दो भागों में विभक्त (शुद्ध तथा विकृत)। षड्जसंवादिनीः = षड्ज स्वर के समान गम्भीरता वाली । मनोभिरामाः = मन को प्रसन्नता प्रदान करने वाली । केकाः = मयूर । श्रृणवन्तौ = सुनते हुए।

**हिन्दी-अर्थः** – रथ के पहियों से निकलते हुए ध्वनि सुनकर ऊपर की ओर मुख उठाये हुए मयूरों के द्वारा षड्ज स्वर के समान गम्भीर एवं मनोहर वाणी को सुनते हुए वे दोनों मार्ग में जा रहे थे।

**व्याख्या** –

**( क ) पर्यायपदानि** – रथनेमिस्वनोन्मुखैः = रथचक्रशब्दोत्कण्ठितैः, शिखण्डिभिः = मयूरैः, द्विधा भिन्नाः = द्विधा विभक्ताः, षड्जसंवादिनीः केकाः = षङ्जसंवादिनीः मयूरवाणी, मनोभिरामाः = मनसः प्रियाः, केकाः शृणवन्तौ = मयूरवाणी आकर्णयन्तौ।

**( ख ) भावार्थः** – रथचक्रशब्दोत्कण्ठितैः मयूरैः द्विधा विभक्ताः षड्जसंवादिनीः मयूरवाणी-केका मनोभिरामाः आकर्णयन्तौ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य लक्षणं पूर्वश्लोके वर्णितमस्ति ।

**विशेषांशः** – अमरकोषेऽपि –

निषादर्षभगान्धारषड्जमध्यमधैवताः।
पञ्चमश्चेत्यमी सप्ततन्त्रीकण्ठोत्थिताः स्वराः ।।

## श्लोकः ४०

**प्रसङ्गः** – अस्मिन् श्लोके महाकविः कालिदासः राज्ञः दिलीपस्य आश्रमगमनमार्गस्य वर्णनं करोति –

**परस्पराक्षिसादृश्यमयूरोज्झितवर्त्मसु।**
**मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु।।४०।।**

**अन्वयः** – अदूरोज्झितवर्त्मसु स्यन्दनाबद्धदृष्टिषु मृगद्वन्द्वेषु परस्पराक्षिसादृश्यं पश्यन्तौ (तौ जग्मतुः)।

**पदार्थः** – अदूरोज्झितवर्त्मसु = मार्ग से हटकर थोड़ी दूर पर ही स्थित । स्यन्दनाबद्धदृष्टिषु = रथ को अपलकनेत्रों से देखते हुए । मृगद्वन्द्वेषु = मृगयुगल में । परस्पराक्षिसादृश्यं = सुदक्षिणा ने मृगों में दिलीप को और दिलीप ने मृगियों में सुदक्षिणा के नेत्रों की समानता को । पश्यन्तौ = देखते हुए । (तौ जग्मतुः = वे दोनों चले जा रहे थे)।

**हिन्दी-अर्थः** – मार्ग से थोड़ी दूर पर ही स्थित रहने वाले, रथ पर एकपलकनेत्रों से देखते हुए मृगयुगलों में वे दोनों एक दूसरे के नेत्रों की समानता देखते हुए चले जा रहे थे।

**व्याख्या** –

**( क ) पर्यायपदानि** – अदूरोज्झितवर्त्मसु = समीपम् एव व्यक्तमार्गेषु, स्यन्दनाबद्धदृष्टिषु = रथसंलग्नदृष्टिषु, मृगद्वन्द्वेषु = मृगयुगले, परस्पराक्षिसादृश्यं = अन्योन्यं नेत्रसमानतां, पश्यन्तौ = अवलोकयन्तौ। (तौ जग्मतुः)।

**( ख ) भावार्थः** –विश्वासकारणात् रथमार्गसमीपे स्थितेषु कौतुकाद् रथासक्तलोचनेषु मृगमिथुनेषु परस्परं नेत्रसादृश्यं पश्यन्तौ सुदक्षिणा दिलीपौ प्रस्थितवन्तौ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य लक्षणं पूर्वश्लोके प्रदत्तमस्ति ।

**विशेषांशः** – स्यन्दनाबद्धदृष्टिषु = स्यन्दने आबद्धाः दृष्टयः यैः ते स्यन्दनाबद्धदृष्टयः, तेषु स्यन्दनाबद्धदृष्टिषु । पश्यन्तौ = दृश् + शत् (प्रथमा विभक्तिः, द्विवचनम्)।

## श्लोकः ४१

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य गुरोः वशिष्ठस्य आश्रमगमनमार्गे पङ्क्तिबद्धसारसाः कथं स्वागतं कुर्वन्ति इति वर्णनं करोति –

**श्रेणीबन्धाद्वितन्वद्भिरस्तम्भां तोरणास्रजम्।**
**सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ।।४१।।**

**अन्वयः** – श्रेणीबन्धात् अस्तम्भां तोरणस्रजं वितन्वद्भिः कलनिर्ह्लादैः सारसैः क्वचित् उन्नमिताननौ (जग्मतुः)।

**पदार्थः** – श्रेणीबन्धात् = पंक्तिबद्ध होने के कारण । अस्तम्भां = बिना किसी स्तम्भ के ही । तोरणस्रजं = नगर या भवन के बाहर द्वार की माला को । वितन्वद्भिः = बनाते हुए । कलनिर्ह्लादैः = मधुर ध्वनि वाले । सारसैः = सारस पक्षियों द्वारा । क्वचित् = कहीं- कहीं पर । उन्नमिताननौ = देखने के लिए ऊपर को मुख उठाए । (तौ जग्मतुः = वे दोनों चले जा रहे थे)।

**हिन्दी-अर्थः** – पंक्ति बांधकर मधुर शब्द करते हुए तथा आकाश-मार्ग से उडते हुए सारस-पक्षियों को देखकर ऐसा प्रतीत होता था कि मानों वे बिना खम्भे के सजी हुई बन्दनवार हों, जिन्हे देखने के लिए ऊपर की ओर मुख किए हुए वे दोनों चले जा रहे थे।

**व्याख्या** –

**(क) पर्यायपदानि** – श्रेणीबन्धात् = पंक्तिबन्धनात्, अस्तम्भाम् = आधार-स्तम्भरहितां, तोरणस्रजं = बहिर्द्वारमालां, वितन्वद्भिः = कुर्वद्भिः, कलनिर्ह्लादे = मधुरध्वनिभिः, सारसैः = सारसपक्षिभिः, क्वचित् = कुत्रचित्, उन्नमिताननौ = ऊर्ध्वमुखौ, (तौ जग्मतुः)।

**(ख) भावार्थः** –आकाशे पंक्तिबद्धां राज्ञः उपरि उड्डीयमानाम्, अतएव आधाररहितां पुष्पमालामिव उपलक्ष्यमाणां मधुरं कूजन्तीं सारसपक्तिं मुखम् उन्नमय्य पश्यन्तौ तौ प्रस्थितवन्तौ।

**(ग) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

## श्लोकः ४२

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य सुदक्षिणायाश्च रथेन सह प्रचलतः वायोः वर्णनं करोति –

**पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः।**
**रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ।।४२।।**

**अन्वयः** – प्रार्थनासिद्धिशंसिनः पवनस्य अनुकूलत्वात् तुरगोत्कीर्णैः रजोभिः अस्पृष्टालकवेष्टनौ (जग्मतुः)।

**पदार्थः** – प्रार्थनासिद्धिशंसिनः = मनोरथ की सफलता को सूचित करने वाले । पवनस्य = वायु के । अनुकूलत्वात् = अनुकूल होने से । तुरगोत्कीर्णैः = घोडों के सुरों से उठी हुई । रजोभिः = धूलि से । अस्पृष्टालकवेष्टनौ = नहीं स्पर्श किए गए हैं बाल तथा पगड़ी जिनकी ऐसे।

**हिन्दी-अर्थः** – मनोरथ की सफलता को सूचित करने वाली वायु की गति अनुकूल होने के कारण घोडे के खुरों के द्वारा उठाई गई धूलि रानी सुदक्षिणा के बालों तथा राजा दिलीप की पगडी को स्पर्श न कर सकी।

**व्याख्या** –

**(क) पर्यायपदानि** – प्रार्थनासिद्धिशंसिनः = कार्यसिद्धिसूचकाः, पवनस्य = वायोः, अनुकूलत्वात् = गन्तव्याभिमुखात्वात्, तुरगोत्कीर्णैः = तुरगखुरोत्थितैः, रजोभिः = धूलिभिः, अस्पृष्टालकवेष्टनौ = असंलग्नकुन्तलोष्णीषौ।

**(ख) भावार्थः** –सुदक्षिणादिलीपयोः गुरोः आश्रमं प्रस्थानकाले वायोः गतिः अनुकूला आसीत् । अश्व खुरोत्थिता धूलिः सुदक्षिणायाः केशान् दिलीपस्य उष्णीषञ्च स्प्रष्टुम् असमर्था अभवत्।

**(ग) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य लक्षणं पूर्वश्लोके द्रष्टव्यम् ।

**विशेषांशः** – अनुकूलत्वात् = अनुकूलस्य भावः अनुकूलत्वं तस्मात् (अनुकूल+त्व)।
उत्कीर्ण = उत् +कृ +क्त ।

## श्लोकः ४३

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य गुरोः आश्रमगमनमार्गे मार्गस्थसरोवरेभ्यः आगच्छतः कमलसुगन्धस्य वर्णनं करोति –

**सरसीष्वरविन्दानां वीचिविक्षोभशीतलम्।**
**आमोदमुपजिघ्रन्तौ स्वनिः श्वासानुकारिणम्।।४३।।**

**अन्वयः** – सरसीषु वीचिविक्षोभशीतलं स्वनिः श्वासानुकारिणम् अरविन्दानाम् आमोदम् उपजिघ्रन्तौ (जग्मतुः)।

**पदार्थः** – सरसीषु = सरोवरों में / के । वीचिविक्षोभशीतलं = लहरों के सम्पर्क से शीतल । स्वनिः श्वासानुकारिणं =अपने श्वासों की समानता का अनुसरण करने वाले । अरविन्दानां = कमलों की । आमोदं = सुगन्ध को । उपजिघ्रन्तौ = सूँघते हुए।

**हिन्दी-अर्थः** – सरोवरों के लहरों के सम्पर्क से शीतल अपने निःश्वास का अनुकरण करने वाले कमलों की सुगन्धि को ग्रहण हुए वे दोनों सुदक्षिणा और राजा दिलीप आश्रम चले जा रहे थे।

**व्याख्या** –

**( क ) पर्यायपदानि** – सरसीषु = सरोवरेषु, वीचिविक्षोभशीतलं = तरङ्गक्षोभ-शीतलं, स्वनिः श्वासानुकारिणं =निजनिःश्वासनुकरणशीलम्, अरविन्दानां = कमलानाम्, आमोदं = सुगन्धः, उपजिघ्रन्तौ = घ्राणेन (नासिकया) गृह्णन्तौ।

**( ख ) भावार्थः** –सरोवराणां तरङ्गानां सम्पर्केण शीतलं स्वमुखवायोरनुरूपं तत्र उत्पन्नानां कमलानां सुगन्धं जिघ्रन्तौ तौ सुखेन गुरोः आश्रमं प्रस्थितवन्तौ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य छन्दसः लक्षणं पूर्वश्लोके द्रष्टव्यम् ।

**विशेषांशः** – सरसी = कासारः सरसी सरः – इत्यमरः।

उपजिघ्रन्तौ = उप + घ्रा + शतृ (प्रथमाविभक्तिः, द्विवचनम्) ।

## श्लोकः ४४

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य आश्रमगमनकाले ताभ्यां ग्रामेषु प्रवृत्तयज्ञब्राह्मणैः प्रदत्ताशीर्वादस्य वर्णनं करोति –

**ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनाम्।**
**अमोघाः प्रतिगृह्णन्तावर्ध्यानुपदमाशिषः।।४४।।**

**अन्वयः** – आत्मविसृष्टेषु यूपचिह्नेषु ग्रामेषु यज्वनाम् अमोघाः आशिषः अर्ध्यानुपदं प्रतिगृह्णन्तौ (तौ जग्मतुः)।

**पदार्थः** – आत्मविसृष्टेषु = स्वयं राजा दिलीप द्वारा दान में दिए हुए । यूपचिह्नेषु = यज्ञस्तम्भों में चिह्नित । ग्रामेषु = गाँवों में । यज्वनां = यज्ञ करने वाले ब्राह्मणों के । अमोघाः = कभी भी व्यर्थ न होने वाले । आशिषः = आशीर्वाद लेते हुए । अर्ध्यानुपदं = अर्ध्य आदि के स्वीकार करने के अनन्तर । प्रतिगृह्णन्तौ = स्वीकार करते हुए।

**हिन्दी-अर्थः** – स्वयं दान में दिए हुए यज्ञ के स्तम्भों में चिह्नित गाँवों में अर्ध्य प्राप्त करने के अनन्तर यज्ञ कराने वाले ब्राह्मणों के असफल न होने वाले आशीषों को लेते हुए वे दोनों चले जा रहे थे।

**व्याख्या** –

**( क ) पर्यायपदानि** – आत्मविसृष्टेषु = स्वदत्तेषु, यूपचिह्नेषु = स्तम्भलक्षणेषु, ग्रामेषु = अभिजनेषु, यज्वनां = विधिनेष्टवताम्, अमोघाः = सफलाः, आशिषः = आशीर्वादान्, अर्ध्यानुपदं = अर्ध्यस्वीकारानन्तरं, प्रतिगृह्णन्तौ = स्वीकुर्वन्तौ (तौ जग्मतुः)।

**( ख ) भावार्थः** –आत्मना विविधेषु यज्ञेषु याज्ञिकविप्रेभ्यो दत्तेषु यज्ञस्तम्भेषु चिह्नितेषु ग्रामेषु तत्रस्थ ब्राह्मणानां सफलाशीर्वादान् पूजाविधेरनन्तरं स्वीकुर्वन्तौ तौ प्रस्थितवन्तौ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । पूर्वश्लोके अस्य लक्षणं द्रष्टव्यम् ।

**विशेषांशः** – यज्वनाम् = यज् + ङ्वनिप् इति इज्वा, तेषाम्।

प्रतिगृह्णन्तौ = प्रति +गृह् +शतृ (प्र.वि., द्विवचनम्)।

## श्लोकः ४५

**प्रसङ्गः** – महाकविः कालिदासः श्लोकेऽस्मिन् राज्ञः दिलीपस्य कृते आश्रमगमनमार्गे ग्रामस्थैः गोपैः वृद्धैश्च आनीतनवनीतस्य वर्णनं करोति –

**हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान्।**
**नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम्।।४५।।**

**अन्वयः** – हैयङ्गवीनम् आदाय उपस्थितान् घोषवृद्धान् वन्यानां मार्गशाखिनां नामधेयानि पृच्छन्तौ (तौ जग्मतुः)।

**पदार्थः** – हैयङ्गवीनम् = नवीन मक्खन को । आदाय = ले करके । उपस्थितान् = आए हुए । घोषवृद्धान् = गोपों में वृद्ध या श्रेष्ठ लोगों से । वन्यानां = वन में उत्पन्न होने वाले । मार्गशाखिनां = मार्ग के वृक्षों का । नामधेयानि = नाम । पृच्छन्तौ = पूछते हुए।

**हिन्दी-अर्थः** – नवीन मक्खन को ले करके आए हुए गोपों में वृद्ध या श्रेष्ठ लोगों से वन में उत्पन्न होने वाले मार्ग के वृक्षों का नाम पूछते हुए वे दोनो चले जा रहे थे ।

**व्याख्या** –

**( क ) पर्यायपदानि** – हैयङ्गवीनं = सद्यनिस्सृतनवनीतम्, आदाय = गृहीत्वा, उपस्थितान् = समागतान्, घोषवृद्धान् = गोपवृद्धान्, वन्यानां = वनेषु उत्पन्नानां, मार्गशाखिनां = पथवृक्षाणां, नामधेयानि = नामानि, पृच्छन्तौ = जिज्ञासमानौ।

**( ख ) भावार्थः** –सुदक्षिणादिलीपयोः आश्रमगमनवार्त्तां श्रुत्वा वृद्धाः गोपाः प्रत्यग्रं नवनीतमादाय ताभ्यां समर्पितवन्तः। तेषाम् उपहारान् स्वीकृत्य दिलीपः सुदक्षिणा च मार्गस्थितानां वन्यवृक्षाणां नामानि पृच्छन्तौ प्रस्थितवन्तौ ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । पूर्वश्लोके अस्य लक्षणं द्रष्टव्यम् ।

**विशेषांशः** – आदाय = आ +दा +क्त्वा (ल्यप्) ।

उपस्थित = उप +स्था +क्त । पृच्छन्तौ = प्रच्छ् + शतृ (प्र.वि., द्विवचनम्)।

## श्लोकः ४६

**प्रसङ्गः** – अस्मिन् श्लोके महाकविः कालिदासः चित्रानक्षत्रं शिशिरऋतोः पश्चात् प्रकटितं चतुर्दिक्षु च प्रकृतौ उज्ज्वलता प्रसृतेति वर्णयति –

**काप्यभिख्यातयोरासीद् व्रजतोः शुद्धवेषयोः।**
**हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ।।४६।।**

**अन्वयः** – वज्रतोः शुद्धवेषयोः तयोः हिमनिर्मुक्तयोः चित्राचन्द्रमसोः इव योगे (सति) काऽपि अभिख्या आसीत्।

**पदार्थः** – व्रजतो = मार्ग में जाते समय । शुद्धवेषयोः = श्वेत वस्त्रों से सुशोभित । तयोः = रानी सुदक्षिणा तथा राजा दिलीप की । हिमनिर्मुक्तयोः = हेमन्त ऋतु के पश्चात् । चित्राचन्द्रमसोः = चित्रा नक्षत्र और चन्द्रमा के । योगे सति = संयोग होने पर । काऽपि = कोई अपूर्व । अभिख्या = सुन्दरता /शोभा । आसीत् = हुई /थी ।

**हिन्दीअर्थः** – मार्ग में जाते हुए सुन्दर श्वेत वस्त्रों से सुसज्जित उन राजा दिलीप तथा रानी सुदक्षिणा की शोभा हेमन्त ऋतु के समाप्त हो जाने के पश्चात् चित्रानक्षत्र तथा चन्द्रमा के योग होने पर प्रस्तुत होने वाली आभा के समान प्रतीत हो रही थी।

**व्याख्या –**

**( क ) पर्यायपदानि** – व्रजतोः = गच्छतोः, शुद्धवेषयोः = उज्ज्वलवेषयोः, तयोः = सुदक्षिणादिलीपयोः, हिमनिर्मुक्तयोः = हिमविरहितयोः, चित्राचन्द्रमसोः = चित्राचन्द्रयोः, योगे सति = संयोगे सति, काऽपि = अद्वितीया, अभिख्या = शोभा, आसीत् = अभूत् / सञ्जाता।

**( ख ) भावार्थः** –शिविरावसाने चैत्रस्य पूर्णिमातिथौ चित्रापूर्णचन्द्रयोः योगे यथा अद्वितीया शोभा भवति तथैव शुभ्रवेषयोः एकरथाारुढयोः सुदक्षिणादिलीपयोः प्रतीतिः भवति स्म।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।अस्य छन्दसः लक्षणं पूर्वश्लोकस्य व्याख्यानप्रसङ्गे लिखितम् ।

**( घ ) अलङ्कारः** – अत्र उपमा अलङ्कारः अस्ति ।

**विशेषांशः** – व्रजतोः = व्रज +शतृ (ष.वि., द्विवचनम्)।

अभिख्या = अभि +ख्या +अङ् (स्त्री.)।

## श्लोकः ४७

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञा दिलीपेन सुदक्षिणायाः कृते प्रदर्शितमार्गस्थवस्तूनां वर्णनं करोति –

**तत्तद्भूमिपतिः पत्न्यै दर्शयन्प्रियदर्शनः।**
**अपि लङ्घितमध्वानं बुबुधे न बुधोपमः ।।४७।।**

**अन्वयः** – बुधोपमः प्रियदर्शनः भूमिपतिः पत्न्यै तत् तत् दर्शयन् लङ्घितम् अपि अध्वानं न बुबुधे।

**पदार्थः** – बुधोपमः = पण्डितों के समान विद्वान् ।प्रियदर्शनः = देखने में सुन्दर ।भूमिपतिः = राजा (दिलीप)। पत्न्यै = पत्नी (सुदक्षिणा) को ।तत् तत् = मार्ग के उन-उन दर्शनीय वस्तुओं को ।दर्शयन् = दिखाते हुए । लङ्घितमपि = पीछे छोड़े गए ।अध्वानं = मार्ग को ।न बुबुधे = नहीं जान सके।

**हिन्दी-अर्थः** – पण्डितों के समान एवं देखने में सुन्दर राजा दिलीप अपनी पत्नी को मार्ग के दर्शनीय वस्तुओं को दिखाते हुए पीछे छोड़े गए मार्ग को भी न जान सके।

**व्याख्या –**

**( क ) पर्यायपदानि** – बुधोपमः = पण्डितसदृशः, प्रियदर्शनः = प्रियदर्शी, भूमिपतिः = राजा दिलीपः, पत्न्यै = भार्यायै, तत् तत् = अद्भूतं वस्तु, दर्शयन् = प्रदर्शयन्, लङ्घितमपि = अतिवाहितम् अपि, अध्वानं = मार्गं, न बुबुधे = न ज्ञातवान्।

**( ख ) भावार्थः** –पण्डितोपमः प्रियदर्शी राजा दिलीपः स्वीयभार्यायै सुदक्षिणायै मार्गस्थाद्भूतवस्तूनि प्रदर्शयन् अतिवाहितमपि मार्गं न ज्ञातवान्।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः –**

प्रियदर्शनः = प्रियं दर्शनं यस्य सः (बहु.समासः)।

भूमिपतिः = पाति इति पतिः, भूमेः पतिः (ष. तत्पुरुष समासः)।

## श्लोकः ४८

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः राज्ञः दिलीपस्य राज्ञ्याः सुदक्षिणायाश्च गुरोः आश्रमप्राप्तेः वर्णनं करोति –

**सः दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः।**
**सायं संयमिनस्तस्य महर्षेर्महिषीसख।।४८।।**

**अन्वयः** – दुष्प्रापयशाः श्रान्तवाहनः महिषीसखः सः सायं संयमिनः तस्य महर्षेः आश्रमं प्रापत्।
**पदार्थः** – दुष्प्रापयशाः = जो यश दूसरे न प्राप्त कर सके हों ऐसे यशवाले । श्रान्तवाहनः = थके हुए घोड़ों वाले । महिषीसखः = रानी सुदक्षिणा के सहित । सः = वह राजा दिलीप । सायं = सांयकाल के समान । संयमिनः = इन्द्रियों को वश में रखने वाले । तस्य महर्षेः = उस महर्षि वशिष्ठ के। आश्रमं = आश्रम को । प्रापत् = पहुँचे ।
**हिन्दी-अर्थः** – दुर्लभ यश वाले तथा थके हुए घोड़ों वाले राजा दिलीप पत्नी सुदक्षिणा के साथ सांयकाल महर्षि वशिष्ठ के आश्रम में पहुँचे।
**व्याख्या** –
**( क ) पर्यायपदानि** – दुष्प्रापयशाः = दुर्लभयशाः, श्रान्तवाहनः = क्लान्तवाहनः, महिषीसखः = राज्ञीसुदक्षिणासहितः, सः = राजा दिलीपः, सायं = सांयकाले, संयमिनः = नियमवतः, तस्य महर्षेः = तस्य गुरोः वशिष्ठस्य, आश्रमं = तपोवनं, प्रापत् = प्राप्तवान् ।
**( ख ) भावार्थः** –दुर्लभयशः सपत्नीकः राजा दिलीपः सन्ध्यायां महर्षे वशिष्ठस्य यदा आश्रमं प्राप्तवान् तदा सूदूरभ्रमणेन तस्य रथाश्वाः परिक्लान्ताः आसन्।
**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।
**विशेषांशः** – दुष्प्राप = दुस् + प्र + आप् + खल्।
प्रापत् = प्र + आप् – लुङ् लकारः, प्र.पु., एकवचनम् ।

## श्लोकः ४९

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः अग्निहोत्राय तपस्वियुक्तवशिष्ठाश्रमस्य वर्णनं करोति –

**वनान्तरादुपावृत्तैः समित्कुशफलाहरैः ।**
**पूर्यमाणामदृश्याग्निप्रत्युद्यातैस्तपस्विभिः ।।४९।।**

**अन्वयः** – वनान्तरात् उपावृत्तैः समित्कुशफलाहरैः अदृश्याग्निप्रत्युद्यातैः तपस्विभिः पूर्यमाणम्।
**पदार्थः** – वनान्तरात् = जहाँ दूसरे वनों से । उपावृत्तैः = लौटते हुए । समित्कुशफलाहरैः = समिधा, कुश और फलों को लाने वाले । अदृश्याग्निप्रत्युद्यातैः = अदृश्य अग्नि के द्वारा स्वागत किये जाते हुए । तपस्विभिः = तपस्वियों से । पूर्यमाणं = भर रहा था।
**हिन्दी-अर्थः** – जहाँ दूसरे वनों से समिधा, कुश और फलों को लेकर लौटते हुए तपस्वियों का अदृश्य अग्नि के द्वारा स्वागत किया जा रहा था, उन तपस्वियों से ऋषि वशिष्ठ का आश्रम भरा हुआ था।
**व्याख्या** –
**( क ) पर्यायपदानि** – वनान्तरात् = अन्यस्मात् वनात्, उपावृत्तैः = प्रत्यागतैः, समित्कुशफलाहरैः = समित्कुशफलाहरणशीलैः, अदृश्याग्निप्रत्युद्यातैः = अदृश्याग्निप्रत्युद्गतैः, तपस्विभिः = महर्षिभिः, पूर्यमाणं = व्याप्तम् आसीत्।
**( ख ) भावार्थः** –सांयकाले तत्र तपस्विनः यज्ञार्थं यज्ञकाष्ठानि कुशान् फलानि च गृहीत्वा अन्यस्मात् वनात् स्वाश्रमम् आगच्छन्ति स्म । तदनीम् अदृश्याग्निना स्वागतयुक्ततपस्विभिः ऋषेः वशिष्ठस्य आश्रमः पूरितः आसीत्।
**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।
**विशेषांशः** – उपावृत्तैः = उप + आ + वृत् + क्त (तृ.वि., बहुवचनम्)।
समित्कुशफलाहरैः = समिधश्च कुशाश्च फलानि चेति समित्कुशफलानि, (द्वन्द्व)। तानि आहर्तुं शीलम् एषां ते समित्कुशफलाहराः (उपपद), तैः ।

## श्लोक: ५०

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकवि: कालिदास: ऋषिवशिष्ठस्य आश्रमे पालितमृगाणां चेष्टां वर्णयति –

**आकीर्णमृषिपत्नीनामुटजद्वाररोधिभि:।**
**अपत्यैरिव नीवारभागधेयोचितैर्मृगै:।।५०।।**

**अन्वयः** – नीवारभागधेयोचितै: उटजद्वाररोधिभि: मृगै: ऋषिपत्नीनाम् अपत्यै: इव आकीर्णम् (आश्रमं प्रापत्)।

**पदार्थः** – नीवार भागधेयोचितै: = नीवार नामक धान्य के भाग को प्राप्त करने वाले । उटजद्वारोधिभि: = कुटियों के द्वार को अपना भाग प्राप्त करने की लालसा से रोकने वाले । ऋषिपत्नीनां = ऋषि-पत्नियों के । अपत्यै: इव = पुत्रों के समान । मृगै: = मृगों से । आकीर्णं = व्याप्त था (आसीत्)।

**हिन्दी-अर्थः** – नीवार नाम धान्य के भाग को पाने वाले ऋषियों की कुटिया का द्वार रोकने वाले ऋषिपत्नियों द्वारा पुत्रों के समान पाले गए मृगों से वह आश्रम भरा हुआ था।

**व्याख्या** –

**(क) पर्यायपदानि** – नीवारभागधेयोचितै: = नीवारधान्यांशयोग्यै:, उटजद्वारोधिभि: = पर्णशालाद्वाररोधकै:, ऋषिपत्नीनां = मुनिभार्याणाम्, अपत्यै: इव = सन्तानै: इव, मृगै: = हरिणै:, आकीर्णं= व्याप्तम् (आसीत्)।

**(ख) भावार्थः** –मुनिभार्याणां सन्तानसदृशमृगा: नीवारधान्यांशान् प्राप्तुं पर्णशालाद्वाररोधकत्वेन स्थितवन्त: आसन्।

**(ग) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्द: अस्ति ।

## श्लोक: ५१

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकवि: कालिदास: आश्रमे विद्यमानपादपानां पक्षिणाञ्च वर्णनं करोति –

**सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम् ।**
**विश्वासाय विहङ्गानामालवालाम्बुपायिनाम् ।।५१।।**

**अन्वयः** – आलवालाम्बुपायिनां विहङ्गानां विश्वासाय मुनिकन्याभि: सेकान्ते तत्क्षणोज्झितवृक्षकम्( आश्रमं प्रापत्)।

**पदार्थः** – आलवालाम्बुपायिनां = पेड़-पौधों के थाल्हों के जल पीने वाले । विहङ्गानां = पक्षियों के । विश्वासाय = विश्वास के लिए । मुनिकन्याभि: = वृक्षों को सींचने वाली ऋषिकन्याओं के द्वारा। सेकान्ते = वृक्षों को सींचने के पश्चात् । तत्क्षणोज्झितवृक्षकम् = तत्क्षण छोड़े गए छोटे-छोटे पौधों वाले।

**हिन्दी-अर्थः** – पेड़-पौधों के थाल्हों के जल को पीने वाले पक्षियों के विश्वास के लिए सिंचन के पश्चात् मुनिकन्याओं के द्वारा तत्क्षण छोड़े गए वृक्षों-पादपों से युक्त आश्रम में राजा दिलीप पत्नी सुदक्षिणा के साथ पहुँचे।

**व्याख्या** –

**(क) पर्यायपदानि** – आलवालाम्बुपायिनां = जलयुक्तपादपस्थाधोभागात् जलपायिनां, विहङ्गानां = पक्षिणां , विश्वासाय = विश्रम्भाय, मुनिकन्याभि: = ऋषिसुताभि:, सेकान्ते = सेचनानन्तरं, तत्क्षणोज्झितवृक्षकं = सद्य: व्यक्तपादपम्।

**(ख) भावार्थः** –यत्र मुनिकन्याभि: शीघ्रमेव पादपानां कृते जलसिञ्चनं कृतमासीत् तथा तदेव जलं पातुं पक्षिण: निर्भीका: सन्त: तत्र आगता: आसन् एतादृशम् आश्रमं राजा दिलीप: सपत्नीक: प्राप्तवान्।

**(ग) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्द: अस्ति ।

**विशेषांशः** – विश्वासाय – वि + श्वस् + घञ् (च.वि., एकवचनम्)।

विहङ्गानाम् – विहायसा आकाशेन गच्छन्ति इति विहङ्गा:, तेषां (ष.वि., बहुवचनम्)।

## श्लोकः ५२

**प्रसङ्गः** – अस्मिन् श्लोके महाकविः कालिदासः ऋषेः वशिष्ठस्याश्रमे उपविष्टानां मृगाणां चर्वित-चर्वणस्य वर्णनं करोति –

**आतपात्ययसंक्षिप्तनीवारासु निषादिभिः।**
**मृगैर्वर्तितरोमन्थमुटजाङ्गनभूमिषु ।।५२।।**

**अन्वयः** – आतपात्ययसंक्षिप्तनीवारासु उटजाङ्गनभूमिषु निषादिभिः मृगैः वर्तित रोमन्थम् (आश्रमं प्रापत्)।

**पदार्थः** – आतपात्ययसंक्षिप्तनीवारासु = धूप के चले जाने पर एकत्रित किए गए नीवार नामक धान्य की ढेर पर । उटजाङ्गनभूमिषु = पर्णशालाओं के आँगन की भूमि पर । निषादिभिः = बैठे हुए । मृगैः = मृगों के द्वारा । वर्तितरोमन्थम् = जुगाली किए जाते हुए । (आश्रमं प्रापत् = आश्रम में पहुँचे)।

**हिन्दी-अर्थः** – राजा दिलीप पत्नी के साथ धूप के चले जाने पर एकत्रित करके रखे गए नीवार नामक धान्य की ढेर पर पर्णशालाओं के आँगन की भूमि पर बैठे हुए हिरणों द्वारा जुगाली किए जाते हुए वशिष्ठ के आश्रम को पहुँचे।

**व्याख्या** –

**(क) पर्यायपदानि** – आतपात्ययसंक्षिप्तनीवारासु = सूर्यातपस्य अपगते सति एकत्रीकृतनीवारनामकधान्यासु, उटजाङ्गनभूमिषु = पर्णशालायाः प्राङ्गणेषु, निषादिभिः = उपविष्टैः, मृगैः = हरिणैः, वर्तितरोमन्थं = चर्वितस्य चर्वणम्।

**(ख) भावार्थः** –सूर्यातपे अपगते सति एकत्रीकृतनीवारनामकधान्यासु पर्णशालायाः प्राङ्गणेषु उपविष्टैः मृगैः चर्वितस्य चर्वणयुक्तमाश्रमं दिलीपः सुदक्षिणासहितं प्राप्तवान्।

**(ग) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** – निषादिभिः = नि + सद् + णिनि – तृ.वि.बहुवचनम् ।

## श्लोकः ५३

**प्रसङ्गः** – श्लोकेऽस्मिन् महाकविः कालिदासः ऋषेः वशिष्ठस्याश्रमे प्रसृताहव्यादिगन्धयुक्तधूमस्य वर्णनं करोति –

**अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान्।**
**पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः ।।५३।।**

**अन्वयः** – अभ्युत्थिताग्निपिशुनैः पवनोद्धूतैः आहुतिगन्धिभिः धूमैः आश्रमोन्मुखान् अतिथीन् पुनानम् (आश्रमं प्रापत्)।

**पदार्थः** – अभ्युत्थिताग्निपिशुनैः = प्रज्वलित अग्नि की सूचना देने वाले। पवनोद्धूतैः = हवा के द्वारा उड़ाये गये । आहुतिगन्धिभिः = आहुति की गन्ध से सुगन्धित । धूमैः = धुओं के द्वारा । आश्रमोन्मुखान् = आश्रम आने को उत्सुक । अतिथीन् = अतिथियों को । पुनानम् = पवित्र करने वाले। (आश्रमं प्रापत् = आश्रम को पहुँचे)।

**हिन्दी-अर्थः** – प्रज्वलित अग्नि की सूचना देने वाले, हवा के द्वारा उड़ाये गये मुनियों के द्वारा दी जाने वाली आहुति के गन्ध से सुगन्धित-धूओं के द्वारा आश्रम में आने वाले अतिथियों को पवित्र करने वाले आश्रम में राजा दिलीप और सुदक्षिणा दोनों पहुँचे ।

**व्याख्या** –

**(क) पर्यायपदानि** – अभ्युत्थिताग्निपिशुनैः = प्रज्वलिताग्नि सूचकैः, पवनोद्धूतैः = वायूत्थापितैः, आहुतिगन्धिभिः = होमद्रव्यसुगन्धिभिः, धूमैः = धूम्रैः, आश्रमोन्मुखान् = आश्रमं प्रति गन्तुमुत्सुकान्, अतिथीन् = अभ्यागतान्, पुनानं = पवित्रीकुर्वाणम्। (आश्रमं प्रापत् )।

**(ख) भावार्थः** – राजा दिलीपः सुदक्षिणा सह तमाश्रमं प्राप्तवान्, यत्र प्रज्वलिताग्निसूचकैः वायूत्थापितैः होमद्रव्यसुगन्धिभिः धूमैः आश्रमं प्रति आगन्तुमुत्सुकाः अतिथयः पवित्रीक्रियन्ते स्म।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।
**विशेषांशः** – पवनोद्धूतैः = पवनेन उद्धूताः पवनोद्धूताः, तैः ।
पुनानम् = पूङ्+ शानच् ।

## श्लोकः ५४

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः राज्ञः दिलीपस्य राज्ञ्याः सुदक्षिणायाश्च आश्रमं सम्प्राप्य रथात् अवतरणस्य वर्णनं करोति –

**अथ यन्तारमादिश्य धुर्यान्विश्रामयेति सः ।**
**तामवारोहयत्पत्नीं रथादवततार च ।।५४।।**

**अन्वयः** – अथ सः यन्तारं ''धूर्यान् विश्रामय'' इति आदिश्य, तां पत्नीं रथात् अवरोहयत् अवततार च।
**पदार्थः** – अथ = आश्रम प्राप्ति के पश्चात् । सः = वह राजा दिलीप । यन्तारं = सारथी को । धुर्यान् = घोड़ों को । विश्रामय = विश्राम कराओ । इति = ऐसा । आदिश्य = आदेश दे कर । तां पत्नीं = अपनी पत्नी सुदक्षिणा को । रथात् = रथ से । अवारोहयत् = उतारा । अवततार च = और स्वयं उतरे ।
**हिन्दी-अर्थः** – गुरु वशिष्ठ के आश्रम पहुँचने के बाद राजा दिलीप सारथी को घोड़ों की थकान दूर करने का आदेश देते हुए पत्नी सुदक्षिणा को रथ से उतारा और स्वयं उतरे ।
**व्याख्या** –
**( क ) पर्यायपदानि** – अथ = आश्रमप्राप्तेः पश्चात्, सः = राजा दिलीपः, यन्तारं = सारथिं, धुर्यान् = अश्वान्, विश्रामय = विगतश्रमान् कुरु, इति = एवम्, आदिश्य = आज्ञाप्य, तां पत्नीं = सुदक्षिणां, रथात् = स्यन्दनात्, अवरोहयत् = अवतारितवान्, अवततार च = स्वयं च अवतीर्णवान् ।
**( ख ) भावार्थः** – गुरोः वशिष्ठस्य आश्रमप्राप्तेरनन्तरं राजा दिलीपः सारथिम् ''अश्वान् विगतश्रमान् कुरु'' इति आज्ञाप्य रथात् पूर्वं सुदक्षिणाम् अवतारितवान् पुनः स्वयमपि अवतीर्णवान् ।
**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।
**विशेषांशः** – विश्रामय = वि + श्रम् + णिच् (लोट् ल., म.पु., एकवचनम्)।
आदिश्य = आ + दिश् + ल्यप् ।
अवरोहयत् = अव + आ + रुह्+ णिच् (लङ् ल., प्र.पु., एकवचनम्)।
अवततार = अव + तृ (लिट् ल., प्र.पु., एकवचनम्)।

## श्लोकः ५५

**प्रसङ्गः** – अनेन श्लोक माध्यमेन महाकविः कालिदासः गुरोः आश्रमे राज्ञः दिलीपस्य मुनिभिः क्रियमाणस्वागतस्य वर्णनं करोति –

**तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेन्द्रियाः ।**
**अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ।।५५।।**

**अन्वयः** – सभ्याः गुप्ततमेन्द्रियाः मुनयः सभार्याय गोप्त्रे नयचक्षुषे अर्हते तस्मै अर्हणां चक्रुः।
**पदार्थः** – सभ्याः = सज्जन आश्रमवासी । गुप्ततमेन्द्रियाः = इन्द्रियों को वश में रखने वाले । मुनयः = ऋषियों ने । सभार्याय = भार्या सहित । गोप्त्रे = प्रजा की रक्षा करने वाले । नयचक्षुषे = नीतिशास्त्रज्ञ । अर्हते = पूजनीय । तस्मै = उन राजा दिलीप की । अर्हणां = स्वागत । चक्रुः = किया ।
**हिन्दी-अर्थः** – सज्जन तथा इन्द्रियों को वश में रखने वाले ऋषियों ने पत्नी सहित प्रजा की रक्षा करने वाले, नीति-शास्त्रज्ञ तथा पूज्य उस राजा दिलीप का स्वागत किया ।

**व्याख्या –**

**( क ) पर्यायपदानि** – सभ्याः = साधवः आश्रमवासिनः, गुप्ततमेन्द्रियाः = जितेन्द्रियाः, मुनयः = ऋषयः, सभार्याय = पत्नीसहिताय, गोप्त्रे = प्रजारक्षकाय, नयचक्षुषे = नीतिशास्त्रज्ञाय, अर्हते = पूज्याय, तस्मै = राज्ञे दिलीपाय, अर्हणां = स्वागतं, चक्रुः = कृतवन्तः।

**( ख ) भावार्थः** – आश्रमवासिनः जितेन्द्रियाः ऋषयः पत्नीसहिताय, प्रजारक्षकाय, नीतिशास्त्रज्ञाय पूज्याय च तस्मै राज्ञे दिलीपाय स्वागतार्चनं कृतवन्तः।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** – गोप्त्रे = रक्षणार्थक 'गुप्' धातोः 'तृच्' प्रत्ययः (च.वि., एकवचनम्)।

अर्हते = अर्ह + शतृ (च.वि., एकवचनम्)।

## श्लोकः ५६

**प्रसङ्गः** – अनेन श्लोक माध्यमेन महाकविः कालिदासः राज्ञा दिलीपेन सांयकाले अनुष्ठानात् परम् अरुन्धतीसहितगुरुवशिष्ठस्य कृतदर्शनस्य वर्णनं करोति –

**विधेः सायन्तनस्यान्ते स ददर्श तपोनिधिम् ।**
**अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम् ।।५६।।**

**अन्वयः** – सः सायन्तनस्य विधेः अन्ते अरुन्धत्या अन्वासितं तपोनिधिं स्वाहया हविर्भुजम् इव ददर्श।

**पदार्थः** – सः = राजा दिलीप । सायन्तनस्य = सन्ध्या काल में होने वाले । विधेः = अनुष्ठान के । अन्ते = समाप्त हो जाने के बाद । अरुन्धत्या = अपनी पत्नी अरुन्धती के साथ बैठे हुए, अन्वासितं = सेवित । तपोनिधिं = महर्षि वशिष्ठ को । स्वाहया = स्वाहा देवी के साथ । हविर्भुजम् इव = अग्नि के समान । ददर्श = देखा ।

**हिन्दी-अर्थः** – उस राजा दिलीप ने सांयकालीन सन्ध्या के पश्चात् स्वाहा से युक्त अग्नि के समान अरुन्धती के साथ बैठे हुए तपोनिधि महर्षि वशिष्ठ का दर्शन किया ।

**व्याख्या –**

**( क ) पर्यायपदानि** – सः = राजा दिलीपः, सायन्तनस्य = सन्ध्याकालीनस्य, विधेः = अनुष्ठानस्य, अन्ते = पश्चात्, अरुन्धत्या = अरुन्धती नामक पत्न्या सह, अन्वासितं = सहोपविष्टं, तपोनिधिं = महर्षिं वशिष्ठं, स्वाहया = स्वाहादेव्या सह, हविर्भुजम् = अग्नेः, इव = समानं, ददर्श = दृष्टवान् ।

**( ख ) भावार्थः** – सायंकालिकानुष्ठानं समाप्य यदा महर्षिः वशिष्ठः अरुन्धत्या सह उपविष्टः आसीत् तदा स्वभार्यया स्वाहया सहितम् अग्निम् इव शोभमानं तं महर्षिं वशिष्ठं राजा दिलीपः दृष्टवान् ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** – अन्वासितम् = अनु + आस् (कर्मणि) क्त ।

ददर्श = दृश् लिट् ल., प्रथमपुरुषः, एकवचनम् ।

## श्लोकः ५७

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः सपत्नीकेन राज्ञा दिलीपेन गुरोः वशिष्ठस्य कृतवन्दनां वर्णयति –

**तयोर्जगृहतुः पादान्राजा राज्ञी च मागधी ।**
**तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ।।५७।।**

**अन्वयः** – मागधी राज्ञी राजा च तयोः पादान् जगृहतुः गुरुपत्नी गुरुश्च तौ प्रीत्या प्रतिननन्दतुः।

**पदार्थः** – मागधी = मगध नरेश की पुत्री । राज्ञी = रानी सुदक्षिणा । राजा च = राजा दिलीप ने । तयोः = अरुन्धती तथा वशिष्ठ के । पादान् = पैरों को । जगृहतुः = प्रणाम किया । गुरुपत्नी = गुरु की पत्नी अरुन्धती । गुरुश्च = तथा गुरु वशिष्ठ को । तौ = सुदक्षिणा और राजा दिलीप को । प्रीत्या = प्रसन्नता के साथ । प्रतिनन्दतुः = आशीर्वाद आदि देकर स्वागत किया।

**हिन्दी-अर्थः** – मगध राजा की पुत्री रानी सुदक्षिणा और राजा दिलीप ने अरुन्धती तथा महर्षि वशिष्ठ के चरण-स्पर्शपूर्वक प्रणाम किया तथा गुरुपत्नी अरुन्धती और गुरु वशिष्ठ ने रानी सुदक्षिणा तथा राजा दिलीप को प्रसन्नतापूर्वक आशीर्वाद देकर स्वागत किया।

**व्याख्या** –

**( क ) पर्यायपदानि** – मागधी = मगधराजपुत्री, राज्ञी = सुदक्षिणा, राजा च = राजा दिलीपः च, तयोः = अरुन्धतीवशिष्ठयोः, पादान् = चरणान्, जगृहतुः = अभिवादनं कृतवन्तौ, गुरुपत्नी = अरुन्धती, गुरुश्च = वशिष्ठश्च, तौ = सुदक्षिणादिलीपौ, प्रीत्या = प्रेम्णा, प्रतिनन्दतुः = आशीर्वादान् दत्तवन्तौ ।

**( ख ) भावार्थः** – सुदक्षिणादिलीपो यथाक्रमम् अरुन्धतीवशिष्ठयोः चरणौ संस्पृश्य अभिवादनं कृतवन्तौ। अरुन्धतीवशिष्ठौ अपि प्रणतयोः तयोः कृते आशीर्वादान् दत्तवन्तौ ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य छन्दसः लक्षणं पूर्ववर्णितश्लोके द्रष्टव्यम् ।

**विशेषांशः** – जगृहतुः = गृह लिट् ल., प्र.पु., द्विवचनम् ।

प्रतिनन्दतुः = प्रति + नन्द् लिट् ल., प्र.पु., द्विवचनम् ।

## श्लोकः ५८

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः महर्षिणा वशिष्ठेन राजानं दिलीपं प्रति पृष्टायाः राज्यकुशलवार्तायाः वर्णनं करोति –

**तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् ।**
**पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ।।५८।।**

**अन्वयः** – मुनिः आतिथ्य क्रियाशान्तरथक्षोभपरिश्रमं राज्याश्रममुनिं तं राज्ये कुशलं पप्रच्छ।

**पदार्थः** – मुनिः = महर्षि वशिष्ठ ने । आतिथ्यक्रियाशान्तरथक्षोभपरिश्रमं = वशिष्ठ मुनि के द्वारा प्राप्त अतिथि सत्कार की क्रिया से रथ से उत्पन्न परिश्रम अथवा थकान दूर करने वाले। राज्याश्रममुनिं = राज्य रूपी आश्रम के मुनि । तं = उन राजा दिलीप से । राज्ये = राज्य-सम्बन्धी, कुशलं = कुशल समाचार को । पप्रच्छ = पूछा ।

**हिन्दी-अर्थः** – महर्षि वशिष्ठ ने रथ से उत्पन्न परिश्रम एवं थकान को आतिथ्य-सत्कार से दूर किया और राज्य रूपी आश्रम के मुनि राजा दिलीप से राज्य-सम्बन्धी कुशल-समाचार पूछा।

**व्याख्या** –

**( क ) पर्यायपदानि** – मुनिः = महर्षिः वशिष्ठः, आतिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् = अतिथिसत्कारेण शान्तमार्गक्लमं, राज्याश्रममुनिं = राज्याश्रमे ऋषिकल्पं, तं = राजानं दिलीपं, राज्ये = राष्ट्रमण्डले, कुशलं = क्षेमं, पप्रच्छ = पृष्टवान् ।

**( ख ) भावार्थः** – महर्षिः वशिष्ठः आतिथ्य-सत्कारविधिना राज्ञः दिलीपस्य मार्गपरिश्रमजनितां क्लान्तिमपनीय तं राजर्षिं राज्यविषयिणीं कुशलवार्तां पृष्टवान्।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य छन्दसः लक्षणं पूर्वश्लोके द्रष्टव्यम् ।

## श्लोकः ५९

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन कविकुलगुरुः महाकविः कालिदासः महर्षिणा वशिष्ठेन पृष्टस्य राज्यसमाचारस्य राज्ञा दिलीपेन प्रदत्तस्य उत्तरस्य वर्णनं करोति –

**अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः ।**
**अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः ।।५९।।**

**अन्वयः** – अथ विजितारिपुरः वदतां वरः अर्थपतिः अथर्वनिधेः तस्य पुरः अर्थ्यां वाचम् आददे ।

**पदार्थः** – अथ = महर्षि वशिष्ठ के द्वारा कुशल प्रश्न पूछने के बाद । विजितारिपुरः = शत्रुओं के नगरों को जीतने वाले । वदतां =वक्ताओं में। वरः =श्रेष्ठ। अर्थपतिः = राजादिलीप। अथर्वनिधेः = अथर्ववेद के विद्वान् । तस्य = महर्षि वशिष्ठ के । पुरः = आगे । अर्थ्यां = अर्थपूर्ण । वाचं = वचन। आददे = बोले।

**हिन्दी-अर्थः** – कुशल समाचार पूछने के पश्चात् शत्रुओं के नगर को जीतने वाले, वक्ताओं में सर्वश्रेष्ठ अर्थपति राजा दिलीप ने अथर्ववेद के ज्ञाता मुनि वशिष्ठ के सामने साभिप्राय वचनों को बोला।

**व्याख्या** –

**( क ) पर्यायपदानि** – अथ = गुरोः कुशलसमाचारप्रश्नानन्तरं, विजितारिपुरः = विजितशत्रुनगरः, वदतां =वक्तृणां, वरः =श्रेष्ठः, अर्थपतिः = राजादिलीपः, अथर्वनिधेः = अथर्ववेदाकारः, तस्य = वशिष्ठस्य, पुरः = समक्षं, अर्थ्यां = साभिप्रायं, वाचं = वाणीम्, आददे = उक्तवान्।

**( ख ) भावार्थः** – गुरोः वशिष्ठस्य कुशलसमाचारप्रश्नान्तरं विजितशत्रुनगरः, वक्तृणां श्रेष्ठः राजा दिलीपः अथर्ववेदनिपुणस्य तस्य वशिष्ठस्य समक्षम् अर्थयुक्तं वचनम् उक्तवान्।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** – वदताम् = वद् + शतृ (ष.वि., बहुवचनम्)

आददे = आ +दा (आत्मने) लिट् लकारः, प्र.पु., एकवचनम् ।

## श्लोकः ६०

**प्रसङ्गः** – अनेन श्लोक माध्यमेन महाकविः कालिदासः वर्णयति यत् राज्ञा दिलीपेन उक्तं – यस्य भवान् गुरुः अस्ति, तत् राज्यं कुशलयुक्तमस्ति इति –

**उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे ।**
**दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदाम् ।।६०।।**

**अन्वयः** – सप्तसु अङ्‌गेषु मे शिवम् उपपन्नम् । ननु यस्य मे दैवीनां मानुषीणाञ्च आपदां त्वं प्रतिहर्ता असि।

**पदार्थः** – सप्तसु अङ्गेषु = राज्य के सातों अंगों में (स्वामी, मन्त्री, सुहृत, कोष, राष्ट्र, दुर्ग और सेना) । शिवं = कुशल । उपपन्नं = ठीक ही है। ननु = निश्चित रूप से । यस्य मे दैवीनाम् = क्योंकि मेरी दैवी। मानुषीणाञ्च = तथा मनुष्यों से प्राप्त होने वाली। आपदाम् = आपदाओं को । त्वं = आप। प्रतिहर्ता असि = दूर करने वाले हो।

**हिन्दी-अर्थः** – राजा दिलीप ने गुरु वशिष्ठ से कहा कि मेरे राज्य के सातों अङ्गों में कुशलता है । क्योंकि मेरी दैवी तथा मानुषी सभी प्रकार की आपत्तियों को दूर करने वाले आप स्वयं विद्यमान हैं।

**व्याख्या** –

**( क ) पर्यायपदानि** – सप्तसु अङ्गेषु = स्वाम्यमात्यादिषु सप्तसु राज्याङ्गेषु, मे = मम, शिवं = कल्याणं, उपपन्नं =

युक्तमस्ति, ननु = निश्चितरूपेण, यस्य मे दैवीनाम् = मम दिलीपस्य समीपे आगतानां दैवीयानां, मानुषीणां = मानवप्रदत्तानां, आपदां = विपत्तीनां, त्वं = भवान् एव, प्रतिहर्ता असि = दूरी करोति।

**( ख ) भावार्थः** – मम राज्यस्य सप्ताङ्गानि (स्वाम्यमात्यादीनि) सम्यक् सन्ति। यतोहि भवान् एव मम दैवीनां मानवीयानाञ्च विपत्तीनां दूरीकरणं करोति।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य लक्षणं पूर्वश्लोकस्य व्याख्यानक्रमे वर्णितम् ।

**विशेषांशः** –

उपपन्नम् = उप + पद् + क्त।

प्रतिहर्ता = प्रति + हृ + तृच् ।

## श्लोकः ६१

**प्रसङ्गः** – अनेन श्लोक माध्यमेन महाकविः कालिदासः महर्षेः वशिष्ठस्य मन्त्राणां वर्णनं करोति –

**तव मन्त्रकृतो मन्त्रैर्दूरात्प्रशमितारिभिः ।**

**प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ।।६१।।**

**अन्वयः** – दूरात् प्रशमितारिभिः मन्त्रकृतः तव मन्त्रैः दृष्टलक्ष्यभिदः मे शराः प्रत्यादिश्यन्त इव।

**पदार्थः** – दूरात् = दूर से ही । प्रशमितारिभिः = शत्रुओं का विनाश करने वाले। मन्त्रकृतः = मन्त्र का प्रयोग करने वाले। तव = आपके। मन्त्रैः = वेद-मन्त्रों द्वारा। दृष्टलक्ष्यभिदः = प्रत्यक्ष लक्ष्य का भेदन करने वाले। मे = मेरे। शराः = बाण। प्रत्यादिश्यन्त इव = व्यर्थ हो रहे हैं।

**हिन्दी-अर्थः** – राजा दिलीप ने गुरु वशिष्ठ से कहा कि आप अपने मन्त्रों के सामर्थ्य से दूर से ही मेरे शत्रुओं का विनाश कर देते हैं । अतः प्रत्यक्ष लक्ष्य का भेदन करने वाले मेरे बाण तो व्यर्थ से प्रतीत होते हैं।

**व्याख्या** –

**( क ) पर्यायपदानि** – दूरात् = दूरस्थानात्, प्रशमितारिभिः = शान्तारिभिः, मन्त्रकृतः = मन्त्रप्रयोगकर्तुः, तव = भवतः, मन्त्रैः = वेदमन्त्रैः, दृष्टलक्ष्यभिदः = प्रत्यक्षलक्ष्यभेदनसमर्थः, मे = मम, शराः = बाणाः, प्रत्यादिश्यन्त इव = निराक्रियन्ते इव।

**( ख ) भावार्थः** – दिलीपेन गुरुं प्रत्युक्तं – भवतः मन्त्राः दूरादेव मम शत्रून् विनाशयन्ति। अतः प्रत्यक्षलक्ष्यभेदकाः मम बाणास्तु व्यर्थाः इव प्रतीयन्ते।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**( घ ) अलङ्कारः** – अस्मिन् श्लोके उत्प्रेक्षा अलङ्कारः अस्ति।

**विशेषांशः** –

प्रत्यादिश्यन्ते = प्रति + आ + दिश् (कर्मणि) लट् ल. प्रथमपुरुषः, बहुवचनम्।

## श्लोकः ६२

**प्रसङ्गः** – अनेन श्लोक माध्यमेन महाकविः कालिदासः महर्षिणा वशिष्ठेन क्रियमाणस्य होमस्य वर्णनं करोति –

**हविरावर्जितं होतस्त्वया विधिवदग्निषु।**

**वृष्टिर्भवति शस्यानामवग्रहविशोषिणाम्।।६२।।**

**अन्वयः** – हे होतः ! त्वया विधिवद् अग्निषु आवर्जितं हविः, अवग्रहविशोषिणां शस्यानां वृष्टिः भवति।

**पदार्थः** – हे होतः = हे यज्ञ करने वाले। त्वया = आपके द्वारा। विधिवद् = शास्त्रानुसार। अग्निषु = अग्नि में । आवर्जितं = देते हैं। हविः = आहुति। अवग्रहविशोषिणां = वर्षा के अभाव में सूखते हुए। शस्यानां = पेड-पौधों के लिए। वृष्टिः = वर्षा। भवति = हो जाती है।

**हिन्दी-अर्थः** – हे यज्ञ करने वाले ! आप शास्त्रानुसार अग्नि में आहुति देते हैं । वह ही वर्षा के अभाव में सूखने वाले अन्नों के लिए वर्षा हो जाती है।

**व्याख्या** –

**( क ) पर्यायपदानि** – हे होतः = हे याज्ञिक, त्वया = भवता, विधिवद् = विधिपूर्वकम्, अग्निषु = वह्निषु, आवर्जितं = दत्तं, हविः = आहुतिः, अवग्रहविशोषिणां = अनावृष्टिकारणात् शुष्काणां, शस्यानां = वृक्षपादपानां वा, वृष्टिः = वर्षा, भवति = जायते।

**( ख ) भावार्थः** – हे याज्ञिक! भवता होमस्य अग्नौ विधिपूर्वकं या आहुतयः प्रदीयन्ते, ता एव वृष्टिरूपेण परिणताः भूत्वा अनावृष्टिकारणात् शुष्कान् अन्नपादपान् कृते उज्जीवयन्ति।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** –

आवर्ति = आ + वृज + णिच् + क्त।

होतः = 'हु' + तृच् = होतृ = होता – सम्बोधनम् एकवचनम् ।

## श्लोकः ६३

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः प्रजानां सर्वविधसुखाय महर्षिवशिष्ठस्य ब्रह्मतेजसः वर्णयति –

**पुरुषायुषजीविन्यो निरातङ्का निरीतयः।**
**यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसम्।।६३।।**

**अन्वयः** – मदीयाः प्रजाः पुरुषायुषजीविन्यः निरातङ्काः निरीतयः (सन्ति), यत् तस्य त्वद्ब्रह्मवर्चसं हेतुः।

**पदार्थः** – मदीयाः = मेरी। प्रजाः = प्रजा। पुरुषायुषजीविन्यः = पुरुष की आयु अर्थात् सौ वर्ष तक जीने वाली । निरातङ्काः = भयरहित। निरीतयः = अतिवृष्टि आदि बाधाओं से रहित। सन्ति = हैं। तस्य = उसका। त्वद् = आपका। ब्रह्मवर्चसं = ब्रह्म तेज ही। हेतुः = कारण। अस्ति = है।

**हिन्दी-अर्थः** – मेरी प्रजा सौ वर्ष तक जीने वाली, भयरहित तथा अतिवृष्टि आदि बाधाओं से रहित है। उसका कारण आपका ब्रह्म तेज है।

**व्याख्या** –

**( क ) पर्यायपदानि** – मदीयाः = मम सम्बन्धिन्यः, प्रजाः = जनाः, पुरुषायुषजीविन्यः = वर्षशतजीविन्यः, निरातङ्काः = भयरहिताः, निरीतयः = अतिवृष्ट्यादिबाधारहिताः, यत् सन्ति, तस्य = सर्वस्य, त्वद् = भवतः, ब्रह्मवर्चसं = ब्रह्मतेजः, हेतुः = कारणम्, अस्ति = भवति।

**( ख ) भावार्थः** – मम प्रजाः वर्षशतजीविन्यः भवन्तु। सर्वाः भयरहिताः भवन्तु। अतिवृष्ट्यादिबाधारहितं यत्किमपि अस्ति, तत्सर्वं भवतः ब्रह्मतेजसः कारणादेव अस्ति।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य छन्दसः लक्षणं पूर्वश्लोके वर्णितम् ।

## श्लोकः ६४

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः राज्ञः दिलीपस्य कथनमेतत् वर्णयति यत् गुरोः वशिष्ठस्य कारणादेव राज्यकल्याणमस्ति –

**त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना।**
**सानुबन्धाः कथं न स्युः संपदो मे निरापदः।।६४।।**

**अन्वयः** – ब्रह्मयोनिना गुरुणा त्वया एवं चिन्त्यमानस्य निरापदः मे सम्पदः सानुबन्धाः कथं न स्युः?

**पदार्थः** – ब्रह्मयोनिना = ब्रह्मा के पुत्र। गुरुणा = हमारे कुलगुरु। त्वया = आपके द्वारा। एवं = उक्त रीति से। चिन्त्यमानस्य = कल्याण की चिन्ता करने वाले। निरापदः = आपत्ति से रहित। मे = मेरी। सम्पदः = सम्पत्तियाँ। सानुबन्धाः = बाधाओं से रहित। कथं न स्युः = क्यों न होंवे?

**हिन्दी-अर्थः** – ब्रह्मा के पुत्र तथा हमारे कुलगुरु आप इस प्रकार से कल्याण की चिन्ता करने वाले हैं तो मेरी सम्पत्तियाँ हमेशा आपत्ति से रहित अविच्छिन्न क्यों नहीं रहेगी?

**व्याख्या** –

**( क ) पर्यायपदानि** – ब्रह्मयोनिना = ब्रह्मपुत्रेण, गुरुणा = आचार्येण, त्वया = भवता, एवम् = उक्तप्रकारेण, चिन्त्यमानस्य = अनुध्यायमानस्य, निरापदः = आपत्तिरहितस्य, मे = मम, सम्पदः = सम्पत्तयः, सानुबन्धाः = अविच्छिन्नाः, कथं न स्युः = केन प्रकारेण न भवेयुः?

**( ख ) भावार्थः** – हे गुरो ब्रह्मपुत्र! यदा भवान् मामेवं स्मरति तदा मम सम्पत्तयः अविच्छिन्नाः कथं न स्युः?

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** – चिन्त्यमानः = चिन्त् + णिच् + कर्मणि यक् + शानच।

स्युः – अस् (विधिलिङ् प्र.पु. बहुवचनम्)।

## श्लोकः ६५

**प्रसङ्गः** – अनेन श्लोक माध्यमेन महाकविः कालिदासः राज्ञः दिलीपस्य गुरोः वशिष्ठस्य आश्रममागमनस्य प्रयोजनं वर्णयति –

**किन्तु वध्वां तवैतस्यामदृष्टसदृशप्रजम्।**
**न मामवति सद्वीपा रत्नसूरपि मेदिनी।।६५।।**

**अन्वयः** – किन्तु तव एतस्यां वध्वाम् अदृष्ट सदृशप्रजं मां सद्वीपां रत्नसूः अपि मेदिनी न अवति।

**पदार्थः** – किन्तु =यद्यपि। तव = आपकी ।एतस्यां = सामने उपस्थित ।वध्वां = वधू-सुदक्षिणा में ।अदृष्टसदृशप्रजं = अपने सदृश पुत्र न पाकर ।मां = मुझे ।सद्वीपां = सातों द्वीपों से परिपूर्ण ।रत्नसूः = रत्नों को उत्पन्न करने वाली ।अपि = भी ।मेदिनी = पृथिवी ।न अवति = अच्छी नहीं लगती है।

**हिन्दी-अर्थः** – राजा दिलीप गुरु वशिष्ठ से कहते हैं कि यद्यपि आपकी कृपा से मेरी समस्त सम्पत्तियाँ अविच्छिन्न हैं किन्तु आपके सामने उपस्थित वधू सुदक्षिणा से स्वसदृश पुत्र न पाकर मुझे सातों द्वीपों के साथ समस्त रत्नों को उत्पन्न करने वाली पृथ्वी भी प्रिय नहीं लगती है।

**व्याख्या** –

**( क ) पर्यायपदानि** – किन्तु = परन्तु, तव = भवतः, एतस्यां = सुदक्षिणा इत्यस्यां, वध्वां = स्नुषायाम्, अदृष्टसदृशप्रजं = अदृष्टानुरूपसन्ततिः, मां = दिलीपं, सद्वीपां = सप्तद्वीपसहितां, रत्नसूः = रत्नप्रसूः, अपि, मेदिनी = पृथिवी, न अवति = न प्रीणाति।

**( ख ) भावार्थः** – भवतः कृपया अविच्छिन्नसम्पत्तियुक्तः भूत्वा अपि मम सुदक्षिणायां पुत्रस्य अभावकारणात् अखण्डमपि साम्राज्यं सन्तोषप्रदं प्रतीयते।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** –

तव – युष्मद् षष्ठीविभक्तिः, एकवचनम्।

सद्वीपा = द्वीपैः सह वर्तमाना (ब.व्री.)।

## श्लोकः ६६

**प्रसङ्गः** – अनेन श्लोक माध्यमेन महाकविः कालिदासः राज्ञः दिलीपस्य सन्तानविहीनतायाः पीडां वर्णयति –

**नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः ।**
**न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ।।६६।।**

**अन्वयः** – नूनं मत्तः परं पिण्डविच्छेददर्शिनः वंश्याः स्वधासंग्रहतत्पराः (सन्तः) श्राद्धे प्रकामभुजः न (कुर्वन्ति)।

**पदार्थः** – नूनं = निश्चित रूप से। मत्तः परं = मेरे मृत्यु के बाद । पिण्डविच्छेददर्शिनः = पिण्ड के लोप को देखते हुए । वंश्याः = हमारे वंश में उत्पन्न पूर्वज लोग । स्वधासंग्रहतत्पराः = स्वधा एकत्र करने में लगे हुए । श्राद्धे = श्राद्ध कर्म में । प्रकामभुजः = तृप्त होकर भोजन । न (कुर्वन्ति) = नहीं (करते हैं)।

**हिन्दी-अर्थः** – निश्चित रूप से मेरे मृत्यु के बाद पिण्ड के लोप को देखकर हमारे वंश में उत्पन्न पूर्वज स्वधा संग्रह में लगे हुए श्राद्ध में इस समय तृप्त होकर भोजन ग्रहण नहीं करते हैं।

**व्याख्या** –

**(क) पर्यायपदानि** – नूनं = निश्चयेन, मत्तः परं = मम मृत्योः अनन्तरं, पिण्डविच्छेददर्शिनः = पिण्डदानविच्छेदम् उत्प्रेक्षमाणाः, वंश्याः = वंशोद्भवाः पितरः, स्वधासंग्रहतत्पराः = स्वधाग्रहणासक्ताः, सन्तः, श्राद्धे = श्राद्धकर्मणि, प्रकामभुजः = प्रकामभोजिनः, न = न भवन्ति।

**(ख) भावार्थः** – मम मृत्योरनन्तरं निश्चयेन पिण्डदानम् उत्प्रेक्षमाणाः वंशोद्भवाः पितरः स्वधाग्रहणासक्ताः सन्तः श्राद्धकर्मणि प्रकामभोजिनः न भवन्ति।

**(ग) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य लक्षणं पूर्वश्लोके वर्णितम् ।

**विशेषांशः** –

मत्तः = अस्मद् शब्दः + तसिल् प्रत्ययः।

प्रकामभुजः = प्रकामं भुञ्जन्तीति प्रकामभुजः ।

## श्लोकः ६७

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन कविकुलगुरुः महाकविः कालिदासः राज्ञा दिलीपेन पितृभ्यः कृतजलतर्पणस्य वर्णनं करोति –

**मत्परं दुर्लभः मत्वा नूनमावर्जितं मया ।**
**पयः पूर्वैः स्वनिश्वासैः कवोष्णमुपभुज्यते ।।६७।।**

**अन्वयः** – मत्परं दुर्लभं मत्वा मया आवर्जितं पयः पूर्वैः स्वनिश्वासैः कवोष्णम् उपभुज्यते नूनम् ।

**पदार्थः** – मत्परं = मेरे मृत्यु के पश्चात्। दुर्लभं = कठिनाई से प्राप्त होने योग्य । मत्वा = जानकर । मया = मुझ दिलीप के द्वारा । आवर्जितं = दिये गए । पयः = जल को । पूर्वैः = पूर्वज पितरों के द्वारा । स्वनिश्वासैः = अपने दुःखद श्वासों से । कवोष्णं = कुछ-कुछ गरम। उपभुज्यते = पी रहे होंगे । नूनं = निश्चय ही।

**हिन्दी-अर्थः** – मेरे मृत्यु के पश्चात् दुर्लभ समझकर मेरे द्वारा दिए गए जल को हमारे पूर्वज अपने दुःखद श्वासों से कुछ गरम कर निश्चय ही पीते होंगे।

**व्याख्या** –

**(क) पर्यायपदानि** – मत्परं = मम मृत्योरनन्तरं, दुर्लभं = दुष्प्रापं, मत्वा = ज्ञात्वा, मया = राज्ञा दिलीपेन, आवर्जितं = दत्तं, पयः = जलं, पूर्वैः = पूर्वजैः, स्वनिश्वासैः = दुःखदश्वासैः, कवोष्णं = ईषदुष्णम्, उपभुज्यते = पीयते, नूनं = निश्चयेन।

**(ख) भावार्थः** – राजा दिलीपः चिन्तयति यत् यदा अहं पितृभ्यः तर्पणं करोमि तदा मत्पितराः चिन्तयन्ति – " दिलीपे मृते जलमिदं दुर्लभं भविष्यति । " अनेन दुःखीभूय ते दीर्घमुष्णं च निःश्वसन्ति । अतः किञ्चिदुष्णं जातं जलं ते पिबन्ति।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** – मत्वा = मन् + क्त्वा ।

उपभुज्यते = उप + भुज् (कर्मणि) यक्, लट् ल., प्र.पु., एकवचनम्।

## श्लोकः ६८

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन कविकुलगुरुः महाकविः कालिदासः राज्ञ दिलीस्य सन्तानाभावजशोकं वर्णयति–

**सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः ।**
**प्रकाशाप्रकाशश्च लोकालोक इवाचलः ।।६८।।**

**अन्वयः** – इज्याविशुद्धात्मा प्रजालोपनिमीलितः सः अहं लोकालोकः अचलः इव प्रकाशः च अप्रकाशः च।

**पदार्थः** – इज्याविशुद्धात्मा = यज्ञादि द्वारा देव ऋण से मुक्त होने के कारण प्रसन्नचित्त ।प्रजालोपनिमीलितः = पुत्र के अभाव में शोकमग्न ।सः अहं = मैं राजा दिलीप।लोकालोकः = चक्रवालनामक ।अचलः = पर्वत ।इव = समान ।प्रकाशः = देव–ऋण से मुक्त होने के कारण प्रकाशशील ।अप्रकाशः = पितृ–ऋण से मुक्त न होने के कारण तेज रहित ।

**हिन्दी–अर्थः** – यज्ञ आदि द्वारा देव–ऋण से मुक्त होने के कारण प्रसन्नचित्त तथा पुत्र के अभाव से पितृ–ऋण से मुक्त न होने के कारण मलिन–चित्त में राजा दिलीप चक्रवाल नामक पर्वत के समान प्रकाशमान् तथा अप्रकाशमान् हो रहा हूँ ।

**व्याख्या** –

**( क ) पर्यायपदानि** – इज्याविशुद्धात्मा = यागशुद्धचेतनः, प्रजालोपनिमीलितः = संतत्यभावेन कृतनिमीलनः, सः अहं = अहं राजा दिलीपः, लोकालोकः = चक्रवालः, अचलः = पर्वतः, इव = समानः, प्रकाशः = देव–ऋणविमोचनात् दीप्तः, अप्रकाशः = पितृ–ऋणाविमोचनात् तेजविहीनः।

**( ख ) भावार्थः** – यथा चक्रवालनामकः पर्वतः एकतः सूर्यसम्पर्कात् प्रकाशितः अपरतश्च सूर्यसम्पर्काभावात् तमसाच्छन्नः तिष्ठति तथैव राजा दिलीपः यज्ञादिजनितधर्मेण दीप्तः पुत्राभावजनितशोकेन निस्तेजः च जातः ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**( घ ) अलङ्कारः** – श्लोकेऽस्मिन् उपमा अलङ्कारः अस्ति।

**विशेषांशः** –

लोकालोकः – 'चक्रवाल' इति पर्वतस्य वर्णनं पद्मपुराणे दत्तमस्ति।

## श्लोकः ६९

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन कविकुलगुरुः महाकविः कालिदासः राज्ञ दिलीपस्य सन्तानपीडां वर्णयति–

**लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम् ।**
**संततिः शुद्धवंश्या हि परत्रेह च शर्मणे ।।६९।।**

**अन्वयः** – तपोदानसमुद्भवं पुण्यं लोकान्तरसुखं (भवति) हि शुद्धवंश्या सन्ततिः इह परत्र च शर्मणे (भवति)।

**पदार्थः** – तपोदानसमुद्भवं = तप और दान आदि से उत्पन्न होने वाला ।पुण्यं = पुण्य ।लोकान्तरसुखं = परलोक में सुख देने वाला होता है।हि = क्योंकि ।शुद्धवंश्या = शुद्ध वंश में उत्पन्न होने वाली ।सन्ततिः = प्रजा, सन्तान ।इह = इस लोक में ।परत्र च = और परलोक में भी ।शर्मणे = सुख के लिए ।

**हिन्दी–अर्थः** – तप और दान आदि से उत्पन्न होने वाला पुण्य परलोक में सुख देने वाला होता है।परन्तु शुद्धवंश में उत्पन्न हुई सन्तति इस लोक में और परलोक दोनों में सुख देने वाली होती है।

**व्याख्या –**

**( क ) पर्यायपदानि** – तपोदानसमुद्भवं = तपोदानसमुत्पन्नं, पुण्यं = सुकृतं । लोकान्तरसुखं = पारलौकिकसुखं । हि = यतोहि, शुद्धवंश्या = शुद्धवंशे उत्पन्ना, सन्ततिः = प्रजा पुत्रो वा, इह = अस्मिन् लोके, परत्र च = परलोके च उभयत्रापि, शर्मणे = सुखदायिका भवति ।

**( ख ) भावार्थः** – तपोदानसमुत्पन्नं पुण्यं तु पारलौकिकसुखं ददाति । परन्तु शुद्धवंशे उत्पन्ना सन्ततिस्तु इहलोके परलोके चोभयत्रैव सुखं ददाति।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**( घ ) अलङ्कारः** – अत्र सामान्यविशेषपरस्परसमर्थनत्वात् अर्थान्तरन्यासः अलङ्कारः अस्ति।

## श्लोकः ७०

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः गुरुं वशिष्ठं प्रति राजा दिलीपः पुत्राभावस्य दुःखानुभूतिं कारयति इति वर्णयति –

**तया हीनं विधातर्मां कथं पश्यन्न दूयसे ।**
**सिक्तं स्वयमिव स्नेहाद्वन्ध्यमाश्रमवृक्षकम् ।।७० ।।**

**अन्वयः** – हे विधातः ! तथा हीनं मां स्नेहात् स्वयं सिक्तं बन्ध्यम् आश्रमवृक्षकम् इव पश्यन् कथं न दूयसे ?

**पदार्थः** – हे विधातः = हे सृष्टि करने वाले गुरु । तया = उस सन्तान से । हीनं = रहित । मां = मुझ दिलीप को । स्नेहात् = प्रेम से । स्वयं = अपने आप । सिक्तं = सींचकर बढाये हुए । बन्ध्यं = फलशून्य । आश्रमवृक्षकं = आश्रम के छोटे वृक्षों को । इव = जैसे । पश्यन् = देखते हुए । कथं = क्यों । न = नहीं । दयसे = दुःखी होते ।

**हिन्दी-अर्थः** – हे भगवन् ! उस सन्तति से रहित मुझको देखते हुए अपने स्नेह से स्वयं सींचे गए फलरहित आश्रमवृक्ष के समान क्या आपको व्यथा नहीं होती है?

**व्याख्या –**

**( क ) पर्यायपदानि** – हे विधातः = हे भगवन्, तया = सन्तत्या, हीनं = रहितं, मां = दिलीपं, स्नेहात् = प्रेम्णा, स्वयं = आत्मना, एव = निश्चयेन, सिक्तं = जलसेकेन वर्धितं, बन्ध्यं = निष्फलं / फलरहितम्, आश्रमवृक्षकं = आश्रमस्य लघुवृक्षम्, इव = यथा, पश्यन् = अवलोकयन्, कथं = केन प्रकारेण, न = नहि, दयसे = परितप्यसे ।

**( ख ) भावार्थः** – हे भगवन् ! किं मां सन्तानहीनं दृष्ट्वा दुःखी न भवसि ? सहस्तदत्तजलादिना संवर्धितमाश्रमतरुं फलहीनं दृष्ट्वा किं भवान् व्यथितो न भविष्यसि ?

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**( घ ) अलङ्कारः** – अत्र उपमा अलङ्कारः अस्ति।

**विशेषांशः** –

विधातः = वि + धा + तृच् = सम्बोधने एकवचनम् ।
दूयसे = दूङ् लट् लकारः, मध्यमपुरुषः, एकवचनम् ।

## श्लोकः ७१

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः राज्ञः दिलीपस्य पुत्राभावस्य असह्यपीडां वर्णयति –

**असह्यपीडं भगवन्नृणमन्त्यमवेहि मे ।**
**अरुन्तुदमिवालानमनिर्वाणस्य दन्तिनः ।।७१ ।।**

**अन्वयः** – हे भगवन् ! मे अन्त्यम् ऋणम् अनिर्वाणस्य दन्तिनः अरुन्तुदम् आलानम् इव असह्यपीडम् अवेहि ।

**पदार्थः** – हे भगवन् = हे परमेश्वर ! मे = मुझे । अन्त्यमृणम् = पितृ-ऋण । अनिर्वाणस्य = स्नान क्रिया न होने से । दन्तिनः = हाथी के । अरुन्तुदं = मर्म को विदीर्ण करने वाले । आलानम् इव = हाथी को बाँधने वाले खम्भे के समान । असह्यपीडं = असह्य दुःख देने वाला । अवेहि = समझिए ।

**हिन्दी-अर्थः** – हे परमेश्वर ! इस समय मुझे पितृ-ऋण इस प्रकार कष्ट पहुँचा रहा है, जिस प्रकार स्नान क्रिया न होने से हाथी व्याकुलतावश अपने बन्धन स्तम्भ को असह्य कष्टजनक मानता है ।

**व्याख्या** –

**( क ) पर्यायपदानि** – हे भगवन् = हे परमेश्वर ! मे = मम, अन्त्यमृणम् = पैतृकम् ऋणम्, अनिर्वाणस्य = स्नानरहितस्य, दन्तिनः = गजस्य, अरुन्तुदं = मर्मस्पृक्, आलानम् इव = बन्धनस्तम्भमिव, असह्यपीडं = दुःखसहदुःख जनकम्, अवेहि = जानीहि ।

**( ख ) भावार्थः** – यथा मदमत्तः गजः स्नानं विना स्तम्भे श्रृंखलायाञ्च निबद्धः भवति चेत् तस्य महती पीडा जायते तथैव अपुत्रता मे हृदये महद् दुःखं जनयति । यतः अपुत्रोऽहं पितृणात् कथं मुक्तो भविष्यामि ?

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**( घ ) अलङ्कारः** – अत्र उपमा अलङ्कारोऽपि विद्यते।

**विशेषांशः** –

निर्वाणः = निर् + वा + क्त ।

अवेहि = अव + इ लोट्लकारः, म.पु., एकवचनम् ।

## श्लोकः ७२

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन कविकुलगुरुः महाकविः कालिदासः राज्ञा दिलीपेन पृष्टस्य पितृणात् मुक्तेरुपायं वर्णयति –

**तस्मान्मुच्ये यथा तात संविधातुं तथार्हसि ।**
**इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः ।।७२।।**

**अन्वयः** – हे तात् ! तस्मात् यथा मुच्ये तथा संविधातुम् (त्वम्) अर्हसि । हि इक्ष्वाकूणां दुरापे अर्थे सिद्धयः त्वदधीनाः ।

**पदार्थः** – हे तात् = हे पितृतुल्य महर्षि वशिष्ठ ! तस्मात् = उस पैतृक ऋण से । यथा = जिस प्रकार से । मुच्ये = मुक्त हो जाऊँ । तथा = उसी प्रकार से । संविधातुं = करने के लिए । (त्वं = आप) । अर्हसि = समर्थ हैं । हि = क्योंकि । इक्ष्वाकूणाम् = इक्ष्वाकुवंशियों की । दुरापे = कठिनता से सिद्ध होने वाले । अर्थे = प्रयोजन में । सिद्धयः = सफलतायें । त्वदधीनाः = आपके अधीन रहा करती हैं ।

**हिन्दी-अर्थः** – हे पितृतुल्य महर्षि ! उस पैतृक-ऋण से जिस प्रकार मुक्त हो सकूँ, उसी प्रकार से उपाय कीजिए, सिद्धि आपके अधीन रहती है । क्योंकि इक्ष्वाकुवंशी राजाओं के कठिन कार्यों की सिद्धि आपके अधीन है।

**व्याख्या** –

**( क ) पर्यायपदानि** – हे तात् = हे पितः! तस्मात् = पैतृक-ऋणात्, यथा = येन प्रकारेण, मुच्ये = मुक्तो भवामि, तथा = तेनप्रकारेण, संविधातुं = कर्तुं, (त्वं = भवान्) , अर्हसि = शक्नोसि, हि = यतः, इक्ष्वाकूणाम् = इक्ष्वाकुवंशियां, दुरापे = दुष्प्राये, अर्थे = प्रयोजने, सिद्धय = कार्यसिद्धयः, त्वदधीनाः = तव अधिकारक्षेत्रीयाः ।

**( ख ) भावार्थः** – हे गुरो ! तस्मात् यथा अहं पैतृकात् ऋणात् मुक्त भवामि तथा उपायं कुरु । यतोहि इक्ष्वाकुवंशीयानां राज्ञां दुष्करकार्याणां सिद्धयः त्वदायत्ताः सन्ति ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य लक्षणं पूर्वश्लोके लिखितम् ।

**विशेषांशः** –

संविधातुम् = सम् + वि + धा + तुमुन् ।

दुरापे = दुर् + अप् + खल् ।

## श्लोकः ७३

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः राज्ञः दिलीपस्य निवेदनं श्रुत्वा कथं विचारमग्नः सञ्जातः महर्षिः वशिष्ठ इति वर्णयति –

**इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः ।**
**क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः ।।७३।।**

**अन्वयः** – इति राज्ञा विज्ञापितः ऋषिः ध्यानस्तिमितलोचनः क्षणमात्रं सुप्तमीनः ह्रदः इव तस्थौ ।

**पदार्थः** – इति = इसके बाद । राज्ञा = राजा दिलीप के द्वारा । विज्ञापितः = प्रार्थना किये जाने पर । ऋषिः = महर्षि वशिष्ठ ने । ध्यानस्तिमितलोचनः = ध्यान मग्न होने के कारण आँखे बन्द कर । क्षणमात्रं = क्षणमात्र के लिए । सुप्तमीनः = सुप्त मछलियों वाले । ह्रदः इव = सरोवर के समान । तस्थौ = समाधिस्थ हो गए ।

**हिन्दी-अर्थः** – तत्पश्चात् राजा दिलीप के द्वारा प्रार्थना किए जाने पर महर्षि वशिष्ठ ध्यान में आँखे बन्द कर सुप्त मछलियों वाले सरोवर के समान समाधिस्थ हो गए ।

**व्याख्या** –

**( क ) पर्यायपदानि** – इति = तत्पश्चात्, राज्ञा = महाराजेन दिलीपेन, विज्ञापितः = प्रार्थितः, ऋषिः = महर्षिः वशिष्ठः, ध्यानस्तिमितलोचनः = ध्याननिश्चलाक्षः, क्षणमात्रं = मूहूर्तमात्रं, सुप्तमीनः = निद्रितमत्स्यः, ह्रदः इव = सरोवर इव, तस्थौ = स्थितवान् ।

**( ख ) भावार्थः** – तत्पश्चात् महाराजेन दिलीपेन प्रार्थितः महर्षिः वशिष्ठः तत्कारणं ज्ञातुं नेत्रे निमील्य समाधौ क्षणमात्रं सुप्तमीनसरोवरः इव निश्चलः सञ्जातः।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**( घ ) अलङ्कारः** – अत्र उपमा अलङ्कारः अस्ति ।

**विशेषांशः** – विज्ञापितः = वि + ज्ञा + णिच् + क्त ।

स्तिमित = स्मित् + क्त ।

तस्थौ = स्था लिट् ल., प्रथमपुरुषः, एकवचनम् ।

## श्लोकः ७४

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः महर्षिणा वशिष्ठेन राज्ञः दिलीपस्य सन्तानाभावकारणं ज्ञातुं ध्यानं क्रियते इति वर्णयति –

**सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकारणात् ।**
**भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् ।।७४।।**

**अन्वयः** – भावितात्मा सः प्रणिधानेन भुवः भर्तुः सन्ततेः स्तम्भकारणम् अपश्यत् अथ एनं प्रत्यबोधयत् ।

**पदार्थः** – भावितात्मा = शुद्ध अन्तःकरण वाले । सः = महर्षि वशिष्ठ ने । प्रणिधानेन = समाधि के द्वारा । भुवः = पृथ्वी के । भर्तुः = स्वामी के । सन्ततेः = पुत्र के । स्तम्भकारणं = सन्तान न होने का कारण । अपश्यत् = देखा ( समझा)। अथ = उसके बाद । एनं = इस राजा दिलीप को । प्रत्यबोधयत् = बतलाया ।

**हिन्दी-अर्थः** – शुद्ध अन्तःकरण वाले महर्षि वशिष्ठ ने समाधि के द्वारा पृथ्वी के स्वामी राजा दिलीप के पुत्र न होने के कारण को जानकर राजा को बतलाया ।

**व्याख्या** –

**( क ) पर्यायपदानि** – भावितात्मा = शुद्धान्तःकरणः, सः = महर्षिः वशिष्ठः, प्रणिधानेन = समाधिना, भुवः = भूमेः, भर्तुः = स्वामिनः, सन्ततेः = सन्तानस्य, स्तम्भकारणं = प्रतिबन्धकारणम्, अपश्यत् = अवलोकयत्, अथ = अनन्तरम्, एनम् = अमुं दिलीपं, प्रत्यबोधयत् = ज्ञापितवान् ।

**( ख ) भावार्थः** – शुद्धान्तःकरणः सः महर्षिः वशिष्ठः योगबलेन राज्ञः सन्ततेः अभावकारणं ज्ञात्वा राजानं ज्ञापितवान् ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** –

प्रणिधानेन = प्र + धा + ल्युट् – तृ.वि., एकवचनम् ।

अपश्यत् = दृश् लङ्लकारः, प्र.पु., एकवचनम् ।

## श्लोकः ७५

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः राज्ञः दिलीपस्य सन्ततिरभावकारणं वर्णयति –

**पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः।**
**आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि ।।७५।।**

**अन्वयः** – पुरा शक्रम् उपस्थाय उर्वीं प्रति यास्यतः तव पथि कल्पतरुच्छायाम् आश्रिता सुरभिः आसीत् ।

**पदार्थः** – पुरा = प्राचीन काल में । शक्रं = इन्द्र को । उपस्थाय = सेवा कर । उर्वीं प्रति = पृथ्वी की ओर । यास्यतः = आते समय । तव = आपके । पथि = मार्ग में । कल्पतरुच्छायां = कल्पतरु की छाया में। आश्रिता = बैठी हुई । सुरभिः = कामधेनु नाम वाली गाय । आसीत् = थी ।

**हिन्दी-अर्थः** – गुरु वशिष्ठ ने राजा दिलीप से कहा – हे राजन् ! प्रचीन काल में एक बार इन्द्र की सेवा करके पृथ्वी की ओर आते समय मार्ग में कल्पवृक्ष की छाया में कामधेनु बैठी हुई थी।

**व्याख्या** –

**( क ) पर्यायपदानि** – पुरा = प्राचीनकाले, शक्रम् = इन्द्रम्, उपस्थाय = संसेव्य, उर्वीं प्रति = पृथ्वीं प्रति, यास्यतः = आगमनकाले, तव = भवतः, पथि = मार्गे, कल्पतरुच्छायां = कल्पवृक्षस्य अधः, आश्रिता = उपविष्टा, सुरभिः = कामधेनुः, आसीत् = अभूत्।

**( ख ) भावार्थः** – प्राचीनकाले इन्द्रं संसेव्य पृथ्वीं प्रति आगमनकाले भवतः (दिलीपस्य) मार्गे कल्पवृक्षस्य छायायां कामधेनुः उपविष्टा आसीत्।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** – उप + स्था + ल्यप् ।

आश्रिता = आ + श्रि + क्त (स्त्री.)।

## श्लोकः ७६

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः राज्ञः दिलीपस्य सन्तानविहीनतायाः कारणं वर्णयति –

**धर्मलोपभयाद्राज्ञीमृतुस्नातामिमां स्मरन्।**
**प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु नाचरः।।७६।।**

**अन्वयः** – ऋतुस्नाताम् इमां राज्ञीं धर्मलोपभयात् स्मरन् प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु न आचरः ।

**पदार्थः** – ऋतुस्नातां = रजोदर्शन होने के पश्चात् स्नान से निवृत्त । इमां = इस। राज्ञीं = रानी सुदक्षिणा को । धर्मलोपभयात् = धर्मलोप हो जाने के डर से । स्मरन् = चिन्तन करते हुए । प्रदक्षिणाक्रियार्हायां = प्रदक्षिणा करने के योग्य । तस्यां = उस कामधेनु का । त्वं = आपने । साधु = उचित प्रकार से । नाचरः = सत्कार नहीं किया।

**हिन्दी-अर्थः** – रजोदर्शन के पश्चात् स्नान से निवृत्त इस रानी सुदक्षिणा का ही धर्म-लोप के भय से चिन्तन करते हुए आपने मार्ग में बैठी हुई कामधेनु का प्रदक्षिणादि से उचित-प्रकार से सत्कार नहीं किया।

**व्याख्या** –

**( क ) पर्यायपदानि** – ऋतुस्नातां = रजोदर्शन पश्चात् स्नाताम्, इमाम् = एतां, राज्ञीं = सुदक्षिणां, धर्मलोपभयात् = धर्मभ्रंशभयात्, स्मरन् = चिन्तयन्, प्रदक्षिणक्रियार्हायां = प्रदक्षिणकरणयोग्यां, तस्यां = कामधेन्वां, त्वं = दिलीपः, साधु = सम्यक् प्रकारेण, नाचरः = सत्कारं न कृतवान्।

**( ख ) भावार्थः** – ऋतुकाले गमनाभावात् धर्मनाशः मा अभूत् इति राज्ञीमेव चिन्तयन् पुरस्थितां कामधेनुं भवान् प्रदक्षिणादिकर्मणा सम्यक्प्रकारेण सत्कारं न कृतवान्।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** – स्मरन् = स्मृ + शतृ।

## श्लोकः ७७

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः राज्ञे दिलीपाय प्रदत्तकामधेनोः शापस्य वर्णनं करोति –

**अवजानासि मां यस्मादतस्ते न भविष्यति।**
**मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा।।७७।।**

**अन्वयः** – यस्मात् माम् अवजानासि, अतः मत्प्रसूतिमनाराध्य ते प्रजा न भविष्यति इति सा त्वां शशाप ।

**पदार्थः** – यस्मात् = जिस कारण से । माम् = मुझ कामधेनु को । अवजानासि = तिरस्कृत कर रहे हो । अतः = इस कारण से । मत्प्रसूतिं = मेरी सन्तान को । अनाराध्य = आराधना किये बिना । ते = तुम्हें । प्रजा = सन्तान । न भविष्यति = नहीं होगी । इति = इस प्रकार । सा = उस कामधेनु ने । त्वां = तुम्हें । शशाप = शाप दे दिया।

**हिन्दी-अर्थः** – जिस कारण से तुमने मेरा अनादर किया है, इसी प्रकार से मेरी सन्तान की अराधना किये बिना तुझे सन्तान की प्राप्ति नहीं होगी ऐसा शाप उस कामधेनु ने तुम्हें दे दिया।

**व्याख्या** –

**( क ) पर्यायपदानि** – यस्मात् = यतः, (त्वं) माम् = कामधेनुम्, अवजानासि = तिरस्करोषि, अतः = अस्मात्कारणात्, मत्प्रसूतिं = मम सन्ततिम्, अनाराध्य = आराधनां विना, ते = तव, प्रजा = सन्ततिः, न भविष्यति = न प्राप्स्यति, इति = इत्थं, सा = कामधेनुः, त्वां = दिलीपं, शशाप = अशपत्।

**( ख ) भावार्थः** – यतः त्वं मां तिरस्कृत्य गतः – अतः यावत् त्वं मम पुत्र्याः शुश्रूषाम् आराधनां वा न करिष्यसि, तावत् तव सन्तानप्राप्तिः न भविष्यति – इति सा कामधेनुः त्वाम् अशपत्।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** –

अवजानासि = अव + ज्ञा (लट्लकारः, म.पु., एकवचनम्)।

अनाराध्य = न आराध्य (आ + राध् + ल्यप् )।

शशाप = शप् धातोः लिट् लकारः, प्र.पु., एकवचनम् ।

## श्लोकः ७८

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन कविकुलगुरुः महाकविः कालिदासः राज्ञा दिलीपेन शापः किमर्थं न श्रुतः – इति कारणं विवेचयति –

**स शापो न त्वया राजन्न च सारथिना श्रुतः।**
**नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे।।७८।।**

**अन्वयः** – हे राजन् ! उद्दामदिग्गजे आकाशगङ्गायाः स्रोतसि नदति (सति) सः शापः त्वया सारथिना च न श्रुतः ।

**पदार्थः** – हे राजन् = हे नृप दिलीप । उद्दामदिग्गजे = उन्मुक्त दिग्गजों के । आकाशगङ्गायाः = आकाशगङ्गा के । स्रोतसि = प्रवाह में । नदति सति = कलकल शब्द होने के कारण । सः शापः = कामधेनु का वह शाप । त्वया = आपके द्वारा । सारथिना च = और सारथी के द्वारा भी । न = नहीं । श्रुतः = सुना गया।

**हिन्दी-अर्थः** – हे राजन् ! उन्मुक्त स्वच्छन्द अर्थात् बन्धनरहित दिग्गजों के आकाशगङ्गा के प्रवाह में जलस्नान करने के कारण शब्द करते रहने के कारण वह शाप न तो तुम्हारे द्वारा सुना गया और न तुम्हारे सारथी ने ही सुना।

**व्याख्या** –

**( क ) पर्यायपदानि** – हे राजन् = हे नृप ! उद्दामदिग्गजे = उन्मुक्तगजे, आकाशगङ्गायाः = मन्दाकिन्याः, स्रोतसि = प्रवाहे, नदति (सति) = शब्दं कुर्वति सति, सः शापः = कामधेनोः सः शापः, त्वया = भवता दिलीपेन, सारथिना = सूतेन, च, न, श्रुतः = आकर्णितः।

**( ख ) भावार्थः** – हे राजन् ! तदानीं मदोद्धताः दिग्गजाः मन्दाकिन्याः स्रोतसि क्रीडन्तः गम्भीरं नादं कुर्वन्तः असान् । अतः भवता सारथिना च कामधेनोः शापः न श्रुतः।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** – नदति = नद्-शतृ – स.वि., एकवचनम्।

## श्लोकः ७९

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः राज्ञा दिलीपेन कामधेनोः कृतपूजोल्लङ्घनविषये वर्णयति –

**ईप्सितं तदवज्ञानाद्विद्धि सार्गलमात्मनः।**
**प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः।।७९।।**

**अन्वयः** – तदवज्ञानात् आत्मनः ईप्सितं सार्गलं विद्धि, हि पूज्यपूजाव्यतिक्रमः श्रेयः प्रतिबध्नाति।

**पदार्थः** – तदवज्ञानात् = उस कामधेनु के अपमान से । आत्मनः = अपना । ईप्सितं = मनोरथ को । सार्गलं = रुका हुआ । विद्धि = जानो । हि = क्योंकि । पूज्यपूजाव्यतिक्रमः = पूजनीयों की पूजा का उल्लङ्घन । श्रेयः = कल्याण को । प्रतिबध्नाति = रोक देता है।

**हिन्दी-अर्थः** – उस कामधेनु का अनादर करने से तुम्हारे इच्छित सन्तान होने में बाधा पड़ गई है – ऐसा जानो । क्योंकि पूज्यों के उल्लङ्घन से कल्याण में बाधा हो जाती है।

**व्याख्या** –

**( क ) पर्यायपदानि** – तदवज्ञानात् = कामधेनोः अपमानात्, आत्मनः = स्वस्य, ईप्सितं = मनोरथं, सार्गलं =

प्रतिबन्धयुक्तं, विद्धि = जानीहि, हि = यतः, पूज्यपूजाव्यतिक्रमः = पूज्यपूजातिक्रमणं, श्रेयः = कल्याणं, प्रतिबध्नाति = अवरुणद्धि।

**( ख ) भावार्थः** – कामधेनोः अपमानात् एव तव मनोरथः प्रतिबन्धयुक्तं सञ्जातम् इति जानाहि । यतः पूज्यपूजातिक्रमणं कल्याणस्य प्रतिबन्धनं करोति।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**( घ ) अलङ्कारः** – अस्मिन् श्लोके अर्थान्तरन्यासनामकः अलङ्कारः अस्ति।

**विशेषांशः** –

तदवज्ञानात् = तस्याः अवज्ञानं तदवज्ञानं, तस्मात् तदवज्ञानात् – अव + ज्ञा + ल्युट्।

सार्गलम् = अर्गलया सहितं सार्गलम् ।

ईप्सितम् = आप्तुम् इष्टम् ईप्सितम्।

## श्लोकः ८०

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः सम्प्रति कामधेनुः कुत्र अस्ति इति वर्णयति –

**हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः।**
**भुजङ्गपिहितद्वारं पातालमधितिष्ठति।।८०।।**

**अन्वयः** – सा च इदानीं दीर्घसत्रस्य प्रचेतसः हविषे भुजङ्गपिहितद्वारं पातालम् अधितिष्ठति।

**पदार्थः** –सा च = और वह कामधेनु गाय ।इदानीं = इस समय ।दीर्घसत्रस्य = बहुत दिनों के बाद पूर्ण होने वाले ।प्रचेतसः = वरुण के ।हविषे = यज्ञ में दही, घृत आदि हविष्य के लिए ।भुजङ्गपिहितद्वारं = सर्पों से अवरुद्ध मार्ग वाले ।पातालं = पाताल लोक में ।अधितिष्ठति = रहती है।

**हिन्दी-अर्थः** – वह कामधेनु गाय इस समय बहुत दिनों में सम्पन्न होने वाले वरुण के यज्ञ में हवि आदि देने के लिए सर्पों से अवरुद्ध मार्ग वाले पाताल लोक में रहती है।

**व्याख्या** –

**( क ) पर्यायपदानि** – सा च = पुनश्च इयं कामधेनुः, इदानीं = सम्प्रति, दीर्घसत्रस्य = चिरकालसाध्ययज्ञस्य, प्रचेतसः = वरुणस्य, हविषे = दध्यादिहविरादिकं दातुं, भुजङ्गपिहितद्वारं = सर्पावरुद्धद्वारं, पातालं = रसातलम्, अधितिष्ठति = अधिवसति।

**( ख ) भावार्थः** – सा कामधेनुः इदानीं चिरकालसाध्यं यज्ञं कुर्वतः वरुणस्य भवने दध्यादिहविरादिकं दातुं सर्पावरुद्धद्वारं पाताललोकं गता अस्ति (तत्रैव निवसति इत्यर्थः)।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** –

अधितिष्ठति = अधि + स्था + लट्ल., प्र.पु., एकवचनम्।

## श्लोकः ८१

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः सपत्नीकदिलीपेन कामधेनोः पुत्र्याः आराधना कर्त्तव्या इति वर्णयति –

**सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः।**
**आराधय सपत्नीकः प्रीता कामदुधा हि सा।।८१।।**

**अन्वयः** – तदीयां सुतां सुरभेः प्रतिनिधिं कृत्वा शुचिः सपत्नीकः आराधय हि सा प्रीता कामदुधा (भवति)।

**पदार्थः** – तदीयां = उस कामधेनु की । सुतां = पुत्री नन्दिनी को । सुरभेः = कामधेनु की । प्रतिनिधिं = प्रतिनिधि । कृत्वा = मानकर (करके)। शुचिः = पवित्र होकर । सपत्नीकः = पत्नी सहित । आराधय = सेवा करो । हि = क्योंकि । सा = वह नन्दिनी । प्रीताः = प्रसन्न होने पर । कामदुधा = मनोरथों को पूर्ण करने वाली । (भवति = होती है)।

**हिन्दी-अर्थः** – आप उस कामधेनु की पुत्री को उस कामधेनु की प्रतिनिधि मानकर पवित्र होकर पत्नी सहित आराधना करो, क्योंकि प्रसन्न होने पर वह मनोरथों को पूर्ण करती है।

**व्याख्या** –

**(क) पर्यायपदानि** – तदीयां = कामधेनुसम्बन्धिनीं, तां सुतां = कामधेनोः पुत्रीं नन्दिनीं, सुरभेः = कामधेनोः, प्रतिनिधिं = स्थानापन्नां, कृत्वा = विधाय, शुचिः = शुद्धः, सपत्नीकः = पत्न्या सह, आराधय = सेवस्व, हि = यतः, सा = नन्दिनी, प्रीता = प्रसन्ना, कामदुधा = मनोरथान् प्रपूरयत्ति।

**(ख) भावार्थः** – इदानीं त्वं कामधेनुसुतां नन्दिनीं तत्प्रतिनिधिं कृत्वा शुद्धो भूत्वा सभार्यः सेवस्व । यतः सा नन्दिनी प्रसन्ना सती सर्वान् मनोरथान् प्रपूरयति।

**(ग) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** –

आराधय = आ + राध् + णिच्, लोट् ल., म.पु., एकवचनम्।

प्रीता = प्री + क्त (स्त्री.)।

## श्लोकः ८२

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः कामधेनोः पुत्र्याः नन्दिन्याः वर्णनं करोति –

**इति वादिन एवास्य होतुराहुतिसाधनम्।**
**अनिन्द्या नन्दिनी नाम धेनुराववृत्ते वनात्।।८२।।**

**अन्वयः** – इति वादिनः एव होतुः अस्य आहुतिसाधनं नन्दिनी नाम अनिन्द्या धेनुः वनात् आववृत्ते।

**पदार्थः** – इति = इस प्रकार । वादिनः = कहते हुए । एव = ही । होतुः = हवन करने वाले । अस्य = मुनि वशिष्ठ की । आहुतिसाधनं = हवन की सामग्री देने वाली । नन्दिनी नाम = नन्दिनी नाम वाली । अनिन्द्या = प्रशंसनीय । धेनुः = गाय । वनात् = वन से । आववृते = आ गई ।

**हिन्दी-अर्थः** – मुनि वशिष्ठ जी इस प्रकार कह ही रहे थे कि हवन करने वाले मुनि वशिष्ठ के यज्ञ की आहुति दधि, घी आदि का साधनभूत कामधेनु की पुत्री नन्दिनी नाम की प्रशंसनीय गाय वन से लौट आई।

**व्याख्या** –

**(क) पर्यायपदानि** – इति = इत्थं, वादिनः = कथयतः, एव, होतुः = हवनशीलस्य, अस्य = मुनेः, आहुति-साधनं = हवनसामग्रीणां करणभूता, नन्दिनी नाम = नन्दिनी नामधेन्या, अनिन्द्या = प्रशंसनीया, धेनुः = गौः, वनात् = अरण्यात्, आववृते = प्रत्यागता ।

**(ख) भावार्थः** – इत्थं कथयतः एव वशिष्ठस्य यज्ञाय दध्याज्यादि-साधनाभूता कामधेनुसुता नन्दिनी वनात् प्रत्यागता।

**(ग) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** –

नन्दिनी = नन्दयति इति सा – नन्द + इन् + ङीष् ।

आववृते = आ + वृत लि.लकारः, प्र.पु., एकवचनम्।

## श्लोकः ८३

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः कामधेनोः पुत्र्याः नन्दिन्याः स्वरूपं वर्णयति –

**ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला।**
**विभ्रती श्वेतरोमाङ्कं संध्येव शशिनं नवम् ।।८३।।**

**अन्वयः** – पल्लवस्निग्धपाटला ललाटोदयम् आभुग्नं श्वेतरोमाङ्कं विभ्रति नवं शशिनं विभ्रती सन्ध्या इव (स्थिता वनात् आववृते)।

**पदार्थः** – पल्लवस्निग्धपाटला = नूतन किसलयों के समान कोमल और लालवर्ण वाली। ललाटोदयं = मस्तक में उत्पन्न होने वाली । आभुग्नं = कुछ-कुछ टेढ़ी । श्वेतरोमकाङ्कं = श्वेत बालों के चिह्न को । विभ्रती = धारण करती हुई । नवं = नवीन निकले हुए । शशिनं = चन्द्रमा को । विभ्रति = धारण करने वाली । सन्ध्या = सांयकाल के । इव = समान (स्थिता वनात् आववृते = वन से लौटती हुई नन्दिनी सुशोभित हुई)।

**हिन्दी-अर्थः** – वह नवीन पल्लवों के समान कोमल लाल रंगवाली, माथे पर कुछ-कुछ टेढ़े श्वेत बालों के चिह्न को धारण करने वाली नवीन चन्द्रमा को धारण करने वाली सन्ध्या के समान उपस्थित हो गई।

**व्याख्या** –

**(क) पर्यायपदानि** – पल्लवस्निग्धपाटला = किसलयवत् स्निग्धरक्तवर्णा, ललाटोदयं = भालस्थानोदयम्, आभुग्नम् = ईषद्वक्रं, श्वेतरोमाङ्कं = धवलरोमचिह्नं, बिभ्रती = धारयन्ति, नवं = नवीनं, शशिनं = चन्द्रमसं, बिभ्रति = धारयन्ती, सन्ध्या इव = सांयकाल इव।

**(ख) भावार्थः** – यथा नवपल्लवसदृशं स्निग्धतायुक्तं श्वेतरक्तं वक्रं च नवीनं चन्द्रं धारयन्ती सन्ध्या शोभते तथैव ललाटस्थं श्वेतरोमाङ्कं धारयन्ती नन्दिनी वनात् प्रत्यागता सुशोभते स्म।

**(ग) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति । अस्य लक्षणं पूर्वश्लोके द्रष्टव्यम् ।

**(घ) अलङ्कारः** – श्लोकेऽस्मिन् उत्प्रेक्षा अलङ्कारः अस्ति ।

**विशेषांशः** – भुग्नम् = भुज् + क्त ।

बिभ्रती = भृ + शतृ (स्त्री., प्रथमावि., एकवचनम्)।

## श्लोकः ८४

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः नन्दिन्याः स्तनानां वर्णनं करोति –

**भुवं कोष्णेन कुण्डोघ्नी मेध्येनावभृथादपि।**
**प्रस्नवेनाभिवर्षन्ती वत्सालोकप्रवर्तिना ।।८४।।**

**अन्वयः** – कोष्णेन अवभृथात् अपि मेध्येन, वत्सालोकप्रवर्तिना प्रस्नवेन भुवम् अभिवर्षन्ती कुण्डोघ्नी (वनात् आववृते)।

**पदार्थः** – कोष्णेन = कुछ-कुछ उष्ण । अवभृथात् अपि = यज्ञ के अन्त में किए गए स्नान से भी । मेध्येन = पवित्र । वत्सालोकप्रवर्तिना = बछड़े को देखने से प्रवाहित होने वाली । प्रस्नवेन = दूध के बहने से । भुवं = पृथ्वी को । अभिवर्षन्ती = सींचती हुई । कुण्डोघ्नी = घड़े के समान स्तनों वाली।

**हिन्दी-अर्थः** – कुछ-कुछ गरम, यज्ञ के पश्चात् होने वाले स्नान से भी अधिक पवित्र तथा बछडे को देखने मात्र से अपने आप बहते हुए दूध से पृथ्वी को सींचती हुई नन्दिनी आ गई।

**व्याख्या –**

**( क ) पर्यायपदानि –** कोष्णेन = ईषत् उष्णेन, अवभृथात् अपि = यज्ञाङ्गभूत स्नानादपि, मेध्येन = पवित्रेण, वत्सालोकप्रवर्तिना = वत्सदर्शनेन प्रवहता, प्रस्रवेन = अभिष्यन्दनेन, भुवं = भूमिम्, अभिवर्षन्ती = सिञ्चन्ती, कुण्डोघ्नी = घटोघ्नी।

**( ख ) भावार्थः –** किञ्चित् उष्णेन यज्ञाङ्गस्नानात् अपि पवित्रेण वत्सदर्शनेन प्रवहता अभिष्यन्दनेन भूमिं सिञ्चन्ती घटोघ्नी नन्दिनी वनादागता ।

**( ग ) छन्दः –** श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः –**

अभिवर्षन्ती = अभि + वृष् + शतृ (स्त्री., प्रथमावि., एकवचनम्)।

कुण्डोघ्नी = कुण्डम् इव ऊघः यस्याः सा (ब.व्री.)।

## श्लोकः ८५

**प्रसङ्गः –** अनेन श्लोकमाध्यमेन महाकविः कालिदासः नन्दिन्याः रजकणैः राज्ञः दिलीपस्य शुद्धतायाः वर्णनं करोति –

**रजः कणैः खुरोद्धूतैः स्पृशद्भिर्गात्रमन्तिकात् ।**
**तीर्थाभिषेकजां शुद्धिमादधाना महीक्षितः ।।८५।।**

**अन्वयः –** खुरोद्धूतैः अन्तिकात् गात्रं स्पृशद्भिः रजः कणैः महीक्षितः तीर्थाभिषेकजां शुद्धिम् आदधाना (वनात् आववृते)।

**पदार्थः –** खुरोद्धूतैः = खुरों के द्वारा उठाये गए । अन्तिकात् = समीप से । गात्रं = शरीर को । स्पृशद्भिः = स्पर्श करते हुए । रजः कणैः = धूलि के कणों द्वारा । महीक्षितः = राजा दिलीप के । तीर्थाभिषेकजां = तीर्थ के जल में स्नान करने से उत्पन्न होने वाली । शुद्धिं = पवित्रता । आदधाना = करती हुई (वनात् आववृते)।

**हिन्दी-अर्थः –** खुरों के द्वारा उड़ाये गये समीप से राजा दिलीप के शरीर को स्पर्श करने वाले धूलि-कणों के द्वारा राजा को मानो तीर्थाभिषेक से शुद्धि करती हुई नन्दिनी आ गई।

**व्याख्या –**

**( क ) पर्यायपदानि –** खुरोद्धूतैः = शफोत्क्षिप्तैः, अन्तिकात् = समीपात्, गात्रं = शरीरं, स्पृशद्भिः = स्पर्शं कुर्वद्भिः, रजः कणैः = धूलिकणैः, महीक्षितः = राज्ञः दिलीपस्य, तीर्थाभिषेकजां = तीर्थजलाभिषेकसम्भवां, शुद्धिं = पवित्रताम्, आदधाना = कुर्वाणा ।

**( ख ) भावार्थः –** खुरोत्थापितैः धूलिकणैः समीपे वर्तमानस्य राज्ञः दिलीपस्य गात्रस्पर्शं कुर्वद्भिः तीर्थाभिषेकजां शुद्धिं कुर्वाणा नन्दिनी वनात् प्रत्यागता ।

**( ग ) छन्दः –** श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः –**

उद्धूत = उत् + धृ + क्त ।

स्पृशद्भिः = स्पृश् + शतृ तृ.वि., बहुवचनम् ।

## श्लोकः ८६

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः नन्दिनीं दृष्ट्वा महर्षिवशिष्ठेन कथितवचनानि वर्णयति –

**तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः ।**
**याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ।।८६।।**

**अन्वयः** – निमितज्ञः तपोनिधिः पुण्यदर्शनां तां दृष्ट्वा आशंसिता–वन्ध्यप्रार्थनं याज्यं पुनः अब्रवीत् ।

**पदार्थः** – निमितज्ञः = शकुनशास्त्र के विद्वान् । तपोनिधिः = तपस्वी महर्षि वशिष्ठ। पुण्यदर्शनां = पवित्र दर्शनों वाली । तां = उस नन्दिनी को । दृष्ट्वा = देखकर । आशंसिताबन्ध्यप्रार्थनं = सफल मनोरथ की प्रार्थना करने वाले । याज्यं = यज्ञ कराने योग्य राजा दिलीप से । पुनः = फिर । अब्रवीत् = बोले।

**हिन्दी–अर्थः** – शकुनों को जानने वाले महर्षि वशिष्ठ ने पुण्य दर्शनों वाली उस नन्दिनी गाय को देखकर सफल मनोरथ की याचना करनेवाले यजमान राजा दिलीप से पुनः कहा ।

**व्याख्या** –

**( क ) पर्यायपदानि** – निमितज्ञः = शकुनज्ञः, तपोनिधिः = महर्षिवशिष्ठः, पुण्यदर्शनां = पवित्रदर्शनां, तां = नन्दिनीं, दृष्ट्वा = अवलोक्य, आशंसिताबन्ध्यप्रार्थनं = सफलमनोरथं, याज्यं = याजयितुं योग्यं, तं दिलीपं, पुनः = भूयः, अब्रवीत् = अवदत् ।

**( ख ) भावार्थः** – शकुनज्ञः महर्षिः वशिष्ठः यदा तां नन्दिनीम् अपश्यत् तदा असौ शीघ्रमेव ज्ञातवान् यत् राज्ञः पुत्र प्रार्थना अवश्यमेव सफला भविष्यति । सः च मुनिः राजानं पुनरवोचत् ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** – दृष्ट्वा = दृश् + क्त्वा ।

आशंसितम् = आ + शंस् + क्त ।

अब्रवीत् = ब्रूञ् + लङ् , प्र.पु., एकवचनम् ।

## श्लोकः ८७

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः महर्षिवशिष्ठेन राज्ञे दिलीपाय कृतसफलमनोकामनापूर्तेः वर्णनं करोति –

**अदूरवर्तिनीं सिद्धिं राजन् विगणयात्मनः ।**
**उपस्थितेयं कल्याणी नाम्नि कीर्तिते एव यत् ।।८७।।**

**अन्वयः** – राजन् ! आत्मनः सिद्धिम् अदूरवर्तिनीं विगणय यत् नाम्नि कीर्तिते एव इयं कल्याणी उपस्थिता ।

**पदार्थः** – राजन् = हे राजा दिलीप ! आत्मनः = अपनी । सिद्धिं = कार्य सिद्धि को । अदूरवर्तिनां = शीघ्रपूर्ण होने वाली । विगणय = जानिये । यत् = जिस कारण से । नाम्नि कीर्तिते एव = नाम ग्रहण मात्र से ही । इयं कल्याणी = यह कल्याणी नन्दिनी । उपस्थिता = उपस्थित हो गई ।

**हिन्दी–अर्थः** – हे राजन् ! आप अपनी कामना को शीघ्र पूर्ण होने वाली जानिये, क्योंकि नाम लेते ही यह कल्याणी नन्दिनी यहाँ उपस्थित हो गई ।

**व्याख्या** –

**( क ) पर्यायपदानि** – राजन् = हे नृप !, आत्मनः = स्वस्य, सिद्धिं = कार्यसिद्धिम्, अदूरवर्तिनीं = शीघ्रभाविनीं, विगणय = जानीहि, यत् = यस्मात् कारणात्, नाम्नि कीर्तिते एव = नामग्रहणमात्रेणैव, इयं कल्याणी उपस्थिता = इयं कल्याणी सम्प्राप्ता ।

**( ख ) भावार्थः** – हे राजन् ! इदानीं भवतः मनोरथसिद्धिः अविलम्बेन एव भविष्यति यतः एषा मङ्गलमयी नन्दिनी मया नाम्ना उच्चारिते सत्येव सम्मुखमागता ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** –

विगणय = वि + गण् , लोट् लकारः, म.पु., एकवचनम् ।

उपस्थिता = उप + स्था + क्त (स्त्री.)।

## श्लोकः ८८

**प्रसङ्गः** – अनेन श्लोक माध्यमेन महाकविः कालिदासः राज्ञा दिलीपेन नन्दिन्याः सेवा कर्त्तव्या इति वर्णयति –

**वन्यवृत्तिरिमां शश्वदात्मानुगमनेन गाम् ।**

**विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ।।८८।।**

**अन्वयः** – वन्यवृत्तिः (सन्) इमां गां शश्वत् आत्मानुगमनेन अभ्यसनेन विद्याम् इव प्रसादयितुम् अर्हसि ।

**पदार्थः** – वन्यवृत्तिः = कन्दमूल-फल आदि के द्वारा जीवन-यापन करते हुए । इमां गां = इस नन्दिनी गाय को । शश्वत् = निरन्तर । आत्मानुगमनेन = अपने अनुसरण के द्वारा । अभ्यसनेन = सतत् अभ्यास के द्वारा । विद्याम् इव = विद्या के समान । प्रसादयितुम् = प्रसन्न करने के लिए । अर्हसि = समर्थ हो ।

**हिन्दी-अर्थः** – हे राजन् ! आप वन के कन्द-मूल-फलों का आहार करते हुए निरन्तर इसके पीछे-पीछे चलते हुए इस गाय को उसी प्रकार प्रसन्न करने मे समर्थ हो, जिस प्रकार अभ्यास से विद्या प्राप्त की जाती है।

**व्याख्या** –

**( क ) पर्यायपदानि** – वन्यवृत्तिः = कन्दमूलादि-आहारः, इमां गां = एतां धेनुं नन्दिनीं, शश्वत् = निरन्तरम्, आत्मानुगमनेन = स्वानुसरणेन, अभ्यसनेन = अभ्यासेन, विद्यां = शास्त्रम्, इव = समानं, प्रसादयितुं = प्रसन्नां कर्त्तुम्, अर्हसि = समर्थः असि ।

**( ख ) भावार्थः** – यथा अभ्यासेन विद्या प्रसन्ना सती हृदयंगता भवति तथैव त्वमपि वनकन्दमूलादिभिरेव आहारं विधाय अस्याः अनुसरणेन इमां यावन्मनोरथसिद्धिः भवति तावत् प्रसादय ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**( घ ) अलङ्कारः** – श्लोकेऽत्र उपमा नामकः अलङ्कारः अस्ति ।

**विशेषांशः** – वन्यवृत्तिः = वने भवं वन्यम् । वन्यम् एव वृत्तिः (भोजनं) यस्य असौ (ब.ब्री. समासः)।

प्रसादयितुम् = प्र +सद् + णिच् + तुमुन् ।

## श्लोकः ८९

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः महर्षेः वशिष्ठस्य कथनानुसारं राज्ञा दिलीपेन गौः नन्दिनी अनुसरणीया इति वर्णयति –

**प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः ।**

**निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः ।।८९।।**

**अन्वयः** – अस्यां प्रस्थितायां त्वं प्रतिष्ठेथाः , स्थितायां स्थितिम् आचरेः, निषण्णायां निषीद, पीताम्भसि अपः पिबेः।

**पदार्थः** – अस्यां = इस नन्दिनी के । प्रस्थितायां = प्रस्थान करने पर (चलने पर)। त्वं = तुम (राजा दिलीप)।

प्रतिष्ठेथाः = प्रस्थान करना (चलना)। स्थितायां = रुक जाने पर । स्थितिम् आचरेः = रुक जाना । निषण्णायां = बैठ जाने पर । निषीद = बैठ जाना । पीताम्भसि = जल पीने पर । अपः = जल को । पिबेः = पीना ।

**हिन्दी-अर्थः** – हे राजन् ! यह नन्दिनी गाय जब चले, तब चलना, जब खड़ी हो, तब खड़ा होना, जब बैठे, तो बैठना, जब जल पी चुके, तब जल पीना, इस प्रकार छाया की भाँति इसका अनुसरण करना ।

**व्याख्या** –

**( क ) पर्यायपदानि** – अस्याम् = एतस्यां नन्दिन्यां, प्रस्थितायां = प्रचलितायां, त्वं = भवान् दिलीपः, प्रतिष्ठेथाः = प्रस्थानं कुरु, स्थितायां = तिष्ठन्त्यां, स्थितिम् आचरेः = स्थितीं कुरु(तिष्ठतु), निषण्णायाम् = उपविष्टायां, निषीद = उपविश, पीताम्भसि = कृतजलपानायाम्, अपः = जलं, पिबेः = पिब ।

**( ख ) भावार्थः** – हे राजन् ! यदा इयं प्रचलति तदा त्वमपि प्रचल, यदा च तिष्ठति तदा तिष्ठ, यदा निषीदति तदा निषीद तथा च यदा जलं पिबति तदैव त्वमपि जलं पिब इत्येवं छायावत् एनामनुसर।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** –

प्रस्थितायाम् = प्र + स्था + क्त (स्त्री.) स.वि., एकवचनम् ।

प्रतिष्ठेथाः = प्रति + स्था (आ.) विधिलिङ् लकारः, म.पु., एकवचनम् ।

आचरेः = आ + चर्, वि.लिङ् लकारः, म.पु., एकवचनम् ।

निषण्णायाम् = नि +सद् + क्त (स्त्री.), स.वि., एकवचनम् ।

## श्लोकः ९०

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः ऋषिवशिष्ठानुसारं राज्ञी सुदक्षिणाऽपि नन्दिन्याः सेवां कुर्यात् इति वर्णयति –

**वधूर्भक्तिमती चैनामर्चितामातपोवनात् ।**
**प्रयता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि ।।९०।।**

**अन्वयः** – वधूः भक्तिमती प्रयता च अर्चिताम् एनां प्रातः आतपोवनात् अन्वेतु सायमपि प्रत्युद्व्रजेत् ।

**पदार्थः** – वधूः = जाया सुदक्षिणा । भक्तिमती = भक्तिपूर्वक । प्रयता = पवित्र होकर । च = और । अर्चितां = इसकी पूजा करके । एनां = नन्दिनी को । प्रातः = प्रतिदिन प्रातःकाल । आतपोवनात् = तपोवन की सीमा तक । अन्वेतु = अनुगमन करें । सायमपि = सन्ध्याकाल के समय भी । प्रत्युद्व्रजेत् = आगे जाकर स्वागत करें ।

**हिन्दी-अर्थः** – वधू सुदक्षिणा भी पवित्र होकर भक्तिपूर्वक इसकी पूजा करके प्रतिदिन प्रातःकाल तपोवन की सीमा तक इसे पहुँचाने जाये तथा सायंकाल में भी तपोवन की सीमा पर पहुँचकर स्वागत पूर्वक आश्रम में लाये ।

**व्याख्या** –

**( क ) पर्यायपदानि** – वधूः = जाया , भक्तिमती = भक्तियुक्ता, प्रयता च = पवित्रा, च = अपि, अर्चितां = पूजिताम्, एनां = नन्दिनीं, प्रातः = प्रातःकाले, आतपोवनात् = तपोवनान्तं यावत्, अन्वेतु = अनुगच्छतु, सायमपि = सायंकालेऽपि, प्रत्युद्व्रजेत् = प्रत्युद्गच्छेत् ।

**( ख ) भावार्थः** – वधूः सुदक्षिणाऽपि पवित्रा सती भक्त्यैनां सम्पूज्य प्रातः तपोवनसीमापर्यन्तम् अनुगच्छतु, सायंकाले च अस्याः आगमनसमये स्वागतपूर्वकम् एनाम् आश्रमम् आनयतु ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः –**
प्रयत = प्र + यम् + क्त ।
अर्चित = अर्च् + क्त ।
अन्वेतु = अनु + इ – लोट्लकारः, प्र.पु., एकवचनम् ।

## श्लोकः ९१

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महर्षिणा वशिष्ठेन प्रदत्तसेवाधर्मनियमान् आशीर्वादान् च वर्णयति महाकविः कालिदासः –

**इत्याप्रसादादस्यास्त्वं परिचर्यापरो भव ।**
**अविघ्नमस्तु ते स्थेयाः पितवे धुरि पुत्रिणाम् ।।९१।।**

**अन्वयः** – इति त्वम् आप्रसादात् अस्याः परिचर्यापरः भव, ते अविघ्नम् अस्तु पिता इव पुत्रिणां धूरि स्थेयाः ।
**पदार्थः** – इति = इस प्रकार से । त्वं = आप राजा दिलीप । आप्रसादात् = जब तक वह प्रसन्न न हो जाय तब-तक । अस्याः = इस नन्दिनी की । परिचर्यापरः = सेवा में तत्पर । भव = होना चाहिए । ते = तुम्हारा । अविघ्नं = विघ्नों का अभाव । अस्तु = होवे । पिता इव = पिता के समान । पुत्रिणां = सत्पुत्रवालों में। धुरि = श्रेष्ठ (अग्रगण्य)। स्थेयाः = होवें ।
**हिन्दी-अर्थः** – इस प्रकार आपको इस नन्दिनी के प्रसन्न होने तक इसकी सेवा करनी चाहिए । तुम्हारे कष्ट दूर हों । तुम भी अपने पिता के समान पुत्र-वालों में श्रेष्ठ बनों ।
**व्याख्या –**
**( क ) पर्यायपदानि** – इति = अनेन प्रकारेण, त्वं = भवान् राजा दिलीपः, आप्रसादात् = प्रसन्नतापर्यन्तम्, अस्याः = नन्दिन्याः, परिचर्यापरः = सेवातत्परः, भव = भवेः, ते = तव, अविघ्नं = विघ्नाभावः, अस्तु = भवतु, पिता इव = जनकः इव, पुत्रिणां = सत्पुत्रवतां, धुरि = अग्रे, स्थेयाः = तिष्ठेः ।
**( ख ) भावार्थः** – यथोक्तविधिना त्वम् अस्याः प्रसादपर्यन्तं परिचर्यां कुरु । ते विघ्नानि नष्टानि भवन्तु । तव पितेव त्वं शोभनपुत्रवतां भवेः ।
**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।
**( घ ) अलङ्कारः** – अत्र श्लोके उपमानामकः अलङ्कारः अस्ति ।
**विशेषांशः –**
अस्तु = अस् , लोट्लकारः, प्र.पु., एकवचनम् ।
स्थेयाः = स्था आ.लिङ्, म.पु., एकवचनम् ।

## श्लोकः ९२

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः राज्ञा दिलीपेन गुरोः वशिष्ठस्य आदेशः शिरोधार्यः कृत इति वर्णयति –

**तथेति प्रतिजग्राह प्रीतिमान् सपरिग्रहः ।**
**आदेशं देशकालज्ञः शिष्यः शासितुरानतः ।।९२।।**

**अन्वयः** – देशकालज्ञः प्रीतिमान् सपरिग्रहः शिष्यः आनतः (सन्) शासितुः आदेशं तथा इति प्रतिजग्राह ।

**पदार्थः** – देशकालज्ञः = देश तथा काल के मर्मज्ञ । प्रीतिमान् = प्रसन्न होकर । सपरिग्रहः = पत्नी सुदक्षिणा के साथ । शिष्यः = राजा दिलीप । आनतः (सन्) = नम्रतापूर्वक । शासितुः = गुरु वशिष्ठ के । आदेशं = आदेश को । तथा इति = ऐसा ही हो । प्रतिजग्राह = स्वीकार किया।

**हिन्दी-अर्थः** – देश तथा काल के मर्मज्ञ राजा दिलीप ने प्रसन्न होकर रानी सुदक्षिणा के साथ गुरु वशिष्ठ के आदेश को बड़ी नम्रतापूर्वक ऐसा ही हो– ऐसा कहकर स्वीकार किया ।

**व्याख्या** –

**( क ) पर्यायपदानि** – देशकालज्ञः = अग्निसामीप्यस्य अग्निहोत्रावसानस्य च बोद्धा, प्रीतिमान् = प्रसन्नः, सपरिग्रहः = सपत्नीकः, शिष्यः = अन्तेवासी राजा दिलीपः, आनतः (सन्) = नम्रः, शासितुः = गुरोः, आदेशम् = आज्ञां, तथा इति = तथास्तु इति, प्रतिजग्राह = स्वीचकार ।

**( ख ) भावार्थः** – देशकालमर्मज्ञः सभार्यः राजा दिलीपः प्रसन्नः सन् गुरोर्वशिष्ठस्याज्ञां विनयावनतो भूत्वा स्वीकृतवान्।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** –

आनतः = आ + नम् + क्त ।

शासितुः = शास् + षष्ठी एकवचनम् ।

प्रतिजग्राह = प्रति + ग्रह् , लिट्लकारः, प्र.पु., एकवचनम् ।

## श्लोकः ९३

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः राज्ञे दिलीपाय प्रदत्तशयनाज्ञायाः पालनस्य वर्णनं करोति –

**अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम् ।**
**सूनुः सूनृतवाक्स्रष्टुर्विससर्जोर्जितश्रियम् ।।९३।।**

**अन्वयः** – अथ प्रदोषे दोषज्ञः सूनृतवाक् स्रष्टुः सूनुः उर्जितश्रियं विशांपतिं संवेशाय विससर्ज ।

**पदार्थः** – अथ = गुरु वशिष्ठ की आज्ञा स्वीकार कर लेने के पश्चात् । प्रदोषे = रात्रि में । दोषज्ञः = विद्वान् । सूनृतवाक् = सत्यप्रियभाषी । स्रष्टुः = ब्रह्मा के । सूनुः = पुत्र । उर्जितश्रियं = बढी हुई शोभा वाले । विशांपतिः = राजा दिलीप को । संवेशाय = सोने के लिए । विससर्ज = आज्ञा दी ।

**हिन्दी-अर्थः** – इसके अनन्तर रात में विद्वान् सत्य और प्रिय बोलने वाले ब्रह्मा के पुत्र महर्षि वशिष्ठ ने राजा दिलीप को सोने की आज्ञा प्रदान की ।

**व्याख्या** –

**( क ) पर्यायपदानि** – अथ = अनन्तरं, प्रदोषे = सांयकाले, दोषज्ञः = विद्वान्, सूनृतवाक् = सत्यप्रियभाषी, स्रष्टुः = ब्रह्मणः, सूनुः = पुत्रः, उर्जितश्रियं = प्रवृद्धशोभं, विशांपतिं = नृपं दिलीपं, संवेशाय = शयनाय, विससर्ज = आज्ञापयामास।

**( ख ) भावार्थः** – ततः रात्रौ विद्वान् मधुरभाषी ब्रह्मपुत्रः सः महर्षिः राज्यश्रिया दीप्यमानं तं राजानं दिलीपं शयनाय आदेशं दत्तवान् (आदिष्टवान्) ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** –

स्रष्टुः = सृजति इति स्रष्टा – सृज् +तृच् । तस्य (ष.वि., एकवचनम्)।

संवेशाय = सम् + विश्, चतुर्थीविभक्तिः, एकवचनम् ।

विससर्ज = वि + सृज्, लिट् लकारः, प्र.पु., एकवचनम् ।

## श्लोकः ९४

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः महर्षिणा वशिष्ठेन राज्ञे दिलीपाय प्रदत्तमुनियोग्यभोजनशय्ययोः वर्णनं करोति –

**सत्यामपि तपः सिद्धौ नियमापेक्षया मुनिः।**
**कल्पवित्कल्पयामास वन्यामेवास्य संविधाम् ।।९४।।**

**अन्वयः** – कल्पवित् मुनिः तपः सिद्धौ सत्याम् अपि नियमापेक्षया अस्य वन्याम् एव संविधां कल्पयामास ।

**पदार्थः** – कल्पवित् = व्रत-विधिज्ञ । मुनिः = मुनि वशिष्ठ । तपः सिद्धौ = तप की सिद्धि से । सत्याम् अपि = राजाओं के योग्य शय्या तैयार कर देने का सामर्थ्य होने पर भी । नियमापेक्षया = व्रत का ध्यान रखते हुए । अस्य = राजा दिलीप के । वन्याम् एव = वनवासी वृत्तियों के समान ही । संविधां = कुशाओं के बिछौनों का । कल्पयामास = प्रबन्ध किया ।

**हिन्दी-अर्थः** – व्रत-विधिज्ञ मुनि वशिष्ठ ने अपने तप के प्रभाव से अन्य राजकीय भोग्य सामग्री को उपस्थित करने की शक्ति रखते हुए भी व्रत के नियमों के विचार से वनवासी वृत्तियों के समान ही कुशाओं के बिछौनों का प्रबन्ध किया ।

**व्याख्या** –

**( क ) पर्यायपदानि** – कल्पवित् = व्रतप्रयोगाभिज्ञः, मुनिः = मुनिः वशिष्ठः, तपः सिद्धौ = तपस्यायाः सिद्धयां, सत्याम् अपि = विद्यमानेऽपि सर्वविधसामर्थ्ये, नियमापेक्षया = व्रतचर्यापेक्षया, अस्य = दिलीपस्य, वन्यामेव = वनोत्पन्नामेव, संविधां = कुशास्तरणसामग्रीं, कल्पयामास = रचयामास ।

**( ख ) भावार्थः** – व्रतप्रयोगाभिज्ञः मुनिः वशिष्ठः तपस्यासिद्धिबलेन विद्यमानेऽपि व्रतचर्यापेक्षया राज्ञे दिलीपाय वनोत्पन्नामेव कुशास्तरणसामग्रीं रचयामास।

**( ग ) छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दः अस्ति ।

**विशेषांशः** –

सत्याम् = अस् + शतृ (स्त्री.) स.वि., एकवचनम् ।

संविधा = संविधीयते अनया इति = सं +वि + धा + क ।

कल्पयामास = कल्प् + णिच्, लिट्लकारः, प्र.पु., एकवचनम् ।

## श्लोकः ९५

**प्रसङ्गः** – अनेन श्लोकमाध्यमेन महाकविः कालिदासः महर्षिणा वशिष्ठेन राज्ञे दिलीपाय प्रदत्त पर्णशय्यायां द्वयोः सुदक्षिणादिलीपयोः शयनं वर्णयति –

**निर्दिष्टां कुलपतिना च पर्णशाला,**
**मध्यास्य प्रयतपरिग्रहद्वितीयः ।**
**तच्छिष्याध्ययननिवेदितावसानां,**
**संविष्टः कुशशयने निशां निनाय ।।९५।।**

**अन्वयः** – प्रयतपरिग्रहद्वितीयः सः कुलपतिना निर्दिष्टां पर्णशालाम् अध्यास्य कुशशयने संविष्टः (सन्)

तच्छिष्याध्ययननिवेदितावसानां निशां निनाय ।

**पदार्थः** – प्रयतपरिग्रहद्वितीयः = राजा दिलीप अपनी पत्नी सुदक्षिणा के साथ । सः = वह राजा दिलीप ने । कुलपतिना = कुलगुरु वशिष्ठ से । निर्दिष्टां = बताई हुई । पर्णशालां = पर्णकुटी में । अध्यास्य = निवास करके । कुशशयने = कुशों की शय्या पर । संविष्टः = सोये हुए । तच्छिष्याध्ययननिवेदितावसानां = ऋषि के छात्रों के प्रातः कालीन वेदपाठ के द्वारा जानी गई प्रभातवाली । निशां = रात्रि को । निनाय = व्यतीत किया ।

**हिन्दी-अर्थः** – राजा दिलीप अपनी पत्नी सुदक्षिणा के साथ कुलपति वशिष्ठ जी द्वारा निर्दिष्ट पर्णकुटी में कुश के आसन पर सोये तथा गुरु वशिष्ठ के शिष्यों द्वारा किये गए वेदपाठ से रात्रि को बीती हुई जानकर जाग गए ।

**व्याख्या** –

**( क ) पर्यायपदानि** – प्रयतपरिग्रहद्वितीयः = नियतपत्नीद्वितीयः, सः = दिलीपः, कुलपतिना = वशिष्ठेन, निर्दिष्टां = आदिष्टां, पर्णशालां = पर्णकुटीम्, अध्यास्य = अधिष्ठाय, कुशशयने = कुशशय्यायां, संविष्टः = सुप्तः, तच्छिष्याध्ययननिवेदितावसानां = ऋषिच्छात्राणां वेदपाठेन ज्ञातावसानां, निशां = रात्रिं, निनाय = यापयामास ।

**( ख ) भावार्थः** – राजा दिलीपः सुदक्षिणया सह कुलपतिना वशिष्ठेन सूचितां पर्णकुटीं प्रविश्य कुशास्तरणे सुप्तवान् । तच्छिष्यैः कृतेन वेदघोषेण च रात्रिर्गतेति विज्ञाय प्रबुद्धः ।

**( ग ) छन्दः** – श्लोकेऽस्मिन् प्रहर्षिणी छन्दः अस्ति । इदमेकं समवृत्तमस्ति । अतः सर्वेषु चरणेषु समानं लक्षणं भवति । 'प्रहर्षिणी' छन्दसः लक्षणमिदम् –

**म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् ।**

अर्थात् प्रहर्षिणी छन्दसः प्रत्येकस्मिन् चरणे मगणः, नगणः, जगणः, रगणः, अन्ते च एकः गुरुः अक्षरः भवति । तृतीये-अक्षरे दशमे अक्षरे च यतिः भवति । अत्र यथा –

| मगणः | नगणः | जगणः | रगणः | गुरुः |
|---|---|---|---|---|
| ऽऽऽ | ।।। | ।ऽ। | ऽ।ऽ | ऽ |
| निर्दिष्टां | कुलप | तिना स | पर्णशा | ला |

**विशेषांशः** – अध्यास्य = अधि + आस् + ल्यप् ।

संविष्ट = सम् + विश् + क्त ।

निनाय = 'नी' लिट् लकारः, प्र.पु., एकवचनम् ।

## आदर्शप्रश्नाः

**( क ) निम्नलिखितप्रश्नानामुत्तरं केवलं शब्दमात्रेण अथवा वाक्यमात्रेण प्रदातव्यम् –**

१. रघुवंशस्य लेखकः कः अस्ति ?
२. रघुवंशमहाकाव्ये कति सर्गाः सन्ति ?
३. रघुवंशस्य प्रथमसर्गस्य प्रारम्भे कयोः वन्दना कृता अस्ति ?
४. महाकविकालिदासेन कति महाकाव्यानि लिखितानि ?
५. महाकविकालिदासस्य कति नाटकानि प्रसिद्धानि ?
६. सुदक्षिणा कस्य राज्ञः पत्नी आसीत् ?
७. सुदक्षिणा कस्य राजपुत्री आसीत् ?
८. सुदक्षिणायाः पतिः कः आसीत् ?
९. राजा दिलीपः कस्याः पतिः आसीत् ?
१०. राजा दिलीपः कस्य वंशस्य राजा आसीत् ?
११. राज्ञः दिलीपस्य कुलगुरुः कः आसीत् ?
१२. राजा दिलीपः किमर्थं दुःखी आसीत् ?
१३. महर्षिणा वशिष्ठेन कस्याः सेवां कर्त्तुम् आदेशः दत्तः ?
१४. नन्दिनी गौः कस्याः पुत्री आसीत् ?
१५. महाकविः कालिदासः कस्य अलङ्कारस्य प्रयोगे सिद्धः प्रसिद्धश्च ?

**( ख ) लघूत्तरात्मकप्रश्नाः –**

१. रघुवंशस्य प्रथमे श्लोके शिवपार्वत्योः तुलना काभ्यां सह कृता अस्ति ?
२. राज्ञः दिलीपस्य सन्ततिरभावस्य कारणं संस्कृतभाषया लेखनीयम् ।
३. गुरोः वशिष्ठस्य आश्रमगमनमार्गस्य संक्षिप्तवर्णनं स्वशब्दैः कर्त्तव्यम् ।
४. राज्ञा दिलीपेन कथं राज्यसञ्चालनं क्रियते स्म इति लेखनीयम् ।
५. राज्ञा दिलीपेन राज्ञ्या सुदक्षिणया च नन्दिनी–गोः सेवा केन प्रकारेण कृता ?

**( ग ) विवरणात्मकप्रश्नाः –**

१. रघुवंशस्य प्रथमसर्गस्य कथासारः संस्कृतभाषया लेखनीयः।
२. 'उपमा कालिदासस्य' इति सूक्तेः संस्कृतभाषया व्याख्या कर्त्तव्या।
३. महाकविकालिदासस्य संक्षिप्त–परिचयः संस्कृतेन लेखनीयः।
४. महाकविकालिदासविरचितग्रन्थानां संक्षिप्तवर्णनं स्वशब्दैः करणीयम्।

# महाकविभासप्रणीतं स्वप्नवासवदत्तम्

# प्रास्ताविकम्

## नाट्यस्य ( नाटकस्य ) उद्भवो विकासश्च

नाट्यस्य उद्भवविषये बहूनि मतानि प्रचलितानि सन्ति। तेष्वेव भरतमुनिप्रणीतस्य नाट्यशास्त्रस्य प्रथमेऽध्याये कथैकाऽऽगच्छति। तदनुसारं लौकिकान् अत्यधिकं खिद्यमानान् दृष्ट्वा इन्द्रादयो देवा ब्रह्माणमुपगत्य निवेदितवन्तः। देव! सर्वविधजनानां मनोविनोदाय कश्चन नूतनो वेद आवश्यकः। देवानां तन्निवेदनं श्रुत्वा ब्रह्मा चतुर्भ्यः वेदेभ्यः पञ्चमवेदत्वेन नाट्यवेदं सृष्टवान्। यथा –

**एवं सङ्कल्प्य भगवान् सर्ववेदाननुस्मरन्।**
**नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसम्भवम्॥**
**जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसानाथर्वणादपि॥**

एवं रीत्या नाट्यवेदस्य रचनां विधाय ब्रह्मा तत्प्रचाराय इन्द्रमादिष्टवान्, किन्तु नाट्यकर्मणि देवानामकौशलं विज्ञाय पुनरिन्द्रो ब्रह्मणे निवेदितवान्। यत् देवानामपेक्षया नाट्यप्रयोगे वेदज्ञाः मुनयः समर्थाः सन्तीति। इत्थं ब्रह्मणः आदेशं स्वीकृत्य भरतमुनिना सर्वप्रथमं स्वपुत्रेभ्यो नाट्यवेदस्य शिक्षा दत्ता। नाट्यवेदप्रयोगः भारतीवृत्तितः समारभ्य शृंगारप्रधानायां कैशिकीवृत्तिपर्यन्तं समायोजितः। कैशिक्यां नाट्यप्रयोगं सम्पादयितुम् अप्सरसां कल्पना विहिता। ब्रह्मणः निर्देशानुसारं नाट्यवेदस्य प्रथमः प्रयोग इन्द्रस्य ध्वजोत्सवे कृतः। प्रयोगमिमं दृष्ट्वा मुदितैर्देवैः पात्रेभ्यः नैकविधोपहारा दत्ताः। 'इन्द्रविजयः' इति विषयमादाय नाट्येऽस्मिन् देवानामुत्कर्षं दैत्यानामपकर्षं वीक्ष्य क्रुद्धाः दैत्याः विघ्नोत्पादने संलग्ना अभूवन्। परन्तु इन्द्रः ध्वजेन सकलविघ्नान् नाशितवान्। विघ्नानां जर्जरीकरणेनैव इन्द्रध्वजः जर्जरे'ति' नाम्ना प्रसिद्धिङ्गतः। इन्द्रः विघ्नानां नाशाय नाट्यगृहस्य तथा नाट्यप्रयोगादि रक्षायै च स्वयं ब्रह्मा तत्र देवस्थापनां कृतवान्। ब्रह्मा दैत्यान् सम्बोधयन् उक्तवान् यद् नाट्यवेदोऽयं देवेभ्यः दैत्येभ्यश्चास्ति। ब्रह्मणा बहुधा बोध्यमानाः दैत्याः शान्तिं प्राप्तवन्तः। नाट्यस्य प्रथमप्रयोगे त्रिपुरदाहनामकः डिमः, समुद्रमन्थननामकश्च समवकारः आस्ताम्। एवं रीत्या नाट्यपरम्परायाः प्रारम्भो जातः खलु।

### नाट्यस्य स्वरूपः –

**'अवस्थानुकृतिर्नाट्यम्'** इति। (दशरूपककारः)
**भवेदभिनयोऽवस्थानुकारः स चतुर्विधः।**
**आङ्गिकोवाचिकश्चैवमाहार्यः सात्त्विकस्तथा॥** (साहित्यदर्पणकारः)

अर्थात् नाट्यप्रयोगे अवस्थानुकरणमेवाभिनयो भवति। तच्चतुर्धा – आङ्गिकः अभिनयः (अङ्गमाध्यमेन), वाचिकः (वाण्या), आहार्यः (वेशभूषया), सात्त्विकः (भावप्रदर्शनेन रसेन च)।

## नाट्यस्य ( रूपकस्य ) भेदाः-

**नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।**
**ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश॥ साहित्यदर्पणकारः।**

नाट्यस्य, रूपकस्य वा प्रथमो भेदः 'नाटकम्' इति भवति। तल्लक्षणम् यथा –

**नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम्।**
**विलासद्धर्यादिगुणवद्युक्तं नानाविभूतिभिः॥**
**सुखदुःखसमुद्भूति - नानारसनिरन्तरम्।**
**पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः॥**
**प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्।**
**दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः॥**
**एक एव भवेदङ्गी शृङ्गारो वीर एव वा।**
**अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतः॥**
**चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपुरुषाः।**
**गोपुच्छाग्रसमाग्रं तु बन्धनं तस्य कीर्तितम्॥**

## नाट्य-प्रयोजनम्

आचार्यभरतेन नाट्यशास्त्रे नाट्यस्य नैकविधानि प्रयोजनानि प्रोक्तानि सन्ति –

**उत्तमाधममध्यमानां नराणां कर्मसंश्रयम्।**
**हितोपदेश जननं धृतिक्रीडासुखादिकृत्॥**
**दुःखार्त्तानां श्रमार्त्तानां शोकार्त्तानां तपस्विनाम्।**
**विश्रान्ति जननं काले नाट्यमेतद् भविष्यति॥**
**धर्म्यं यशस्यमायुष्यं हितं बुद्धिर्विवर्धनम्।**
**लोकोपदेश जननं नाट्यमेतद् भविष्यति॥**

नाट्यस्य इतोऽपि महिमानं वर्णयन्नाह भरतः –

**न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**
**न स योगो न तत्कर्म नाट्येऽस्मिन् यन्न विद्यते॥**

महाकविकालिदासेनापि नाट्यस्योपादेयता महत्ता वा इत्थं वर्णिता –

'**नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्**' इति।

## संस्कृतस्य प्रसिद्ध-नाटकानि

**१. अभिज्ञानशाकुन्तलम्** – इयं महाकविकालिदासस्य सर्वोत्कृष्टा नाट्यरचना अस्ति। सप्ताङ्केषु नाटकमिदं सर्वैः नाटकीयतत्त्वैः काव्यप्रतिभया च पूर्णं वर्तते। अस्मिन् दुष्यन्तस्य शकुन्तलायाश्च प्रणयस्य, वियोगस्य पुनर्मिलनस्य च कथायाः रुचिकरं वर्णनमस्ति।

**२. मृच्छकटिकम्** – नाटकमिदं शूद्रकविरचितसंस्कृतनाट्यसाहित्यस्य अनुपमं प्रकरण रत्नमस्ति। अस्मिन् तात्कालिक भारतीयसमाजस्य समग्रं चित्रं प्रस्तुतमस्ति। ब्राह्मणः चारुदत्तः नायकः अस्ति गणिका वसन्तसेना च नायिका।

**३. मुद्राराक्षसम्** – नाटकस्यास्य रचयिता विशाखदत्त अस्ति। संस्कृतनाटकसाहित्ये अस्य विशिष्टं स्थानमस्ति। अस्मिन् कुटनीतेः राजनीतेश्च सर्वाङ्गपूर्णं सुन्दरं सफलञ्च चित्रणमस्ति।

**४. उत्तररामचरितम्** – इदं भवभूतेः सर्वोत्कृष्टं नाटकमस्ति। अस्मिन् सप्ताङ्काः सन्ति। रामायणस्य उत्तरकाण्डमाधारीकृत्य रचितं वर्तते।''उत्तररामचरिते भवभूतिर्विशिष्यते।''

**५. वेणीसंहारम्** – भट्टनारायणस्य प्रसिद्धमिदं नाटकमस्ति। महाभारतस्य एकां महत्त्वपूर्णघटनां स्वीय नाट्यकौशलेन परिष्कृत्य, परिशील्य, नूतनं स्वरूपं प्रस्तुतं कविना।

**६. स्वप्नवासवदत्तम्** – नाटकमिदं भासस्य सर्वाधिकं प्रसिद्धं नाटकमस्ति। कथाबन्धस्य रङ्गमञ्चस्य च दृष्ट्या संस्कृतसाहित्ये अद्वितीयेयं कृतिः।

**७. हनुमन्नाटकम्** – इदं दामोदरमिश्रविरचितं महानाटकमस्ति। हनुमतः उदात्तचरितं वर्णितमस्ति। वर्णनात्मकशैल्यां रचितमस्ति। अस्मिन् विदूषकस्य प्राकृतगद्यांशस्य च अभावः वर्तते।

अन्यान्यपि प्रसिद्धनाटकानि सन्ति।

## भासस्य जीवनवृत्तम्

भासः वर्णाश्रमव्यवस्थायाः समर्थकः आसीत्। सः विद्वान् धार्मिकः सत्यवादी चासीत्। स्वभावेन विनम्र, विनोदप्रियः प्रत्युत्पन्नमतिः चासीत्। मनुष्यस्वभावस्य प्राकृतिकसौन्दर्यस्य प्रेमी चासीत्। तेषां कौटुम्बिकं जीवनं सुखमयमासीत्। भासः साहित्यशास्त्रपारावारपारदृश्वाविद्वान् आसीत्। वेदानाम् इतिहासस्य, पुराणस्य, लोककथानाम्, अर्थशास्त्रस्य राजनीतिशास्त्रस्य धर्मशास्त्रस्य च ज्ञाता। वैष्णवधर्मावलम्बी आसीत्। रामस्य कृष्णस्य च चरितेषु भासस्य भक्तेः पुष्टिः भवति। वैदिककर्मकाण्डे पूर्णविश्वासः आसीत्।

## भासस्य स्थितिकालः

१. भासस्य नाटकानामाधारः रामायणं महाभारतं लोककथाश्च सन्ति। उदयनः, प्रद्योत: दर्शकश्च ई०पू० षष्ठीशताब्द्याः ऐतिहासिकपुरुषाः सन्ति। अतः भासस्य समयः षष्ठी शताब्दी ई०पू० इति स्वीकर्तुं शक्यते।

२. प्रतिज्ञायौगन्धरायणः अविमारकम् एवं स्वप्नवासवदत्तम् एतेषु नाटकेषु ऐतिहासिकतथ्यानि मिलन्ति। राजगृहस्य राजधानीरूपेण पाटलिपुत्रस्य साधारणनगररूपेण वर्णनमस्ति। अतः पञ्चमी शताब्दी स्वीकर्तुं शक्यते।

३. प्रो० बलदेव उपाध्यायः भासस्य समयः पञ्चमी शताब्दी ई०पू० इति स्वीकरोति।

विभिन्नैः विद्वद्भिः प्रस्तुततर्कैः भासस्य स्थितिकालः चतुर्थीशताब्दी ई०पू० इति युक्तियुक्तः प्रतीयते।

## भासस्य नाटकानि

संस्कृतसाहित्ये येषां यशस्विनां नाटककर्तृणां गणना भवति, तेषु महाकवेः भासस्य नाम प्राथम्येनागच्छति। ''भासो हासः कविकुलगुरुः कालिदासो विलासः'' इत्युक्ते महाकविभासः सर्वश्रेष्ठनाटककारः उद्घोषितः। वस्तुतः संस्कृतसाहित्ये नाट्यकलाक्षेत्रे भासस्य महत्त्वपूर्णं योगदानं वर्तते।

महाकवेः भासस्य अद्यावधि त्रयोदशनाटकानि प्राप्तानि सन्ति। एतेषां विषयाः विविधस्थानेभ्यः गृहीताः। जनजीवने प्रस्तुतघटनाः एव नाटकानां विषयः स्वीकृतोऽस्ति। सप्तनाटकानि महाभारतमाधारीकृत्य सन्ति। नाटकद्वयं सम्राट् उदयनस्य सम्बन्धं स्थापयति। नाटकद्वयं रामायणकथाभ्यः पुनश्च नाटकद्वयं कल्पनामूलकमस्ति। सर्वत्र भासस्य मौलिकता, कल्पनाशक्तेश्च सञ्चारोऽस्ति। नाट्यकलाकौशलेन भासस्य मौलिकप्रतिभायाः प्रमाणं मिलति। भासस्य नाटकाधारक्रमः इत्थमस्ति –

**१. दूतवाक्यम्** – अयम् एकाङ्की व्यायोगः अस्ति। अस्य कथानकं महाभारतमाधारीकृत्य अस्ति। अस्मिन् पाण्डवपक्षतः सन्धिप्रस्तावं संधार्य भगवान् श्रीकृष्णः कौरवपक्षस्य शिविरम् आगच्छति। ततः विफलो भूत्वा प्रतिनिवर्तते।

**२. कर्णभारम्** – एकाङ्किरूपकेऽस्मिन् दानवीर-कर्णस्योदात्त चरित्रं वर्णितमस्ति। अस्यापि कथानकं महाभारतादेव। ब्राह्मणवेषधारी देवराजः इन्द्रः कर्णं कवचं कुण्डलौ च याचते। कर्णः इन्द्राय कवचं कुण्डलौ च ददाति।

**३. दूतघटोत्कचम्** – एकांकी उत्सृष्टिकाङ्कः अस्ति। अस्य कथा अभिमन्युमृत्योः पश्चात् क्रमेण चलति। अर्जुनस्य जयद्रथवधस्य प्रतिज्ञा, श्रीकृष्णेन दूतरूपेणप्रेषितस्य घटोत्कचस्याद्वितीयशौर्यमयचरितं चित्रितं वर्तते। अत्र संवादः वीररसपूर्णः अस्ति।

**४. उरुभङ्गम्** – एकाङ्की एव। कथानकमपि महाभारतस्य एव। भीमसेनदुर्योधनयोः अन्तिमगदायुद्धस्य मार्मिकं वर्णनमस्ति। दुःखान्तं नाटकमिदम्।

**५. मध्यमव्यायोगः** – महाभारतमाधारीकृत्य भासस्य लघुनाटकमस्ति। भीमः एकस्य ब्राह्मणपुत्रस्य रक्षां घटोत्कचात् कृतवान्। भीमसेनः पाण्डवेषु मध्यमः आसीत्। अतः अस्य नाटकस्य नाम मध्यमव्यायोगः अभवत्।

**६. पञ्चरात्रम्** – त्रयाणामङ्कानां समवकारः अस्ति। अस्मिन् महाभारतस्य एकां घटनां स्वीकृत्य रचितम् अस्ति।

**७. बालचरितम्** – श्रीकृष्णकथामूलकं पञ्चानामङ्कानां नाटकमिदमस्ति। अस्मिन् श्रीकृष्णजन्मनः कंसवधपर्यन्तं श्रीकृष्णस्य चरित्रं वर्णितमस्ति।

**८. प्रतिमानाटकम्** – रामायणमाश्रित्य सप्तानामङ्कानां नाटकम् इदमस्ति। रामस्य वनगमनतः रावणवधानन्तरं पुनः अयोध्यऽऽगमनपर्यन्तं वर्णनमस्ति।

**९. अभिषेकनाटकम्** – षण्णामङ्कानां नाटकमिदं रामायणमाश्रित्य रचितम् अस्ति।

**१०. प्रतिज्ञायौगन्धरायणम्** – अस्मिन् चत्वारः अङ्काः सन्ति। अस्मिन् मन्त्री यौगन्धरायणः प्रतिज्ञां करोति यत् सः राजानमुदयनम् उज्जैनस्य राज्ञः प्रद्योतात् मुक्तं कारयित्वा आनेष्यति। सः यौगन्धरायणः सफलः जातः। प्रतिज्ञा तस्य पूर्णा। अतः प्रतिज्ञायौगन्धरायणम् इति नाम जातम्।

**११. स्वप्नवासवदत्तम्** – षण्णामङ्कानां नाटकमस्ति। भासनाटकचक्रे अत्यधिकं प्रसिद्धमस्ति।

**१२. अविमारकम्** – कल्पनामूलकमिदं नाटकम्। अत्र षड् अंकाः सन्ति। राज्ञः कुन्तिभोजस्य रूपवती कन्या ''कुरङ्गी'' अस्य नायिका वर्तते। अविमारकः राजपुत्रश्चास्य नायकः। अत्र उभयोः प्रेमविवाहस्य कथायाः चित्रणमस्ति।

**१३. चारुदत्तम्** – कल्पनामूलकमस्ति। अद्यावधि चत्वारः अङ्का एव प्राप्ताः। अस्मिन् नाटके कारागारे गणिकया वसन्तसेनया सह एकस्य सदाशयनिर्धनब्राह्मणस्य चारुदत्तस्य सात्विकप्रेम्णः चित्रणमस्ति।

## भासस्य नाट्यकला

संस्कृतस्य सर्वप्रथमनाटककर्तृषु भासस्य विशिष्टं स्थानमस्ति। महाकविभासः स्वनाटकेषु पुराणानाम् इतिहासस्य, महाभारतस्य, आख्यायिकायाः, लोकप्रचलितकथानकानाम् अभिनवप्रयोगं कृतवान्। तस्य नाटकेषु मौलिकतायाः, कल्पनायाश्च वैचित्र्यं पूर्णरूपेण अस्ति। अभिनयदृष्ट्या भासस्य नाटकानि सफलानि सन्ति। कथानकं, पात्राणि, भाषा, शैली, स्थानकालसंवादादीनि सर्वाणि तत्त्वानि अनुकूलानि सन्ति। संस्कृतक्षेत्रे भास एव सर्वप्रथमं ''एकाङ्कि–नाटकम्'' अलिखत्। पात्राणां चरित्रचित्रणेऽपि भासः कुशलोऽस्ति। तस्य नाटकेषु संवादः संक्षिप्तः, प्रभावोत्पादकः तथा च वर्णनं यथार्थमस्ति।

भासस्य नाटकेषु अलङ्कारविधानमपि दर्शनीयमस्ति। सर्वेषां नाटकानां कथावस्तु प्रभावोत्पादकघटनाभिः पुष्टम् अस्ति। स्वाभाविकगतिशीलतया सह रसपरिपाकोऽपि समुचितरूपेण भवति। अत एव ज्ञायते भासः कुशलः नाटककारः अस्ति।

## पात्राणां चरित्र-चित्रणवैशिष्ट्यम्

भासेन नाट्यपात्राणां चरित्रचित्रणमपि कुशलतया कृतम्। धीरोदात्तः, धीरोद्धतः, धीरललितः, दैवी, आसुरी, खलपात्राणि च भासस्य नाटकेषु मिलन्ति येषु पात्रानुगुणं सन्निवेशोऽपि दृश्यते।

नाटकानुकूलमेव नायकस्य चयनमस्ति। प्रत्येकं पात्रस्य सजीवमङ्कनमस्ति। सर्वत्र आदर्शप्रस्तुतिः वर्तते।

## भासस्य शैली

भासस्य नाट्यशैली विशिष्टा अस्ति। यत्र

**१. व्यापकता, प्रभावोत्पादकता च** – भासस्य नाटकेषु द्वयोरपि मणिकाञ्चनसंयोगः। गम्भीरसरसभावानां लघुवाक्येषु अभिव्यक्तिक्षमता अकल्पनीयाऽस्ति।

**२. गुणरीतयः** – भासस्य शैल्यां प्रसादः, माधुर्यम्, ओजश्च गुणत्रयम् अस्ति। भाषायां सरलतायाः, सरसतायाः, सुगमताया, स्वाभाविकतायाश्च प्रयोगः संवादप्रवाहं विशेषेण पुष्णाति।

**३. वर्णनकौशलम्** – भासः स्वनाटकेषु प्रसङ्गानां स्वाभाविकं वर्णनं कृतवान्। अतः पाठकाः दर्शकाश्च मुग्धाः तल्लीनाश्च भवन्ति।

**४. भावस्फुटनम्** – भासनाटकेषु भारतीयसंस्कृतेः, भावानाञ्च दर्शनं भवति यथा – पितृभक्तिः, पातिव्रत्यम्, तितिक्षा, त्यागादीनामादर्शः प्राचुर्येण दृश्यते। इत्थं शीलनिर्वहनं सम्यक्तया कृतम्।

**५. भाषा** – भासस्य भाषा प्रसादगुणयुक्ताऽस्ति। सम्यक् अभिव्यक्तिः, मनोरञ्जकता, गाम्भीर्यम्, औदार्यम्, माधुर्यम् च शैल्याः वैशिष्ट्यम् अस्ति। तस्मादेव बहुविधनाटकानां प्रणेताऽयं भासः कविभिः ''भारतीवृत्तेः आचार्यः'' इति स्वीक्रियते।

**६. व्याकरणज्ञानं पाण्डित्यञ्च**– शास्त्रीयविद्वत्तायाः व्याकरणज्ञानस्य परिचयञ्च यथायथं प्राप्यते।

**७. रसः** – काव्यसम्मतानां सर्वेषां रसानां प्रयोगः भासेन कृतः। वासवदत्तानाटके संयोगस्य, विप्रलम्भशृङ्गारस्य च प्राचुर्येण प्रयोगः अस्ति। सञ्चारिभावास्तु अत्र नाटके प्रतिप्रसङ्गं मुख्यं रसं पोषयन्तः सञ्चरन्ति एव। गम्भीरभावानामपि सरसाभिव्यञ्जना भासस्य अभिव्यक्तिसामर्थ्यं पुष्णाति।

**८. अलङ्कारः** – भासस्य नाटकेषु स्वभावोक्तिः परिकरः अर्थान्तरन्यासादयः अलङ्काराः भावाभिव्यञ्जनायै एव प्रयुक्ताः सन्ति।

निष्कर्षतः महाकविभासस्य नाट्यशैली अतिविशिष्टा प्रभावोत्पादिका प्रवाहयुक्ता सर्वगुणसम्पन्ना च वर्तते। अत एवोच्यते ''**भासो हासः कविकुलगुरुः कालिदासो विलासः**'' **इति।**

# पात्र - परिचयः

## पुरुषपात्राणि

| | | | |
|---|---|---|---|
| 1. | सूत्रधारः | – | नाटकस्य प्रारम्भकर्ता रङ्गमञ्चाध्यक्षश्च |
| 2. | उदयनः | – | नाटकस्य नायकः वत्सदेशस्य राजा च। |
| 3. | यौगन्धरायणः | – | राज्ञः उदयनस्य प्रधानामात्यः। |
| 4. | रुमण्वान् | – | राज्ञः उदयनस्य द्वितीयः मन्त्री। |
| 5. | वसन्तकः | – | उदयनस्य शृङ्गारसहायकः विदूषकश्च। |
| 6. | ब्रह्मचारी | – | लावाणक ग्रामेऽध्ययनरतो विद्यार्थी। |
| 7. | काञ्चुकीयः | – | (अ) मगधराजस्यान्तःपुरस्याधिकारी ब्राह्मणः।<br>(ब) अवन्तिनृपतेरन्तःपुरस्याधिकारी ब्राह्मणः। |
| 8. | आरुणि | – | राज्ञः उदयनस्य शत्रुः। |
| 9. | गोपालकपालकौ | – | प्रद्योतस्य पुत्रौ, वासवदत्तायाः भ्रातरौ च। |
| 10. | प्रद्योतः | – | अवन्त्याः नृपतिः वासवदत्तायाः पिता च। |
| 11. | दर्शकः | – | मगधराजः, पद्मावत्याः भ्राता च। |
| 12. | पुष्पकभद्रकौ | – | वत्सराज्यस्य आदेशिकौ |
| 13. | भटौ | – | मगधनरेशस्य सेवकौ। |

## स्त्रीपात्राणि

| | | | |
|---|---|---|---|
| 1. | वासवदत्ता | – | उदयनस्य पट्टराज्ञी, प्रद्योतस्य पुत्री आवन्तिका च। |
| 2. | पद्मावती | – | दर्शकस्य भगिनी उदयनस्य द्वितीयपत्नी च। |
| 3. | अङ्गारवती | – | वासवदत्तायाः माता प्रद्योतपत्नी च। |
| 4. | धात्री | – | पद्मावत्याः उपमाता। |
| 5. | वसुन्धरा | – | वासवदत्तायाः उपमाता। |
| 6. | चेटी | – | पद्मावत्याः विश्वस्ता सेविका। |
| 7. | मधुरिका | – | |
| 8. | पद्मिनिका | – | पद्मावत्याः सख्यः। |
| 9. | कुञ्जरिका | – | |
| 10. | तापसी | – | तपोवनस्था वृद्धा स्त्री। |

# अङ्कशः संक्षिप्त-कथावस्तु

**1. प्रथमोऽङ्कः** – मङ्गलगानान्तरं सूत्रधारः रङ्गमञ्चमधिरुह्य प्रार्थयते यत् भगवतो बलरामस्य भुजौ दर्शकवृन्दं रक्षताम्। ततः नेपथ्ये उत्सरत उत्सरत इत्ययं ध्वनिः भवति। तच्छ्रुत्वा सूत्रधारः कथयति – अरे! एतैः मगधराजपुत्र्याः सेवकैः तपोवनगतः सर्वो जनः उत्सार्यते खलु। तदा सूत्रधारे गते सति अवन्तिकावेषधारिणी वासवदत्ता संन्यासिवेषधारी यौगन्धरायणश्च तत्रागत्य उत्सारणमाकर्ण्य दुःखितौ भवतः। पद्मावती तापस्यनुरोधात् तत्र आश्रमे तिष्ठति। काञ्चुकीयः राजपुरुषान् अवरुणद्धि पद्मावत्याज्ञया च याचकेभ्यो मनोवाञ्छितं वस्तूनि दातुमुद्घोषयति। उद्घोषणां श्रुत्वा यौगन्धरायणोऽपि (पद्मावतीं महाराजोदयनस्यापरा पत्नी भविष्यतीति मत्वा) स्वभगिनीं वासवदत्तां पद्मावत्याः पार्श्वे न्यासरूपेण स्थापयति। वार्ताक्रमे च तापसी पद्मावत्याः विवाहचर्चां करोति। पद्मावत्याः सेविका तापसीमवबोधयति यत् उज्जयिन्याः राज्ञः प्रद्योतस्य पुत्रेण सह पद्मावत्याः विवाहचर्चा प्रचलन्ती अस्ति। तस्मिन्नेव काले कश्चिद् ब्रह्मचारी तपोवनं प्रविश्य तत्रागमनकारणं सूचयन् यौगन्धरायणं श्रावयति यत् अहं लावाणकग्रामादागतोऽस्मि। तत्राधुना भीषणविपत्तिरागता वर्तते। तत्रोदयनो नाम राजा प्रतिवसति यस्य वासवदत्तानाम्नी प्रियतमा राजमहिषी अग्निना दग्धा। तद्रक्षातत्परोऽमात्यः यौगन्धरायणोऽपि दग्धः। राजोदयनः तदाकर्ण्य दुःखाधिक्यात् स्वयमपि मरणायोद्यतोऽभूत्, परन्तु भाग्येन यथाकथञ्चित् मन्त्रिणा रुमण्वता रक्षितः। ब्रह्मचारिणा राज्ञः स्वास्थ्यलाभाय रुमण्वतोऽपि प्रशंसा कृता। वासवदत्ता उदयनस्य स्वास्थ्यलाभं श्रुत्वा सन्तोषमनुभवति। तदनन्तरं ब्रह्मचारी गच्छति। यौगन्धरायणोऽपि पद्मावत्याः अनुमतिं प्राप्य ततः प्रस्थानं करोति। तापस्याः स्वानुरूपं भर्त्तारं लभस्वेति आशीर्वचनं प्राप्य पद्मावती वासवदत्ता च सन्ध्यासमयमवगत्य पर्णकुटीरं प्रविशतः।

**२. द्वितीयोऽङ्कः** – माधवीलतामण्डपस्य पार्श्वे पद्मावती वासवदत्तया सह कन्दुकेन क्रीडति। तत्समये वासवदत्ता पद्मावतीं प्रति परिहासपूर्वकं कथयति यत् भगिनि! भवती अचिरेणैव महासेनवधूः भविष्यति। तदा पद्मावत्याः चेटी तत्रागत्य रहस्यं प्रकटयति पद्मावती वत्सराजोदयनस्य गुणेषु आकृष्टाऽस्ति। अत्रान्तरे धात्री सूचयति यत् पद्मावत्याः विवाहो महाराजोदयनेन सह निश्चित इति। इदमाकर्ण्य वासवदत्ता दुःखं प्रकटयति। तस्मिन्नेव काले अपरा चेटी आगत्य सूचयति यत् अद्यैव विवाहस्य शुभवेला वर्तते अतः सज्जाकरणीयाऽस्ति। ततः सर्वा अपि निर्गच्छन्ति।

**३. तृतीयोऽङ्कः** – मगधनरेशस्य राजभवने पद्मावत्याः विवाहोत्सवः भवति। वासवदत्तायाः कृते दृश्यमिदम् असहनीयमस्ति। अतः सा प्रमदवनं गच्छति। ततः वासवदत्तां मृग्यमाणा एका भृत्या उद्यानमागत्य तां मालां गुम्फितुं कथयति। वासवदत्तायै यद्यपि कार्यमिदं न रोचते, तथापि सा तत् करोति। सा मालायां पुष्पैः सह 'अविधवाकरणम्' इत्यौषधं गुम्फति किन्तु 'सपत्नीमर्दनं नामौषधं न गुम्फति। तावदेका अन्या भृत्या आगत्य मालां स्वीकृत्य प्रयाति। वासवदत्ता विषण्णा भूत्वा शान्त्यर्थं शयनाय प्रतिगच्छति।

**४. चतुर्थोऽङ्कः**– विवाहोत्सवेऽत्यधिकं भोजनकरणेन विदूषकस्य आहारः सुष्ठु न परिणमति मन्दाग्निश्च जातः। तदनन्तरं पद्मावती वासवदत्तया दास्या च सह प्रमदवनम् आगच्छति। वार्तालापे पद्मावती उदयनं प्रति स्वानुरागं

प्रकटयति। तत्समये उदयनविदूषकौ तत्रागच्छतः। पद्मावती वासवदत्तायाः सम्मुखे उदयनेन सह मेलनं नेच्छति। अतः सा लताकुञ्जं गच्छति। उदयनविदूषकावपि लताकुञ्जं प्रति गन्तुमुद्यतौ स्तः। तावदेका दासी मधुकरपरिनिलीनामवलम्बलतामवधूय राजानं वारयति। तस्मात् तौ तत्र शिलाखण्डे उपविशतः। विदूषकः वासवदत्तायाः पद्मावत्याः च विषये का भवतः प्रिया इति पृच्छति। महाराजोदयनः वासवदत्ताविषयकं प्रगाढं प्रेम प्रकटयति, अश्रूणि निपतन्ति च। विदूषकः मुखप्रक्षालनार्थं जलमानयति। प्रणयसङ्कटेऽस्मिन् विदूषकः राजानं स्मारयति यदद्य मगधराजदर्शकेन भवन्तमग्रतः कृत्वा प्रीत्युत्सवस्यायोजनं निश्चितं कृतमस्ति। अतः तत्र गमनार्थं शीघ्रता करणीया। तदनन्तरम् उभावेव निर्गच्छतः।

**५. पञ्चमोऽङ्कः** – पञ्चमोऽङ्कस्य प्रारम्भे पद्मावती शिरोवेदनया पीडिता दृश्यते। पद्मावत्याः शिरोवेदनायाः सूचना उदयनाय दातुं पद्मिनिका सेविका वसन्तकं सूचयति। वसन्तकमुखाच्छ्रुत्वा राजा बहुकष्टमनुभवति। पद्मावतीं द्रष्टुमुत्सुको भूत्वा वसन्तकेन सह समुद्रगृहं प्रति धावन् गच्छति। किन्तु शय्यायां पद्मावती न मिलति। तस्याः प्रतीक्षायां राजा शयनं करोति। विदूषकः शीतनिवारणार्थं प्रावारकमानेतुं निर्गच्छति। तस्मिन्नेव समये वासवदत्ता पद्मावत्याः शिरोवेदनां ज्ञात्वा त्वरया तत्रागच्छति। सा वस्त्रावृत्तं राजानं पद्मावतीमवगत्य तस्य समीपे शयनं करोति। शयनसमकाल एव तस्याः हृदयेऽपूर्वानन्दानुभूतिर्जायते। राजोदयनः स्वप्ने वासवदत्तां स्मृत्वा वदति – हा वासवदत्ते! वासवदत्ता तच्छ्रुत्वा पर्यङ्कात् सहसोत्थाय उदयनस्यावलम्बमानं हस्तं शय्योपरि निधाय अन्यदर्शनभयात् बहिर्गच्छति। प्रियतमायाः वासवदत्तायाः स्पर्शसुखमनुभूय राजा झटिति उत्थाय शब्दं कुर्वन् तामनुधावति, किन्तु द्वारताडितः सन् तत्र पतति। स विदूषकं कथयति यत् वासवदत्ता जीविताऽस्ति। परं विदूषको विश्वासं नैव कृत्वा वदति यत् सा स्वप्ने दृष्टा भवेत् अथवाऽस्मिन्नगरे अवन्तिसुन्दरी नामिकायाः यक्षिण्याः दर्शनमभवत्। तस्मिन्नेव समये काञ्चुकीय आगत्य सूचयति – भवतः सेनापतिः रुमण्वान् मगधराजस्य सैन्यसहायतया शत्रुमारुणिमाक्रमितुं समायातोऽस्ति। अस्माकं सेनाऽपि सिद्धा वर्तते। राजा उत्साहं प्रदर्शयन् युद्धाय प्रस्थानं करोति।

**विशेषः** – महाकविभासेन स्वप्ने दृष्टां वासवदत्तामेवाश्रित्य नाटकस्य नामकरणं स्वप्नवासवदत्तमिति कृतम्। अस्मादेवास्याङ्कस्य महत्त्वं सर्वाधिकं वर्तते।

**६. षष्ठोऽङ्कः** – षष्ठाङ्कस्यारम्भे काञ्चुकीयः महाराजोदयनाय निवेदयितुं प्रतीहारीमादिशति यत् महासेनस्य सकाशाद् रैभ्यसगोत्रः काञ्चुकीयः वसुन्धरानाम वासवदत्ताधात्री च प्रतीहारमुपस्थिताविति। किन्तु प्रतीहारी कथयति यत् अदेशकालः प्रतीहारस्य। यतोहि घोषवतीवीणा वासवदत्तायै रोचते स्म, सा वीणा केनापि महाराजाय प्रदत्ता। तां वीणां स्वीकृत्य राजा स्वाङ्केनिधाय तामुपालम्भमानोऽतीव खिन्नः सन् रोदिति। तदनन्तरं प्रतीहारी महासेनकाञ्चुकीयस्य वासवदत्ताधात्र्याश्चागमनं राज्ञे निवेदयति। उभावेव ससम्मानमागत्य महासेनस्य सन्देशं श्रावयतः यत् आवाभ्यां तव वासवदत्तायाश्च प्रतिकृतिं चित्रफलके विरच्य विवाहो निवृत्तः – इत्युक्त्वा चित्रफलकं महाराजोदयनाय समर्पितम्। वासवदत्तायाश्चित्रम् दृष्ट्वा पद्मावती राजानमुक्तवती यत् एतादृशी सुन्दरी स्त्री तु एकेन विप्रेण स्वभगिनीति बोधयित्वा न्यासरूपेण मम पार्श्वे स्थापिताऽऽसीत्। राजा शीघ्रमेव तामानेतुमादिशति। अस्मिन्नेवावसरे परिव्राजकवेषधरो यौगन्धरायण आगत्य स्वभगिनीमावन्तिकां याचते। पद्मावती न्यासतया रक्षितां तामावन्तिकामानयति। वासवदत्ताधात्री वसुन्धरा तामवलोकनमात्रेणैव परिचिनोति यदियं भर्तृदारिका वासवदत्ताऽस्ति। वासवदत्ता आर्यपुत्रमुदयनं सोल्लासं प्रणमति। यौगन्धरायणोऽपि कल्पितवेषमपसार्य जयघोषं कुर्वन् पादयोः पतित्वा राजानं क्षमां याचमानः कथयति – स्वामिनः कल्याणार्थं मया वासवदत्ता भवतो दूरम् आनीता। अतः क्षन्तव्योऽहम्। राजोदयनः स्वप्रधानामात्यं यौगन्धरायणमुत्थाप्य आलिङ्गति प्रशंसां करोति च। इत्थं राज्येन सहैव वासवदत्ताया अपि प्राप्तेः कारणाद् नाटकमिदं सुखान्तं जातम्।

# प्रमुखपात्राणां परिचयः

**१. उदयनः** – ''स्वप्नवासवदत्तम्'' नाटकस्य नायकोऽस्ति। सः सर्वगुणसम्पन्नो धीरललितश्चास्ति। सः पराक्रमी, क्षत्रियः, गम्भीरः, धीरः, सुशीलतायाः प्रतिमूर्तिरस्ति। सः एकः विश्वसनीयः पतिः अस्ति। तस्य वासवदत्तां प्रति प्रेमाधिक्यमस्ति। वासवदत्ताया आकृतिः तस्य अक्ष्णोः प्रत्यक्षं भवति। पद्मावतीं प्रत्यपि तस्य निश्छलं प्रेम भवति, तस्याः शिरोवेदनां ज्ञात्वा महत्कष्टमनुभवति।

**२. वासवदत्ता** – नाटकस्यास्य इयं प्रधानास्वीया (मध्या) नायिका अस्ति। सा अवन्तिनरेशप्रद्योतस्य पुत्री उदयनस्य प्रथमभार्या चास्ति। वासवदत्ता राजमहिष्यनुरुपा लावण्या, स्निग्धा, महाकुलप्रसूता चास्ति। सा पतिपरायणा स्त्री अस्ति। नाटकेऽस्मिन् सा उदयनस्य प्रियशिष्या प्रियभार्या च तथा पत्युः हिताय सर्वस्वबलिदानकर्त्री चित्रिता वर्तते। तस्याः चरित्रे उदारता, शीलता, संयमिता, धीरता संवेदनशीलता चास्ति। आत्मसम्मानस्य भावना दृढा अस्ति तस्याः।

**३. पद्मावती** – नाटकस्य अपरा स्वीया (मुग्धा) नायिका अस्ति। सा मगधनरेशदर्शकस्य भगिनी राज्ञः उदयनस्य द्वितीया पत्नी च वर्तते। पद्मावती उदारहृदया, धर्मप्रिया, प्रतिज्ञापालिका, सहानुभूतिशीला सत्यवादिनी कर्त्तव्यपरायणा स्त्री चास्ति। स्वपतिं प्रति हृदये शाश्वतं प्रेम धारयति। नारीसुलभईर्ष्यायाः सर्वथाऽभावो दृश्यते। विदूषकः पद्मावतीगुणविषये कथयति – तत्र भवती पद्मावती तरुणी, दर्शनीया, अकोपना, अनंहकारा, मधुरवाक् सदाक्षिण्येति।

**४. यौगन्धरायणः** – यौगन्धरायणः वत्सराजोदयनस्य प्रधानमन्त्री अस्ति। राजनीतौऽसौ चाणक्यसदृश दूरद्रष्टाऽस्ति। नाटकस्यास्यायं महत्त्वपूर्णं पात्रमस्ति। सः स्वामिभक्तो वर्तते। सः प्राणपणेनापि स्वामिनः भद्रं वाञ्छति। स्वस्वामिहिताय कष्टं सोढुं सर्वदा तत्परो भवति। एवं प्रकारेण यौगन्धरायणो वत्सराजोदयनस्य परमहितैषी, स्वामिभक्तमन्त्री चास्ति।

**५. वसन्तकः** – नाटकेऽस्मिन्नेषः विदूषकः अस्ति। नाटककारभासस्य अन्यनाटकापेक्षयाऽस्य विदूषकः स्वभावेनातिशयेन गम्भीरो वर्तते। स न केवलं हास्यरसप्रधानः भोजनभट्टश्च अपितु राज्ञः प्रत्येकं कार्ये तर्कपूर्णं साहाय्यमाचरति। सः उदयनस्य कुशलनर्मसचिवतया प्रमुखः सहायकोऽस्ति।

## महाकविभास प्रणीतं

# 'स्वप्नवासवदत्तम्'

## अथ प्रथमोऽङ्कः

नान्द्यन्ते ततः प्रविशति सूत्रधारः।

नान्दी पाठ के पश्चात् सूत्रधार रङ्गमञ्च पर प्रवेश करता है।

**सूत्रधारः** –

**प्रसङ्गः** – नान्दी-पाठान्तरं नाटकस्य निर्विघ्नं समाप्त्यर्थं

सूत्रधारः आशीर्वादात्मकं वस्तुनिर्देशात्मकञ्च मङ्गलमाचरति –

**उदयनवेन्दु सवर्णावासवदत्ताबलौ बलस्य त्वाम्।**
**पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम्॥ १ ॥**

**अन्वयः** – उदयनवेन्दुसवर्णौ, आसवदत्ताबलौ, पद्मावतीर्णपूर्णौ, वसन्तकम्रौ बलस्य भुजौ त्वां पाताम्।

**पदार्थः** – उदयनवेन्दुसवर्णौ = उदयकालीन नवीन चन्द्रमा के समान वर्ण वाली, आसवदत्ताबलौ = मद्यपान(सोमरसपान) करने से शक्तिशाली अथवा प्रियतमा रेवती को मदिरा देने वाली, पद्मावतीर्णपूर्णौ = श्रीवृद्धि से परिपूर्ण, वसन्तकम्रौ = वसन्तऋतु के समान मनोहर, बलस्य = बलभद्र (बलराम) की, भुजौ = दोनों भुजाएँ, त्वां = दर्शक समूह की, पातां = रक्षा करे।

**हिन्दी अर्थ** – उदयकालीन नूतन चन्द्रमा की तरह उज्ज्वलवर्णवाली, मदिरापान से शक्ति सम्पन्न, श्री (लक्ष्मी और सौन्दर्य) से सुशोभित तथा वसन्त ऋतु के समान सुन्दर बलराम की भुजाएँ तुम्हारी (दर्शक समूह की) रक्षा करें।

**व्याख्या – पर्यायपदानि** – उदयनवेन्दुसवर्णौ = उदयनकालीन नवीन चन्द्रसमानवर्णौ, आसवदत्ताबलौ = आसवेन-मद्येन दत्तम् आसमन्तात् बलं शक्तिः ययोस्तौ वा दत्तः अर्पितः आसवो मद्यं यस्यै सा आसवदत्ता अबला (बलरामप्रिया) रेवती याभ्यां तौ, पद्मावतीर्णपूर्णौ = पद्मायाः लक्ष्म्याः अवत्तीर्णेन अवतारेण पूर्णौ सनाथौ लक्ष्मीयुक्तौ यद्वा पद्मायाः कान्त्या अवतीर्णेन पूर्णौ कान्तियुतावित्यर्थः। वसन्तकम्रौ = वसन्तर्तु इव कम्रौ मनोहरौ, बलस्य = बलभद्रस्य, भुजौ = बाहू, त्वां = दर्शकवृन्दं, पातामं = रक्षताम्॥ १ ॥

**भावार्थः** – नवोदयकालीनचन्द्रमासमानवर्णौ, मद्यपानेन शक्तिसम्पन्नौ अथवा अर्पितः मदिरा यस्यै सा आसवदत्ता अबला रेवती नाम्नी बलरामस्यप्रिया याभ्यां तौ लक्ष्म्याः अवत्तीर्णेन लक्ष्मीयुक्तौ, वसन्तर्तु इव मनोहरौ, बलभद्रस्य बाहू त्वां दर्शकवृन्दं रक्षताम्।।१ ।।

**छन्दः** – प्रस्तुतेऽस्मिन् पद्ये आर्या छन्दो वर्तते। तल्लक्षणं यथा–

यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि।
अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या।।

**अलङ्कारः** – प्रस्तुतेऽस्मिन् पद्ये "उदयनवेन्दुसवर्णौ–पद्मावतीर्णपूर्णौ" इति पदेषु श्लेषालङ्कारो विद्यते। सहैव नाटके वर्णितानां प्रमुखाणां पात्राणां (उदयनः, वासवदत्ता, पद्मावती वसन्तकश्च) कौशलेन नामोल्लेखः कृतः कविना, अस्मात् मुद्रालंकारोऽप्यस्ति। तल्लक्षणमिदं – 'सूच्यर्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः।' पुनश्च उपमालङ्कारोऽपि वर्तते।

**व्याकरणम्** – नवश्चासौ इन्दुः नवेन्दुः उदये नवेन्दुः उदयनवेन्दुः, समानो वर्णो ययोस्तौ सवर्णौ, उदयनवेन्दुना सवर्णौ = उदयनवेन्दुसवर्णौ (तत्पुरुषः) आसवेन दत्तम् आसवदत्तम् अबला (बलरामप्रिया रेवती) याभ्यां तौ आसवदत्ताबलौ (बहुव्रीहिः) पद्माया – अवतीर्णं पद्मावतीर्णं तेन पूर्णौ (तत्पुरुषः) अथवा पद्मस्य अवतीर्णं पद्मावतीर्णं तेन पूर्णौ इति। वसन्त इव कम्रौ वसन्तकम्रौ (उपमितसमासः)– अवतीर्णम् = अव+तॄ+(भावे)क्त। कम्र = कम्+र प्रत्ययः। पातां = पा रक्षणे, लोट् लकारः।

**विशेषः** – प्रस्तुते पद्येऽस्मिन् नाटककारेण बलरामस्य बाहूभ्यां रक्षितुं प्रार्थना कृताऽस्ति। अतः आशीर्वादात्मकं मङ्गलाचरणम्। सहैव नाटकस्य प्रमुखाणां पात्राणां नामोल्लेख–व्याजेन कथावस्तुनो निर्देशनेन वस्तुनिर्देशात्मकं मङ्गलाचरणमप्यस्ति।

**पारिभाषिकशब्दाः** – नान्दी–नन्दन्ति देवा अस्यामिति नान्दी अथवा नन्दयति देवद्विजनृपादीन् इति नान्दी। आचार्य –विश्वनाथानुसारं नान्दी इत्यस्य लक्षणं निम्नप्रकारेणास्ति –

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता।।

अर्थात् नाटक के प्रारम्भ में उसकी निर्विघ्न समाप्ति हेतु देवता, ब्राह्मण तथा राजा आदि की आशीर्वादात्मक स्तुति जिसके द्वारा की जाती है उस श्लोक–पाठ को नान्दी कहते हैं।

**सूत्रधारः** – सूत्रं प्रयोगानुष्ठानं धारयतीति सूत्रधारः। अर्थात् रंगमंच का प्रबन्धक, नाटक का संचालन एवं स्वयं नाटक के प्रारम्भ में उपस्थित होने वाला पात्र। नाट्य के सूत्र को धारण करने वाला और रंगदेवता की पूजा करने वाला सूत्रधार कहलाता है। यथा –

नाट्यस्य यदनुष्ठानं तत् सूत्रं स्यात् सबीजकम्।
रङ्गदैवतपूजाकृत् सूत्रधार इति स्मृतः।।

एवमार्यमिश्रान् विज्ञापयामि। अये! किन्नु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते? अङ्ग! पश्यामि।
इस प्रकार मैं आप श्रीमानों (दर्शक महानुभावों) से यह निवेदन करता हूँ कि.................. अरे! मेरे द्वारा निवेदन करने में व्यस्त होते ही यह शब्द (आवाज) कहाँ से सुनाई पडा। अच्छा, देखता हूँ

(नेपथ्ये) (नेपथ्य में)

उस्सरह उस्सरह अय्या! उस्सरह (उत्सरत उत्सरत आर्याः! उत्सरत!)

हटो, हटो महाशयो! हटो।

**सूत्रधारः** – भवतु विज्ञातम्।

**सूत्रधार** – अच्छा, जान गया।

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये सूत्रधारः मगधराजस्य कन्यानुगामिभिः सेवकैः तपोवनवासिनां धृष्टतयोत्सारणविषये सूचयति–

**भृत्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः।**
**धृष्टमुत्सार्यते सर्वस्तपोवनगतो जनः॥२॥**

**अन्वयः** – तपोवनगतः सर्वो जनः मगधराजस्य कन्यानुगामिभिः स्निग्धैः भृत्यैः धृष्टम् उत्सार्यते ।।२।।

**पदार्थः** – तपोवनगतः = तपोवनवासी(आश्रमवासी), सर्वो जनः = सब आश्रमवासी, मगधराजस्य = मगधनरेश की, कन्यानुगामिभिः = राजकुमारी (पद्मावती)का अनुगमन करने वाले, स्निग्धैः = स्नेही, भृत्यैः = सेवकों द्वारा, धृष्टम् = धृष्टतापूर्वक, उत्सार्यते = हटाये जा रहे हैं॥ २॥

**हिन्दी अर्थ** – तपोवन में रहने वाले सब लोग मगधराज की पुत्री के साथ चलने वाले विश्वस्त सेवकों द्वारा धृष्टतापूर्वक हटाये जा रहे हैं।

**व्याख्या** – **पर्यायपदानि** – तपोवनगतः = तपसः वनं तपोवनं तत्र गतः, आश्रमस्य सर्वः बालवृद्धतापसादि, जनः = लोकः, मगधराजस्य – मगधानां राजा नरेशः, तस्य, कन्यानुगामिभिः = कन्यां पुत्रीम् अनुगन्तुं शीलं येषां तैः, पुत्रीसहचरैः, स्निग्धैः = विश्वस्तैः, भृत्यैः = सेवकैः, धृष्टं = धृष्टतापूर्वकम्, उत्सार्यते = अपसार्यते, मार्गाद्दूरीक्रियते॥२॥

**भावार्थः** – सूत्रधारः सूचयति यत् तपोवनवासिनः (आश्रमस्य सर्वः बालवृद्धतापसादि) जनाः मगधनरेशस्य (दर्शकस्य) राजकुमार्याः पद्मावत्याः विश्वस्तैः अनुचरैः धृष्टतापूर्वकं मार्गाद्दूरीक्रियते।

**छन्दः**– पद्येऽस्मिन् अनुष्टुप् वृत्तमस्ति। तल्लक्षणमिदम् –

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः।।

अर्थात् अनुष्टुप्छन्द के प्रत्येक चरण में पांचवाँ अक्षर लघु और छठा अक्षर गुरु होता है। पहले और तीसरे चरण में सातवाँ अक्षर गुरु होता है और दूसरे व चौथे चरण में लघु होता है।

**अलंकारः** – पद्येऽस्मिन् अनुप्रासालङ्कारो वर्तते।

**व्याकरणम्** – तपोवनगतः = तपसः तपस्यार्थं वा वनं तपोवनम् (ष. त.), तपोवनं गतः इति तपोवनगतः। गतः = गम+क्त। मगधराजस्य = मगधानां राजा मगधराजः (राजन्+टच् प्रत्यय) तस्य मगधराजस्य (ष.त.)। कन्यानुगामिभिः = कन्याम् अनुगन्तुं शीलं येषामस्ति ते कन्यानुगामिनः, कन्या अनु+गम्+णिनि, तैः स्निग्धैः – स्निह्+क्त। भृत्यैः = भृ+क्यप् तुगागम, उत्सार्यते = उत्+सृ+णिच्+लट्।

(निष्क्रान्तः) सूत्रधारः निर्गतः।) सूत्रधार निकल जाता है।

स्थापना 'स्थाप्यते प्रस्तूयते कथावस्तु अस्यामिति।'

**विशेषः** – स्थापना=प्रस्तावना अथवा आमुख।

प्रस्तावनायाः लक्षणं साहित्यदर्पणकारेणैवमुक्तम् –

नटी विदूषको वापि पारिपार्श्विक एव वा।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते।।
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि सा।। (सा.द.६/३१-३२)

(प्रविश्य) (प्रवेश करके।)

**भटौ** – उस्सरह उस्सरह अय्या! उस्सरह! (उत्सरत उत्सरत आर्याः! उत्सरत।)

**दो सिपाही** – हटो, हटो महानुभावो! हटो।

[ततः प्रविशति परिव्राजकवेषो यौगन्धरायणः आवन्तिकावेषधारिणी वासवदत्ता च] तदनन्तर संन्यासी का वेष धारण किये हुये यौगन्धरायण और अवन्तिदेश की स्त्रियों के वेष में वासवत्ता, मञ्च पर प्रवेश करते हैं।

**यौगन्धरायणः** – (कर्णं दत्वा) कथमिहाप्युत्सार्यते! कुतः,

**यौगन्धरायण** – (कान लगाकर) क्या यहाँ भी लोग हटाये जा रहे हैं? क्योंकि –

**प्रसङ्गः** – प्रकृते पद्येस्मिन् यौगन्धरायणः भटौ प्रति तपस्विनामुत्सारणाविषये कथयति –

**धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्य वन्यैः फलै-**
**र्मानार्हस्य जनस्य वल्कलवतस्त्रासः समुत्पाद्यते।**
**उत्सिक्तो विनयादपेतपुरुषो भाग्यैश्चलैर्विस्मितः**
**कोऽयं भो निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया॥ ३॥**

**अन्वयः** – धीरस्य, वन्यैः फलैः तुष्टस्य वसतः, वल्कलवतः मानार्हस्य, आश्रमसंश्रितस्य जनस्य त्रासः समुत्पाद्यते। भो! उत्सिक्तः, विनयादपेतपुरुषः, चलैः भाग्यैः विस्मितः, अयं कः इदं निभृतं तपोवनं, आज्ञया, ग्रामीकरोति।।३।।

**पदार्थः** – धीरस्य = धैर्यवान, वन्यैः फलैः = जंगली फलों से, तुष्टस्य = सन्तुष्ट रहने वाले, वसतः = निवास करते हुये, वल्कलवतः = वल्कलधारी, मानार्हस्य = सम्मान के योग्य, आश्रमसंश्रितस्य = आश्रमवासी, जनस्य = तपस्वीजन को, त्रासः समुत्पाद्यते = भयभीत किया जा रहा है। भो = अरे, उत्सिक्तः = उद्धत (उदण्ड), विनयादपेतपुरुषः = विनम्रतारहित, चलैः भाग्यैः विस्मितः = अस्थिर भाग्य पर घमण्ड करने वाला, अयं कः = यह कौन व्यक्ति है जो, इदम् = इस, निभृतं = शान्त, तपोवनम् = आश्रम को, आज्ञया = अपनी आज्ञा से, ग्रामीकरोति = गाँव की तरह अशान्त बना रहा है।

**हिन्दी अर्थ** – धैर्यशाली, जंगली फलों से संतुष्ट रहने वाले वल्कल वस्त्रधारी, सम्माननीय और आश्रम में रहने वाले तपस्वियों को भयभीत किया जा रहा है। अरे सिपाहियों! मदमत्त, विनम्रता से रहित, अस्थिर भाग्य पर गर्व करने वाला यह कौन है, जो इस शान्त तपोवन को अपनी आज्ञा से गाँवों की तरह अशान्त बना रहा है।

**व्याख्या** – पर्यायपदानि – धीरस्य = धैर्यवान्, वैन्यैः = वनोत्पन्नैः, फलैः = कन्दमूलादिभिः, तुष्टस्य = सन्तृप्तस्य, वसतः = निवासं कुर्वतः, वल्कलवतः = वल्कलवस्त्राणिधारयतः, मानार्हस्य = सम्मानपात्रस्य, आश्रमसंश्रितस्य = आश्रमं तपोवनं संश्रितः वासिनस्तस्य, जनस्य = लोकस्य, तपस्विनामित्यर्थः, त्रासः = भयं, समुत्पाद्यते = जन्यते क्रियते वा। भो = अरे, आश्चर्यम्! उत्सिक्तः = उद्धतः, विनयादपेतः = नम्रतारहितमानवः, चलैः = चञ्चलैः नश्वरैः वा, भाग्यैः = दिष्टैः भागधेयैः, विस्मितः = गर्वितः, अयं कः जनः = एषः कः पुरुषः, इदं=पुरोदृश्यमानं, निभृतं = शान्तं, तपोवनम् = आश्रमपदम्, आज्ञया = उत्सारणादेशेन, ग्रामीकरोति = ग्रामतुल्यतां नयति।।३।।

**भावार्थः** – धीरस्वभावस्य आश्रमस्थितस्य, वन्यफलैः सन्तुष्टस्य, वल्कलवतः सम्मानयोग्यस्य जनस्य मनसि कथं भयमुत्पाद्यते? भोः! उद्धतः विनयहीनः, चञ्चलभाग्यैश्च मत्तोऽयं कः जन इदं शान्तं तपोवनम् आज्ञया ग्रामत्वेन व्यवहरति? अर्थात् एवं नैव कर्तव्यमितिभावः।

**छन्दः** – पद्येऽस्मिन् शार्दुलविक्रीडितं वृत्तमस्ति। तल्लक्षणम् –

''सूर्योश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्''।

अस्मिन् छन्दसि प्रतिचरणं (क्रमशः मगणः, सगणः, जगणः, सगणः, तगण द्वयं गुरुवर्णश्च) नवदश वर्णाः भवन्ति। सूर्याः = द्वादश, अश्वाः = सप्तवर्णैर्यति भवति।

**अलङ्कारः** – पद्येऽस्मिन् विशेषणानां साभिप्रायं प्रयोगात् परिकरालङ्कारः। तल्लक्षणम् – अलङ्कारः परिकरः साभिप्राये विशेषणे॥

**व्याकरणम्** – आश्रमं संश्रित इत्याश्रमसंश्रितः, तस्य आश्रमसंश्रितस्य (द्वि०त०) वने भवानि वन्यानि, तैः वन्यैः। वसतः – वस्+शतृ, षष्ठी। तुष्टस्य – तुष्+क्त, षष्ठी। विनयादपेतपुरुषः – विनयात् अपेतः इति विनयादपेतः (अलुक् समास) स चासौ पुरुषः (कर्मधारयः) विस्मितः – वि+स्मि+क्तः। निभृतम् – नि+भृ+क्त। ग्रामीकरोति – अग्रामं ग्रामं करोतीति, ग्राम+च्वि+कृ+लट्।

**कोशः** – दैवं दिष्टं भागधेयं भाग्यं स्यान्नियतिर्विधिः इत्यमरः।

**वासवदत्ता** – अय्य! को ऐसो उस्सारेदि? [आर्य! क एष उत्सारयति?]

**वासवदत्ता** – आर्य! यह कौन है जो (लोगों को) हटा रहा है?

**यौगन्धरायणः** – भवति! यो धर्मादात्मानमुत्सारयति।

**यौगन्धरायण** – आर्ये! जो अपने को धर्म से हटा रहा है, अर्थात् जो वनवासी लोगों को यहाँ से हटा रहा है, वह पाप-भागी होगा।

**वासवदत्ता** – अय्य! ण हि एव्वं वत्तुकामा, अहं वि णाम उस्सारइदव्वाहोमित्ति। [आर्य! नह्येवं वक्तुकामा, अहमपि नामोत्सारयितव्या भवामीति।]

**वासवदत्ता** – आर्य! मैं यह नहीं कहना चाहती, मेरा अभिप्राय यह है कि क्या मैं भी हटाई जाऊँगी?

**यौगन्धरायणः** – भवति! एवमनिर्ज्ञातानि दैवतान्यवधूयन्ते।

**यौगन्धरायण** – देवीजी! इस प्रकार विदित न होने पर तो देवताओं का भी अपमान होता है।

**वासवदत्ता** – अय्य! तह परिस्समो परिखेदं ण उप्पादेदि, जह अअं परिभवो। [आर्य! तथा परिश्रमः परिखेदं नोत्पादयति यथायं परिभव।]

**वासवदत्ता** – आर्य! यह परिश्रम उतना दुःख नहीं दे रहा है, जितना यह अपमान।

(परिभवः – अनादरः परिभवः परीभावस्तिरस्क्रिया इत्यमरः)

''तथा परिश्रमः – यथायं परिभवः'' इस कथन से वासवदत्ता का आशय है कि इतनी दूर तक पैदल चलकर आने से काफी थकी हुई हूँ, परन्तु यह थकान इतनी कष्टदायी नहीं है, जितना यहाँ से हटाये जाने का अपमान और वह भी आमजन की तरह। इसलिए मैं अपने दुर्दैव से पूछना चाहती हूँ।

**यौगन्धरायणः** – भुक्तोज्झित एष विषयोऽत्रभवत्या। नात्र चिन्ता कार्या। कुतः –

**यौगन्धरायण** – आर्ये! आपने तो इस विषय को उपभोग करके छोड़ दिया है। इसकी चिन्ता नहीं करनी चाहिए। क्योंकि –

**प्रसङ्गः** – श्लोकेऽस्मिन् यौगन्धरायणः वासवदत्तायाः चिन्ताया अनवसरत्वं प्रतिपादयन्नाह–

**पूर्वं त्वयाप्यभिमतं गतमेवमासी–**
**च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः।**
**कालक्रमेण जगतः परिवर्तमाना**
**चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः ॥४॥**

**अन्वयः** – पूर्वं त्वया अपि एवं श्लाघ्यम् अभिमतं गतम् आसीत्। पुनः भर्तुः विजयेन गमिष्यसि। जगतः भाग्यपंक्तिः चक्रारपंक्तिः इव कालक्रमेण परिवर्तमाना गच्छति।

**पदार्थः** – पूर्वं = पहले, त्वया अपि = तुम्हें भी, एवम् = ऐसा, श्लाघ्यं = प्रशंसनीय, अभिमतम् = अभीष्ट, गतं = प्राप्त, आसीत् = था। पुनः = फिर, भर्तुः = महाराज उदयन की, विजयेन = विजय होने से, गमिष्यसि = प्राप्त करोगी। जगतः = संसार की, भाग्यपंक्तिः = भाग्यरेखा, चक्रारपंक्तिः = रथ के पहिये के अरों की, इव = तरह, परिवर्तमाना = परिवर्तनशील, नीचे – ऊपर, गच्छति = होती रहती है।

**हिन्दी अर्थ** – यौगन्धरायण वासवदत्ता की चिन्ता के औचित्य को निरस्त करता हुआ कहता है कि पहले आप भी इसी प्रकार श्लाघनीय मनोरथ सम्मान को प्राप्त करती थी, अब पुनः स्वामी (वत्सराज उदयन) की विजय के उपरान्त इसी प्रकार प्रतिष्ठित पद को प्राप्त करोगी, क्योंकि लोगों का भाग्यचक्र भी रथ के पहिये के अरों (अगले हिस्से) की तरह समयानुसार ऊपर-नीचे घूमता हुआ चलता है।

**व्याख्या – पर्यायपदानि** – पूर्वं = पूर्वस्मिन् काले, त्वया = भवत्यापि, एवम् = ईदृशं, श्लाघ्यं = प्रशंसनीयम्, अभिमतम् = अभीष्टं, गतं = प्राप्तम्, आसीत्। पुनः = भूयः, भर्तुः = स्वामिनः, विजयेन = राज्य प्राप्तिरूपेण, साम्राज्यलाभेन, श्लाघ्यं पदं, गमिष्यसि – यास्यसि एवेति निश्चयः। यतोहि जगतः = लोकस्य, भाग्यपंक्तिः

= अदृष्टपरम्परा, भाग्यरेखा, चक्रारपंक्तिः = चक्रस्य रथाङ्गस्य अराणां दण्डानां पंक्तिः = श्रेणिः, इव = यथा, कालक्रमेण = समयानुसारेण, परिवर्तमाना = भ्रमन्ती क्रमेण नीचैः उपरि च परिभ्रमन्ती, गच्छति = चलति। अर्थात् मानवस्य शुभाशुभानि भाग्यानि समयानुसारं विपरिवर्तन्ते। दुःखानन्तरं सुखमवश्यमेव लप्स्यसे।

**भावार्थः** – यथा समयानुसारेण रथाङ्गपंक्तिः क्रमेण परिवर्तमाना (उपरि-नीचैः) चलति, तथैव प्राणिनां भाग्यरेखाऽपि परिवर्तते। अत एव खेदं विहाय त्वमपि स्वसौभाग्यपरावर्तनं परिपालय। दुःखानन्तरं सुखमवश्यमेव आगमिष्यतीति भावः।

**छन्दः** – अत्र वसन्ततिलका वृत्तं वर्तते। तल्लक्षणमिदम् –

उक्ता वसन्ततिलका तभजा जगौ गः।

**अलङ्कारः** – पद्येऽस्मिन् चक्रारपंक्तिरिव इत्यत्र उपमालङ्कारः, पुनश्च विशेषार्थस्य च सामान्येन कथनेन समर्थनाद् अर्थान्तरन्यास अलङ्कारोऽप्यस्ति।

उपमायाः लक्षणमिदमुक्तं दर्पणकारेण – साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः।

अर्थान्तरन्यासस्य च लक्षणं – सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।

यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा॥

**व्याकरणम्** – अभिमतम् – अभि+मन्+क्त। परिवर्तमाना – परि+वृत्+लट्+शानच्।

**कोशः** – धवः प्रियः पतिर्भर्ताः, दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः इति चामरकोशः।

**विशेषः** – सुखदुःखयोः विषयेऽन्यत्रापि कथितं –

सुखमापतितं सेव्यं दुःखमापतितं तथा।<br>
चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च॥

**भटौ** – उस्सरह अय्या। उस्सरह। [उत्सरत आर्या! उत्सरत।]

**दो सिपाही** – हटो लोगों हटो।

(ततः प्रविशति काञ्चुकीयः)

(ततपश्चात् काञ्चुकीय प्रवेश करता है।)

**काञ्चुकीयः** – सम्भषक! न खलु न खलूत्सारणा कार्या। पश्य –

**काञ्चुकीय** – सम्भषक! नहीं हटाना चाहिए, नहीं हटाना चाहिए। देखो –

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये काञ्चुकीयः राजपुरुषौ (भटौ) निर्दिशति –

**परिहरतु भवान् नृपापवादं न परुषमाश्रमवासिषु प्रयोज्यम्।**<br>
**नगरपरिभवान् विमोक्तुमेते वनमभिगम्य मनस्विनो वसन्ति॥ ५॥**

**अन्वयः** – भवान् नृपापवादं परिहरतु, आश्रमवासिषु, परुषं न प्रयोज्यम्। एते मनस्विनः नगरपरिभवान् विमोक्तुं वनम् अभिगम्य वसन्ति।

**पदार्थः** – भवान् = आप लोग, नृपापवादं = मगधनरेश (राजा) के अपयश के कारण उत्सारणा (तपस्वियों को हटाना) आदि कार्यों को, परिहरतु = छोड़ दीजिये। आश्रमवासिषु = आश्रमवासियों के प्रति, परुषं = कठोरवचन, न प्रयोज्यं = नहीं बोलना चाहिये। एते मनस्विनः = ये मनस्वी तपस्वीजन, नगरपरिभवान् = नगर में होने वाले अपमान को, विमोक्तुं = छोड़ने के लिए, वनम् अभिगम्य = वन में आकर, वसन्ति = रहते हैं॥५॥

**हिन्दी अर्थ** – काञ्चुकीय दोनों सिपाहियों को आश्रमवासियों को नहीं हटाने के लिए निर्देशित करते हुए कहता है – आप लोग मगध नरेश (दर्शक) की निन्दा के कारण तपस्वियों को हटाने का कार्य मत कीजिये। आश्रमवासियों के प्रति कठोर वचन नहीं कहना चाहिये। ये मनस्वी तपस्वीजन नगर में होने वाले अपमानों से बचने के लिए यहाँ वन में आकर रहते है॥५॥

**व्याख्या - पर्यायपदानि** - भवान् = त्वं, नृपापवादं = नृपस्य दर्शकस्य, अपवादं = निन्दां (कलङ्कं), परिहरतु = दूरीकरोतु (तपस्विनामपसारणेन राज्ञः निन्दा भवतीति तात्पर्यम्।) आश्रमवासिषु = तपस्विजनेषु, परुषं = कठोरं वचनं, न = नहि, प्रयोज्यं = व्यवहर्तव्यं, यतो हि, एते = इमे, मनस्विनः = प्रशस्तहृदयाः, मानिनः, नगरपरिभवान् = नगरे सम्भावितान् अपमानान्, विमोक्तुं = परिहर्तुं, वनम् = अरण्यम्, अभिगम्य = सम्प्राप्य, वसन्ति = निवासं कुर्वन्ति॥५॥

**भावार्थः** - काञ्चुकीयो भटौ निर्दिशति यत् इमे आश्रमवासिनः नगरे सम्भावितेभ्योऽपमानेभः पीडिताः अत्र तपोवने शान्त्यर्थम् आगताः सन्ति। यदि एते अत्रापि अपमानिताः स्युस्तर्हि नरेशस्य निन्दा भवेत्। अतो मधुरव्यवहारेण सम्माननीया एते न तूत्सारणीयाः।

**छन्दः** - पद्येऽस्मिन् पुष्पिताग्रावृत्तमस्ति। तल्लक्षणमिदम् -

'अयुजि न युगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा।

**अलङ्कारः** - अर्थान्तरन्यासालङ्कारो वर्तते।

**व्याकरणम्** - नृपस्य अपवादः नृपापवादः तं नृपापवादम् (ष० तत्पुरुषः)। प्रयोक्तुं शक्यं प्रयोज्यम्, आश्रमेवसन्तीति तच्छीलाः आश्रमवासिनः। तेषु आश्रमवासिषु (स०तत्पुरुषः)।

**कोशः** - निष्ठुरं परुषम्, अटव्यरण्यं विपिनं गहनं काननं वनम्, इति चामरः।

**विशेषः** - काञ्चुकीयः - अन्तः पुरचरोवृद्धो विप्रो गुणगणान्वितः।
सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते।
ये नित्यं सत्यसम्पन्नाः कामदोषविवर्जिताः।
ज्ञानविज्ञानकुशलाः काञ्चुकीयास्तु ते मताः॥

**उभौ** - अय्य! तह! [आर्य! तथा]

**दोनों** - आर्य! अच्छा, वैसा ही होगा।

(निष्क्रान्तौ) (दोनों चले जाते हैं)

**यौगन्धरायणः** - हन्त! सविज्ञानमस्य दर्शनम्। वत्से! उपसर्पावस्तावदेनम्।

**यौगन्धरायण** - अहो! देखने में यह बुद्धिमान् लग रहा है। बेटी! हम दोनों उसके पास चलें।

**वासवदत्ता** - अय्य! तह! [आर्य! तथा।]

**वासवदत्ता** - आर्य! वैसा ही करें।

**यौगन्धरायणः** - (उपसृत्य) भोः! किं कृतेयमुत्सारणा?

**यौगन्धरायण** - (पास में जाकर) महाशय! लोगों को किसलिये हटाया जा रहा है?

**काञ्चुकीयः** - भोस्तपस्विन्!

**काञ्चुकीय** - हे तपस्वी!

**यौगन्धरायणः** - (आत्मगतं) तपस्विन्निति गुणवान् खल्वयमालापः। अपरिचयात्तु न श्लिष्यते मे मनसि।

**यौगन्धरायण** - (अपने मन में) तपस्वी, यह कथन तो गुणयुक्त है, परन्तु परिचय नहीं होने के कारण मुझे यह शब्द अच्छा नहीं लग रहा है।

**काञ्चुकीयः** - भोः श्रूयताम्। एषा खलु गुरुभिरभिहितनामधेयस्यास्माकं महाराजदर्शकस्य भगिनी पद्मावती नाम। सैषा नो महाराजमातरं महादेवीमाश्रमस्थामभिगम्यानुज्ञाता तत्र भवत्या राजगृहमेव यास्यति। तदद्य अस्मिन्नाश्रमपदे वासोऽभिप्रेतोऽस्याः। तद् भवन्तः -

**काञ्चुकीय** – आप लोग सुनिये। ये गुरुजनों के द्वारा दर्शक नाम से कहे जाने वाले हमारे महाराज की बहिन पद्मावती हैं। ये आश्रम में रहने वाली महाराज की माता महादेवी से मिलकर उनकी अनुमति से पुनः राजभवन ही लौट जायेंगी। अतः आज इनका इसी आश्रम में रहना अभिप्रेत है। इस कारण आप लोग –

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये काञ्चुकीयः पद्मावत्याः धर्मपरायणतां वर्णयन्नाह –

**तीर्थोदकानि समिधः कुसुमानि दर्भान्**
**स्वैरं वनादुपनयन्तु तपोधनानि।**
**धर्मप्रिया नृपसुता नहि धर्मपीडा-**
**मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः ॥६ ॥**

**अन्वयः** – तपोधनानि, तीर्थोदकानि, समिधः, कुसुमानि, दर्भान्, स्वैरं, वनाद् उपनयन्तु। हि धर्मप्रियानृपसुता तपस्विषु धर्मपीडां न इच्छेत्। एतत् अस्याः कुलव्रतम् अस्तीति शेषः।

**पदार्थः** – तपोधनानि = तपस्या के साधन, तीर्थोदकानि = तीर्थो का जल, समिधः = हवन के लिये सूखी लकड़ियाँ, कुसुमानि = पूजा के फूल, दर्भान् = कुश आदि, स्वैरम् = अपनी इच्छा के अनुसार, वनात् = वन से, उपनयन्तु = ले आइये। हि = क्योंकि, धर्मप्रिया = धर्म में अनुराग रखने वाली, नृपसुता = राजकुमारी पद्मावती, तपस्विषु = तपस्वियों के, धर्मपीडां = धार्मिक कार्यों में बाधक बनना, न इच्छेत् = नहीं चाहती है। एतत् = यह, अस्याः = इसके, कुलव्रतं = वंशपरम्परागत नियम है।

**हिन्दी अर्थ** – आप सब लोग तपस्या के साधन, तीर्थों का जल, हवन करने की लकड़ी, पूजा के लिये पुष्प, अग्निहोत्र के लिये कुशा आदि अपनी इच्छानुसार वन से लायें, क्योंकि धर्मपरायण राजकुमारी पद्मावती तपस्वियों के धर्मकार्य में बाधा नहीं डालना चाहती। यह इनके वंश की रीति है ॥६ ॥

**व्याख्या – पर्यायपदानि** – (भवन्तः = तपस्विनः) तपोधनानि = तपः साधनद्रव्याणि, तीर्थोदकानि = पवित्रतीर्थजलानि, समिधः = हवनीय काष्ठानि, कुसुमानि = पूजार्थं पुष्पाणि, दर्भान् = कुशान्, वनात् = अरण्यात्, स्वैरम् = इच्छानुसारम्, उपनयन्तु = आनयन्तु। हि = यतः, धर्मप्रिया = धर्मानुरागिणी, नृपसुता = राजपुत्री पद्मावती, तपस्विषु = तपोधनेषु, धर्मपीडां = पुण्यकार्यबाधां, न = नहि, इच्छेत् = अभिलषेत्, एतत् = धर्माचरणम्, अस्याः = पद्मावत्याः कुलव्रतं = वंशाचरणम् अस्तीति।

**भावार्थः** – मान्यास्तपस्विनः! तपः साधनद्रव्याणि वनाद् आनयन्तु यतः पद्मावती स्वकुलनियमानुसारमेव धर्मानुरागिणी अस्ति। अस्मात् कारणात् इयं केनापि प्रकारेण क्वचिद् अपि धार्मिककृत्येषु बाधामुत्पादयितुं न इच्छति।

**छन्दः** – अस्मिन् पद्ये वसन्ततिलका छन्दोऽस्ति। तल्लक्षणम् – उक्ता वसन्ततिलका तभजा जगौ गः।

**अलङ्कारः** – पद्येऽस्मिन् काव्यलिङ्गनामालङ्कारोऽस्ति।

तल्लक्षणं यथा – हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते।

**व्याकरणम्** – उपनयन्तु – उप+नी+लोट् लकारः। इच्छेत् – इष्+विधिलिङ्। तपसो धनानि तपोधनानि (ष०तत्पु०) तीर्थानाम् उदकानि – तीर्थोदकानि (ष०त०) धर्मः प्रियो यस्याः सा (ब०व्री०) नृपस्य सुता – नृपसुता (ष०त०) धर्मस्य पीडा धर्मपीडा (ष०त०)।

**कोषः** – आत्मजस्तनयः सूनुः सुतः पुत्रः, स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम् इति चामरः। मानश्चित्तसमुन्नतिः, वैरं विरोधो विद्वेषः इति चामरः।

**यौगन्धरायणः** – (स्वगतम्) एवम्। एषा सा मगधराजपुत्री पद्मावती नाम या पुष्पकभद्रादिभिरादेशिकैरादिष्टा स्वामिनो देवी भविष्यति। ततः –

**यौगन्धरायण** – (अपने मन में) ऐसा! यह तो वही मगधराज की कन्या पद्मावती हैं जो पुष्पकभद्रादि ज्योतिषियों (दैवज्ञों) के कथनानुसार हमारे महाराज उदयन की रानी होगी। इसलिये –

**प्रसङ्गः** – अस्मिन् पद्ये यौगन्धरायणः स्वस्य मनोभावं प्रतिपादयन्नाह –

**प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।**
**भर्तृदाराभिलाषित्वादस्यां मे महती स्वता॥ ७॥**

**अन्वयः** – प्रद्वेषः, बहुमानः, वा सङ्कल्पाद् उपजायते। भर्तृदाराभिलाषित्वात् मे अस्यां महती स्वता अस्तीति।

**पदार्थः** – प्रद्वेषः = अत्यधिक द्वेष (वैरातिशय) वा = अथवा, बहुमानः = अत्यधिक आदर, सङ्कल्पात् = मन की इच्छाओं से, उपजायते = उत्पन्न होता है। भर्तृदाराभिलाषित्वात् = स्वामी की पत्नी बनने की इच्छा के कारण, मे = मेरे मन में, अस्याम् = इसके प्रति, महती स्वता = अत्यधिक आत्मीयता हो गई है।

**हिन्दी अर्थ** – अत्यधिक द्वेष अथवा अत्यधिक सम्मान व्यक्ति की भावनाओं से ही उत्पन्न होता है। यह (पद्मावती) महाराज उदयन की महारानी होगी, इसी कारण से मेरे मन में इसके प्रति अत्यन्त आत्मीयता हो रही है।

**व्याख्या – पर्यायपदानि** – प्रद्वेषः = वैरातिशयः, बहुमानः = अत्यादरः, वा = अथवा, सङ्कल्पात् = मानसिक कर्मणः, उपजायते = उद्भवति। भर्तृदाराभिलाषित्वात् = पद्मावती उदयनस्य महिषी भविष्यतीति भावनयैव, अस्यां = पद्मावत्यां, मे = मम, महती = अत्यधिकं, स्वता = आत्मीयता वर्तत इति भावः।

**भावार्थः** – अतिशयितः द्वेषः उत वा अत्यधिकसम्मानं व्यक्तेः भावनाभिः उत्पन्नं भवति। एषा (पद्मावती) महाराज्ञः उदयनस्य महाराज्ञी भविष्यति इति कारणात् मम मनसि एतां प्रति अत्यन्त-आत्मीयता जायते।

**छन्दः** – अस्मिन् पद्ये अनुष्टुब्वृत्तमस्ति। तल्लक्षणमिदम् –

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघुपञ्चमम्।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः॥

**अलङ्कार** – अत्र अर्थान्तरन्यासः काव्यलिङ्गञ्च।

**व्याकरणम्** – प्रकृष्टो द्वेषः प्रद्वेषः। बहुश्चासौ मानः बहुमानः (कर्मधारय) भर्तृदारान् अभिलषतीति तच्छीलः भर्तृदाराभिलाषी (उपपदसमासः) तस्य भावः तस्मात् भर्तृदाराभिलाषित्वात्।

**वासवदत्ता** – (स्वगतं) राअदारिअत्ति सुणिअ भ इणि असिणेहावि मे एत्थ सम्पज्जइ। [राजदारिकेति श्रुत्वा भगिनिकास्नेहोऽपि मेऽत्र सम्पद्यते।]

**वासवदत्ता** – (अपने मन में) राजकुमारी ऐसा सुनकर इस पद्मावती के प्रति बहिन सा प्रेम उमड़ रहा है।

(ततः प्रविशति पद्मावती सपरिवारा चेटी च)

(तदनन्तर रङ्गमञ्च पर सखियों के साथ पद्मावती और चेटी आती हैं)

**चेटी** – एदु एदु भट्टिदारिआ इदं अस्समपदं पविसदु [एत्वेतु भर्तृदारिका आश्रमपदं प्रविशतु।]

**चेटी** – आइये-आइये राजकुमारी जी! इस आश्रम में प्रवेश करें।

(ततः प्रविशत्युपविष्टा तापसी)

**तापसी** – साअदं राअदारिआए। [स्वागतं दारिकायाः]

(तदनन्तर रङ्गमञ्च पर तापसी बैठी हुई दिखाई देती है।)

**तापसी** – राजकुमारी पद्मावती का स्वागत है।

**वासवदत्ता** – (स्वगतम्) इयं सा राजदारिआ। अभिजणाणुरुवं खुसेरूवं। [इयं सा राजदारिका अभिजनानुरूपं खल्वस्या रूपम्।]

**वासवदत्ता** – (अपने मन में) यह वही राजकुमारी है। निश्चित इसका रूप सौन्दर्य कुल के अनुरुप ही है।

**पद्मावती** – अय्ये! वन्दामि [आर्ये! वन्दे।]

**पद्मावती** – पूजनीये! मैं आपको प्रणाम करती हूँ।

**तापसी** – चिरंजीव! पविस जादे! पविस। तवोवणाणि णाम अदिहिजणएास्य सअगेहं। [चिरञ्जीव! प्रविश जाते! प्रविश। तपोवनानि नाम अतिथिजनस्य स्वगेहम्।]

**तापसी** – चिरञ्जीवी हो बेटी! प्रवेश करो। तपोवन अतिथिजनों का अपना घर होता है।

**पद्मावती** – भादे भोदु अय्ये! विस्सत्थहिन। इमिणा बहुमाणव अणेण अणुग्गहिदह्मि। [भवतु भवतु। आर्ये विश्वस्ताऽस्मि। अनेन बहुमानवचनेनानुगृहीताऽस्मि।]

**पद्मावती** – अच्छा अच्छा पूजनीये! मैं विश्वस्त हूँ। इस प्रकार के सम्मानपूर्ण वचनों से अनुगृहीत हूँ।

**वासवदत्ता** – (स्वगतं) णहि रूवं एव्व, वा आविखुसेमुहरा। [न हि रूपमेव, वागपि खल्वस्या मधुरा।]

**वासवदत्ता** – (अपने मन में) रूप ही नहीं अपितु इसकी वाणी भी निश्चय ही मधुर है।

**तापसी** – भट्टे! इमं दाव भट्टमुहस्स भइणिअं कोविराआ ण वरेदि? [भद्रे! इमां तावद् भद्रमुखस्य भगिनिकां कश्चिद् राजा न वरयति?]

**तापसी** – कल्याणि! क्या कोई राजा इस भद्रमुख दर्शक की बहिन पद्मावती का वरण नहीं करता?

**चेटी** – अत्थि राआपज्जोदो णाम उज्जणीए। दारअस्सकारणदो दूनसम्पादकरेदि। [अस्ति राजा प्रद्योतो नाम उज्जयिन्याः। सदारकस्य कारणाद् दूतसम्पातं करोति।]

**चेटी** – उज्जयिनी के प्रद्योत नामक राजा है। वे अपने पुत्र के लिए दूत भेजा करते हैं।

**वासवदत्ता** – (आत्मगतं) भोदु भोदु। एदा अ अत्तणीया दाणिंसंवुत्ता। [भवतु भवतु। एषा चात्मीयेदानीं संवृत्ता।]

**वासवदत्ता** – (अपने मन में) अच्छा-अच्छा इस समय वह अपनी हो गई।

**तापसी** – अहा खु इअं आ इ दी इमस्स बहुमाणस्स। उमआणि राअउलाणि महत्तराणि त्ति सुणी आदि। [अर्हा खल्वियमाकृतिरस्य बहुमानस्य। उभे राजकुले महत्तरे इति श्रूयते।]

**तापसी** – राजकुमारी की यह आकृति निश्चय ही इस वैवाहिक सम्बन्ध रूप आदर के योग्य है। दोनों राजकुल श्रेष्ठ है, ऐसा सुना जाता है।

**पद्मावती** – अय्य! किं दिट्ठो मुणिजणो अत्ताणं अणुग्गहीदुं? अभिप्पेदप्पवाणे नतवस्सिजणो उवणिमन्ती अदु दावको किं एत्थ इच्छादिति। [आर्य! किं दृष्टो मुनिजन आत्मानमनुग्रहीतुम्? अभिप्रेतप्रदानेन तपस्विजन उपनिमन्त्र्यतां तावत् कः किमत्रेच्छतीति?]

**पद्मावती** – आर्य काञ्चुकीय! अपने को कृतार्थ करने हेतु आपने क्या किसी मुनि को देखा? मैं अभीष्ट वस्तु का दान करना चाहती हूँ। अतः आप तपस्वीजनों को निमन्त्रित करें कि कौन तपस्वी क्या चाहता है?

**काञ्चुकीयः** – यदभिप्रेतं भवत्या। भोः भोः! आश्रमवासिनः तपस्विनः शृण्वन्तु – शृण्वन्तु भवन्तः। इहात्र भवती मगधराजपुत्री अनेन विश्रम्भेणोत्पादितविश्रम्भा धर्मार्थमर्थेनोपनिमन्त्रयते।

**काञ्चुकीय** – आपकी जैसी इच्छा। हे आश्रमवासियों तपस्वियों! आप लोग सुनें – पूज्या मगधनरेश की कन्या पद्मावती आप लोगों के विश्वास से विश्वस्त होकर इस तपोवन में धर्मार्थदान देने के लिए आप लोगों को बुला रही है। अतः कृपया बताइये कि किसे कौन-सी वस्तु दी जाय।

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये काञ्चुकीयः आश्रमवासिजनेभ्यः पद्मावत्याः दानरुचिं प्रति वर्णयति –

**कस्यार्थः कलशेन को मृगयते वासो यथा निश्चितं,**
**दीक्षा पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत्।**
**आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया,**
**यद्यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम्॥ ८॥**

**अन्वयः** – कस्य कलशेन अर्थः? कः यथानिश्चितं वासः मृगयते? कः दीक्षां पारितवान् पुनः गुरोः यद् देयं

भवेत् किम् इच्छति? इह, धर्माभिरामप्रिया नृपजा आत्मानुग्रहम् इच्छति। यस्य यत् समीप्सितम् अस्ति तद् वदतु। अद्य कस्य किम् दीयताम्?

**पदार्थः** – कस्य = किसे, कलशेन = घड़े से, अर्थः = काम है?, कः यथा निश्चितम् = अपने सम्प्रदाय के अनुसार निश्चित, वासः = वस्त्र को, मृगयते = ढूंढ रहा है? कः = किस स्नातक ने, दीक्षां = गुरुकुल में रहकर विद्याव्रत को, पारितवान् = पूर्ण कर लिया है, पुनः फिर, गुरोः = गुरुजी को, यत् देयं = जो देय, भवेत् = होवे, किम् इच्छति = क्या चाहता है? इह = तपोवन में, धर्माभिरामप्रिया – धर्मानुरागिणी, नृपजा = राजकुमारी पद्मावती, आत्मानुग्रहम् = अपना कल्याण चाहती है, यस्य = जिसे, यत् = जो, समीप्सितम् = अभीष्ट है, तत् = उसे, वदतु = कहे, अद्य = आज, कस्य = किस तपस्वी को, किं वस्तु = कौन वस्तु, दीयतां = दी जाय।

**हिन्दी अर्थ** – किसे घड़ा चाहिए? कौन वस्त्र चाहता है? विधिवत् दीक्षा ग्रहण करने के बाद गुरुजी को दक्षिणा देने हेतु किसे क्या चाहिए? धार्मिक जनों से प्रेम करने वाली राजकुमारी पद्मावती यहाँ तपोवन में अपने कल्याण के लिए आपकी इच्छानुसार अभीष्ट वस्तु प्रदान करना चाहती है। अतः कृपया अभीष्ट वस्तु बताइये।

**व्याख्या – पर्यायपदानि** – कस्य = तपस्विनः, कलशेन = घटेन, अर्थः = प्रयोजनम् (अस्ति)। कः = कतमः, तपस्वी, यथानिश्चितं = स्वसम्प्रदायानुकूलं, वासः = वस्त्रम्, मृगयते = अन्विष्यति। कः = स्नातकः, दीक्षां = गुरुकुले नियमेन विद्याव्रतं, पारितवान् = समापितवान्, पुनः = भूयः, गुरोः = आचार्यस्य, आचार्याया वा, यत् = गुरुदक्षिणा वस्तु, देयम् = दातव्यं, भवेत् = स्यात्, तत् किं = वस्तु दक्षिणाद्रव्यम्, इच्छति = वाञ्छति। इह = अत्र तपोवने, धर्माभिरामप्रिया = तपस्विजनवल्लभा, नृपजा = राजकन्या पद्मावती, आत्मानुग्रहं = स्वकृतार्थताम्, इच्छति = कामयते, अतः यस्य = आश्रमवासिनः, यत् यद् वस्तु, समीप्सितम् = अभीष्टमस्ति तद् इह वदतु = कथयतु, अद्य = इदानीं, कस्य = कस्मै, किं वस्तु दीयतां = वितीर्यताम्।

**भावार्थः** – धर्मप्रिया राजकुमारी पद्मावती कुलपरम्परानुसारम् आत्मकल्याणाय तपस्विभ्यस्तदभीष्टं वस्तु दातुमत्र समागता राजते। अतः अभीष्टवस्तुग्रहणेन भवद्भिः पद्मावत्यामनुग्रहो विधेयः।

**विशेषः** – श्लोकेऽस्मिन् प्राचीन–भारतीयाश्रमपरम्परायाः वास्तविकं चित्रणं कृतं कविना।

**छन्दः** – अस्मिन् पद्ये शार्दूलविक्रीडितं वृत्तमस्ति।

**अलङ्कारः** – अत्र नृपजायाः साभिप्रायं विशेषणप्रयोगात् परिकरालङ्कारः।

**व्याकरणम्** – दीक्षां – दीक्ष्+अ+टाप्। पारितवान् – पार+क्तवतु, समीप्सितं – सम्+आप्+सन्+क्त। दीयतां – दा+लोट्। नृपजा – नृप ङसि जन् + ड (टाप्)।

**यौगन्धरायणः** – हन्त! दृष्ट उपायः। (प्रकाशम्) भोः! अहमर्थी।

**यौगन्धरायण** – अहो! उपाय देख लिया (प्रकट में) हे महानुभाव! मैं याचक हूँ।

**पद्मावती** – दिट्ठिआ सहणं मे तवोवणाभिगमणं। [दिष्ट्या सफलं मे तपोवनाभिगमनम्।]

**पद्मावती** – सौभाग्य से मेरा तपोवन में आना सफल हो गया।

**तापसी** – संतुट्ठतपस्सिजणं इदं अस्समपदं। आअन्तुएण इमिणा होदव्वं [सन्तुष्ट तपस्विजनमिदमाश्रमपदम्। आगन्तुकेनानेन भवितव्यम्]

**तापसी** – इस आश्रम में रहने वाले सभी तपस्वीगण सन्तुष्ट है। यह कोई आगन्तुक होगा।

**काञ्चुकीयः** – भोः! किं क्रियताम्?

**काञ्चुकीय** – हे तपस्वी! आपके लिए क्या किया जाय?

**यौगन्धरायणः** – इयं मे स्वसा। प्रोषितभर्तृकामिमामिच्छाम्यत्र भवत्या कञ्चित् कालं परिपाल्यमानाम्। कुतः –

**यौगन्धरायण** – यह मेरी बहिन है। इसके पति परदेश गये है। मैं चाहता हूँ कि पूज्या राजकुमारी जी इसे कुछ समय तक अपने संरक्षण में रखें। क्योंकि –

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये दानार्थिरूपेण यौगन्धरायणः काञ्चुकीयं कथयति –

**कार्यं नैवार्थैर्नापि भोगैर्नवस्त्रै-**
**र्नाहं काषायं वृत्तिहेतोः प्रपन्नः।**
**धीरा कन्येयं दृष्टधर्मप्रचारा**
**शक्ता चारित्रं रक्षितुं मे भगिन्याः॥ ९॥**

**अन्वयः** – मम अर्थैः कार्यं नैव, नापि भोगैः, न वस्त्रैः (कार्यमस्ति)। अहं वृत्तिहेतोः काषायं न प्रपन्नः दृष्टधर्मप्रचारा धीरा इयं कन्या मे भगिन्याः चारित्रं रक्षितुं शक्ता।

**पदार्थः** – मम = मेरा (यौगन्धरायण का), अर्थैः = धनों से, कार्यं = प्रयोजन, नैव = नहीं है, नापि = और न ही, भोगैः = भोग साधनों से, न पुनः = और न, वस्त्रैः = वस्त्रों की जरुरत है। अहं = मैंने, वृत्तिहेतोः = जीविका के लिए, काषायं = गेंरुए वस्त्र, न = नहीं, प्रपन्नः = धारण किया है, दृष्टधर्मप्रचाराः = धर्म के तत्त्व को जानने वाली, धीरा = गम्भीर स्वभाव वाली, इयं कन्या = राजपुत्री पद्मावती, मे = मेरी, भगिन्याः = बहिन के, चरित्रं = चरित्र की, रक्षितुं = रक्षा करने के लिए शक्ता = समर्थ है।

**हिन्दी अर्थ** – मेरा न तो धन सम्पत्ति से कोई प्रयोजन है न सांसारिक सुखों से और न वस्त्रों से ही कोई प्रयोजन है। मैंने जीविका के लिए गेरुआ वस्त्र धारण नहीं किया है। धर्मतत्त्व को जानने वाली धीर–गम्भीर स्वभाव वाली यह राजकुमारी पद्मावती मेरी बहिन के चरित्र की रक्षा करने में समर्थ है।

**व्याख्या – पर्यायपदानि** – मम = यौगन्धरायणस्य, अर्थैः =धनैः, कार्यं = प्रयोजनं, नैव = नास्ति, नापि = न च भोगैः = भोग्यपदार्थैः, न पुनः = भूयः, वस्त्रैः = वसनैः, किञ्चित् प्रयोजनमस्ति। अहं = यौगन्धरायणः, वृत्तिहेतोः = जीविकार्थं, काषायम् = ईषद्रक्तं, परिव्राजकवस्त्रं, नहि = न, प्रपन्नः = स्वीकृतवान् अस्मि। दृष्टधर्मप्रचारा = विदिधर्मतत्त्वा, धीरा = धीरस्वभावा, इयं कन्या = राजकुमारी पद्मावती, मे = मम, भगिन्याः = स्वसुः, चारित्रं = चरितं, रक्षितुं = पालयितुं, शक्ता = समर्था अस्तीति शेषः।

**भावार्थः** – मम धनवस्त्रादिभिरन्यैश्च भोगसाधनैः किमपि प्रयोजनं नास्ति। धर्मतत्त्वज्ञा धीरस्वभावा व्यवहार चतुरा चेयं राजकुमारी पद्मावती मे भगिन्याश्चरित्रं रक्षितुं समर्था अस्ति। एतदर्थमेव आगतोऽस्मि इति भावः।

**छन्दः** – अत्र वैश्वदेवीनामकं छन्दः वर्तते। तल्लक्षणमिदं – पञ्चाश्वैश्छिन्नावैश्वदेवी ममौ यौ।

**अलङ्कारः** – अस्मिन् पद्ये काव्यलिङ्गं, कन्यायाः धीरा, दृष्टधर्मप्रचारा इति विशेषणयोः साभिप्रायत्वात् परिकरालङ्कारश्च।

**व्याकरणम्** – वृत्तेर्हेतुः वृत्तिहेतुः तस्मात् वृत्तिहेतोः (षष्ठी तत्पुरुष) धर्मस्य प्रचारः धर्मप्रचारः (ष०त०) दृष्टः धर्मप्रचारो यस्याः सा दृष्टधर्मप्रचारा(बहु०)।

**वासवदत्ता** – (आत्मगतं) हं इह मं णिक्खिविदुकामो अय्य यौगन्धरायणो होदुः, अविआरिअ कमं ण करस्सिदि। [हम्, इह मां निक्षेप्तुकामा, आर्य यौगन्धरायणः। भवतु, अविचार्य क्रमं न करिष्यति।]

**वासवदत्ता** – (अपने मन में) अरे! क्या यौगन्धरायण मुझे यहाँ धरोहर रखना चाहते हैं? अच्छा ठीक है। वे बिना विचार कार्य नहीं करेंगे।

**काञ्चुकीयः** – भवति! महती खल्वस्य व्यपाश्रयणा। कथं प्रतिजानीमः? कुतः –

**काञ्चुकीय** – पूज्ये! इस याचक की याचना निश्चित रूप से दुष्कर है। कैसे स्वीकार करें। क्योंकि –

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये काञ्चुकीयः याचनाया दुष्करत्वमाकलयन् पद्मावतीं कथयति –

**सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः।**
**सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्॥ १०॥**

**अन्वयः** – अर्थः सुखं दातुं भवेत्, प्राणाः सुखं दातुं भवेयुः, तपः सुखं दातुं भवेत्, अन्यत्सर्वम् सुखं दातुं भवेत् (किन्तु) न्यासस्य रक्षणम् दुःखं भवेत्।

**पदार्थः** – अर्थः = धन, सुखं = सुखपूर्वक, दातुं भवेत् = दिया जा सकता है। प्राणाः = प्राण, सुखम् = आसानी से, दातुं भवेत् = दिये जा सकते हैं, तपः = तप भी, सुखं दातुं भवेत् = आसानी से दिया जा सकता है, अन्यत्सर्वम् = अन्य भी चीजें, सुखं दातुं भवेत् = आसानी से दी जा सकती है, किन्तु, न्यासस्य = धरोहर की, रक्षणं = रक्षा करना, दुःखं = कष्टप्रद होता है।

**हिन्दी अर्थ** – धन देना सरल है, प्राण, तपस्या का फल तथा अन्य सभी वस्तुएँ आसानी से दी जा सकती है, किन्तु धरोहर की रक्षा करना अत्यन्त कठिन है।

**व्याख्या – पर्यायपदानि** – अर्थं = धनं, सुखं = सुखपूर्वकेन, दातुम् = अर्पयितुं, भवेत् = स्यात्, प्राणाः = असवः, सुखम् = अनायासेन, दातुम् = अर्पयितुं, भवेयुः = स्युः, तपः = तपश्चरणफलं, सुखम् = अनायासेन, दातुं भवेत् = समर्पयितुं स्यात्। अन्यत् सर्वं = सकलमपि वस्तु, सुखं = कष्टं विना, दातुं भवेत् = प्रदातुं शक्येत्, किन्तु न्यासस्य = निक्षेपस्य, रक्षणं = यथावत्परिपालनं, दुःखं = कष्टसाध्यं स्यादिति भावः।

**भावार्थः** – लोके धनादिकं सुखपूर्वकं दातुं शक्यते, तपः फलादिकम् अन्यत्सकलमपि वस्तुजातं सरलतया प्रदातुं शक्यते, किन्तु केनचिद् दत्तस्य निक्षेपस्य रक्षणं नूनमतीव कष्टकरं भवति। अतः कष्टसाध्येऽस्मिन् कर्मणि कथं प्रवर्तितव्यमिति काञ्चुकीयस्य चिन्ता॥१०॥

**छन्दः** – अस्मिन् पद्ये अनुष्टुब्वृत्तमस्ति।

**अलङ्कारः** – अत्र अर्थान्तरन्यासालङ्कारोऽस्ति।

**व्याकरणम्** – दातुं – दा+तुमुन्, प्राणाः – प्राणशब्दः पुंसि नित्यबहुवचनान्तः, न्यासः – नि+अस्+घञ्।

**पद्मावती** – अय्य! पढमं उग्घोसिअ को किं इच्छदिति अजुत्तदाणि विआरिदुं जं एसो भणादि, तं अबु चिट्ष्दुअय्यो। [आर्य! प्रथममुद्घोष्य कः किमिच्छितीत्ययुक्तमिदानीं विचारयितुम्। यदेष भणति तदनुतिष्ठत्वार्यः।]

**पद्मावती** – आर्य! काञ्चुकीय! कौन क्या चाहता है, पहले ऐसी घोषणा करके अब विचार करना ठीक नहीं है। यह याचक जो कहता है वैसा कीजिए।

**काञ्चुकीयः** – अनुरूपमेतद् भवत्याभिहितम्।

**काञ्चकीयः** – पूज्ये! आपने अनुरूप ही कहा।

**चेटी** – चिरं जीवदु भट्टे! एव सच्च वादिणि। [चिरं जीवतु भर्तृदारिकैवं सत्यवादिनी।]

**चेटी** – इस प्रकार सत्य बोलने वाली राजकुमारी दीर्घायु हो।

**तापसी** – चिरं जीवदु भद्दे! [चिरं जीवतु भद्रे!]

**तापसी** – कल्याणि! आप बहुत दिनों तक जीयें।

**काञ्चुकीयः** – भवति! तथा। (उपगम्य) भोः! अभ्युपगतमत्र भवतो भगिन्याः परिपालनमत्र भवत्या।

**काञ्चुकीय** – पूज्ये! आपने जैसा कहा है वैसा ही करता हूँ। (पास में जाकर) हे तपस्वी! पूजनीया पद्मावती ने आपकी बहिन का संरक्षण कार्य स्वीकार कर लिया है।

**यौगन्धरायणः** – अनुगृहीतोऽस्मि तत्र भवत्या। वत्से! उपसर्पात्रभवतीम्।

**यौगन्धरायण** – मैं पूज्य राजकुमारी से अनुगृहीत हूँ। पुत्रि! इनके पास जाओं।

**वासवदत्ता** – (आत्मगतं) का गई। एसा गच्छामि मन्दभाआ। [का गतिः। एषा गच्छामि मन्दभागा।]

**वासवदत्ता** – (अपने मन में) अब क्या होगा? यह मैं अभागिनी जा रही हूँ।

**पद्मावती** – भोदु भोदु। अत्तणीआ दाणि संवुत्ता। [भवतु भवतु। आत्मीयेदानीं संवृत्ता।]

**पद्मावती** – अच्छा अच्छा। अब यह आत्मीय हो गई।

**तापसी** – जा ई दिसी ते आइदी, इयं वि राअदारिअत्ति सक्केमि। [या ईदृश्यस्या आकृतिः, इयमपि राजदारिकेति तर्कयामि।]

**तापसी** – जो इसकी ऐसी आकृति है, इससे अनुमान लगाती हूँ कि यह भी राजकुमारी है।

**चेटी** – सुट्ठु अय्या भणादि। अहं वि अणुहूदसुहत्ति पेक्खामि। [सुष्ठु आर्या भणति। अहमप्यनुभूतसुखेति पश्यामि।]

**चेटी** – आप ठीक कहती है। इसने (याचक की बहिन ने) भी सुख का अनुभव किया है ऐसा मैं भी देख रही हूँ।

**यौगन्धरायणः** – (आत्मगतं) हन्त भोः! अर्धमवसितं भारस्य। यथा मन्त्रिभिः सह समर्थितं, तथा परिणमति। ततः प्रतिष्ठिते स्वामिनि तत्रभवतीमुपनयतो मे इहात्रभवती मगधराजपुत्री विश्वासस्थानं भविष्यति। कुतः –

**यौगन्धरायण** – (अपने मन में) अहो! मेरा आधा भार कम हो गया। मैंने मन्त्रियों के साथ जैसा निश्चय किया था वैसा ही फल मिलेगा। इसके बाद महाराज उदयन के सिंहासन पर पुनः प्रतिष्ठित होने पर पूज्या वासवदत्ता को उनके पहुँचाते समय मेरी गवाह (साक्षिणी) ये राजकुमारी पद्मावती होंगी। क्योंकि –

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये यौगन्धरायणः भवितव्यतापि सिद्धवचनानुसारमेव पूर्णतां प्राप्नोतीति सूचयन्नाह–

**पद्मावती नरपतेर्महिषी भवित्री**
**दृष्टा विपत्तिरथ यैः प्रथमं प्रदिष्टा।**
**तत्प्रत्ययात् कृतमिदं नहि सिद्धवाक्या–**
**न्युत्क्रम्य गच्छति विधिः सुपरीक्षितानि॥११॥**

**अन्वयः** – यैः प्रथमं विपत्तिः दृष्टा, अथ (तैः) पद्मावती नरपतेः भवित्री महिषी प्रदिष्टा। तत्प्रत्ययात् इदं कृतम्। हि विधिः, सुपरीक्षितानि, सिद्धवाक्यानि, उत्क्रम्य न गच्छति।

**पदार्थः** – यैः = जिन पुष्पकभद्रादि ने, प्रथमं = पहले, विपत्तिः = (कष्ट) विपत्ति, दृष्टा = देखी, तैः = उन्हीं के द्वारा, अथ = अनन्तर, पद्मावती = मगधराजपुत्री, नरपतेः = महाराज उदयन की, भवित्री = होने वाली, महिषी = पटरानी, प्रदिष्टा = बतायी गई। तत्प्रत्ययात् = उन्हीं भविष्यवक्ताओं के विश्वास से, इदं कृतं = यह कार्य किया है, हि = क्योंकि, विधिः = भवितव्यता, सुपरीक्षितानि = अच्छी तरह से परखे हुये, सिद्धवाक्यानि = सिद्धपुरुषों के वचनों का, उत्क्रम्य = उल्लंघन करके, न गच्छति = नहीं चलती है॥११॥

**हिन्दी अर्थ** – जिन भविष्यवक्ताओं ने आने वाली विपत्ति (राजा उदयन का राज्य छिन जाना और वासवदत्ता का गुप्त रूप में इधर-उधर भटकना) की पहले ही सूचना दी थी, उन्हीं के द्वारा यह भविष्यवाणी भी की गई थी कि "पद्मावती वत्सराज उदयन की महिषी होगी।" उन्हीं पुष्पकभद्रादि सिद्धपुरुषों की बात मानकर मैंने वासवदत्ता को धरोहर के रूप में (पद्मावती के पास) रखा है, क्योंकि विधि भी, सिद्धपुरुषों के वचनों का उल्लंघन नहीं करती है॥११॥

**व्याख्या – पर्यायपदानि** – यैः = पुष्पकभद्रादिभिः, प्रथमं = पूर्वमेव, विपत्तिः = विपद्, दृष्टा = सूचिता, अथ = अनन्तरं, तैरेव, पद्मावती= मगधराजपुत्री, नरपतेः = वत्सराजोदयनस्य, भवित्री = भाविनी महिषी = पट्टराज्ञी, प्रदिष्टा = संसूचिता। तत्प्रत्ययात् = तेषां विश्वासात्, मया इदं = वासवदत्तायाः न्यासीकरणं, कृतं = विहितं, हि = यतः, विधिः = दैवं, सुपरीक्षितानि = सम्यक् परीक्षितानि, सिद्धवाक्यानि = सिद्धपुरुषवचनानि, उत्क्रम्य = उल्लङ्घ्य, न = नहि, गच्छति = याति।

**भावार्थः** – अत्र हि यौगन्धरायणः चिन्तयति यत् यैः पुष्पकभद्रादिभिरादेशिकैः पूर्वमेव उदयनः विपन्नः

पद्मावतीञ्च महिषीरूपेण दृष्टा। मयापि तेषां वचनविश्वासात् वासवदत्तायाः न्यासीकरणं कृतम्। यतोहि विधिरपि सम्यक् परीक्षितानि सिद्धपुरुषवचनानि उल्लङ्घ्य नहि याति, अपितु ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति एव रति भावः।

**छन्दः** – अस्मिन् पद्ये वसन्ततिलकावृत्तमस्ति।

**अलङ्कारः** – अत्र सामान्येन विशेषस्य समर्थनाद् अर्थान्तरन्यासो वर्तते।

**व्याकरणम्** – भवित्री – भू+तृच्+ङीप्। प्रदिष्टा – प्र+दिश्+क्त+टाप्। सुपरीक्षितानि – सु+परि+ईक्ष्+क्त।

(ततः प्रविशति ब्रह्मचारी)

(तत्पश्चात् ब्रह्मचारी प्रवेश करता है।)

**ब्रह्मचारी** – (ऊर्ध्वमवलोक्य) स्थितो मध्याह्नः। दृढमस्मि परिश्रान्तः। अथ कस्मिन् प्रदेशे विश्रमयिष्ये? (परिक्रम्य) भवतु दृष्टम्। अभितस्तपोवनेन भवितव्यम्। तथाहि –

**ब्रह्मचारी** – (ऊपर देखकर) दोपहर हो गई है। अत्यधिक थक गया हूँ। किस जगह विश्राम किया जाय? (घूमकर) अच्छा, देख लिया। चारों और तपोवन होना चाहिए, क्योंकि –

**प्रसङ्गः** – प्रकृते पद्येऽस्मिन् ब्रह्मचारी तपोवनलक्षणानि वर्णयन्नाह –

**विश्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्यया**
**वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः।**
**भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो**
**निः सन्दिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रयः॥१२॥**

**अन्वयः** – देशागतप्रत्ययाः, अचकिता हरिणाः विश्रब्धं चरन्ति, दयारक्षिताः सर्वे वृक्षाः पुष्पफलैः समृद्धविटपाः। कपिलानि गोकुलधनानि भूयिष्ठम्। दिशः अक्षेत्रवत्यः। हि अयं धूमः बह्वाश्रयः। निःसन्दिग्धम् इदं तपोवनम्।

**पदार्थः** – देशागतप्रत्ययाः = तपोवन में आने से उत्पन्न विश्वास से, अचकिताः = आश्चर्यरहित, हरिणाः = मृग, विश्रब्धं = शङ्का रहित होकर, चरन्ति = घूम फिर रहे है। दया रक्षिताः = दया पूर्वक पाले गये, पोषित किये गये, सर्वे = समस्त वृक्षाः = पेड, पुष्पफलैः = फूलों व फलों से, समृद्धविटपाः = समृद्धशाखाओं वाले हैं। कपिलानि = कपिला (श्वेत-पीले रंग) वर्ण की, गोकुलधनानि = गोधन (गायें), भूयिष्ठं = बहुत ज्यादा हैं, दिशः = दिशायें, अक्षेत्रवत्यः = विना खेती वाली भूमि से युक्त हैं। हि = निश्चय ही, अयं धूमः = यह धुआँ, बह्वाश्रयः = अनेक स्थानों से उठ रहा हैं, इदं = पूरोदृश्यमान, निःसन्दिग्धं = निःसन्देह, तपोवनं = तपोवन ही है।१२॥

**हिन्दी अर्थ** – ब्रह्मचारी विश्राम हेतु उपयुक्त स्थान (तपोवन) के चिह्नों को बतलाते हुये कहता है – इस स्थान में मृग निर्भय विचरण कर रहे हैं। यहाँ वृक्ष भी दयापूर्वक पाले गये एवं फूलों-फलों से लदी हुई शाखाओं वाले हैं कपिला गायों का बाहुल्य है। दिशाएं खेती योग्य मैदान से रहित है, यहाँ अनेक स्थानों से निकलकर हवन सम्बन्धी धुआँ भी चारों और फैल रहा है। इससे यह प्रमाणित होता है कि यह निश्चित रूप से तपोवन ही है॥१२॥

**व्याख्या – पर्यायपदानि** – अत्र = अस्मिन् स्थाने, देशागतप्रत्ययाः = आश्रमागतोत्पन्नविश्वासाः, अचकिताः = निर्भयाः, हरिणाः = मृगाः, विश्रब्धं = निश्शङ्कं, चरन्ति = भ्रमन्ति तृणं खादन्ति च। दयारक्षिताः = कृपापालिताः, सर्वे = सकलाः, वृक्षाः = द्रुमाः, पुष्पफलैः = कुसुमफलैः, समृद्धविटपाः = परिपूर्णशाखाः। कपिलानि = पिशङ्गवर्णानि, गोकुलधनानि = धेनुयूथवित्तानि, भूयिष्ठं = बाहुल्येन (सन्ति)। दिशः = दिशाः, अक्षेत्रवत्यः = कृषिक्षेत्ररहिताः। इदं = पुरोदृश्यमानं वनं, निःसन्दिग्धं = निश्चितं, तपोवनम् = आश्रमपदम् अस्ति, हि = यतः, धूमः = हवनोत्पन्नधूम्रः, बह्वाश्रयः = नानाश्रयः प्रसरतीति।

**भावार्थः** – अस्मिन् स्थाने हरिणाः निर्भया विचरन्तः सन्ति, सम्यक् रक्षिताः वृक्षाः पुष्पफलैः समृद्धास्सन्ति

कपिला-गावोऽपि आधिक्येन दृश्यन्ते बह्वाश्रयो हवनीयधूमोऽपि सर्वत्र प्रसरति एभिः सर्वैरपि लक्षणैः ज्ञायते यद् इदं तपोवनमेवास्तीति ॥१२॥

**छन्दः** – पद्येऽस्मिन् शार्दूलविक्रीडितं वृत्तमस्ति।

**अलङ्कारः** – अस्मिन् पद्ये तपोवनस्य स्वाभाविकवर्णनात् स्वभावोक्तिरलङ्कारोऽस्ति। तल्लक्षणमुक्तं दण्डिना–

नानावस्थं पदार्थानां रूपं साक्षाद्विवृण्वती।
स्वभावोक्तिश्च जातिश्चेत्याद्यासालङ्कृतिर्यथा॥

**व्याकरणम्** – आगतः प्रत्ययो येषां ते आगतप्रत्ययाः (ब०व्री०) देशे आगतप्रत्यया इति देशागतप्रत्ययाः (स०त०) न चकिता अचकिताः (नञ्) पुष्पाणि च फलानि च पुष्पफलानि तैः पुष्पफलैः (द्वन्द्व) बहवः आश्रयाः यस्य सः बह्वाश्रयः (ब०व्री०)। विस्रब्धं – वि+स्रम्भ्+क्त। भूयिष्ठं – भू+इष्ठन्+इडागम।

**विशेषः** – तपोवनस्य वातावरणम् अत्यन्तं शान्तः अंहिसकः पवित्रश्च भवति। हरिणाः निर्भयाः विचरन्ति। तपस्विनः वृक्षान् पुत्रवत् पालयन्ति। सर्वाणि धार्मिक-कृत्यानि निर्विघ्नं सम्पन्नं भवन्ति।

**ब्रह्मचारी** – यावत् प्रविशामि। (प्रविश्य) अये! आश्रमविरुद्धः खल्वेषः जनः। (अन्यतो विलोक्य) अथवा तपस्विजनोऽप्यत्र। निर्दोषमुपसर्पणम्। अये! स्त्रीजनः।

**ब्रह्मचारी** – तो भीतर (अन्दर) चलूँ। (अन्दर जाकर) अरे! यह आदमी तो आश्रम के विरुद्ध मालूम होता है। (दूसरी तरफ देखकर) अथवा यहाँ तपस्वी लोग भी हैं पास जाने में दोष नहीं हैं। अरे यहाँ तो स्त्रियाँ भी हैं।

**काञ्चुकीयः** – स्वैरं स्वैरं प्रविशतु भवान्। सर्वजनसाधारणमाश्रमपदं नाम।

**काञ्चुकीय** – आप निःशङ्क होकर प्रवेश करें। आश्रम तो सभी लोगों के लिए होता है।

**वासवदत्ता** – हम्!

**वासवदत्ता** – अरे!

**पद्मावती** – अम्मो! परपुरुसदंसणं परिहरदि अय्या। भोदु, सुपरिवालणी ओक्खु मव्णासो। [अम्मो! परपुरुषदर्शनं परिहरत्यार्या। भवतु सुपरिपालनीयः खलु मन्न्यासः।]

**पद्मावती** – अहो! आर्या (वासवदत्ता) पर पुरुष को देखना नहीं चाहती। अच्छा, अब मेरी धरोहर की रक्षा सावधानी से होनी चाहिए।

**काञ्चुकीयः** – भोः! पूर्वं प्रविष्टाः स्मः। प्रतिगृह्यतामतिथिसत्कारः।

**काञ्चुकीय** – महोदय! हम लोग पहले से आये हुए हैं। अतः आप हमारा अतिथि सत्कार स्वीकार करें।

**ब्रह्मचारी** – (आचम्य) भवतु भवतु। निवृत्तपरिश्रमोऽस्मि।

ब्रह्मचारी – (आचमन करके) बस-बस! मेरी थकावट दूर हो गई।

**यौगन्धरायणः** – भोः! कुतः आगम्यते क्व गन्तव्यं, क्वाधिष्ठानमार्यस्य!

**यौगन्धरायण** – श्रीमान्! कहाँ से आ रहे हो? कहाँ जाना है? और आपका शुभस्थान कहाँ हैं?

**ब्रह्मचारी** – भोः! श्रूयताम्। राजगृहतोऽस्मि। श्रुतिविशेषणार्थं वत्सभूमौ लावाणकं नाम ग्रामस्तत्रोषितवानस्मि।

**ब्रह्मचारी** – श्रीमान्! सुनें। मैं राजगृह से आ रहा हूँ। वत्सराज उदयन के राज्य में लावाणक नाम का एक गाँव है। वहाँ मैंने वेदों का विशेष अध्ययन करने के लिए कुछ समय निवास किया है।

**वासवदत्ता** – (आत्मगतं) हा वालाणाअं णाम। लावाणअसंकित्तणेण पुणो णवीदिको विअ मे सन्दावो। [हा! लावाणकं नाम। लावाणकसंकीर्तनेन पुनर्नवीकृत इव मे सन्तापः।]

**वासवदत्ता** – (मन में) हाय! लावाणक! लावाणक नाम लेने से मेरा सन्ताप फिर नया सा हो गया है।

**टिप्पणी** – अये- आश्चर्य या शङ्कासूचक अव्यय। स्वैरं-स्वैरं – उत्कण्ठा दिखाने के लिये दो बार प्रयोग।

श्रुतिविशेषणार्थम् – वेदों का विशेष ज्ञान पाने के लिए। वत्सभूमौ – वत्सदेश में, प्रयाग के चारों और यमुना के दक्षिणी किनारे पर फैला हुआ उदयन का राज्य।

**यौगन्धरायणः** – अथ परिसमाप्ता विद्या?

**यौगन्धरायण** – क्या विद्याध्ययन समाप्त हो गया?

**ब्रह्मचारी** – न खलु तावत्।

**ब्रह्मचारी** – अभी नहीं।

**यौगन्धरायणः** – यद्यनवसिता विद्या, किमागमनप्रयोजनम्?

**यौगन्धरायण** – यदि अध्ययन सम्पन्न नहीं हुआ तो चले क्यों आयें?

**ब्रह्मचारी** – तत्र खल्वतिदारुणं व्यसनं संवृत्तम्।

**ब्रह्मचारी** – वहाँ बडी भारी विपत्ति आ पडी है।

**यौगन्धरायणः** – कथमिव?

**यौगन्धरायण** – कैसी (विपत्ति)?

**ब्रह्मचारी** – तत्रोदयनो राजा प्रतिवसति।

**ब्रह्मचारी** – वहाँ उदयन नाम के राजा रहते है।

**यौगन्धरायणः** – श्रूयते तत्रभवानुदयनः। किं सः?

**यौगन्धरायण** – महाराज उदयन का नाम सुना है। उन्हें क्या हुआ?

**ब्रह्मचारी** – तस्यावन्तिराजपुत्री वासवदत्ता नाम पत्नी दृढमभिप्रेता किल।

**ब्रह्मचारी** – अवन्तिराजकुमारी वासवदत्ता नाम की पत्नी उन्हें अत्यधिक प्रिय थी।

**यौगन्धरायणः** – भवितव्यम्। ततस्ततः?

**यौगन्धरायण** – होगी। फिर क्या हुआ?

**ब्रह्मचारी** – ततस्तस्मिन् मृगयानिष्क्रान्ते राजनि ग्रामदाहेन सा दग्धा।

**ब्रह्मचारी** – तब (एक दिन) राजा के शिकार खेलने के लिए चले जाने पर गाँव में आग लगने से वह जल गई।

**वासवदत्ता** – (आत्मगतम्) अलिअं अलिअं खु एदं। जीवामि मन्दभाआ। [अलीकं अलीकं खलु एतत्। जीवामि मंदभागा।]

**वासवदत्ता** – (मन में) मिथ्या, मिथ्या है यह। मैं अभागिन जी रही हूँ।

**यौगन्धरायणः** – ततस्ततः?

**यौगन्धरायण** – उसके बाद क्या हुआ?

**ब्रह्मचारी** – ततस्तामभ्यवपत्तुकामो यौगन्धरायणो नाम सचिवस्तस्मिन्नेवाग्नौ पतितः।

**ब्रह्मचारी** – तब उसको (वासवदत्ता को) बचाने के लिये यौगन्धरायण नाम का मंत्री भी उसी आग में गिर पड़ा।

**यौगन्धरायणः** – सत्यं पतित इति। ततस्ततः?

**यौगन्धरायण** – सचमुच गिर गया। फिर क्या हुआ?

**ब्रह्मचारी** – ततः प्रतिनिवृत्तो राजा तद्वृत्तान्तं श्रुत्वा तयोर्वियोगजनितसन्तापस्तस्मिन्नेवाग्नौ प्राणान् परित्यक्तुकामोऽमात्यैर्महता यत्नेन वारितः।

**ब्रह्मचारी** – उसके बाद शिकार से लौटने पर राजा ने जब उन दोनों का समाचार सुना, तब वह उनके वियोग से सन्तप्त होकर उसी आग में (कूद कर) प्राण देने को उद्यत हो गया। किन्तु मन्त्रियों ने बड़े यत्न से उसे रोका।

**वासवदत्ता** – (आत्मगतं) जाणामि जाणामि अय्यउत्तस्स मइ साणुक्कोसत्तणं। [जानामि जानाम्यार्यपुत्रस्य मयि सानुक्रोशत्वम्।]

**वासवदत्ता** – (मन में) जानती हूँ, जानती हूँ, आर्यपुत्र मुझ पर कृपा रखते हैं।

**यौगन्धरायणः** – ततस्ततः?

**यौगन्धरायण** – तब क्या हुआ?

**ब्रह्मचारी** – ततस्तस्याः शरीरोपभुक्तानि दग्धशेषाण्याभरणानि परिष्वज्य राजा मोहमुपगतः।

**ब्रह्मचारी** – उसके बाद वासवदत्ता के पहने हुए आभुषणों को, जो जलने से बच गये थे, छाती से लगाकर राजा मूर्च्छित हो गये।

**सर्वे** – हा!

**सभी** – हाय!

**वासवदत्ता** – (स्वगतं) सकामो दाणिं अय्य जोअंधराअणो होदु। [सकाम इदानीमार्ययौगन्धरायणो भवतु।]

**वासवदत्ता** – (मन में) अब आर्य यौगन्धरायण की अभिलाषा पूर्ण हो।

**चेटी** – भट्टिरारिए! रोदिदि खु इअं अय्या। [भर्तृदारिके! रोदिति खलु इयम् आर्या।]

**दासी** – राजकुमारी जी! ये आर्या तो रो रही हैं।

**पद्मावती** – साणुक्कोसाए होदव्वं। [सानुक्रोशया भवितव्यम्।]

**पद्मावती** – ये दयालु (भावुक प्रकृति की) होंगी।

**यौगन्धरायणः** – अथ किमथ किम्? प्रकृत्या सानुक्रोशा में भगिनी। ततस्ततः?

**यौगन्धरायण** – और क्या, और क्या! मेरी बहिन स्वभाव से ही दयालु है। फिर क्या हुआ?

**ब्रह्मचारी** – ततः शनैः शनैः प्रतिलब्धसंज्ञः संवृत्तः।

**ब्रह्मचारी** – उसके बाद धीरे-धीरे राजा की मूर्च्छा दूर हुई।

**पद्मावती** – दिट्ठिआ धरइ। मोहं गदोत्ति सुणिअ सुण्णं विअ मे हिअअं? [दिष्ट्या ध्रियते। मोहं गत इति श्रुत्वा शून्यमिव मे हृदयम्?]

**पद्मावती** – भाग्य से वे जी रहे हैं। मूर्च्छित हो गये यह सुनकर मेरा हृदय शून्य सा हो गया था।

**यौगन्धरायणः** – ततस्ततः?

**यौगन्धरायण** – तब क्या हुआ?

**ब्रह्मचारी** – ततः स राजा महीतलपरिसर्पणपांसुपाटलशरीरः सहसोत्थाय हा वासवदत्ते! हा अवन्तिराजपुत्रि! हा प्रिये! हा प्रियशिष्ये! इति किमपि किमपि बहु प्रलपितवान्। किं बहुना –

**ब्रह्मचारी** – तदनन्तर भूमि पर लोटने से राजा का शरीर धूलिधूसरित हो गया। फिर अचानक उठकर हाय वासवदत्ता, हाय वासवदत्ता, हाय अवन्तिराजपुत्रि! हाय प्रिये! हाय प्रियशिष्ये! इत्यादि बहुत विलाप करने लगे। अधिक क्या कहूँ–

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये ब्रह्मचारी राज्ञः उदयनस्य वासवदत्तां प्रति अनुरागातिशयं वर्णयन्नाह –

**नैवेदानीं तादृशाश्चक्रवाका**
**नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः।**
**धन्या सा स्त्री यां तथा वेत्ति भर्ता**
**भर्तृस्नेहात् सा हि दग्धाप्यदग्धा॥ १३॥**

**अन्वयः** – इदानीं तादृशाः चक्रवाकाः न एव, स्त्रीविशेषैः वियुक्ताः अन्ये अपि नैव, सा स्त्री धन्या यां भर्ता तथा वेत्ति। हि भर्तृस्नेहात् दग्धा अपि सा अदग्धा॥ १३॥

**पदार्थः** – इदानीम् = इस समय, तादृशाः = उस तरह के, चक्रवाकाः = चकवे, नैव = नहीं हैं, अन्ये = दूसरे लोग, स्त्रीविशेषैः = विशिष्ट स्त्रियों से, वियुक्ताः = विरहित लोग, अपि = भी, तादृशाः नैव = वैसे नहीं हैं। भर्ता = स्वामी (पति), यां = जिस स्त्री को, तथा = उस तरह से, वेत्ति = मानता है, सा = वह स्त्री, धन्या = धन्य है, हि = क्योंकि, सा = वह स्त्री, भर्तृस्नेहात् = पति के प्रेम से, दग्धा अपि = जलकर भी, अदग्धा = जली नहीं है, अपितु जीवित है।

**हिन्दी अर्थ** – इस समय राजा उदयन के समान न तो चकवे हैं और न विशिष्ट स्त्रियों से वियुक्त हुये अन्य कोई हैं। वह स्त्री धन्य है, जिसे उसका पति इतना चाहता है। निःसन्देह पति के प्रेम के कारण वह स्त्री जलकर भी नहीं जली है, अपितु अमर हो गई।

**व्याख्या – पर्यायपदानि** – इदानीम् = अस्मिन् समये, तादृशाः = उदयनसदृशाः, चक्रवाकाः = कोकाः, न एव = नहि सन्ति, स्त्रीविशेषैः = विशिष्टयोषिद्भिः, वियुक्ताः = विरहिताः, अन्येऽपि = इतरेऽपि जनाः, नैव तादृशा = विरहव्यथिता न सन्ति। सा स्त्री = तादृशी पत्नी, धन्या = अभिनन्दनीया, यां = नारीं, भर्ता = पतिः, तथा = तेन प्रकारेण स्नेहातिशयेन, वेत्ति = मन्यते। हि = निश्चयेन, भर्तृस्नेहात् = पत्युः प्रेम्णा, दग्धा अपि = भस्मीभूतापि, सा = नारी, अदग्धा = न भस्मीभूता जीविता वर्तते इत्यर्थः॥१३॥

**भावार्थः** – इदानीन्तु चक्रवाका अपि खलु उदयन इव विरहाकुलाः नावलोक्यन्ते। उदयनः स्त्रीवियुक्तान् रामादीनप्यतिशेते। सा वासवदत्ता निश्चयेन धन्या यस्यां भर्तृः तादृशोऽनुरागो वर्तते। अतः सा दग्धाऽपि कीर्त्तिशरीरेण जीविता एव।

**छन्दः** – पद्येऽस्मिन् शालिनीवृत्तं वर्तते। तल्लक्षणमिदं – शालिन्युक्ता म्तौ तगौ गोब्धिलोकैः।

**अलङ्कारः** – श्लोकेऽस्मिन् प्रतीपालङ्कारोऽस्ति। तस्य लक्षणमिदं – प्रतीपमुपमानस्योपमेयत्व प्रकल्पनम्। अस्मिन्नेव पद्ये दग्धाऽप्यदग्धा इत्यत्र विरोधाभासालङ्कारोऽप्यस्ति। तल्लक्षणमिदं – विरुद्धमिव भासेत विरोधोऽसौ निगद्यते।

**यौगन्धरायणः** – अथ भोः! तं तु पर्यवस्थापयितुं न कश्चिद् यत्नवानमात्यः?

**यौगन्धरायण** – ब्रह्मचारी जी! तो क्या महाराज को होश में लाने के लिये किसी मन्त्री ने प्रयत्न नहीं किया?

**ब्रह्मचारी** – अस्ति रुमण्वान्नामामात्यो दृढं प्रयत्नवांस्तत्र भवन्तं पर्यवस्थापयितुम्। स हि –

**ब्रह्मचारी** – रुमण्वान् नाम का एक मन्त्री है, महाराज को होश में लाने के लिए बहुत अधिक प्रयास किया है। क्योंकि वह –

**टिप्पणी** – अथ – यह प्रश्नार्थक अव्यय है। पर्यवस्थापयितुम् – आश्वासन आदि से होश में लाने के लिए। परि+अव+स्था+णिच्, पुक्+तुमुन्।

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये ब्रह्मचारी, अमात्यो रुमण्वान् राजानं पर्यवस्थापयितुं प्राणपणेन प्रयतत इति वर्णयन्नाह –

**अनाहारे तुल्यः सततरुदितक्षामवदनः**
**शरीरे संस्कारं नृपतिसमदुःखं परिवहन्।**
**दिवा वा रात्रौ वा परिचरति यत्नैर्नरपतिं**
**नृपः प्राणान् सद्यस्त्यजति यदि तस्याप्युपरमः॥१४॥**

**अन्वयः** – अनाहारे तुल्यः सततरुदितक्षामवदनः नृपति समदुःखं शरीरे संस्कारं परिवहन्, दिवा वा रात्रौ वा यत्नैः नरपतिं परिचरति। यदि नृपः प्राणान् त्यजति तर्हि तस्य अपि सद्यः उपरमः।

**पदार्थः** – अनाहारे = भोजन नहीं करने में, तुल्यः = समान, सततरुदितक्षामवदनः = निरन्तर रोने से

मलिन वदन वाले, शरीरे = शरीर में, नृपतिसमदु:खं = राजा के समान ही दु:ख को, संस्कारं च = और स्नान आदि को, परिवहन् = धारण करते हुये, दिवा वा = दिन हो, रात्रि वा = या रात हो लगातार, यत्नैः = अनेक प्रयासों से, नरपतिं = राजा की, परिचरति = सेवा कर रहे हैं। यदि = अगर, नृपः = राजा, प्राणान् = प्राणों को, त्यजति = छोड़ देते हैं तो, तस्य = उसकी, अपि = भी, सद्यः = तुरन्त, उपरमः = मृत्यु निश्चित है ॥१४॥

**हिन्दी अर्थ** – राजा के भोजन नहीं करने पर वह (रुमण्वान्) भी अनाहार रहता है। निरन्तर रोने से मलिन वदन वाले राजा उदयन के समान ही दु:ख का अनुभव करते हुये उसने भी नहाना-धोना छोड़ दिया है। वह दिन-रात बड़े प्रयास से राजा की सेवा कर रहा है। यदि कदाचित् राजा प्राणों को त्याग दें तो तत्काल ही उसकी भी मृत्यु हो जायेगी ॥१४॥

**व्याख्या – पर्यायपदानि** – अनाहारे = आहाराभावं, अनशने, तुल्यः = सदृशं, सततरुदितक्षामवदनः = निरन्तररोदनमलिनाननः, नृपतिसमदु:खं = नृपतिना समं सदृशं दुखं कष्टं यस्मिन् तद्यथा स्यात्तथेति, नृपसमानकष्टं, शरीरे = देहे, संस्कारं = स्नानादिजनितस्वच्छतां, परिवहन् = धारयन्, दिवा वा रात्रौ वा = अहर्निशं, यत्नैः = प्रयत्नैः, नरपतिं = राजानमुदयनं, परिचरति = सेवते। यदि नृपः = राजा, प्राणान् = असून्, त्यजति = मुञ्चति, तर्हि तस्य = अमात्यरुमण्वतः अपि, सद्यः = तत्क्षणमेव, उपरमः = मृत्युः भवेत् ॥१४॥

**भावार्थः** – अमात्यरुमण्वान् राजनि अनाहारे सति स्वयमप्यनशनं करोति, तद्दु:खे समानदु:खमनुभवति। सोऽपि उदयन इव स्नानादिकमपि त्यजति, अहर्निशं राजानं सेवते। यदि कदाचित् राजा प्राणान् त्यजेत् तदा असावपि जीवितो न स्थास्यतीति निश्चितम्। इत्थं रुमण्वान् प्राणपणेन नृपतिं परिचरतीति भावः।

**छन्दः** – श्लोकेऽस्मिन् शिखरिणीवृत्तं वर्तते। तल्लक्षणं यथा – रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी।

**अलङ्कारः** – अनुप्रासालङ्कारो वर्तते।

**व्याकरणम्** – न आहारः अनाहारः तस्मिन् अनाहारे (नञ्०) सततं च तद् रुदितं सततरुदितं (कर्म०) तेन क्षामं वदनं यस्य सः सततरुदितवदनः (ब०व्री०) नृपतिना समं दु:खं यस्मिन् कर्मणि तत् नृपतिसमदु:खं (ब०व्री०) संस्कारं – सम्+कृ+घञ्। परिवहन् – परि+वह्+शतृ।

**विशेषः** – पद्येऽस्मिन् अमात्यरुमण्वतः राजानमुदयनं प्रति शुद्धा हार्दिकी च राजभक्तिः वर्णिता वर्तते।

**वासवदत्ता** – (स्वगतं) दिट्ठिआ सुणिक्खित्तो दाणीं अय्यउतो। [दिष्ट्या सुनिक्षिप्तः इदानीम् आर्यपुत्रः।]

**वासवदत्ता** – (मन में) सौभाग्य से इस समय आर्यपुत्र (पतिदेव) की देखभाल अच्छे व्यक्ति के हाथों में है।

**यौगन्धरायण** – (आत्मगतम्) अहो! महद्भारमुद्वहति रुमण्वान्। कुतः –

**यौगन्धरायण** – (मन में) अहो! रुमण्वान् बहुत बड़े भार को ढो रहा है। क्योंकि –

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये यौगन्धरायणः, रुमण्वतो वैशिष्ट्यं वर्णयन्नाह –

**सविश्रमो ह्ययं भारः प्रसक्तस्तस्य तु श्रमः।**
**तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः ॥१५॥**

**अन्वयः** – हि अयं भारः सविश्रमः तु तस्य श्रमः प्रसक्तः। हि यत्र नराधिपः अधीनः तस्मिन् सर्वम् अधीनम् ॥१५॥

**पदार्थः** – हि = निश्चितरूप से, अयम् = यह, भारः = वासवदत्ता को धरोहर रूप में रखने का बोझ, सविश्रमः = विश्रामयुक्त है, तस्य = उसका (रुमण्वान् का) तु = तो, श्रमः = राजा की रक्षारुपी परिश्रम, प्रसक्तः = विशेषरूप से संलग्न है। हि = क्योंकि, यत्र = जिसके, अधीनः = वश में, नराधिपः = राजा उदयन है, तस्मिन् = उस रुमण्वान् के सर्वं = समस्त राज्यकार्य, अधीनं = वश में है ॥१५॥

**हिन्दी अर्थ** – यौगन्धरायण कहता है कि मेरा यह भार तो कुछ कम हो गया है, किन्तु रुमण्वान् का भार और अधिक बढ़ गया है। क्योंकि राजा जिसके अधीन होता है, राज्य सम्बन्धी सारे कार्य भी उसी के अधीन रहते हैं ॥१५॥

**व्याख्या** – पर्यायपदानि – हि = निश्चयेन, अयम् = एषः, भारः = वासवदत्तारक्षणरूपः, मदीयभारः, सविश्रमः = विश्रान्तियुक्तः सञ्जातः अपि, तस्य = रुमण्वतः, श्रमः = भूपतिरक्षणरूपः, परिश्रमः, प्रसक्तः = विशेषेण संलग्नः, हि = यतः, यत्र = यस्मिन्, नराधिपः = राजा उदयनः, अधीनः = आयत्तः, तस्मिन् = तत्र, सर्वं = समस्तं राज्यकार्यम्, अधीनम् = आयत्तमेव भवति।

**भावार्थः** – यौगन्धरायणः कथयति यत् वासवदत्तायाः पद्मावती सविधे न्यासतया रक्षणाद् अधुना मम भारः तु न्यूनो जातः किन्तु रुमण्वान् साक्षाद् नृपतिमेव रक्षति। नृपरक्षक एव साम्राज्यरक्षको भवति। अतो मदीयभारापेक्षया रुमण्वतो भारः गुरुतरः इति भावः।

**छन्दः** – पद्येऽस्मिन् अनुष्टुब्वृत्तमस्ति।

**अलङ्कारः** – अत्र हि सामान्येन विशेषस्य समर्थनात् अर्थान्तरन्यासो वर्तते।

**व्याकरणम्** – भारः-भृ+अच्। सविश्रमः – स+वि+श्रम्+घञ्, वृद्धिनिषेधः। प्रसक्तः – प्र+स्रज्+क्त। अधीनम् – अधि+रव, ईनादेशः। विश्रमेण सहितः सविश्रमः (त०पु०) नराणामधिपः – नराधिपः (ष०त०)

(प्रकाशम्) अथ भोः! पर्यवस्थापित इदानीं स राजा?

**यौगन्धरायण** – (प्रकट में) क्यों महाराज! अब तो वे राजा होश में हैं?

**ब्रह्मचारी** – तदिदानीं न जाने। इह तया सह हसितम् इह तया सह कथितम्, इह तया सह पर्युषितम्, इह तया सह कुपितम्, इह तया सह शयितम्, इत्येवं तं विलपन्तं राजानममात्यैर्महता यत्नेन तस्माद् ग्रामाद् गृहीत्वाऽपक्रान्तम्। ततो निष्क्रान्ते राजनि प्रोषितनक्षत्रचन्द्रमिव नभोऽरमणीयः संवृत्तः स ग्रामः। ततोऽहमपि निर्गतोऽस्मि।

**ब्रह्मचारी** – वह तो अब मुझे मालूम नहीं। इस जगह उसके साथ हँसा था, इस जगह उसके साथ बात की थी, इस जगह उसके साथ बैठा था, इस जगह उसके साथ रुठा था, इस जगह उसके साथ सोया था – इस प्रकार विलाप करते हुए राजा को बड़े प्रयास के साथ मन्त्रिगण उस गाँव से लेकर चले गये। राजा के चले जाने के बाद वह गाँव चन्द्रमा और तारों से रहित आकाश की भाँति सौन्दर्यविहीन हो गया। इस कारण से मैं भी वहाँ से चला आया हूँ।

**तापसी** – सो खु गुणवन्तो णाम राआ, जो आअन्तुएणा वि इमिणा एव्वं पससीअदि। [स खलु गुणवान् नाम राजा य आगन्तुकेनाप्यनेनैवं प्रशस्यते।]

**तापसी** – वह राजा अवश्य ही गुणवान् है, जिसकी प्रशंसा आगन्तुक भी इस तरह कर रहा है।

**चेटी** – भठिदारिए! किं णु खु अवरा इत्थिआ तस्य हत्थं गमिस्सदि? [भर्तृदारिके! किन्नु खल्वपरा स्त्री हस्तं गमिष्यति।]

**चेटी** – राजकुमारी जी! क्या दूसरी स्त्री राजा को प्राप्त होगी?

**पद्मावती** – (आत्मगतं) मम हिअएण एव्व सह मंतिदं। [मम हृदयेनैव सह मन्त्रितम्।]

**पद्मावती** – (अपने मन में) मेरे मन के समान ही सोचा (मेरे मन की बात ही कही।)

**ब्रह्मचारी** – आपृच्छामि भवन्तौ। गच्छामस्तावत्।

**ब्रह्मचारी** – आप दोनों की अनुमति चाहता हूँ। मैं अब जा रहा हूँ।

**उभौ** – गम्यतामर्थसिद्धये।

**दोनों** – प्रयोजन सिद्धि के लिये जाइये।

**ब्रह्मचारी** – तथास्तु। (निष्क्रान्तः)

**ब्रह्मचारी** – ऐसा ही हो। (निकल जाता है।)

**यौगन्धरायणः** – साधु, अहमपि तत्र भवत्याभ्यनुज्ञातो गन्तुमिच्छामि।

**यौगन्धरायण** – अच्छा मैं भी राजकुमारीजी से आज्ञा लेकर जाना चाहता हूँ।

**काञ्चुकीयः** – तत्र भवत्याभ्यनुज्ञातो गन्तुमिच्छति किल।

**काञ्चुकीय** – आप से अनुमति लेकर ये भी जाना चाहते हैं।

**टिप्पणी** – आपृच्छामि – आङ् के योग में प्रच्छ् धातु से 'आङ्नुप्रच्छोः' वार्तिक द्वारा आत्मनेपद का रूप आपृच्छे होना चाहिए था न कि परस्मैपद। सम्भवतः कवि ऐसे प्रयोग से ब्रह्मचारी की अन्यमनस्कता एवं व्याकुलता प्रकट करना चाहता है।

**पद्मावती** – अय्यस्स अइणिअ अय्येण विना उक्कण्ठिस्सदि। [आर्यस्य भगिनिकाऽऽर्येण विनोत्कण्ठिष्यते।]

**पद्मावती** – इनकी बहिन इनके बिना उदास होगी।

**यौगन्धरायणः** – साधुजनहस्तगतैषा नोत्कण्ठिष्यते। (काञ्चुकीयमवलोक्य) गच्छामस्तावत्।

**यौगन्धरायण** – भले लोगों के हाथ में पड़ने के कारण यह नहीं घबराएगी। (काञ्चुकीय को देखकर) तो मैं जाता हूँ।

**काञ्चुकीयः** – गच्छतु भवान् पुनर्दर्शनाय।

**काञ्चुकीय** – जाइये आप, फिर दर्शन दीजियेगा।

**यौगन्धरायणः** – तथास्तु। (निष्क्रान्तः)

**यौगन्धरायण** – अच्छा। (यौगन्धरायण चला जाता है।)

**काञ्चुकीयः** – समय इदानीमभ्यन्तरं प्रवेष्टुम्।

**काञ्चुकीय** – अब भीतर चलने का समय हो गया है।

**पद्मावती** – अय्ये! वंदामि। [आर्ये! वन्दे।]

**पद्मावती** – आर्ये! प्रणाम करती हूँ।

**तापसी** – जादे! तब सदिसं भत्तारं लभेहि। [जाते! तव सदृशं भर्तारं लभस्व।]

**तापसी** – पुत्री! तुम्हें अपने योग्य पति मिले।

**वासवदत्ता** – अय्ये! वंदामि दाव अहम्। [आर्ये! वन्दे तावदहम्।]

**वासवदत्ता** – आर्ये! मैं भी प्रणाम करती हूँ।

**तापसी** – तुवं पि अइरेण भत्तारं ससादेहि। [त्वमपि अचिरेण भर्तारं समासादय।]

**तापसी** – तुम्हें भी शीघ्र तुम्हारा पति मिले।

**वासवदत्ता** – अणुग्गहीदम्हि। [अनुगृहीतास्मि।]

**वासवदत्ता** – अनुगृहीत हूँ।

**काञ्चुकीयः** – तदागम्यताम्। इत इतो भवति! सम्प्रति हि –

**काञ्चुकीय** – तो आइये। इधर से चलिये, इधर से। इस समय –

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये कविः काञ्चुकीयमुखेन सायङ्कालिकं दृश्यं वर्णयन्नाह –

**खगा वासोपेताः सलिलमवगाढो मुनिजनः**
**प्रदीप्तोग्निर्भाति प्रविचरति धूमो मुनिवनम्।**
**परिभ्रष्टो दूराद्रविरपि च संक्षिप्तकिरणो**
**रथं व्यावर्त्यासौ प्रविशति शनैरस्तशिखरम्॥ १६॥**

**अन्वयः** – खगाः वासोपेताः मुनिजनः सलिलम् अवगाढः प्रदीप्तः अग्निः भाति, धूमः मुनिवनं प्रविचरति। दूरात् परिभ्रष्टः च संक्षिप्तकिरणः असौ रविः अपि रथं व्यावर्त्य शनैः अस्तशिखरं प्रविशति।

**पदार्थः** – खगाः = पक्षीगण, वासोपेता = घोंसलों में चले गये है, मुनिजनः = मुनिजन, सलिलं = जल में, अवगाढः = स्नान करने लगे, अग्निः = आग, भाति = शोभित हो रही है, धूमः = यज्ञ का धुआँ, मुनिवनं = तपोवन में, प्रविचरति = फैल रहा है। दूरात् = दूर से, परिभ्रष्टः = गिरा हुआ (अस्ताचल को प्राप्त) रविः = सूर्य, अपि = भी, संक्षिप्त किरणः = किरणों को समेटे हुये, रथं = रथ को, व्यावर्त्य = लौटाकर, शनैः = धीरे-धीरे, अस्तशिखरम् = अस्ताचल की चोटी पर, प्रविशति = जा रहा है।

**हिन्दी अर्थ** – पक्षीगण अपने घोंसलों में चले गये हैं, मुनिजन (स्नानार्थ) जल में प्रविष्ट हो गये है, यज्ञाग्नि प्रदीप्त होकर सुशोभित हो रही है, तपोवन में धुआँ चारों ओर फैल रहा है और दूर आकाश से गिरा हुआ (नीचे उतरा हुआ) यह सूर्य भी अपनी किरणों को समेटते हुए रथ को लौटाकर धीरे-धीरे अस्ताचल की ओर जा रहा है।

**व्याख्या – पर्यायपदानि** – खगाः = पक्षिणः, वासोपेताः = स्वनीडमुपगताः, मुनिजनः = तपस्विगणः, सलिलं = जलम्, अवगाढः = स्नानार्थं प्रविष्टः, प्रदीप्तः = प्रज्वलितः, अग्निः = यज्ञाग्निः, भाति = प्रकाशते, धूमः = यज्ञधूम्रः, मुनिवनं = तपोवनं परितः, प्रविचरति = प्रसरति। दूरात् = दूर स्थानात्, परिभ्रष्टः = निपतितः, च = पुनः, संक्षिप्तकिरणः = सङ्कुचितरश्मयः सन् असौ = दृश्यमानः, रविः = सूर्योऽपि, रथं = स्यन्दनं, व्यावर्त्य = परिवर्त्य, शनैः = मन्दं मन्दम्, अस्तशिखरम् = अस्ताचलशृङ्गम्, प्रविशति = गच्छति। अर्थात् अधुनाऽत्र सायं वेला समुपागतेति भावः।

**भावार्थः** – खगानां स्वनीडगमनेन मुनीनां जलावगाहेन यज्ञाग्रेः प्रज्वलनेन यागधूमस्याश्रमम्परितः प्रसरणेन सूर्यस्य चास्ताचलं प्रति गमनेन सुसिद्धं यत् सायंवेला समुपागता।

**छन्दः** – अस्मिन् पद्ये शिखरिणीछन्दो वर्तते।

**अलङ्कारः** – श्लोकेऽस्मिन् सूर्यास्तस्य स्वाभाविकचित्रणेन स्वाभावोक्तिरलङ्कारोऽस्ति। सहैव 'खगाः वासोपेताः' इत्यादि वर्णनेन सन्ध्याकालस्यानुमानेनानुमानालङ्कारोऽप्यस्ति।

**व्याकरणम्** – वासमुपेताः – वासोपेताः (द्वि०त०)। मुनीनां वनं मुनिवनम् (ष०त०)। संक्षिप्ताः किरणाः येन सः संक्षिप्तकिरणः (ब०व्री०)। खगाः – खे (आकाशे) गच्छन्तीति खगाः, ख+गम्+ड। अवगाढः – अव+गाह्+क्त। प्रदीप्तः – प्र+दीप्+क्त। परिभ्रष्टः – परि+भ्रंश्+क्त।

**कोशः** – खगो विहङ्गविहगविहङ्गमविहायसः इत्यमरः।

(निष्क्रान्ताः सर्वे)

(सभी पात्रों का प्रस्थान)

**विशेषः** – अङ्कस्य समाप्तौ हि सर्वेषामपि मञ्चस्थपात्राणां ततो निर्गमनम् आवश्यकमिति कृत्वा (निष्क्रान्ताः सर्वे) तथोक्तम् – 'अन्तनिष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्तितः।'

[अन्त में सभी पात्रों का मञ्च से निर्गमन, अङ्क कहलाता है।]

**॥ इति प्रथमोऽङ्कः ॥**

**॥ प्रथम अङ्क समाप्त ॥**

# अथ द्वितीयोऽङ्कः

(ततः प्रविशति चेटी)

**चेटी** – कुञ्जरिए! कुञ्जरिए! कहिं हिं भट्टिदारिआ पुदमावदी? किं भणासि, एसा भट्टिदारिआ माहवीलदामण्डवस्सपस्सदो कन्दुएण कीलदिति। जाव भट्टिदारिअं उवसप्पामि। (परिक्रम्यावलोक्य) अम्मो इअं भट्टिदारिआ उक्करिदकण्णचूलिएण वा आम सञ्जादसेदविन्दुवि इत्तिदेण परिस्सन्नमणे अदं सणेण मुहेण कन्दुएण कीलन्दी एदो एव्व आअच्छदि। जाव उवसप्पिस्स। [कुञ्जरिके! कुञ्जरिके! कुत्र कुत्र भर्तृदारिका पद्मावती? किं भणसि, एषा भर्तृदारिका माधवीलतामण्डपस्य पार्श्वतः कन्दुकेन क्रीडतीति। यावद् भर्तृदारिकामुपसर्पामि। अम्मो! इयं भर्तृदारिका उत्कृतकर्णचूलिकेन व्यायामसञ्जातस्वेदबिन्दुविचित्रितेन परिश्रान्तरमणीयदर्शनेन मुखेन कन्दुकेन क्रीडन्तीत एवागच्छति। यावदुपसर्पामि।]

(निष्क्रान्ता)

(तदनन्तर दासी का प्रवेश)

**चेटी** – अरी कुञ्जरिका! राजकुमारी पद्मावती कहाँ है? कहाँ है? क्या कहती हो, यह राजकुमारी माधवीलताकुञ्ज मण्डप के समीप में गेंद खेल रही है। अच्छा, तो राजकुमारी के पास चलूँ। (घूमकर और देखकर) ओहो! राजकुमारी जिसने कर्णफूलों को ऊपर उठा लिया है और जिसका मुख व्यायाम से उत्पन्न पसीने की बूँदों से विलक्षण एवं थकावट से रमणीय दीख रहा है, गेंद खेलती हुई इधर ही आ रही है। अच्छा, समीप तो चलूँ।

(चली गई)

**टिप्पणी** – किं भणसि – क्या कहती हो? नाटक में इस तरह के प्रश्नोत्तर को आकाशभाषित कहते है। इसमें एक ही पात्र अभिनयपूर्वक प्रश्न उपस्थित कर उत्तर देता है। इसकी परिभाषा साहित्यदर्पण में इस प्रकार है –

'किं ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते।
श्रुत्वेकाऽनुक्तमप्यर्थं तस्मादाकाशभाषितम्॥'

अम्मो – हर्ष तथा आश्चर्यसूचक अव्यय। उत्कृतकर्ण चूलिकेन कर्णफूलों को कानों के ऊपर चढ़ाए हुए से। उत्कृते कर्ण चूलिके यस्मिन् तेन (बहुव्रीहिः)। मुखेन – इत्थंभूतलक्षणे सूत्र से तृतीया। क्रीडन्ती – क्रीड् +शतृ। उपसर्पामि – उप+सृप्+लट् व्यायामसञ्जातस्वेदबिन्दूविचित्रितेन – व्यायामेन सञ्जाताः (तृतीया तत्पुरुष) स्वेदस्य बिन्दवः (ष०त०) व्यायामसञ्जातश्च ते स्वेदबिन्दवः (कर्मधारय) तैः विचित्रितेन (तृ०त०)।

॥ प्रवेशकः॥

(प्रवेशक समाप्त)

(ततः प्रविशति कन्दुकेन क्रीडन्ती पद्मावती सपरिवारा वासवदत्तया सह।)

(तदनन्तर गेंद खेलती हुई पद्मावती परिजनों तथा वासवदत्ता के साथ प्रवेश करती है।)

**टिप्पणी** – प्रवेशकः – दो अङ्कों के बीच का एक प्रकार का अङ्क जिसमें नीच पात्र भूत तथा भविष्यत् की

घटनाओं की सूचना देते है। इसमें नीच पात्र प्राकृत में वार्तालाप करता है। यह विष्कम्भक की तरह ही होता है। परन्तु इसमें अन्तर यह है कि प्रवेश दो अङ्कों के मध्य में ही आता है। जैसा कि साहित्यदर्पणकार ने कहा है –

'प्रवेशकोऽनुदात्तोक्त्या नीचपात्रयोजित:।
अङ्कद्वयान्तर्विज्ञेय: शेषं विष्कम्भके यथा॥

**वासवदत्ता** – हला! एसो दे कन्दुओ। [हला! एष ते कन्दुक:।]

**वासवदत्ता** – सखी! यह तुम्हारी गेंद है।

**पद्मावती** – अय्ये! भोदु दाणि एत्तअं [आर्ये! भवतु इदानीम् एतावत्।]

**पद्मावती** – आर्ये! इस समय इतना ही पर्याप्त है।

**वासवदत्ता** – हला! अदिचिरं कन्दुएण कीलिअ अहि अ सञ्जादराआ परकेरआ विअ दे हत्था संवुत्ता। [हला! अतिचिरं कन्दुकेन क्रीडित्वाधिकसञ्जातरागौ परकीयाविव ते हस्तौ संवृत्तौ।]

**वासवदत्ता** – सखी! अधिक देर तक गेंद खेलने के कारण लालिमा बढ़ जाने से तुम्हारे हाथ मानो पराये हो गए है।

**चेटी** – कीलदु-कीलदु दाव भट्टिदारिआ। णिव्वत्तअदु दाव अअं कण्णाभावरमीणओ कालो। [क्रीडतु क्रीडतु तावद् भर्तृदारिका। निवर्त्यतां तावद् अयं कन्याभावरमणीय: काल:।]

**चेटी** – राजकुमारी जी खूब खेलें। कुँवारेपन के इस रमणीय समय को सफल करें।

**पद्मावती** – अय्ये! किं दाणिं मे ओह सिदुं विअ णिज्झाअसि? [आर्ये! किमिदानीं मामपहसितुमिव निध्यायसि?]

**पद्मावती** – आर्ये! क्या इस समय मेरी हँसी उड़ाने के लिए ताक रही हो?

**वासवदत्ता** – णहि णहि। हला! अधिअं अज्ज सोहदि। अभिदो विअ दे अज्जवरमुहं पेक्खामि। [नहि नहि। हला! अधिकमद्य शोभते अभित इव तेऽद्य वरमुखं पश्यामि।]

**वासवदत्ता** – नहीं नहीं। सखी! तुम्हारा मुख आज बहुत सज रहा है। अब मैं तुम्हारे वर का मुख निकट से देख रही हूँ।

**पद्मावती** – अवेहि। मा दाणिं मं ओह स। [अपेहि! मेदानीं मामपहस।]

**पद्मावती** – हटो, अब मेरी खिल्ली मत उड़ाओ।

**वासवदत्ता** – एसह्यि तुह्णीआ भविस्सम्हासेण बहू! [एषास्मि तूष्णीका भविष्यन्महासेनवधु!]

**वासवदत्ता** – हे महासेन की भावी पुत्रवधु! अच्छा मैं चुप हो गई।

**पद्मावती** – को ऐसो महासेणो णाम? [क एष महासेनो नाम?]

**पद्मावती** – ये महासेन कौन है?

**वासवदत्ता** – अत्थि उज्जइणीओ राजा पज्जोदो णाम। तदस बलपरिमाणणिवत्तं णामहेअं महासेणोक्ति। [अस्ति उज्जयिन्या राजा प्रद्योतो नाम। तस्य बलपरिमाणनिर्वृत्तं नामधेयं महासेन इति।]

**वासवदत्ता** – उज्जैन के राजा प्रद्योत है। विशाल सेना के स्वामी होने के कारण उनका नाम महासेन पड़ गया है।

**चेटी** – भट्टिदारिआ तेण रज्जा सह सम्बन्धं णेच्छदि। [भर्तृदारिका तेन राज्ञा सह सम्बन्धं नेच्छति।]

**चेटी** – राजकुमारी उस राजा के साथ सम्बन्ध नहीं करना चाहती है।

**वासवदत्ता** – अह केण खु दाणिं अभिलसदि? [अथ केन खल्विदानीमभिलषति?]

**वासवदत्ता** – तो फिर किसके साथ चाहती है?

**चेटी** – अत्थि वच्छराओ उअअणो णाम। तस्स गुणाणि भट्टदारिआ अभिलसदि। [अस्ति वत्सराज उदयनो नाम तस्य गुणान् भर्तृदारिकाभिलषति।]

**चेटी** – उदयन नाम का वत्सदेश का राजा है। राजकुमारी उसी के गुणों पर अनुरक्त है।

**वासवदत्ता** – (आत्मगतम्) अय्यउत्तं भत्तारं अभिलसदि (प्रकाशम्) केण कारणेन? [आर्यपुत्रं भर्तारमभिलषति। केन कारणेन?]

**वासवदत्ता** – (मन में) आर्यपुत्र को स्वामी बनाना चाहती है। (प्रकट) किस कारण?

**चेटी** – साणुक्कोसिक्ति। (सानुक्रोश इति।]

**चेटी** – चुंकि वह दयालु है।

**वासवदत्ता** – (आत्मगतं) जाणामि जाणामि। अअं विजणो एव्व उम्मादिदो। [जानामि जानामि। अयमपि जन एवमुन्मादितः।]

**वासवदत्ता** – (मन में) जानती हूँ जानती हूँ, यह व्यक्ति (मैं) भी इसी प्रकार उन्मत्त बनाया गया था।

**चेटी** – भट्टिदारिए! जदि सो राआ विरूवो भवे? [भर्तृदारिके! यदि स राजा विरूपो भवेत्?]

**चेटी** – राजकुमारी! यदि वह राजा कुरुप हो तो?

**वासवदत्ता** – णहि णहि। दंसणीओ एव्व। [नहि नहि। दर्शनीय एव।]

**वासवदत्ता** – नहीं, नहीं। वे तो देखने योग्य ही है अर्थात् बड़े ही सुन्दर है।

**पद्मावती** – अय्ये! कहं तुवं जाणासि? [आर्ये! कथं त्वं जानासि?]

**पद्मावती** – आर्ये! तुम कैसे जानती हो?

**वासवदत्ता** – (आत्मगतम्) अय्यउत्तपक्खवादेण अदिक्कन्दो समुदाआरो किं दाणि करिस्सं? होदु, दिट्ठं। (प्रकाशम्) हला! एव्वं उज्जईणीओ जणो मन्तेदि? [आर्यपुत्रपक्षपातेनातिक्रान्तः समुदाचारः। किमिदानीं करिष्यामि? भवतु, दृष्टम्। हला! एवमुज्जयिन्याः जनो मन्त्रयते।]

**वासवदत्ता** – (मन में) आर्यपुत्र का पक्ष लेकर मैंने शिष्टाचार का उल्लंघन कर दिया। अब क्या करूँ? अच्छा, उत्तर सूझ आया। (प्रकट) ऐसा उज्जैन के लोग कहते हैं।

**पद्मावती** – जुज्जइ। ण खु एसा उज्जइणो दुल्लहो। सव्वजणमणोभिरामं खु सोभग्गं णाम। [युज्यते। न खल्वेष उज्जयिनी दुर्लभः। सर्वजनमनोऽभिरामं खलु सौभाग्यं नाम।]

**पद्मावती** – ठीक है। उज्जैन के निवासियों के लिए उनका (उदयन का) दर्शन दुर्लभ नहीं है। सौन्दर्य सबके मन को आकृष्ट कर लेता है।

(ततः प्रविशति धात्री)

**धात्री** – जेदु भट्टिदारिआ। भट्टिदारिए! दिण्णासि। [जयतु भर्तृदारिका। भर्तृदारिके! दत्तासि।]

(तदनन्तर धाय का प्रवेश)

**धाय** – राजकुमारी की जय हो। राजकुमारी! तुम दे दी गई अर्थात् तुम्हारी सगाई हो गई।

**वासवदत्ता** – अय्योकस्स? [आर्ये! कस्मै?]

**वासवदत्ता** – देवी! किसे?

**धात्री** – वच्छराअस्स उदअणस्स। [वत्सराजायोदनयाय।]

**धाय** – वत्सराज उदयन को।

**वासवदत्ता** – अह कुसली सो राआ। [अथ कुशली स राजा?]

**वासवदत्ता** – वे राजा कुशल से तो है न?

**धात्री** – कुशली सोइह आअदो। तस्स भट्टिदारिआ पडिच्छिदा अ। [कुशली स इहागतः। तस्य भर्तृदारिका प्रतीष्टा च।]

**धाय** – वे कुशलपूर्वक आये है और उन्होंने राजकुमारी से विवाह सबन्ध भी स्वीकार कर लिया है।

**वासवदत्ता** – अच्चाहिदं। [अत्याहितम्]

**वासवदत्ता** – अनर्थ हो गया।

**धात्री** – किं एत्थ अच्चाहिदं? [किमत्रात्याहितम्?]

**धाय** – इसमें क्या अनर्थ हुआ?

**वासवदत्ता** – णा हु किञ्चि। तह णाम सन्तप्पिअ उदासीणो होदित्ति। [न खलु किञ्चित्। तथा नाम सन्तप्योदासीनो भवतीति।]

**वासवदत्ता** – कुछ नहीं। (वे राजा) उस प्रकार (वासवदत्ता के वियोग से) सन्तप्त होकर उदासीन हो गये – यही सोच कर मैंने ऐसा कहा है।

**धात्री** – अय्ये! आ अप्पहाणाणि सुलहपय्यवत्थाणाणि महापुरुसट्टि अआणि होन्ति। [आर्ये! आगमप्रधानानि सुलभ पर्यवस्थानानि महापुरुषहृदयानि भवन्ति।]

**धाय** – श्रीमती जी! महापुरुषों के हृदय शास्त्रों पर विश्वास करने के कारण आसानी से प्रकृतिस्थ हो जाते है।

**वासवदत्ता** – अय्ये! सअं एव्व तेण वरिदा? [आर्ये! स्वयमेव तेन वृत्ता।]

**वासवदत्ता** – देवी जी! क्या उन्होंने स्वयं वरण किया?

**धात्री** – णहि णहि। अण्णप्पओ अणेणा इह आअदस्स अभिजणविञ्ञाणाव औरूवं पेक्खिअ सअं एव्व महारावेण दिण्णा। [नहि, नहि, अन्यप्रयोजनेनेहागतस्य अभिजनविज्ञानवयोरूपं दृष्ट्वा स्वयमेव महाराजेन दत्ता।]

**धाय** – नहीं नहीं। किसी दूसरे उद्देश्य से आये हुए उनके कुल, ज्ञान, यौवन तथा सौन्दर्य को देखकर महाराज ने स्वयं ही पद्मावती को दे दिया।

**वासवदत्ता** – (आत्मगतम्) एव्वं! अणवरद्धो दाणिं एत्थ अय्यउतो। [एवम् अनपराद्ध इदानीमत्रार्यपुत्रः।]

**वासवदता** – (मन में) ऐसा। अब इसमें आर्यपुत्र का कोई दोष नहीं है।

(प्रविश्यापरा)

**चेटी** – तुवरदु तुवरदु दाव अय्या। अज्ज एव्व किल सोभणं णासतं। अज्ज एव्व कोदु अमङ्गलं कादव्वं तह अह्माणं भट्टिणी भणादि। [त्वरतां त्वरतां तावदार्या। अद्यैव किल शोभनं नक्षत्रम्। अद्यैव कौतुकमङ्गलं कर्त्तव्यमित्यस्माकं भट्टिनी भणति।]

(दूसरी दासी का प्रवेश)

**चेटी** – देवी! शीघ्रता कीजिए। हमारी महारानी कहती है कि आज ही उत्तम नक्षत्र है। (इसलिए) आज ही कंगन बाँधने का मङ्गलाचार सम्पन्न हो जाना चाहिए।

**वासवदत्ता** – (आत्मगतं) जह जह तुवरदि, तह तह अन्धी करेदि मे हिअअं। [यथा यथा त्वरते तथा तथान्धी करोति मे हृदयम्।]

**वासवदत्ता** – (मन में) जैसे-जैसे यह शीघ्रता कर रही है। वैसे-वैसे मेरा हृदय सूना होता जा रहा है।

**धात्री** – एदु एदु भट्टिदारिआ। [एत्वेतु भर्तृदारिका!]

(निष्क्रान्ताः सर्वे)

**धाय** – आइये, राजकुमारीजी! आइये।

(सबका प्रस्थान)

**॥ इति द्वितीयोऽङ्कः ॥**

**॥ दूसरा अङ्क समाप्त ॥**

# अथ तृतीयोऽङ्कः

(ततः प्रविशति विचिन्तयन्ती वासवदत्ता।)

**वासवदत्ता** – विवाहामोदसङ्कुले अन्तेउरचउस्साले परित्तजअ पदुमावदिं इह आअदह्मि पमदवण। जाव दाणिं भा अधेअणिव्वुक्तं दुःखं विणोदेमि। (परिक्रम्य) अहो! अच्चाहिदं अय्यउत्तो विणाम परकेरओ संवुता। जाव उवविसामि। (उपविश्य) धज्जा खु चक्कवाअवहू, जा अण्णो – ण्णाविरहिदाण जीवइ। ण खु अहं पाणाणि परत्तिजामि। अय्यउत्तं पेक्खामि ति एदिणा मणारहेण जीवामि मन्दभाआ। [विवाहामोदसङ्कुले अन्तःपुरचतुश्शाले परित्यज्य पद्मावतीमिहागतास्मि प्रमदवनम्। यावदिदानीं भागधेयनिवृत्तं दुःखं विनोदयामि। अहो! अत्याहितम्। आर्यपुत्रोऽपि नाम परकीयः संवृत्तः। यावद् उपविशामि। धन्या खलु चक्रवाकवधूः, याऽन्योऽन्यविरहिता न जीवति। न खल्वहं प्राणान् परित्यजामि। आर्यपुत्रं पश्यामीति एतेन मनोरथेन जीवामि मन्दभागा।]

(तदनन्तर सोचती हुई वासवदत्ता का प्रवेश)

**वासवदत्ता** – विवाह के आमोद-प्रमोद से परिपूर्ण रनिवास में पद्मावती को छोड़कर मैं यहाँ प्रमदवन (क्रीडोद्यान) में चली आई हूँ। अभी दुर्भाग्य से उपस्थित दुःख को तब तक कुछ शान्त करूँ। (घूमकर) हाय! अनर्थ हो गया। आर्यपुत्र भी परायी (स्त्री) के हो गये। तब तक बैठ जाती हूँ। (बैठकर) निःसन्देह यह चकवे की बहू (चकवी) ही धन्य है, जो एक दूसरे अलग होकर नहीं जीती। मैं तो प्राण भी नहीं छोड़ती। आर्यपुत्र को देखूँगी, इसी अभिलाषा से मैं अभागिन जी रही हूँ।

**टिप्पणी – विवाहामोदसङ्कुले** –विवाहस्य आमोदः तेन सङ्कुले (त०पु०) अन्तःपुरचतुश्शाले – चतसृणां शालानां समाहारः इति चतुश्शालम् (द्विगु) अन्तःपुरस्य चतुश्शालम् (ष०त०)। परित्यज्य – परि+त्यज्+ल्यप्। विचिन्त्यन्ती – वि+चिन्त्+शतृ। प्रमदवनं – प्रमदानां वनमिति। रानियों का क्रीडोद्यान। चक्रवाकवधूः – चक्रवाकस्य वधू, चक्रवाकीति।

(ततः प्रविशति पुष्पाणि गृहीत्वा चेटी)

(तत्पश्चात् दासी फूल लेकर आती है।)

**चेटी** – कहिं ण खु गदा आवन्ति आ? (परिक्रम्यावलोक्य) अम्मो! इअं चिन्तासुण्णहि अआ णीहारपडिहदचन्दलेहा विअ अमण्डिदभद्दअं वेसं धारअन्दी पिअङ्गुसिलापट्टए उवविट्ठा। जाव उपसप्पामि। (उपसृत्य) अय्ये! अवन्तिए। को कालो तुमं अण्णेसामि। [क्व नु खलु गता आर्यावन्तिका? अम्मो! इयं चिन्ताशून्यहृदया नीहारप्रतिहतचन्द्रलेखेवामण्डितभद्रकं वेषं धारयन्ती प्रियङ्गुशिलापट्टके उपविष्टा। यावदुपसर्पामि। आर्ये! कः कालः त्वामन्विष्यामि।]

**चेटी** – आवन्तिका आर्या कहाँ चली गई? (घूमकर और देखकर) अहो! ये तो हिमाच्छादित चन्द्रकला की भांति चिन्ता के मारे अपने आप में खोकर बिना श्रृंगार के भी सुन्दर वेश धारण किये हुये प्रियंगुलता के नीचे

शिलापट्ट पर बैठी हुई है। अच्छा, पास जाकर, आर्ये आवन्तिके (देवि)। मैं तुम्हें कितने समय से खोज रही हूँ।

**वासवदत्ता** – किण्णिमित्तं? (किन्निमित्तम्?)

**वासवदत्ता** – किसलिए?

**चेटी** – अह्माणं भट्टिणी भणादि – महाकुलप्पसूदा सिणिद्धा णिउणत्ति इम दाव कोदुअमालिअ गुह्मदु अय्या। [अस्माकं भट्टिनी भणति – महाकुलप्रसूता स्निग्धा निपुणेति इमां तावत् कौतुकमालिकां गुम्फत्वार्या।]

**चेटी** – हमारी स्वामिनी कह रही है कि आप उच्च कुल में उत्पन्न हुई है, स्नेह रखती है और निपुण है, इसलिए आप ही यह सौभाग्य की माला गूँथे।

**टिप्पणी** – भट्टिनी = भट्टः राजा, सोऽस्ति पतित्वेन अस्याः इति, भट्ट+इनि+ङीप्। कौतुकमालिकां – विवाह के समय हाथ में धारण करने की मङ्गलमाला। कौतुकमयी माला। गुम्फतु – रचयतु, गुम्फ+लोट्।

**वासवदत्ता** – अह कस्य किल गुह्मिदव्वं? [अथ कस्मै किल गुम्फितव्यम्।]

**वासवदत्ता** – किसके लिये (मुझे) माला गूँथनी है?

**चेटी** – अह्माअं भट्टिदारिआए। [अस्माकं भर्तृदारिकायै।]

**चेटी** – हमारी भर्तृदारिका (राजकुमारी) के लिए।

**वासवदत्ता** – (आत्मगतम्) एदंपि मए कत्तव्वं आसी। अहो! अकरुणा ख इस्सरा। [एतदपि मया कर्त्तव्यमासीत्। अहो! अकरुणाः खल्वीश्वराः।]

**वासवदत्ता** – (मन में) यह भी मुझे करना था। हाय! ईश्वर बड़े निर्दयी हैं।

**चेटी** – अय्ये! मा दाणिं अण्णा चिन्तिअ। एसो जमादुओ, मणिभूमीए हणाअदि। सिग्धे दाव गुह्मदु अय्या। [आर्ये! मेदानीमन्यच्चिन्तयित्वा। एष जामाता मणिभूम्यां स्नायति। शीघ्रं तावद् गुम्फत्वार्या।]

**चेटी** – आर्ये! इस समय आप दूसरी बात न सोचें। ये दामाद जी मणिवेदिका पर स्नान कर रहे हैं। इसलिए आप शीघ्र माला गूँथ दें।

**वासवदत्ता** – (आत्मगतं) ण सक्कुणेमि अण्णिं चिन्तेदुं (प्रकाशम्) हला! किं दिट्ठो जामादुओ? [न शक्नोम्यन्यच्चिन्तयितुम्। हला! किं दृष्टो जामाता।]

**वासवदत्ता** – (मन में) दूसरी बात सोच भी नहीं सकती। (प्रकट) सखी! क्या तुमने जामाता (दामाद) को देखा है?

**चेटी** – आम्, दिठ्ठो भट्टिदारिआए सिणेहेण अह्माअं कोदूहलेणअ। [आं, दृष्टो भर्तृदारिकायाः स्नेहनास्माकं कौतुहलेन च।]

**चेटी** – हाँ, राजकुमारी जी के स्नेह और अपनी इच्छा से देखा है।

**वासवदत्ता** – कीदिसो जामादुओ? [कीदृशो जामाता?]

**वासवदत्ता** – जामाता (दामाद) कैसा है?

**चेटी** – अय्ये! भणामि दाव, ण ईरिसो दिट्ठपुरुवो। [आर्ये! भणामि तावद्, नेदृशो दृष्टपूर्वः।]

**चेटी** – आर्ये! मैं तो कहती हूँ कि ऐसा दामाद पहले कभी देखा ही नहीं था।

**वासवदत्ता** – हला! भणाहि भणाहि, किं दंशणीओ? [हला! भण भण, किं दर्शनीयः?]

**वासवदत्ता** – सखी! कहो – कहो क्या देखने योग्य है?

**चेटी** – सक्कं भणिदु सरचावहीणो कामदेवोति। [शक्यं भणितुं शरचापहीनः कामदेव इति।]

**चेटी** – जामाता को धनुष और बाण से रहित साक्षात् कामदेव कहा जा सकता है।

**वासवदत्ता** – होदु एत्तअं। [भवेत्तावत्।]

**वासवदत्ता** – अच्छा रहने दो।

**चेटी** – किण्णिमित्तं वारेसि? [किन्निमित्तं वारयसि?]

**चेटी** – क्यों मना कर रही हैं?

**वासवदत्ता** – अजुत्तं परपुरुससङ्कित्तणं सोदु। [अयुक्तं परपुरुषसङ्कीर्तनं श्रोतुम्।]

**वासवदत्ता** – पराये व्यक्ति का गुणानुवाद सुनना उचित नहीं है।

**चेटी** – तेण हि गुह्मदु अय्या सिग्धं। [तेन ही गुम्फत्वार्या शीघ्रम्।]

**चेटी** – अच्छा, तो आप शीघ्र माला गूँथ दीजिए।

**वासवदत्ता** – इअं गुह्मामि आणेहि दाव। [इयं गुम्फामि। आनय तावत्।]

**वासवदत्ता** – यह लो अभी गूँथती हूँ। लाओ तो।

**चेटी** – गह्णदु अय्या। [गृह्णात्वार्या।]

**चेटी** – लीजिये।

**वासवदत्ता** – (वर्जयित्वा विलोक्य) इमं दाव ओसहं किं णाम? [इदं तावदौषधं किं नाम?]

**वासवदत्ता** – (हटाकर और देखकर) इस औषधि का नाम क्या हैं?

**चेटी** – अविहबाकरणं णाम। [अविधवाकरणं नाम।]

**चेटी** – सदा सुहागिन बनाने वाली।

**वासवदत्ता** – (आत्मगतम्) इदं बहुसो गुह्मदव्वं मम अ पदुमावदीएअ। (प्रकाशम्) इमं दाव ओसहं किं णाम? [इदं बहुशो गुम्फितव्यं मह्यं च पद्मावत्यै च। इदं तावदौषधं किं नाम?]

**वासवदत्ता** – (मन में) अपने लिए और पद्मावती के लिए इस औषधि को अनेक बार गूँथना चाहिए। (प्रकट) इस औषधि का क्या नाम हैं?

**चेटी** – सवत्तिमदणं णाम। [सपत्नीमर्दनं नाम]

**चेटी** – सौत का मर्दन करने वाली।

**वासवदत्ता** – इदं ण गुहितव्वं। [इदं न गुम्फितव्यम्।]

**वासवदत्ता** – इसको नहीं गूँथना चाहिए।

**चेटी** – कीस [कस्मात्]

**चेटी** – क्यों?

**वासवदत्ता** – उवरदा तस्य भय्या, तं णिप्पओ अणं त्ति। [उपरता तस्य भार्या, तन्निष्प्रयोजनमिति।]

**वासवदत्ता** – उनकी स्त्री (पत्नी) तो मर चुकी है। इसलिए (इसका गूँथना व्यर्थ हैं)।

(प्रविश्यापरा) (दूसरी चेटी आकर)

**चेटी** – तुवरदु तुवरदु अय्या। एसो जामादुओ अविहवाहि अब्भन्तरचउस्सालं पवेसीअदि। [त्वरतां त्वरतामार्या। एष जामाता अविधवाभिरभ्यन्तरचतुश्शालं प्रवेश्यते।]

**चेटी** – देवी जी! जल्दी कीजिए, जल्दी। यह जामाता सुहागिनों द्वारा चौशाला में लाया जा रहा हैं।

**वासवदत्ता** – अइ! वदामि गह्ण एदं। [अयि! वदामि, गृहाणैतत्।]

**वासवदत्ता** – अरी! कहती हूँ, यह लो।

**चेटी** – सोहणं! अय्ये! गच्छामि दाव अहं। [शोभनम् आर्ये! गच्छामि तावदहम्।]

**चेटी** – बहुत सुन्दर। देवी जी। अब मैं जाती हूँ।

(उभे निष्क्रान्ते।) (दोनों निकल जाती हैं)

**वासवदत्ता** – गदा एसा। अहो! अच्चाहिदं। अय्यउत्तो वि णाम परकेरओ संवुत्तो। अविदा! सय्याए मम दुक्खं विणोदेमि, जदिणिद्दं लभामि। [गतैषा। अहो! अत्याहितम्। आर्यपुत्रोऽपि नाम परकीय संवृत्तः। अविदा! शय्यायां मम दुःखं विनोदयामि यदि निद्रां लभे]

**वासवदत्ता** – यह चली गई। हाय! अनर्थ हुआ। आर्यपुत्र भी पराये हो गये। अहो! यदि नींद आ जाये तो अपने दु:ख को दूर कर लूँ।

(निष्क्रान्ता)

(वासवदत्ता का प्रस्थान)

**टिप्पणी** – वर्जयित्वा – वर्ज+णिच्+क्त्वा। अविधवाकरणम् – विगत: धव: यस्या: सा विधवा (बहु०), न विधवा अविधवा (नञ् तत्पुरुष), अविदा – प्राकृत में इसका प्रयोग विषाद व्यक्त करने के लिए होता है। यह अव्यय पद है। लभे – भविष्यत् काल के अर्थ में वर्तमान काल (लट् लकार) का प्रयोग हुआ है।

**॥ इति तृतीयोऽङ्कः ॥**

**॥ तृतीय अङ्क समाप्त ॥**

# अथ चतुर्थोऽङ्कः

(ततः प्रविशति विदूषकः)

**विदूषकः** – (सहर्षं) भो! दिट्ठिआ तत्रहोदो वत्सराअस्स अभिप्पदे विवाहमङ्गलमणिज्जो कालो दिट्ठो। भो !भो! णाम एदं जाणादि तादिसे वयं अणती सलिावत्ते पक्खित्ता उण उम्भाज्जिस्सामोत्ति। इदाणिं पासादेसु वसीअदि, अन्देउरदिग्घिआसु, ह्णाईअदि पकिदिमउरसुउमाराणि मोट्अखज्जआणि खज्जी अन्ति त्ति अणच्छरंवासो उत्तरकुरुवासो मए अणुभवीअदि। एक्को खु महन्तो दोसो, मम आहारो सुठठुण परिणमदि, सुप्पच्छदणाए सय्याए णिद्दंएर लभामि, जह वादसोविदं अभिदो विअ वत्तदि ति पेक्खामि। भो! मुह णाम अपरिभूदं अक्लवत्तं च। [भो! दिष्ट्या तत्र भवतो वत्सराजस्याभिप्रेत विवाहमङ्गल रमणीयः कालो दृष्टः। भो! को नामेतज्जानाति तादृशे वयमनर्थसलिलावर्ते प्रक्षिप्ताः पुनरुन्मङ्क्ष्यामः इति। इदानीं प्रासादेषु उष्यते, अन्तःपुरदीर्घिकासु स्नायते, प्रकृतिमधुरसुकुमाराणि मोदकखाद्यानि खाद्यन्त इति अनप्सरस्संवास उत्तरकुरुवासे मयानुभूयते। एकः खलु महान् दोषः ममाहारः सुष्ठु न परिणमति, सुप्रच्छादनायां शय्यायां निद्रां न लभे, यथा वातशोणितमभित इव वर्तत इति पश्यामि। भो! सुखं नामयपरिभूतमकल्यवर्तं च।]

(तदनन्तर विदूषक प्रवेश करता है)

**विदूषक** – (हर्षपूर्वक), अरे! भाग्य से हमनें वत्सराज उदयन के मनचाहे विवाहोत्सव का आनन्दमय समय देख लिया है। अरे! किसको मालूम था कि वैसे अनर्थ (राज्यापहरण और वासवदत्तामरण) रूपी जल के भँवर में डाले हुये हम लोग उससे निकल आएँगे! इस समय तो मैं राजमहल में रहता हूँ, रनिवास की बावड़ियों में स्नान करता हूँ और स्वभावतः मधुर तथा मुलायम लड्डू आदि पदार्थों को खाता हूँ। इस तरह मैं अप्सराओं के सहवास से रहित स्वर्ग का सुख भोग रहा हूँ। हाँ, एक बडा भारी दोष है कि मुझे खाना ठीक से हजम नहीं होने से अच्छे बिस्तर वाली शय्या (पलंग) पर भी नींद नहीं आती, लगता है कि वातरक्त के रोग से मैं बिल्कुल आक्रान्त हो गया हूँ। अरे! वह सुख, सुख नहीं माना जाता है, जो रोग से पीड़ित हो गया हो और उसमें कलेवा (नाश्ता) न मिले।

**टिप्पणी** – अनर्थसलिलावर्ते – विपत्तिरूपी जल भँवर में। अनप्सरस्संवासः– अप्सराओं से रहित वास। वातशोणितं – वातव्याद्यि, गठिया रोग। आमयपरिभूतं – रोगग्रस्त। अकल्यवर्तं – कलेवा (प्रातः भोजन) रहित।

(ततः प्रविशति चेटी)

**चेटी** – कहिं णु खु गदो अय्यवतन्सओ? (परिक्रम्यावलोक्य) अहो! एसो अय्यवसन्तो। (उपगम्य) अय्य वसन्तअ! कालो, तुमं अण्णेसामि [कुत्र नु खलु गत आर्यवसन्तक? अहो! एष आर्यवसन्तकः। आर्य! वसन्तक! कः कालः, त्वामन्विष्यामि।]

(तत्पश्चात् दासी का प्रवेश)

**चेटी** – आर्यवसन्तक कहाँ गये? (घूमकर और देखकर) अरे! यही तो आर्य वसन्तक हैं। (समीप जाकर) आर्य वसन्तक! मैं कब से आपको ढूँढ रही हूँ।

**विदूषक :** – (दृष्ट्वा) किं णिमित्तं भद्दे! मं अण्णेससि? [किन्निमित्तं भद्रे मामन्विष्यसि?]

**विदूषक** – (देखकर) देवी! मुझे क्यों ढूँढ रही हो?

**चेटी** – अह्माण भट्टिणी भणादि – अवि हूणादो जामादुओ त्ति। [अस्माकं भट्टिनी भणति – अपि स्नातो जमातेति।]

**चेटी** – हमारी मालकिन (स्वामिनी) कह रही हैं कि जामाता जी नहा चुके हैं।

**विदूषकः** – किं णिमित्तं भोदि! पुच्छदि! [किन्निमित्तं भवति पृच्छति?]

**विदूषक** – देवी! किसलिए पूछ रही हैं?

**चेटी** – किमण्ण सुमणेवण्णअं आणेमिति। [किमन्यत्! सुमनोवर्णकमानयामीति।]

**चेटी** – और (दूसरा) क्या? फूल – चन्दन ले आऊँ – इसलिए।

**विदूषकः** – ह्णादो तत्र भवं। सव्वं अणेदु भोदी विज्जि अभो अणं। [स्नातस्तत्र भवान्। सर्वमानयतु भवती वर्जयित्वा भोजनम्।]

**विदूषक** – महाराज स्नान कर चुके है। आप सब (चीजें) ले आइए, सिवाय भोजन के।

**चेटी** – किंणिमितं वारेसि भोअणं? [किन्निमितं वारयसि भोजनम्?]

**चेटी** – भोजन के लिए क्यों मना कर रहे हैं?

**विदूषकः** – अधण्णस्म मम कोइलाणं अक्खिपरिवट्टो विअ कुक्खिपरिवट्टो संवृत्तो। [अधन्यस्य मम कोकिलानामक्षिपरिवर्त इव कुक्षिपरिवर्तः संवृत्तः।]

**विदूषक** – मुझ अभागे के पेट में ऐसा उलट-फेर हो गया है जैसा कि कोयल की आँख में हुआ करता है।

**चेटी** – ईदिसो एव्व होहि। [ईदृश एव भव।]

**चेटी** – आप ऐसे ही बने रहो।

**टिप्पणी** – वसन्तक – विदूषक का नाम। अक्षिपरिवर्तः– नेत्रों का घूमना। कुक्षि परिवर्तः– उदरविकार (पेट में उलटफेर होना।)

**विदूषकः** – गच्छदु भोदी! जाव अहं वि तत्तहोदी सआसं गच्छामि। [गच्छतु भवती यावदहमपि तत्रभवतः सकाशं गच्छामि।]

**विदूषक** – आप जाओ! अब मैं भी महाराज के पास जाता हूँ।

(निष्क्रान्तौ)(दोनों निकल जाते हैं।)

(प्रवेशकः)(प्रवेशक)

(ततः प्रविशति सपरिवारा पद्मावती आवन्तिकावेषधारिणी वासवदत्ता च।)

(तदनन्तर परिजनों के सहित पद्मावती और मालव-निवासिनी (आवन्तिका वेश) में वासवदत्ता का प्रवेश।)

**चेटी** – किण्णिमित्तं भट्टिदारिआ पदमवणं आअदा? [किन्निमित्तं भर्तृदारिका प्रमदवनमागता?]

**चेटी** – राजकुमारीजी! आनन्दबाग (अन्तःपुर-उद्यान) में किसलिए आई हैं?

**पद्मावती** – हला! ताणि दाव सेहालि आगुह्म आणि पेक्खामि कुसुमिदाणि वा णा वेत्ति [हला! ते तावत् शेफालिकागुल्मकाः पश्यामि कुसुमिता वा नवेति।]

**पद्मावती** – सखी! मैं अभी देख रही हूँ कि हरसिंगार के वे गुच्छे फूले हैं या नहीं।

**टिप्पणी** – प्रवेशक – दो अंकों के बीच एकप्रकार की अन्तर्वाता, जिसके द्वारा निम्न श्रेणी के पात्र संक्षेप में भूत तथा भविष्यत् की घटनाओं की सूचना देते हैं।

**टिप्पणी** – भर्तृदारिका – राजकुमारी, भर्तुः स्वामिनः दारिकाः भर्तृदारिका। शेफालिका – गुल्मकाः – हरसिंगार की झाडियाँ, शेफालिकायाः गुल्मकाः शेफालिगुल्मकाः (ष०तत्पुरुष)। शेफालिका तु सुवहा निर्गुण्डीनीलिका सा इत्यमरः।

**चेटी** – भट्टिदारिए! ताणि कुसुमिदाणि णाम, पवालन्तरिदेहिं विअ मौत्तिआलम्बएहिं आइदाणि कुसुमेहिं [भर्तृदारिके! ते कुसुमिता नाम, प्रवालान्तरितैरिव मौक्तिकलम्बकैराचिताः कुसुमैः।]

**चेटी** – राजकुमारीजी! वे तो फूल कर मूँगों से छिपी हुई मोती की लड़ियों के समान पुष्पों से लद गये हैं।

**पद्मावती** – हला! जदि इव्वं, किं दाणि विलम्बेसि? [हला! यदेवं, किमिदानीं विलम्बसे?]

**पद्मावती** – सखी! यदि ऐसा है तो फिर क्यों अब विलम्ब कर रही हो?

**चेटी** – तेण हि इमस्सि सिलावट्टए मुहुत्तअं उपविसदु भट्टिदारिआ। जाव अहं विकुसुमावचअ करेमि। [तेन हि अस्मिन् शिलापट्टके मुहूर्तकमुपविशतु भवती। यावदहमपि कुसुमावचयं करोमि।]

**चेटी** – तो कुछ देर इस शिलाखण्ड पर आप बैठ जायें। तब तक मैं भी फूलों को बटोर लेती हूँ।

**पद्मावती** – अय्ये! किं एत्य उपविसामो? [आर्ये! किमत्रोपविशावः?]

**पद्मावती** – आर्ये! क्या हम दोनों यहाँ बैठें।

**वासवदत्ता** – एव्वं होदु। (एवं भवतु) (उभे उपविशतः)।

**वासवदत्ता** – ऐसा ही हो (दोनों बैठ जाती है।)

**टिप्पणी** – प्रवालान्तरितैः – मूंगों से जटिल, प्रवालैः विद्रूमैः अन्तरितैः खचितैः (तृ०तत्पु०)। मौक्तिकलम्बकैः – मोतियों से लटकते हुए हार, मौक्तिकानां लम्बकानि मौक्तिकलम्बकानि तैः (ष०तत्पु०) कुसुमावचयं – फूलों का चयन, कुसुमानाम् अवचयम्।

**चेटी** – (तथा कृत्वा) पेक्खदु पेक्खदु भट्टदारिआ अद्धमणसिलावट्टएहिं विअ सेहालिआकुसुमेहिं पुरिअं मे अंजलि। [पश्यतु–पश्यतु भर्तृदारिका अर्द्धमनशिशलापट्टकैरिव शेफालिकाकुसुमैः पूरितं मेऽञ्जलिम्।]

**चेटी** – (वैसा करके) राजकुमारी जी! देखिये! मैनसिल के समान (अरुण) मूल भाग वाले हरसिंगार के पुष्पों से मेरी अंजलि भर गई।

**टिप्पणी** – अर्द्धमनश्शिलापट्टकेः – आधे भाग में मैनसिल के टूकडों से, अर्द्धम् एकदेशः मनश्शिलापट्टको येषां तैः। 'मनः शिला मनोगुप्ता मनोह्वा नागजिह्विका। नैपाली कुनटी गोला' इत्यमरः।

**पद्मावती** – (दृष्ट्वा) अहो! विइत्तदा कुसुमाणं। पेक्खदु पेक्खदु अय्या। [अहो विचित्रतां कुसुमानाम्। पश्यतु पश्यत्वार्या।]

**पद्मावती** – अहो! कैसे रङ्ग–बिरंगे फूल हैं। देवी जी देखिये।

**वासवदत्ता** – अहो दस्सणीअदा कुसुमाणं (अहो! दर्शनीयता कुसुमानाम्।)

**वासवदत्ता** – अहा! फूलों की सुन्दरता कैसी है।

**चेटी** – भट्टिदारिए! किं भूयो अवइणुएस्सं? [भर्तृदारिके! किं भूयोऽवचेष्यामि?]

**चेटी** – राजकुमारीजी! क्या और चुना जाये?

**पद्मावती** – हला! मा मा भूयो अव इणि अ। [हला! मा मा भूयोऽवचित्य।]

**पद्मावती** – सखी! नहीं–नहीं। अब मत चुनो।

**वासवदत्ता** – हला! किंणिमित्तं वारेसि? [हला! किन्निमित्तं वारयसि?]

**वासवदत्ता** – सखी! किसलिए मना कर रही हो?

**पद्मावती** – अय्यउत्तो इह आअच्छअ इमं कुसुमसमिद्धिं पेक्खिअ सम्माणिदा भवेअं [आर्यपुत्र इहागत्येमां कुसुमसमृद्धिं दृष्ट्वा सम्मानिता भवेयम्।]

**पद्मावती** – यदि आर्यपुत्र यहाँ आकर पुष्पसम्पदा (फूलों की बहार) को देखेंगे तो मेरा सम्मान होगा।

**वासवदत्ता** – हला! पिओ दे भत्ता। [हला! प्रियस्ते भर्ता।]

**वासवदत्ता** – सखी! तुम्हें भर्ता प्रिय है।

**पद्मावती** – अय्ये! ण जाणिमि, अय्यउत्तेण विरहिदा उक्कण्ठिदा होमि। [आर्ये! न जानामि, आर्यपुत्रेण विरहितोत्कण्ठिता भवामि।]

**पद्मावती** – आर्ये! यह तो मैं नहीं जानती, पर उनसे अलग होने पर व्याकुल हो जाती हूँ।

**वासवदत्ता** – (आत्मगतम्) दुक्खरं खु अहं करेमि। इअ णि णाम एव्वमन्तेदि। [दुष्करं खल्वहं करोमि। इयमपि नामैवं मन्त्रयते।]

**वासवदत्ता** – (मन में) मैं बड़ा कठिन काम कर रही हूँ। यह भी ऐसा कह रही है।

**चेटी** – अभिजादं खु भट्टिदारिआए मन्तिदं – पिओ मे भत्तेति। [अभिजातं खलु भर्तृदारिकया मन्त्रितं – प्रियो मे भर्तेति।]

**चेटी** – अपने कुल के अ नुरूप ही राजकुमारी जी ने कहा कि पतिदेव मुझे प्रिय है।

**पद्मावती** – एक्को खु मे सन्देहो। [एकः खलु मे सन्देहः।]

**पद्मावती** – मुझे एक सन्देह है।

**वासवदत्ता** – किं किं? [किं किम्?]

**वासवदत्ता** – क्या-क्या?

**पद्मावती** – जह मम अय्यउतो, तह एव्व अय्याए वासवदत्ताए त्ति? [यथा ममार्यपुत्रस्तथैवार्याया वासवदत्ताया इति।]

**पद्मावती** – आर्यपुत्र जैसे मेरे प्रिय हैं उसी तरह आर्या वासवदत्ता के भी..........?

**वासवदत्ता** – अदो वि अहिअं [अतोऽप्यधिकम्।]

**वासवदत्ता** – इससे भी अधिक।

**पद्मावती** – कहं तुवं जाणासि? [कथं त्वं जानासि?]

**पद्मावती** – तुम कैसे जानती हो?

**वासवदत्ता** – (आत्मगतं) हं, अय्यउत्तपक्खवादेण अतिक्कन्दो समुदारो। एव्वं दाव भणिस्सं। (प्रकाशं) जइ अय्यो सिणेहो, सा सजणं णा परित्तजदि। [हम्, आर्यपुत्र पक्षपातेनातिक्रान्तः समुदाचारः। एवं तावद् भणिष्यामि। यद्यल्पः स्नेहः, सा स्वजनं न परित्यजति।]

**वासवदत्ता** – (मन में) अरे, मैंने आर्यपुत्र के पक्षपात से शिष्टाचार का उल्लंघन कर दिया। अच्छा ऐसा कहती हूँ (प्रकट में) यदि (वासवदत्ता) का प्रेम थोड़ा होता तो वह अपने परिवार को नहीं छोड़ती।

**पद्मावती** – होदव्वं। [भवितव्यम्।]

**पद्मावती** – हो सकता है।

**चेटी** – भट्टिदारिए! साहु भट्टारं भवाहि – अहं पि वीणं सिक्खिसामि त्ति। [भर्तृदारिके! साधु भर्तारं भण – अहमपि वीणां शिक्षिष्य इति।]

**चेटी** – राजकुमारी जी! आप पतिदेव से अच्छी तरह कहें कि मैं भी वीणा सीखूँगी।

**पद्मावती** – उत्तो मये अय्यउत्तो [उक्तो मयार्यपुत्रः।]

**पद्मावती** – मैंने आर्यपुत्र से कहा था।

**वासवदत्ता** – तदो किं भणिदं? [ततः किं भणितम्?]

**वासवदत्ता** – तब उन्होंने क्या कहा?

**पद्मावती** – अभणिअ किञ्चि दिग्धं णिस्ससिअ तुह्णीओ संवुत्तो। [अभणित्वा किञ्चिद् दीर्घं निःश्वस्य तूष्णीकः संवृत्तः।]

**पद्मावती** – बिना कुछ कहे ही लम्बी साँस लेकर चुप हो गये।

**वासवदत्ता** – तदो तुवं विअ तक्केसि? [ततस्त्वं किमिव तर्कयसि?]

**वासवदत्ता** – तो इससे तुम्हारा क्या अनुमान है?

**पद्मावती** – तक्केसि अय्याए वासवदत्ताए गुणाणि सुमरिअ दिक्खिणदाए मम आगदो ण रोदिदि ति। [तर्कयाम्यार्याया वासवदत्ताया गुणान् स्मृत्वा दक्षिणतया ममाग्रतो न रोदितीति।]

**पद्मावती** – मेरा अनुमान है कि आर्या वासवदत्ता के गुणों का स्मरण करके उदारता के कारण मेरे सामने नहीं रोए।

**वासवदत्ता** – (आत्मगतं) घण्ण खु ह्मि, जदि एव्वं सच्चंभवे। [धन्या खल्वस्मि, यद्येवं सत्यं भवेत्।]

**वासवदत्ता** – (मन में) यदि यह सत्य है, तो मैं कृतार्थ हो गई।

(ततः प्रविशति राजा विदूषकश्च)

(तब राजा और विदूषक प्रवेश करते हैं)

**विदूषकः** – ही! ही! पचि अपदि अबन्धुजीवकुसुमविरलवादमणिज्जं पमदवणं। इदो दावभवं। [ही! ही! प्रचितपतितबन्धुजीवकुसुमविरलपातरमणीयं प्रमदवनम्। इतस्तावद् भवान्।]

**विदूषक** – अहा! हा! सञ्चित किए हुए गिरे हुए गुलदुपहरिया के फूलों से यह प्रमदवन कितना रमणीय लग रहा है। आप इधर से आइये।

**राजा** – वयस्य! वसन्तक! अयमहमागच्छामि।

**राजा** – मित्र वसन्तक! यह मैं आ रहा हूँ।

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये मित्रवसन्तकं प्रति स्वमनोदशां वर्णयन्नाहोदयनः –

**कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते,**
**दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषवः पातिताः।**
**तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयं,**
**पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः॥ १॥**

**अन्वयः**– तदा उज्जयिनीं गते मयि कामेन पञ्च इषवः दृष्ट्वा काम् अपि अवस्थां गते मयि कामेन पञ्चः इषवः पातिताः। तैः अद्य अपि (मम) हृदयं सशल्यम् एव। वयं भूयः च विद्धाः। यदा मदनः पञ्चेषु (तदा तेन) अयं षष्ठः शरः कथं पातितः॥

**पदार्थः**– तदा = उस समय, उज्जयिनीं गते = उज्जयिनी में जाने पर, अवन्तिराजतनयां = अवन्तिराजकुमारी वासवदत्ता को, स्वैरं = इच्छा के अनुसार, दृष्ट्वा = देखकर, काम् – अनिर्वचनीय अपि = भी, अवस्थां गते = अवस्था में पड़ने पर, मयि – मेरे ऊपर, कामेन = कामदेव ने, पञ्च = पाँच, इषवः = बाण, पातिताः = गिराये (मारे), अद्याऽपि = आज भी, तैः = उनके द्वारा, हृदयं = हृदय, सशल्यम् एव = बींधा ही है। भूयश्च = फिर भी, वयं = मैं (उदयन) विद्धाः = विद्ध हो गया हूँ, यदा = जब, मदनः = कामदेव, पञ्चेषु = पाँच बाणों वाला है, अयं = यह, षष्ठः = छठा, शरः = बाण, कथं पातितः = कैसे गिराया।

**हिन्दी अर्थ** – उस समय उज्जयिनी में जाने पर और अवन्तिराजकुमारी वासवदत्ता को इच्छा के अनुसार देखकर मेरे अनिर्वचनीय अवस्था में पड़ने पर कामदेव ने अपने बाणों से मेरे ऊपर प्रहार किया। आज भी उन (बाणों) से मेरा चित्त विद्ध ही है। पद्मावती से विवाह होने पर भी मैं फिर से विद्ध हो गया हूँ। जब कामदेव पाँच बाणों से ही युक्त है तो यह छठा बाण उसने कैसे गिराया।

**व्याख्या** – **पर्यायपदानि** – तदा = तस्मिन् काले, उज्जयिनीं गते = प्रद्योतस्य मन्त्रिणा निगृहीतः सन् तत्र याते, अवन्तिराजतनयां = प्रद्योतपुत्रीं वासवदत्तां, स्वैरं = विस्रब्धं, दृष्ट्वा = विलोक्य, काम्–अनिर्वचनीयाम् अपि,

अवस्थां = दशां, गते = प्राप्ते, मयि = उदयने, कामेन = मदनेन, पञ्च इषवः = पञ्च बाणाः, पातिताः = वासवदत्तामालक्ष्य निक्षिप्ताः, तै = पञ्चभिः बाणैः, मम हृदयं = मम चित्तम्, अद्यापि = अद्यावधिपर्यन्तं, सशल्यं = विक्षतमस्ति, वयं भूयः = पुनरपि च विद्धाः = आहताः। यदा = यदि, मदनः = कामः, पञ्चेषु = पञ्च इषवः यस्य सः, पञ्चबाणः, तर्हि कथं = केन प्रकारेण, अयं षष्ठः शरः = षष्ठो बाणः, तेन मयि पातितः = कामेन मयि उदयनस्योपरि निक्षिप्तः।

**भावार्थः** – तस्मिन्नुज्जयिनीं गते उदयने प्रद्योतपुत्रीं वासवदत्ताम् इच्छानुरूपं विलोक्य अनिर्वचनीयमवस्थामपि प्राप्ते तस्मिन् कामदेवेन पञ्चबाणाः निक्षिप्ताः, तैः बाणैः तस्य हृदयं सशल्यं विद्धम्। यदा मदनः पञ्चबाणः अस्ति तदा अयं षष्ठं बाणः कथं पातितः? इति भावः।

**छन्दः** – अस्मिन् पद्ये शार्दूलविक्रीडितं छन्दः अस्ति।

**अलङ्कारः** – अत्रोत्प्रेक्षालङ्कारः अस्ति।

**व्याकरणम्** – अविन्तराजतनयाम् = अवन्तीनां राजा अवन्तिराजः। तस्य तनया, ताम् (षष्ठी तत्पुरुष)। दृष्ट्वा = दृश्+क्त्वा, पातिताः = पत्+णिच्+क्त। सशल्यं = शल्यैः सहितम् (तुल्ययोगे बहुव्रीहिः।)

**विशेषः** –कामस्य पञ्चबाणाः सन्ति–

"अरविन्दमशोकञ्च चूतं च नवमल्लिका।
नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः॥"

**विदूषकः**– कहिं णु खु गदा तत होदी पदुमावदी, लदा मणुवं गदा भवे, उदाहो असणकुसुमसच्चिदं वग्धचम्मावगुण्ठिदं विअ पव्वदतिलअ णाम सिलापट्टअ गदा भवे, आदु अधिकडुअगन्धसत्तच्छवणं पविट्ठाभवे, हव आलिहिदअसखपक्खिसङ्कुलं दारुपव्वदअं गदा भवे। (ऊर्ध्वमवलोक्य) ही ही सर – अकालणिम्मले अन्तिररिक्से पासारिअबलदेव बालुदं सणी असारसपन्तिं जाव समाहिदं गच्छन्तिं पेक्खदुदाव भवं। [कुत्र नु खलु गता तत्र भवती पद्मावती, लतामण्डपं गता भवेत्, उता हो असनकुसुमसञ्चितं व्याघ्रचर्मावगुण्ठितमिव पर्वततिलकं नाम शिलापट्टकं गता भवेत्। अथवा आलिखित मृगपक्षिसङ्कुलं दारु पर्वतकं गता भवेत् (ऊर्ध्वमवलोक्य)) ही! ही! शरत्कालनिर्मलेऽन्तरिक्षे प्रसारितबलदेवबाहुदर्शनीयां सारसपङ्क्तिं यावद् गच्छन्तीं पश्यतु तावद् भवान्। ]

**विदूषक** – सम्माननीया पद्मावती कहाँ चली गई? शायद लतामण्डप में गई होगी, अथवा सर्जवृक्ष के फूलों से व्याप्त बाघ के चमड़े से मढ़े हुये के समान पर्वततिलक नामक शिलाखण्ड पर गई होंगी। अथवा तीव्र गन्ध वाले सप्तपर्ण के वन में गई होंगी, या फिर चित्रलिखित पशु–पक्षियों से परिपूर्ण दारुपर्वत पर गई होंगी (ऊपर देखकर) अहो! शरद् ऋतु से निर्मल आकाश में फैलाई हुई बलदेवजी की भुआजों के समान कमनीय सारस पक्षियों की कतार को , जो निश्चित रूप से उड़ रही है, आप देखें।]

**राजा** – वयस्य! पश्याम्येनाम्

**राजा** – मित्र! मैं इस सारस पंक्ति को देख रहा हूँ।

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये राजा विदूषकं कथयति यत् सारसपक्तिं पश्यामि इति –

**ऋज्वायतां च विरलां च नतोन्नतां च**
**सप्तर्षिवंशकुटिलां च निवर्तनेषु।**
**निर्मुच्यमानभुजगोदरनिर्मलस्य**
**सीमामिवाम्बरतलस्य विभज्यमानम्॥२॥**

**अन्वयः** – ऋज्वायतां च विरलां च, नतोन्नतां च, निवर्तनेषु सप्तर्षिवंशकुटिलां निर्मुच्यमानभुजगोदरनिर्मलस्य अम्बरतलस्य सीमां विभज्यमानाम् इव।

**पदार्थः** – ऋज्वायतां = सीधी और फैली हुई, विरलां = विरल, नतोन्नतां = नीची-ऊँची, निवर्तनेषु = दोनों भागों में, सप्तर्षिवंशकुटिलां = सप्तर्षिमण्डल के समान टेढी, निर्मुच्यमान भुजगोदरनिर्मलस्य = केंचुली छोडने वाले सर्प के पेट के समान निर्मल, अम्बरतलस्य = गगनमण्डल की, विभज्यमानां = विभाग की गयी, सीमाम् इव = सीमा के समान (इस सारस पंक्ति को देख रहा हूँ)।

**हिन्दी अर्थ** – सीधी और फैली हुई, विरल नीची-ऊँची और दोनों भागों में सप्तर्षिमण्डल के समान टेढी, केंचुली छोडने वाले सर्प के पेट के समान निर्मल गगनमण्डल की विभाग की गयी सीमा के समान (इस सारस पंक्ति को देख रहा हूँ।)

**व्याख्या** – **पर्यायपदानि** – ऋज्वायतां = सरलदीर्घां, विरलां = विच्छिन्नां, नतोन्नतां च = दन्तुरां च, निवर्तनेषु = परावर्तनेषु, सप्तर्षिवंशकुटिलां = सप्तर्षिवंशतारामण्डलविशेषः, निर्मुच्यमानभुजगोदरनिर्मलस्य – विमुक्तकञ्चुकसर्पजठरस्वच्छस्य, अम्बरतलस्य = गगनतलस्य, विभज्यमानां = विहितविभागं, सीमाम् इव = मर्यादारेखाम् इव (एनां सारसपङ्क्तिं पश्यामि।)

**भावार्थः** – सरलदीर्घां विरलां नतोन्नताम् उभयभागेषु सप्तर्षिमण्डलमिव वक्रां विमुक्तकञ्चुकसर्पजठरस्वच्छस्य गगनतलस्य विहितविभागां मर्यादारेखाम् इव एनां सारस पङ्क्तिं पश्यामि।

**छन्दः** – अस्मिन् पद्ये वसन्ततिलका वृत्तमस्ति।

**अलङ्कारः** – उपमोत्प्रेक्षाभ्यां संसृष्टेन स्वभावोक्तिः अलङ्कारः।

**व्याकरणम्** – नतोन्नतां – नता चासौ उन्नता च नतोन्नता ताम् (कर्म.समास)। निर्मुच्यमानभुजगोदर निर्मलस्य निर्+मुच्+शानच्, निर्मुच्यमानः भुजंगाः तस्य उदरं तदिव निर्मलम् (कर्म.समास)।

**विशेषः** – सप्तर्षिमण्डले एते ऋषयः सन्ति –

मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः।
वसिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः॥

**चेटी** – पेक्खदु पेक्खदु भट्टिदारिआ एदं कोकणदमालापण्डर रमणीअं सारपन्तिं जाव समाहिदं गच्छन्तिं। अम्मो! भट्टा! [पश्यतु पश्यतु भर्तृदारिका एतां कोकनदमालापाण्डररमणीयां सारसपङ्क्तिं यावत् समाहितं गच्छन्तीम्। अहो! भर्ता?]

**चेटी** – राजकुमारी जी! देखिये – देखिये यह श्वेत कमल की माला के समान उज्ज्वल एवं मनोहर सारसों की पंक्ति (कैसी) निश्चिन्तता से उड़ी जा रही है। अरे! स्वामी (यही हैं।)

**पद्मावती** – हं अय्यउत्तो! उय्ये। तव कारणादो अय्य उत्तदंसणं परिहरामि। तां इमं दावमाहवीलदामण्डवं पविसामो। [हम्! आर्यपुत्रः! आर्ये! तव कारणादार्यपुत्रदर्शनं परिहरामि। तदिमं तावन्माधवी लतामण्डपं प्रविशामः।]

**पद्मावती** – हैं! आर्यपुत्र! देवी! तुम्हारे कारण मैं आर्यपुत्र का दर्शन छोड़ती हूँ। इसलिए अभी हम लोग इस माधवी कुंज में चलें।

**वासवदत्ता** – एव्वं होदु। [एवं भवतु।] (तथा कुर्वन्ति।)

**वासवदत्ता** – ऐसा ही हो। (माधवी कुंज में प्रवेश करती हैं।)

**विदूषकः**– तत्तदोही पदुमावदी इह आअच्छिअ णिग्गदा भवे। [तत्र भवती पद्मावतीहागत्य निर्गता भवेत्।]

**विदूषक** – महारानी पद्मावती यहाँ आकर चली गई है।

**राजा** – कथं भवान् जानाति?

**राजा** – आप कैसे जानते हैं?

**विदूषकः** – इमाणि अव इदकुसुमाणि शेफालि आगुच्छआणि पेक्खदु दाव भवं। [इमानवचितकुसुमान् शेफालिगुच्छकान् प्रेक्षतां तावद् भवान्।]

**विदूषक** – इन हरसिंगार के गुच्छों को तो देखिये, जिनके फूल तोड़ लिये गये है।

**राजा** – अहो विचित्रता कुसुमस्य, वसन्तक!

**राजा** – अहा! कैसे रंग-बिरंगे फूल है, वसन्तक!

**वासवदत्ता** – (आत्मगतं) वसन्तअसङ्कित्तेण अहं पुण जाणामि उज्जइणीए वत्तामिति। [वसन्तक सङ्कीर्तनेनाहं पुनर्जानामि उज्जयिन्यां वर्त इति।]

**वासवदत्ता** – (मन में) वसन्तक सङ्कीर्तन (नाम लेने) से तो मैं समझती हूँ कि मैं पुनः उज्जैन में हूँ।)

**राजा** – वसन्तक! अस्मिन्नेवासीनौ शिलातले पद्मावतीं प्रतीक्षिष्यावहे।

**राजा** – वसन्तक! इसी शिलाखण्ड पर बैठकर हम दोनों पद्मावती की प्रतीक्षा करें।

**विदूषक** :– भो! तह (उपविश्योत्थाय) ही! ही! अरअकालतिक्खोदुस्सहो आदवा। ता इमं दाव माहवीमण्डवं परिसामो। [भोस्तथा। ही! ही! शरत्कालतीक्ष्णो दुस्सह आतपः। तदिमं तावन्माधवीमण्डपं प्रविशावः।]

**विदूषक** – जी! अच्छा! (बैठते ही उठकर) हा हा! शरद् ऋतु की तीखी धूप सही नहीं जाती। इसलिए इस वासन्ती कुंज में चलें।

**राजा** – बाढं, गच्छाग्रतः।

**राजा** – अच्छा, आगे चलो।

**विदूषकः** – एव्वं होदु। [एवं भवतु।] (उभौ परिक्रामतः।)

**विदूषक** – ऐसा ही हो। (दोनों का प्रस्थान।)

**पद्मावती** – व्सव्वं आउलं कत्तुकामो अय्यवसन्तओ किं दाणिं करेह्य? [सर्वमाकुलं कर्त्तुकामः आर्यवसन्तकः। किमिदानीं कुर्मः?]

**पद्मावती** – आर्यवसन्तक सब चौपट करना चाहते है। अब क्या करें?

**चेटी** – भट्टिदारिए! एद महु अरपरिणलीणा आलंवलदं ओधूयभट्टारं वारहस्सं। [भर्तृदारिके। एतां मधुकरपरिनिलीनामवलम्बलतामवधूय भर्तारं वारयिष्यामि।]

**चेटी** – राजकुमारीजी! भौंरो से लदी इस सहारे की लता को हिलाकर स्वामी को (आने से) रोक दूँगी।

**पद्मावती** – एव्वं करोहि [एवं कुरु।] (चेटी तथा करोति।)

**पद्मावती** – ऐसा ही करो। (दासी वैसा ही करती है।)

**विदूषकः**:- अविहा, अविहा, चिटढु चिटदु दाव भवं [अविह अविह, तिष्ठतु तिष्ठतु तावद् भवान्।]

**विदूषक** – ओह! ओह! ठहरिए, जरा आप ठहरिए।

**राजा** – किमर्थम्?

**राजा** – क्यों?

**विदूषकः**:– दासीए पुत्तहि महुअरेहि पीडिदोह्य। [दास्याः पुत्रैर्मधुकरैः पीडितोऽस्मि।]

**विदूषक** – हरामी भौंरो ने मुझ पर आक्रमण कर दिया है।

**राजा** – मा मा भवानेवम्। मधुकर! सन्त्रासः परिहार्यः। पश्य।

**राजा** – नहीं-नहीं ऐसा न कहो। भौंरो का भय मिटा देना चाहिए। देखिए –

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये राज्ञः उदयनः मधुकरमाध्यमेन स्वकीयामवस्थां सूचयति –

**मधुमदकला मधुकरा मदनार्ताभिः प्रियाभिरुपगूढाः।**
**पादन्यासविषण्णा वयमिव कान्तावियुक्ताः स्युः॥३॥**

**अन्वयः** – मधुमदकलाः मदनार्ताभिः प्रियाभिः उपगूढाः मधुकराः पादन्यासविषण्णाः (सन्तः) वयमिव कान्तावियुक्ताः स्युः॥ ॥

**पदार्थः** – मधुमदकलाः = पुष्परस के मद से मधुर, मदनार्ताभिः = कामपीडित, प्रियाभिः = प्रियाओं से, उपगूढा = समालिङ्गित, मधुकराः = भौंरे, पादन्यासविषण्णाः = पैर रखने से खिन्न, वयमिव = हम लोगों के समान, कान्तावियुक्ताः स्युः = प्रियाओं से वियुक्त हो जायेंगे।

**हिन्दी अर्थ** – पुष्परस [पराग] के मद से मधुर कामपीडित प्रियाओं से समालिङ्गित भौंरे, पैर रखने से खिन्न हम लोगों की तरह प्रियाओं से वियुक्त हो जायेंगे।

**व्याख्या – पर्यायपदानि** – मधुमदकलाः = पुष्परसमधुराः, मदनार्ताभिः = कामपीडिताभिः, प्रियाभिः = दयिताभिः, उपगूढाः = समालिङ्गिताः, मधुकराः = भ्रमराः, पादन्यासविषण्णाः = चरणनिक्षेपखिन्नाः, वयमिव, कान्तावियुक्ताः = प्रियतमाविरहिताः, स्युः = भवेयुः॥ ॥

**भावार्थः** – परागस्य मदेन मधुराः कामपीडिताभिः प्रियाभिः समालिङ्गिताः भ्रमराः चरणनिक्षेपखिन्नाः सन् वयमिव प्रियतमाविरहिताः भवेयुः।

**छन्दः** – श्लोकेऽस्मिन् आर्यावृत्तमस्ति।

**अलङ्कारः** – वर्णसाम्यात् आवृत्तिकारणादनुप्रासः।

**व्याकरणम्** – मधुमदकला – मधुनः मदः (षष्ठी तत्पुरुष), मधुमदः तेन कलाः (तृतीया तत्पुरुष)। विषण्णः – वि+सद्+क्त।

तस्मादिहैवासिष्यावहे।

इसलिए हम दोनों यहीं बैठे।

**विदूषकः** – एत्वं होदु [एवं भवतु] (उभावुपविशतः।)

**विदूषक** – ऐसा ही हो (दोनों बैठते है।)

**राजा** – (अवलोक्य)

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये राजा उदयनः उपवेशनस्थलं दृष्ट्वा अनुमानं करोति यत्–

**पादाक्रान्तानि पुष्पाणि सोष्म चेदं शिलातलम्।**
**नूनं काचिदिहासीना मां दृष्ट्वा सहसा गता॥४॥**

**अन्वयः**– पुष्पाणि पादाक्रान्तानि इदं शिलातलं च सोष्म। नूनम् इह आसीना काचिद् मां दृष्ट्वा सहसा गता॥

**पदार्थः** – पुष्पाणि = पुष्प, पादाक्रान्तानि = चरणों से दलित हैं, इदं = सामने दिखाई देने वाला, शिलातलं = प्रस्तरखण्ड, सोष्म = उष्णतायुक्त है। नूनं = निश्चित, इह = यहाँ, आसीना = बैठी हुई, काचित् = कोई महिला, मां = मुझे, उदयन को, दृष्ट्वा = देखकर, सहसा = अकस्मात्, गता = निर्गता।

**हिन्दी अर्थ** – (देखकर) फूल पैरों से कुचले हुए हैं। यह शिलाखण्ड भी गरम है। अतः निश्चय ही यहाँ बैठी हुई कोई महिला मुझे देखकर सहसा चली गई।

**व्याख्या** – अत्र पुष्पाणि = कुसुमानि, पादाक्रान्तानि = चरणदलितानि वर्तन्ते, इदं = पुरो दृश्यमानं, शिलातलं = प्रस्तरखण्डं, सोष्म = उष्णतायुक्तं वर्तते। इति दृष्ट्वा मन्ये यत् नूनम् = अवश्यमेव, इह = अत्र, आसीना = उपविष्टा, काचित् = महिला, माम् = उदयनं, दृष्ट्वा = विलोक्य, सहसा = अकस्मात्, गताः = निर्गताः॥४॥

**भावार्थः** – विदूषकेन सह राजा उपवेशनस्थलमवलोक्य अनुमानं करोति यत् अत्र पुष्पाणि चरणतलैः मर्दितानि वर्तन्ते पुरोदृश्यमानं शिलाखण्डमपि उष्णतायुक्तं वर्तते – इति दृष्ट्वा अनुमीयते यत् काचित् महिला मां राजानमुदयनं दृष्ट्वा अकस्मात् निर्गता।

**छन्दः** – प्रकृतेऽस्मिन् पद्ये अनुष्टुब्वृत्तमस्ति।

**अलङ्कारः** – उत्प्रेक्षालङ्कारोऽस्ति। "सम्भावनमथोत्प्रेक्षा।"

**व्याकरणम्** – पादाक्रान्तानि – पादैः आक्रान्ता (तृ.त.) आसीना – आस्+शानच्।

**चेटी** – भट्टिदारिए! रुद्धा खु ह्म वयं। [भर्तृदारिके रुद्धा खलु स्मो वयम्।]

**चेटी** – राजकुमारी! हम लोग घिर गई हैं।

**पद्मावती** – दिट्ठिआ उपविष्ठो अय्युतो। [दिष्ट्योपविष्टः आर्यपुत्रः]

**पद्मावती** – भाग्य से आर्यपुत्र बैठ गये हैं।

**वासवदत्ता** – (आत्मगतं) दिट्ठिआ पकिदित्थ सरीरो अय्य उत्तो। [दिष्ट्या प्रकृतिस्थशरीर आर्यपुत्रः]।

**वासवदत्ता** – (मन में) भाग्य से आर्यपुत्र शरीर से स्वस्थ हैं।

**चेटी** – भट्टिदारिए। सरसुपादा खु अय्याए दिट्ठि।

[भर्तृदारिके साश्रुपाता खल्वार्याया दृष्टिः]

**चेटी** – राजकुमारी जी! आर्या की आँखे अश्रुयुक्त हो रही हैं।

**वासवदत्ता** – एसा खु महअराणं अविणा आदो कास कुसुमरेणुणा पडिडेण सोदका मे दिट्ठि। [एषा खलु मधुकराणामविनयात् काशकुसुमरेणुना पतितेन सोदका मे दृष्टिः]।

**वासवदत्ता** – यह तो भौंरो की चञ्चलता से मेरी आँखों में काशपुष्पों की धूल पड़ जाने के कारण आँसू आ गये है।

**पद्मावती** – जुज्जइ [युज्यते]।

**पद्मावती** – ठीक कहती हो।

**विदूषकः** – भो सुण्ण खु इदं पमदवणं। पुच्छिदत्वं किञ्चिअत्थि पुच्छामि भवन्तं। [भो! शून्यं खल्विदं प्रमदवनं प्रष्टव्यं किचिदस्ति। पृच्छामि भवन्तम्]।

**विदूषक** – श्रीमन्! यह आनन्दवन बिल्कुल सूना है। आपसे कुछ पूछना है। पूँछूँ?

**राजा** – छन्दतः।

**राजा** – खुशी से।

**विदूषकः** – का भवदो पि आ? तदाणिं ततहोदी वासवदत्ता, इदाणिं पद्मावती वा [का भवतः प्रिया, तदानीं तत्र भवती वासवदत्ता, इदानीं पद्मावती वा।]

**विदूषक** – आपको कौन प्रिय है? तब की माननीया वासवदत्ता या अबकी पद्मावती?

**राजा** – किमिदानीं भवान् महति बहुमानसंकटे मां न्यस्यति?

**राजा** – क्यों आप इस समय मुझे बड़े प्रेम – संकट में डाल रहे हैं?

**पद्मावती** – हला! जादिसे सङ्कटे निक्खितो अय्य उत्तो। [हला! यादृशे सङ्कटे निक्षिप्तः आर्यपुत्रः।]

**पद्मावती** – सखी। जैसे संकट में आर्यपुत्र डाले गये हैं (वैसे संकट में मैं भी।)

**वासवदत्ता** – (आत्मगतम्) अहं अ मन्दभाग्या। [अहं च मन्दभागा]

**वासवदत्ता** – (मन में) मैं अभागिन भी।

**विदूषकः** – सेरं सेरं भणाटु भवं, एक्का, उवरदा, अवरा असण्णिहिदा। [स्वैरं स्वैरं भणतु भवान्। एकोपरता, अपरा असन्निहिता।]

**विदूषक** – आप निःसङ्कोच कहे। एक तो मर गई दूसरी पास में नहीं हैं।

**राजा** – वयस्य। न खलु न खलु ब्रुयाम्। भवांस्तु मुखरः।

**राजा** – मित्र! मैं नहीं कहूँगा। तुम मुँहफट हो।

**पद्मावती** – एत्ता एण भणिदं अय्य उत्तेण [एतावता भणितमार्यपुत्रेण]।

**पद्मावती** – इतने में आर्यपुत्र ने (अपना मन्तव्य) कह दिया।

**विदूषकः** – भो सन्वेण सवाभि कस्स विण आचाखिस्स। एसा सन्दठा मे जी हा। [भोः! सत्येन शपामि, कस्यापि नाख्यास्ये। एषा सन्दष्टा मे जिह्वा।

**विदूषक** – महाराज! मैं सत्य की शपथ खाता हूँ, किसी से नहीं कहूँगा। यह मैंने अपनी जीभ काट ली।

**राजा** – सखे! नोत्सहे वक्तुम्।

**राजा** – मित्र! कहने का तो साहस नहीं होता।

**पद्मावती** – अहो! इमस्स पुरो भइदा। एति एणा हिअअं ण जानादि। [अहो! अस्य पुरोभागिता एतावता हृदयं न जानाति]

**पद्मावती** – हाय! इनकी हठवादिता। इतने से भी हृदय को नहीं समझते।

**विदूषकः** – किं ण भणादि मम? अनाचक्खि अ इमादो सिलावट आरोणं सक्खं एक्कपदं विगमिठु। एसो सण्डो अन्तभवं। [किं न भणति मम? अनाख्यायाऽस्माच्छिलापट्टकान्न शक्यमेकपदमपि गन्तुम्। एष रुद्धोऽत्र भवान्।

**विदूषक** – क्यों नहीं मुझसे कहते? बिना कहे इस शिलाखण्ड से अन्यत्र एक पग भी नहीं जा सकते। यह आप यहाँ रोक दिये गये हैं।

**राजा** – किं बलात्कारेण?

**राजा** – क्या जबर्दस्ती (बलपूर्वक)

**विदूषकः** – आम्, बलक्कारेण (आं बलात्कारेण)

**विदूषक** – हाँ, बलपूर्वक।

**राजा** – तेन हि पश्यामस्तावत्।

**राजा** – तो देखता हूँ (कैसे मुझे रोकते हो।)

**विदूषकः** – पसीददु पसीददु भवं। व अस्वभावेण साविदोणि जइ सच्चं ण भणाणि। [प्रसीदतु प्रसीदतु भवान्। वयस्य भावेन शापितोऽसि, यदि सत्यं न भणसि।]

**विदूषक** – प्रसन्न होइए महाराज, प्रसन्न होइये। आपको मित्रता की सौगन्ध है यदि सच्ची बात नहीं कहते।

**राजा** – का गतिः? श्रूयताम् –

**राजा** – लाचारी है। सुनो –

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये राजा उदयनः स्वमित्रं विदूषकं प्रति स्वहृद्भावनां प्रकटयति –

**पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः।**
**वासवदत्ताबद्धं न तु तावन्मे मनो हरति॥ ५॥**

**अन्वयः** – यद्यपि पद्मावती रूपशील माधुर्यैः मम बहुमत्ता। वासवदत्ताबद्धं मे मनः तु न तावत् हरति।

**पदार्थः** – रूपशीलमाधुर्यैः – रूप, शील और माधुर्य से, यद्यपि – यद्यपि, पद्मावती – पद्मावती, मम – मुझे, बहुमता – बहुत प्रिय लगती है, तु – परन्तु, वासवदत्ता बद्धं – वासवदत्ता में लगा हुआ, मे – मेरे, मनः न हरति – मन को आकृष्ट नहीं करती है।

**हिन्दी अर्थ** – रूप, शील और माधुर्य से यद्यपि पद्मावती मुझे बहुत प्रिय लगती है परन्तु वासवदत्ता में आसक्त मेरे मन को आकृष्ट नहीं करती है।

**व्याख्या – पर्यायपदानि** – रूपशीलमाधुर्यै: = सौन्दर्यशीलप्रीतिभि:, यद्यपि पद्मावती = मगध राजकुमारी, मम = मे, बहुमता = अत्यधिकप्रिया, तु = परन्तु, वासवदत्ताबद्धं = वासवदत्तानुरक्तं, मे = मम, मन: = चित्तं, न हरति = नाकर्षति।

**भावार्थ:** – रूपशीलमाधुर्यगुणयुक्तै: यद्यपि पद्मावती मे (उदयनस्य) अत्यधिकप्रिया वर्तते। परन्तु वासवदत्ताऽऽसक्तं मम चित्तं नाकर्षति इति भाव:।

**छन्द:** – प्रस्तुत पद्ये आर्यावृत्तमस्ति।

**अलङ्कार:** – अनुप्रासालङ्कारोऽस्ति।

**व्याकरणम्** – रूपशीलमाधुर्यै: – रूपं च शीलं च माधुर्यञ्च – रूपशीलमाधुर्याणि तै: रूपशीलमाधुर्यै: (द्वन्द्वसमास:)।

**वासवदत्ता** – (आत्मगतं) भवतु भवतु दत्तं वेतनमस्य परिखेदस्य। अहो! अज्ञातावासोप्यत्र बहुगुण: सम्पद्यते।

**वासवदत्ता** – (मन में) बस बस। इस (विरह रूप) क्लेश का पुरस्कार दे दिया। अहा! यहाँ छिपकर रहना भी बहुत गुणकारी हो रहा है।

**चेटी** – भट्टिदारिए! अदक्खिञ्ञो खु भट्टा। [भर्तृदारिके! अदाक्षिण्य: खलु भर्ता]

**चेटी** – राजकुमारी जी! स्वामी उदार नहीं है।

**पद्मावती** – हला! मा मा एव्वं। सदाक्खिञ्ञो एव्व अय्यउत्तो, जा इदाणिं वि अय्याए वासवदत्ताए गुणाणि सुमरदि। [हला! मा मैवम्। सदाक्षिण्य एवार्यपुत्र: य इदानीमप्यार्याया वासवदत्ताया गुणान् स्मरति।]

**पद्मावती** – सखी! ऐसा मत कहो। आर्यपुत्र उदार ही हैं जो अभी तक आर्या वासवदत्ता के गुणों का स्मरण करते हैं।

**वासवदत्ता** – भट्टे, अभिजणस्स सदिसं न्दिदं। [भद्रे! अभिजनस्य सदृशं मन्त्रितम्।]

**वासवदत्ता** – कल्याणी! आपने अपने उच्च कुल के अनुरूप ही कहा है।

**राजा** – उक्तं मया। भवानिदानीं कथयतु। का भवत: प्रिया? तदा वासवदत्ता, इदानीं पद्मावती वा।

**राजा** – मैंने तो कह दिया। अब आप कहिये कि आपको कौन अधिक प्रिय है, उस समय की वासवदत्ता या इस समय की पद्मावती।

**पद्मावती** – अय्यउत्तो वि वसन्तओ संवुत्ता। [आर्यपुत्रोऽपि वसन्तक: संवृत्त:।]

**पद्मावती** – आर्यपुत्र भी वसन्तक हो गये।

**विदूषक:** – किं मे विप्पलविदेण। उभओ वि तत्रहोदी मे बहुमदाओ। [किं मे विप्रलापितेन। उभे अपि तत्र भवत्यौ मे बहुमते।]

**विदूषक** – मेरे बकने से क्या? मुझे तो दोनों देवियाँ अत्यन्त प्रिय हैं।

**राजा** – वैधेय! मामेवं बलाच्छ्रुत्वा किमिदानीं नाभिभाषसे?

**राजा** – मूर्ख! मुझसे इस प्रकार जबर्दस्ती (हठात्) सुनकर अब तुम क्यों नहीं कहते?

**विदूषक:** – किं मं पि बलक्कारेण? [किं मामपि बलात्कारेण?]

**विदूषक** – क्या मुझसे भी जबर्दस्ती कहलाना चाहते हो?

**राजा** – अथ किम् बलात्कारेण।

**राजा** – और क्या, जबर्दस्ती।

**विदूषक:**– तेण हि ण सक्ककं सोदुं। [तेन हि न शक्यं श्रोतुम्।]

**विदूषक** – तब तो अप नहीं सुन सकते।

**राजा** – प्रसीदतु प्रसीदतु महाब्राह्मणः। स्वैरं स्वैरमभिधीयताम्।

**राजा** – मान जाइये, महाब्राह्मणजी! मान जाइये। अपनी इच्छा से कहिये।

**विदूषकः** – इदाणिं सुणादु भवं। तत्रहोदी वासवदत्ता मे बहुमदा। तत्तहोदि पद्मावदी तरुणी दस्सणीआ अकोवणा अणहंकारा महुरवाआ सदक्खिञ्ञा। अअं च अवरो महन्तो गुणो, सिणिद्धेण भोअणेण मं पच्चुगच्छइ वासवदत्ता – कहिं णु खु गदो अय्यवसन्तो त्ति। [इदानीं शृणोतु भवान्। तत्र भवती वासवदत्ता मे बहुमता। तत्र पद्मावती तरुणी दर्शनीया अकोपना अनहंकारा मधुरवाक् सदाक्षिण्या। अयं चापरो महान् गुणः, स्निग्धेन भोजनेन मां प्रत्युद्गच्छति वासवदत्ता कुत्र नु खलु गत आर्यवसन्तक इति।]

**विदूषक** – अब आप सुनिये। मैं माननीया वासवदत्ता का अधिक सम्मान करता हूँ। यद्यपि माननीया पद्मावती युवती, सुन्दर, क्रोधरहित, अभिमानशून्य, मधुरभाषिणी तथा उदार हैं किन्तु वासवदत्ताजी में एक दूसरा बड़ा भारी गुण था – कि सुस्वादु भोजन लेकर मुझे ढूँढा करती थी कि आर्यवसन्तक कहा गये।

**वासवदत्ता** – भोदु भोदु, वसन्तअ! सुमरेहि दाणि एदं। [भवतु भवतु, वसन्तक! स्मरेदानीमेताम्।]

**वासवदत्ता** – अच्छा अच्छा आर्य वसन्तक! अब इसे याद करो।

**राजा** – भवतु, भवतु वसन्तक! सर्वमेतत् कथयिष्ये देव्यै वासवदत्तायै।

**राजा** – अच्छा, अच्छा वसन्तक! मैं यह सब देवी वासवदत्ता से कह दूँगा।

**विदूषकः** – अविहा, वासवदत्ता। कहिं वासवदत्ता? चिरा खु उवरदा वासवदत्ता। [अविहा, वासवदत्ता। कुत्र वासवदत्ता? चिरात् खलूपरता वासवदत्ता।]

**विदूषक** – हाय! वासवदत्ता! वासवदत्ता कहाँ है? वह तो बहुत पहले मर गई।

**राजा** – (सविषादम्) एवम् उपरता वासवदत्ता।

**राजा** – (शोक के साथ) ऐसा, वासवदत्ता मर गई।

**प्रसङ्गः**– प्रकृतेऽस्मिन् पद्ये उदयनः स्वस्योद्विग्नतां वर्णयन्नाह –

**अनेन परिहासेन व्याक्षिप्तं मे मनस्त्वया।**
**ततो वाणी तथैवेयं पूर्वाभ्यासेन निःसृता॥ ६॥**

**अन्वयः** – अनेन परिहासेन त्वया मे मनः व्याक्षिप्तम्। ततः पूर्वाभ्यासेन वाणी तथैव निःसृता॥

**पदार्थः** – अनेन = इस, परिहासेन = हँसी मजाक से, मे = मेरे, मनः = हृदय को, त्वया = तुमने, व्याक्षिप्तं = व्याकुल कर दिया। ततः = उस कारण से, पूर्वाभ्यासेन = पहले के अभ्यासवशात्, तथैव = उसी तरह, इयं वाणी = यह बात, निःसृता = मुख से निकल गई।

**हिन्दी अर्थ** – मित्र! तूने इस परिहास से मेरा मन ऐसा उद्विग्न कर दिया कि जैसे मैं पहले बोला करता था वैसे ही फिर से अभ्यासवश यह बात मेरे मुख से निकल गयी कि मैं सब कुछ देवी वासवदत्ता से कह दूँगा।

**व्याख्या – पर्यायपदानि** – अनेन = पूर्वोक्तेन, परिहासेन = नर्मभाषितेन, त्वया = वसन्तकेन, मे = मम उदयनस्य, मनः = चित्तं, व्याक्षिप्तं = व्याकुलीकृतम्। ततः = तस्मात् कारणात्, पूर्वाभ्यासेन = पूर्वसंस्कारवशात्, इयम् = एषा, वाणी = वाक्, तथैव = पूर्ववदेव, निःसृता = निर्गता, वासवदत्तायै = सर्वं कथयिष्ये इति वाणीत्यर्थः॥

**भावार्थः** – उदयनः कथयति यत् मित्र वसन्तक! त्वयोक्तेन परिहासेन मम मनश्चञ्चलीकृतम्। तस्मात् कारणात् पूर्वसंस्कारवशात् एषा वाणी (वासवदत्तायै सर्वं कथयिष्ये इति) पूर्ववदेव निर्गता।

**छन्दः** – श्लोकेऽस्मिन् अनुष्टुब्वृत्तं वर्तते।

**व्याकरणम्** – व्याक्षिप्तं – वि+आ+क्षिप्+क्त। निःसृता – निस्+सृ+क्त+टाप्। कथयिष्ये – कथय+लृट्+स्यन्+उ.पु.एक.।

**कोशः** – ब्राह्मी तु भारती भाषा गीर्वाग् वाणी सरस्वती इत्यमरः।

**पद्मावती** – रमणीओ खु कहा जोओ णिसंसेण विसंवादिओ। [रमणीयः खलु कथायोगो नृशंसेन विसंवादितः।]

**पद्मावती** – सुन्दर कथा – प्रसंग को दुष्ट विदूषक ने बिगाड़ दिया।

**वासवदत्ता** – (आत्मगतं) भोदु भोदु, विस्सत्थह्मि। अहो! पिअं णाम्, इदिसं वउणं अप्पच्चक्ख सुणी अदि। [भवतु भवतु, विश्वस्तास्मि। अहो! प्रियं नाम, ईदृशं वचनमप्रत्यक्षं श्रूयते।]

**वासवदत्ता** – (मन में) बस-बस मुझे विश्वास हो गया। अहा! आनन्द है, जो ऐसा वचन परोक्ष में सुना जाता है।

**विदूषकः** – धारेदु-धारेदु भवं। अणदिक्कमणीओ हि हिो। ईदिसं दाणि एव।

[धारयतु धारयतु भवान्। अनतिक्रमणीयो हि विधिः। ईदृशमिदानीमेतत्।]

**विदूषक** – आप धैर्य धारण करें, धैर्य धारण करें। होनी (भवितव्यता) को टाला नहीं जा सकता। यह तो अब ऐसा ही है।

**राजा** – वयस्य! न जानाति भवानवस्थाम्। कुतः –

**राजा** – मित्र! आप मेरी दशा को नहीं जानते हैं। क्योंकि –

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये दृढमूलानुरागस्य परित्यागः नितरां कठिनोभवतीति वर्णयन्नाह –

**दुःखं त्यक्तुं बद्धमूलोऽनुरागः**
**स्मृत्वा स्मृत्वा याति दुःखं नवत्वम्।**
**यात्रा त्वेषा यद् विमुच्येह वाष्पं**
**प्राप्तानृण्या याति बुद्धिः प्रसादम्॥ ७॥**

**अन्वयः** – बद्धमूलः अनुरागः त्यक्तुं दुःखम्। स्मृत्वा स्मृत्वा, दुःखं नवत्वं याति। तु एषा यात्रा, यत् इह वाष्पं विमुच्य प्राप्तानृण्या बुद्धिः प्रसादं याति॥

**पदार्थः** – बद्धमूलः = मजबूत जड़वाला, अनुराग = प्रेम, त्यक्तुं = छोड़ना, दुःखं = कष्टकर होता है। स्मृत्वा - स्मृत्वा = पुनः पुनः याद करके, दुःखं = दुःख, नवत्वं याति = नया हो जाता है। तु = लेकिन, एषा यात्रा = यह लोक व्यवहार है, यत् = कि, इह = इस संसार में, वाष्पम् = आँसू को, विमुच्य = बहाकर, बुद्धिः = बुद्धि, प्राप्तानृण्या = प्रियजन के प्रेम से मुक्ति पाकर, ऋण से उऋण होने पर, प्रसादं याति = निर्मल हो जाती है, प्रसन्नता की अनुभूति होती है।

**हिन्दी अर्थ** – दृढ अनुराग को छोड़ना बडा ही कठिन है। बार-बार याद करने से दुःख फिर से नया हो जाता है। यह तो संसार का व्यवहार है कि रोकर, आँसू बहाकर मनुष्य ऋण से उऋण हो जाता है। दुःख कम हो जाने से मन निर्मल हो जाता है॥

**व्याख्या** – **पर्यायपदानि** – बद्धमूलः = सुदृढमूलः, अनुरागः = प्रेम, त्यक्तुं = विस्मर्तुं, दुःखं = कष्टप्रदम्। स्मृत्वा-स्मृत्वा = पौनः पुन्येन संस्मृत्य, दुःखं = कष्टम्, नवत्वं = नवीनतां, याति = गच्छति, तु = तथापि, यात्रा = लोक व्यवहारः, एषा = इयं, यत् इह = संसारे, वाष्पम् = अश्रुजलं, विमुच्य = विसृज्य, प्राप्तानृण्या = ऋणमुक्ता सती, बुद्धिः = मतिः, प्रसादं = प्रसन्नतां, याति = प्राप्नोति॥

**भावार्थः**– सुदृढानुरागस्य परित्यागो हि महत्कष्टमुत्पादयति। पौनः पुन्येन प्रियजनस्य स्मरणेन दुःखं नवतामुपैति, तथापि संसारेऽस्मिन् जनेष्वेतादृशी मान्यता वर्तते यदश्रुत्यागानन्तरं दुःखं किञ्चिन्न्यूनं भवतीति॥

**छन्दः** – अस्मिन् पद्ये शालिनीवृत्तमस्ति। तल्लक्षणं यथा – शालिन्युक्ता म्तौ तगौ गोब्धिलोकैः।

**अलङ्कारः** – पद्येऽस्मिन् विषमालङ्कारोऽस्ति। तल्लक्षणं यथा –

विषमं यद्यनौचित्यादनेकान्वयकल्पनम्।

**व्याकरणम्** – बद्धमूलः – बद्धं मूलं यस्य सः (बहुव्रीहि)। त्यक्तुं – त्यज्+तुमुन्। स्मृत्वा – स्मृ+क्त्वा। विमुच्य – वि+मुञ्च+क्त्वा/ल्यप्।

**कोशः** – बुद्धिः – बुद्धिर्मनीषाधिषणाः धीः प्रज्ञाः शेमुषी मति इत्यमरः।

प्रेम प्रियता हार्दं प्रेम स्नेहः इत्यमरः।

**विदूषकः** – अस्सुपादकिलिण्णं खु तत्तहोदा मुहं। आज मुहोदअं अणेमि। (निष्क्रान्तः) [अश्रुपातक्लिन्नं खलु तत्र भवतो मुखम्। यावन्मुखोदकमानयामि।]

**विदूषक** – महाराज का मुँह आँसू से भीग गया है। मैं तब तक मुँह धोने के लिए जल ले आता हूँ। (निकल जाता है।)

**पद्मावती** – अय्ये बप्फाउलपडन्तरिदं अय्यउत्तस्स मुहं जावणिक्कमह्म। [आर्ये! वाष्पाकुलपटान्तरितमार्यपुत्रस्य मुखम्। यावन्निष्क्रामामः।]

**पद्मावती** – आर्ये! आर्यपुत्र का मुँह आँसुओं से व्याप्त होने के कारण मानो वस्त्र से ढंक गया है। इस बीच हम लोग निकल चलें।

**वासवदत्ता** – एव्वं होदु। अहव चिट्ठ तुवं। उक्कण्ठिदं भत्तारं उज्झिअ, अजुत्तं णिग्गमणं। अहं एव्व गमिस्स। [एवं भवतु। अथवा तिष्ठ त्वम्। उत्कण्ठितं भर्त्तारमुज्झित्वायुक्तं निर्गमनम्। अहमेव गमिष्यामि।]

**वासवदत्ता** – ऐसा ही हो। अथवा तुम यहीं रुको। उत्कण्ठा से युक्त पति को छोड़कर चला जाना उचित नहीं हैं। मैं ही जाती हूँ।

**चेटी** – सुट्ठु अय्या भणादि। उवसप्पदु दाव भट्टिदारिआ। [ सुष्ठ्वार्या भणति। उपसर्पतु तावद् भर्तृदारिका।]

**चेटी** – देवी जी ठीक कह रही हैं। राजकुमारीजी स्वामी के पास जावें।

**पद्मावती** – किं णु खु पविसामि? [ किन्नु खलु प्रविशामि।]

**पद्मावती** – क्या मैं आर्यपुत्र के पास जाँऊ?

**वासवदत्ता** – हला! पविस। [हला प्रविश।] (इत्युक्त्वा निष्क्रान्ता)

**वासवदत्ता** – सखी! जाओ। (यह कहकर चली गई।)

**विदूषकः** – (प्रविश्य) (नलिनीपत्रेण जलं गृहीत्वा) एषा तत्त होदी पदुमावदी! [एषा तत्र भवती पद्मावती!]

**विदूषक** – (प्रवेश करके) (कमलिनी के पत्ते में जल लेकर) अहा! ये माननीया पद्मावती जी आ गई है।

**पद्मावती** – अय्य! वसन्तअ! किं एदं? [आर्य! वसन्तक! किमेतत्?]

**पद्मावती** – आर्य वसन्तक! यह क्या हैं?

**विदूषकः** – एदं इदं इदं एदं। [एतदिदम्। इदमेतत्।]

**विदूषक** – यह ............यह...........यह............यह।

**पद्मावती** – भणादु भणादु अय्यो भणादु। [भणतु भणत्वार्यो भणतु]

**पद्मावती** – कहिये कहिये, आप कहिये।

**विदूषकः** – भोदि! वादणिदेण कासकुसुमरेणुणा अक्खिणिपडिदेणु सस्सुपादं खु तत्तहोदि मुह। ता गहणदु होदी इदं मुहोदअं। [भवति! वातनीतेन काशकुसुमरेणुनाऽक्षिनिपातेन साश्रुपातं तत्रभवतो। मुखम्। तद् गृह्णातु भवतीदं मुखोदकं।]

**विदूषक** – देवि! काश के फूलों के परागकण हवा में उड़कर महाराज की आँखों में पड़ जाने से आँसू बह गये है। इसलिए उनके मुँह को धोने के लिए आप जल लीजिये।

**पद्मावती** – (आत्मगतम्) अहो! सदक्खिणस्स जणस्स परिजणो वि सदक्खिण्णो एव्व होदि (उपेत्य) जेदु अय्यउतो। इदं मुहोदअं।[अहो! सदाक्षिण्यस्य जनस्य परिजनोऽपि सदाक्षिण्य एव भवति। जयत्वार्यपुत्रः। इदं मुखोदकम्।]

**पद्मावती** – (मन में) अहो! उदार व्यक्ति का सेवक भी उदार ही होता है। (पास में जाकर) आर्यपुत्र की जय हो। यह मुँह धोने का जल है।]

**राजा** – अये! पद्मावती। (अपवार्य) वसन्तक! किमिदम्?

**राजा** – अरे! पद्मावती। (मुँह फेरकर) वसन्तक यह क्या?

**विशेष – अपवार्य** – पद्मावती की तरफ से मुँह घुमाकर विदूषक की ओर करके। यह नाट्यशास्त्र का पारिभाषिक शब्द है। विश्वनाथ ने साहित्यदर्पण (6/139) में कहा है (रहस्यं कथ्यतेऽन्यस्यपरावृत्यापवारितम्।) यदि कोई पात्र गोप्य बात को नहीं सुनाना चाहता है तो वह अपना मुँह दूसरी ओर घुमाकर कह देता है। इसे ही अपवारित कहा जाता है।

**विदूषकः**– (कर्णे) एव्वं विअ। (एवमिव)

**विदूषक** – (कान में) इस प्रकार।

**राजा** – साधु वसन्तक! साधु। (आचम्य) पद्मावती! आस्यताम्।

**राजा** – वाह वसन्तक! वाह (आचमन करके) पद्मावती! बैठो।

**पद्मावती** – जं अय्यउत्तो आणवेदि। [यदार्यपुत्र आज्ञापयति।] (उपविशति।)

**पद्मावती** – आर्यपुत्र की जैसी आज्ञा। (बैठती है।)

**राजा** – पद्मावति!

**राजा** – पद्मावती!

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये राजा रहस्यभेदभीतो पद्मावतीं कथयति –

**शरच्छशाङ्कगौरेण वाताविद्धेन भामिनि।**
**काशपुष्पलवनेदं साश्रुपातं मुखं मम॥ ८॥**

**अन्वयः**– भामिनि! शरच्छशाङ्कगौरेण वाताविद्धेन काशपुष्पलवेन इदं मम मुखं साश्रुपातं जातमिति शेषः॥

**पदार्थः** – भामिनि! = हे पद्मावती, शरच्छशाङ्कगौरेण = शरदकालीन चन्द्रमा की तरह उज्वल, वाताविद्धेन = हवा से उडाये गये, काशपुष्पलवेन = काश के फूलों के परागकण से, इदं = यह, मम = मेरा, मुखं = मुँह, साश्रुपातम् = आँसुओं से युक्त हो गया है॥

**हिन्दी अर्थ** – हे पद्मावती! शरत्कालीन चन्द्रमा के समान उज्वल काशपुष्प का परागकण हवा में उड़कर मेरी आँख में पड़ गया है। इसी से मेरा मुख अश्रुपातयुक्त हो गया है।

**व्याख्या – पर्यायपदानि** – भामिनि! = सुन्दरि! पद्मावति शरच्छशाङ्कगौरेण = शरत्कालीन चन्द्रवत् धवलेन, वाताविद्धेन = वायुचालितेन, काशपुष्पलवेन = काशपुष्पकणेन, इदम् = एतद्, मम = उदयनस्य, मुखम् = आननं, साश्रुपातम् = अश्रुजलयुक्तम् अभवत्॥

**भावार्थः** – हे पद्मावति! शरत्कालिकचन्द्रोज्वलस्य वायुचालितस्य काशपुष्पकणस्य नेत्रयोः पतनात् मम मुखम् (नेत्रद्वयम्) अश्रुपूर्णं जातमिति॥

**छन्दः** – पद्येऽस्मिन् अनुष्टुप् छन्दोऽस्ति।

**अलङ्कारः** – श्लोकेऽस्मिन् 'शरच्छशाङ्कगौरेण' लुप्तोपमालङ्कारो वर्तते।

**व्याकरणम्** – शरदः शशाङ्कः शरच्छशाङ्कः शरच्छशाङ्कः इव गौरः शरच्छशाङ्कगौरः तेन (तृ.त.)। भामिनि – भाम+इनि, मत्वर्थे – ङीप् (सम्बोधन में)।

**कोशः** – आननं लपनं मुखं, कोपना सैव भामिनी इति चामरः।

**प्रसङ्गः** – राजा उदयनः मनसि सत्यस्याप्रकाशनमेव वरमिति तर्कयन्नाह –

(आत्मगतम्)

**इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत्।**
**कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः॥ ९॥**

**अन्वयः** – नवोद्वाहा इयं बाला सत्यं श्रुत्वा व्यथां व्रजेत्। इयं कामं धीरस्वभावा तु स्त्रीस्वभावः कातरः।

**पदार्थः** – नवोद्वाहा = नव विवाहिता, इयं बाला = यह षोडशी पद्मावती, सत्यं = सच, श्रुत्वा = सुनकर, व्यथां व्रजेत् = दुःखी होगी, इयं = पद्मावती, कामम् = अत्यधिक, धीरस्वभावा = गम्भीर स्वभाव वाली है, तु = तो भी, स्त्रीस्वभावः = औरतों (स्त्री) की प्रकृति, कातरः = अधीर होती है।

**हिन्दी अर्थ** – (राजा अपने मन में) यह अभी कोमल अवस्थावाली और नवविवाहिता है। सच्ची बात (वासवदत्ता के प्रति प्रगाढ प्रेम) सुनकर इसे दुःख होगा। यद्यपि इसका स्वभाव बड़ा गम्भीर है, लेकिन फिर भी स्त्रियों का स्वभाव अधीर हुआ करता है। अतः इसे सत्य बताना उचित नहीं है॥ ९॥

**व्याख्या – पर्यायपदानि** – नवोद्वाहा = नवविवाहिता, इयं = एषा, बाला = षोडशी पद्मावती, सत्यं = तथ्यं, श्रुत्वा = आकर्ण्य, व्यथां = वेदनां, व्रजेत् = गच्छेत्। इयं = पुरोदृश्यमाना पद्मावती, कामं = पर्याप्तं, धीरस्वभावा: = गम्भीर प्रकृतिः अस्ति, तु = तथापि, स्त्रीस्वभावः = नारीणां प्रकृतिः, कातरः = अधीराः, भवति इत्यर्थः॥ ९॥

**भावार्थः** – राजा स्व मनसि – इयं पद्मावती नवविवाहिता युवतिरस्ति। इयं मम रोदनस्य मूलकारणं श्रुत्वा नूनं दुःखिता स्यात्, यद्यपि एषा स्वभावेन गम्भीरा तथापि स्त्रियः स्वभावादेव कातराः भवन्त्येव। अतः सत्यकारणस्य प्रकाशनं न करणीयमिति भावः।

**छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दो वर्तते।

**अलङ्कारः** – अत्र अर्थान्तरन्यासालङ्कारोऽस्ति।

**व्याकरणम्** – नवः उद्वाहः यस्याः सा नवोद्वाहा (बहु.)। धीरः स्वभावः यस्याः सा धीरस्वभावा (बहु.)। उत्+वह्+घञ् – उद्वाहः। कामम् – अव्ययपदमस्ति।

**विदूषकः** – उइदं तत्तहोदो मअधराअस्स अवाह्णकाले भवन्तं अग्गदो करिअ सहिज्जणदंसगं। सक्कारो हि णाम सक्कारेण पडिच्छिदो पीदिं उप्पादेदि। ता उट्ठेतु दाव भवं। [उचितं तत्र भवतो मगधराजस्यापराह्णकाले भवन्तमग्रतः कृत्वा सुहज्जनदर्शनम्। सत्कारो हि नाम सत्कारेण प्रतीष्टः प्रीतिमुत्पादयति। तदुत्तिष्ठतु तावद् भवान्।]

**विदूषक** – माननीय मगधराज (दर्शक) ने आपको आगे करके अपराह्न में मित्रमण्डली से मिलने का समय तय किया है। क्योंकि यह निश्चित एवं प्रसिद्ध है कि सत्कार का बदला सत्कार से दिये जाने पर प्रीति उत्पन्न करता है। इसलिए आप उठें।

**राजा** – बाढं, प्रथमः कल्पः? (उत्थाय)

**राजा** – बहुत अच्छा, यह पहला कर्म है। (उठकर)

**प्रसङ्गः** – वत्सराजोदयनः सत्कारविज्ञातॄणां संसारे दुर्लभतां समर्थयन्नाह –

**गुणानां वा विशालानां सत्काराणां च नित्यशः।**
**कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः॥ १०॥**

**अन्वयः** – लोके विशालानां गुणानां वा सत्काराणां च कर्तारः नित्यशः सुलभाः तु विज्ञातारः दुर्लभाः॥

**पदार्थः** – (संसार में) विशालानां = महान्, गुणानां = गुणों के, वा = अथवा, सत्काराणाञ्च = और सत्कारों के, कर्तारः = करने वाले, नित्यशः = सतत (प्रतिदिन), सुलभाः = सुलभ हैं, तु = किन्तु, विज्ञातारः = समझने वाले लोग, दुर्लभाः = बड़ी कठिनाई से मिलते हैं।

**हिन्दी अर्थ** – संसार में अच्छे – अच्छे गुणों के अधिकारी और अच्छे – अच्छे कामों के करने वाले तो रोज मिलते हैं, परन्तु उनके गुणग्राही (गुणों के प्रशंसक) बड़ी मुश्किल से मिलते हैं।

**व्याख्या – पर्यायपदानि** – लोके = संसारेऽस्मिन्, विशालानां = महतां, गुणानां = परोपकारादीनां, वा = अथवा, सत्काराणां = सम्मानानां, प्रियजनपूजादीनां च, कर्तारः = सम्पादयितारः, नित्यशः = प्रतिदिनं, सुलभाः = सुप्राप्याः सन्ति, तु = परन्तु, विज्ञातारः = विशेषेण ज्ञातारः, गुणग्राहिणः, दुर्लभाः = दुष्प्राप्या विरला च भवन्ति।

**भावार्थः** – विश्वस्मिन् विश्वे यद्यपि गुणिनः परमसम्मानदातारश्च जनाः सरलतया प्राप्तुं शक्यन्ते, तथापि गुणग्राहिणः सत्कर्तॄणां च कृते सम्मानदातारो जनाः दुःखेन मिलन्ति।

**छन्दः** – अनुष्टुब्वृत्तमत्र वर्तते।

**अलङ्कारः** – पद्येऽस्मिन् दीपकालङ्कारो वर्तते। तल्लक्षणं यथा –

अप्रस्तुतप्रस्तुतयोर्दीपकं तु निगद्यते।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत्॥

**व्याकरणम्** – उत्थाय – उद्+स्था+ल्यप्। सुलभाः सुखेन लब्धुं शक्याः अथवा सुखेन लभ्यन्ते इति (उपपदतत्पुरुषः) सु+लभ्+कर्मणि खल्। दुर्लभाः – दुःखेन लभ्यन्त इति ते (उप.स.)। दुर्+लभ्+खल्। कृ+तृच् (कर्तरि) – कर्तारः। वि+ज्ञा+तृच् – विज्ञातारः।

(निष्क्रान्ताः सर्वे।)

(सभी चले जाते हैं।)

**(॥ इति चतुर्थोऽङ्कः॥)**

**(॥ चतुर्थ अङ्क समाप्त॥)**

# अथ पञ्चमोऽङ्कः

(ततः प्रविशति पद्मिनिका)

**पद्मिनिका** – महुअरिए! महुअरिए! आअच्छ दाव सिग्धं। [मधुकरिके! मधुकरिके! आगच्छ तावच्छीघ्रम्।]

(तदनन्तर पद्मिनिका प्रवेश करती है।)

**पद्मिनिका** – मधुकरिका! मधुकरिका! जल्दी तो आओ।

(प्रविश्य)

**मधुकरिका** – हला! इअह्मि! किं करीअदु? [हला! इयमस्मि, किं क्रियताम्?]

(मधुकरिका प्रवेश करके)

**मधुकरिका** – सखी! यह मैं आ गई हूँ, क्या करूँ?

**पद्मिनिका** – हला! किं ण जाणसि तुवं भट्टिदारिआ पदुमावदी सीसवेदणाए दुक्खीविदेत्ति। [हला! किं न जानासि त्वं भर्तृदारिका पद्मावती शीर्षवेदनया दुःखितेति।]

**पद्मिनिका** – सखी! क्या तुम नहीं जानती कि राजकुमारी पद्मावती सिरदर्द से पीड़ित हैं।

**मधुकरिका** – हद्धि! [हा! धिक्!]

**मधुकरिका** – हाय! हाय!

**पद्मिनिका** – हला! गच्च सिग्धं, अय्य आवन्तिअं सद्दावेहि। केवलं भट्टिदारिआए सीसवेदणं एव्व णिवेदेहि। तदो सअं एव्व आगमिस्सदि। [हला! गच्छ शीघ्रम्, आर्यामावन्तिकां शब्दायस्व। केवलं भर्तृदारिकायाः शीर्षवेदनामेव निवेदय। तदा स्वयमेवागमिष्यति।]

**पद्मिनिका** – सखी! जल्दी जाओ, आर्या अवन्तिका को बुला लाओ। केवल राजकुमारी की शिरोवेदना ही बताना। वे स्वयं चली आयेंगी।

**मधुकरिका** – हला! किं सा करिस्सदि? [हला! किं सा करिष्यति?]

**मधुकरिका** – सखी! वे क्या करेंगी?

**पद्मिनिका** – सा खु दाणिं महुराहि कहाहि भट्टिदारिआए सीसवेदाणं विणोदेदि। [सा खल्विदानीं मधुराभिः कथाभिः भर्तृदारिकायाः शीर्षवेदनां विनोदयति।]

**पद्मिनिका** – वे इस समय सुन्दर कथाओं से राजकुमारी का सिरदर्द दूर करेगी।

**मधुकरिका** – जुज्जइ! कहिं सअणीयं रइदं भट्टिदारिआए? [युज्यते। कुत्र शयनीयं रचितं भर्तृदारिकायाः?]

**मधुकरिका** – ठीक है। राजकुमारी की शय्या कहाँ लगाई हैं?

**पद्मिनिका** – समुद्दगिहके किल सेज्जां त्थिण्ण। गच्छ दाणिं तुवं अहं वि भट्टिणो णिवदिणत्थं अय्यवसन्तअं अण्णेसामि। [समुद्रगृहके किल शय्यास्तीर्णा। गच्छेदानीं त्वम्। अहमपि भर्त्रे निवेदनार्थमार्यवसन्तकमन्विष्यामि।]

**पद्मिनिका** – समुद्रगृह में शय्या बिछी है। अब तुम जाओ। मैं भी स्वामी से निवेदन करने के लिए आर्य वसन्तक को ढूँढती हूँ।

**मधुकरिका** – एव्वं होदु। [एवं भवतु।] (निष्क्रान्ता)

**मधुकरिका** – ऐसा ही हो। (चल देती है।)

**पद्मिनिका** – कहिं दाणिं अय्यवसन्तअं पेक्खामि? [कुत्रेदानीमार्यवसन्तकं प्रेक्षे?]

**पद्मिनिका** – इस समय में आर्य वसन्तक को कहाँ देखूँ?

**टिप्पणी** – समुद्रगृहके – जलयन्त्रों द्वारा ताप नियन्त्रित गृह में। वर्तमान में – (एअरकन्डीशन) वातानुकूलित घर में।

(ततः प्रविशति विदूषकः)

**विदूषकः** – अज्ज खु देवीविओअ विहुरअअस्स तत्तहोदो बच्छराअस्स पदुमावदीपाणिग्गहणसमीरिअस्स अच्चन्तसुहावहे मङ्गलोत्सवे मदणग्गिदाहो अहि अदरं बड्ढइ। (पद्मिनिका विलोक्य) पदुमिणिआ! पदुमिणिए! किं इह वत्तदि? [अद्य खलु देवी वियोग विधुरस्य तत्र भवतो वत्सराजस्य पद्मावती पाणिग्रहणसमीरितस्यात्यन्तसुखावहे मङ्गलोत्सवे मदनाग्निदाहोऽधिकतरं वर्धते। अयि! पद्मिनिका! पद्मिनिके! किमिह वर्तते?]

(तदनन्तर विदूषक का प्रवेश)

**विदूषक** – आज महारानी वासवदत्ता के वियोग से व्याकुल हृदय, श्रीमान् वत्सराज का पद्मावती के साथ विवाह होने से अत्यन्त सुखदायक इस मङ्गलोत्सव के समय कामाग्नि का ताप अत्यधिक बढ़ रहा है। (पद्मिनिका को देखकर) अरे पद्मिनिका! पद्मिनिके! यहाँ कैसे हो?

**पद्मिनिका** – अय्य वसन्तअ! किं ण जाणासि तुवं – भट्टिदारिआ पदुमावदी सीसवदेणाए दुःखाविदेति। [आर्य वसन्तक! किं न जानासि त्वं भर्तृदारिका पद्मावती शीर्षवेदनया दुःखितेति।]

**पद्मिनिका** – आर्य वसन्तक! क्या आप नहीं जानते कि राजकुमारी पद्मावती सिरदर्द से दुःखी है?

**विदूषकः** – भोदि सच्चं? ण जाणामि। [भवति! सत्यं न जानामि।]

**विदूषक** – अजी, सच में, मैं नहीं जानता।

**पद्मिनिका** – तेण हि भट्टिणो णिवेदेहि णं। जाव अहं वि सीसाणुलेवणं तुवारेमि। [तेन हि भर्त्रे निवेदयैनाम्। यावदहमपि शीर्षानुलेपनं त्वरयामि।]

**पद्मिनिका** – तो आप स्वामी से यह निवेदन कर दीजिये। तब तक मैं भी जल्दी सिर का लेप तैयार करती हूँ।

**विदूषकः** – कहिं सअणीअं रइदं पदुमावदीए? [कुत्र शयनीयं रचितं पद्मावत्याः?]

**विदूषक** – पद्मावतीजी कि शय्या कहाँ लगाई गई है?

**पद्मिनिका** – समुद्दगिहके किल सेज्जा त्थिण्णा। [समुद्रगृहके किल शय्यास्तीर्णा]

**पद्मिनिका** – समुद्रगृह में शय्या बिछी है।

**विदूषकः** – गच्छदु भोदी! जाव अहं वि त्तहोदो णिवेदइस्सं। [गच्छतु भवती। यावदहमपि तत्र भवते निवेदयिष्यामि।] (निष्क्रान्तौ)

(प्रवेशकः)

**विदूषक** – आप जाइये। मैं भी महाराज से निवेदन करता हूँ।

(दोनों का प्रस्थान)

(प्रवेशक समाप्त)

[ततः प्रविशति राजा]

[तदनन्तर राजा प्रवेश करते हैं।]

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये उदयनः पद्मावत्या सह विवाहानन्तरमपि वह्निदग्धां वासवदत्तां पुनः स्मरन्नाह–

**राजा – श्लाघ्यामवन्तिनृपतेः सदृशीं तनूजां, कालक्रमेण पुनरागतदारभारः।**
**लावाणके हुतवहेन हृताङ्गयष्टिं, तां पद्मिनीं हिमहतामिव चिन्तयामि॥ १ ॥**

**अन्वयः** – कालक्रमेण पुनरागतदारभारः (अहं) श्लाघ्याम् अवन्तिनृपतेः सदृशीं तां तनूजां लावाणके हुतवहेन हृताङ्गयष्टिं हिमहतां पद्मनीम् इव चिन्तयामि॥१॥

**पदार्थः** – कालक्रमेण = समय के क्रम से, पुनः = फिर से, आगतदारभारः = स्त्रीपरिग्रहरूपभार से युक्त मैं, श्लाघ्यां = प्रंशसनीय, अवन्तिनृपतेः = अवन्तिनरेश प्रद्योत की, सदृशीं = सदृश (गुणवाली) तां = प्रसिद्धां, तनूजां = पुत्री (वासवदत्ता) को, लावाणके = लावाणक नामक गाँव में, हुतवहेन = आग से, हृताङ्गयष्टिं = जले हुए शरीर वाली, हिमहतां = तुषार से विनष्ट, पद्मिनीं = कमलिनी की, इव = तरह, चिन्तयामि = याद कर रहा हूँ॥ १ ॥

**हिन्दी अर्थ** – समय क्रम से (परिस्थितिवश) फिर (मुझ पर) स्त्रीपरिग्रहरूपी भार आ पड़ा है, किन्तु अवन्तिराज के समान (गुणवाली) प्रशंसा के योग्य पुत्री वासवदत्ता को (जो) लावाणक नामक गाँव में जली हुई उसको तुषार (बर्फ) से ताडित कमलिनी की भाँति (आज भी) याद करता हूँ (अर्थात् भूल नहीं पा रहा हूँ।)

**व्याख्या** – पर्यायपदानि – कालक्रमेण = समयगत्या, पुनः = भूयः, आगतदारभारः = समापतितः दाराणां पत्न्या भारः यस्य सोऽहमुदयनः, श्लाघ्यां = प्रशंसनीयाम्, अवन्तिनृपतेः = उज्जयिनीपतेः, प्रद्योतस्य, सदृशीं = अनुरूपां, तां = प्रसिद्धां, तनूजां = पुत्रीं, लावाणके = लावाणक नामके ग्रामे, हुतवहेन = अग्निना, हृताङ्गयष्टिं = दग्धतनुलतां, हिमहतां = तुषारविनष्टां, पद्मिनीं = कमलिनीम्, इव = यथा, चिन्तयामि = ध्यायामि, स्मरामि॥ १ ॥

**भावार्थः** – राजा उदयनः कथयति यत् कालक्रमेण पुनः मम विवाहो (राजकुमार्या पद्मावत्या सह) जातोऽस्ति, तथापि लावाणकनामकग्रामेऽनलदग्धा हिमविनष्टा कमलिनीव प्राणप्रिया वासवदत्ता मच्चिताद् दूरं न गच्छति, पुनः पुनः स्मृतिपथमायाति॥ १ ॥

**छन्दः** – वसन्ततिलकावृत्तमत्र वर्तते।

**अलङ्कारः** – उपमाविशेषोक्ती अलङ्कारौ स्तः श्लोकेऽस्मिन्। विशेषोक्तेः लक्षणमिदं – 'विशेषोक्तिरनुपत्तिः कार्यस्य सति कारणे।'

**व्याकरणम्** – कालक्रमेण – कालस्य क्रमः, तेन (ष०त०)। दाराणां भारः (ष०त०) पुनः आगतः पुनरागतः (सुप्सुपा०) पुनरागतः दारभारः यस्मिन् सः (बहु०)। श्लाघ्यम् – श्लाघ+ल्यप्+टाप्।

(प्रविश्य) (प्रवेश करके)

**विदूषकः** – तुवरदु तुवरदु दाव भवं। [त्वरतां त्वरतां तावद् भवान्।]

**विदूषक** – शीघ्रता कीजिये, महाराज! शीघ्रता।

**राजा** – किमर्थम्?

**राजा** – किसलिए?

**विदूषकः** – तत्र होदी पद्मावती सीसवेदणाए दुक्खाविदा। [तत्र भवती पद्मावती शीर्षवेदनया दुःखिता।]

**विदूषक** – माननीया पद्मावती जी सिरदर्द से पीड़ित हैं।

**राजा** – कैवमाह?

**राजा** – ऐसा किसने कहा?

**विदूषकः** – पदुमिणआए कहिदं। [पद्मिनिकया कथितम्।]

**विदूषक** – पद्मिनिका ने कहा।

**राजा** – भोः कष्टम्।

**राजा** – हा! बड़ी कष्टदायी बात है।

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये राज्ञः उदयनः शिरोवेदनापीडितां पद्मावतीं विज्ञाय तामपि वासवदत्तामिव सम्भावयन्नाह –

**रूपश्रिया समुदितां गुणतश्च युक्तां**
**लब्ध्वा प्रियां मम तु मन्द इवाद्य शोकः।**
**पूर्वाभिघातसरूजोऽप्यनुभूतदुःखः**
**पद्मावतीमपि तथैव समर्थयामि॥ २॥**

**अन्वयः** – रूपश्रिया समुदितां गुणतः च युक्तां प्रियां लब्ध्वा अद्य मम तु शोकः मन्दः इव। पूर्वाभिघातसरूजः अपि अनुभूतदुःखः पद्मावतीम् अपि तथैव समर्थयामि॥ २॥

**पदार्थः** – रूपश्रिया = सौन्दर्यसम्पत्ति से, समुदिता = संयुक्त, गुणतः = दयादाक्षिण्य आदि गुणों से, युक्तां = सम्पन्न, प्रियां = प्रिया पद्मावती को, लब्ध्वा = पाकर, अद्य = आज, पूर्वाभिघातसरूजः = पहले के आघात से पीडित, अपि = भी, मम = उदयन का, तु = तो, शोकः = दुःख, मन्द इव = कुछ कम सा हुआ था। तु = किन्तु, अनुभूतदुःखः = पहले से ही दुःख भोगा हुआ मैं, पद्मावतीम् अपि = पद्मावती के विषय में भी, तथैव = उसी प्रकार से, समर्थयामि = सम्भावना कर रहा हूँ॥ २॥

**हिन्दी अर्थ** – मैं पहले से ही वासवदत्ता की मृत्युरूपी चोट से दुःखी था, पर अब रूपवती व गुणवती प्यारी पद्मावती को पाकर मेरा दुःख कुछ कम हुआ था, किन्तु भुक्तभोगी होने के कारण पद्मावती के सिरदर्द की बात को सुनकर मैं सोचता हूँ कि पद्मावती की भी वही दशा (जो वासवदत्ता की हुई थी) न हो जाए॥ २॥

**व्याख्या** – पर्यायपदानि– रूपश्रिया = सौन्दर्यशोभया, समुदितां = दीपितां, गुणतः = गुणैः, युक्तां = सम्पन्नां च, प्रियां = कान्तां, पद्मावतीं, लब्ध्वा = प्राप्य, अद्य = अधुना, पूर्वाभिघातसरुजः = वासवदत्ता वियोगदुःखसम्पृक्तोऽपि, मम = उदयनस्य, शोकः = दुःखं, मन्द इव = न्यून इव अभूत्। तु = किन्तु, अनुभूतदुःखः = ज्ञातप्रियावियोगात् अहं, पद्मावतीं = दर्शकभगिनीम्, अपि तथैव = तेनैव प्रकारेण, वासवदत्तावदेव, समर्थयामि = सम्भावयामि॥ २॥

**भावार्थः** – सौन्दर्यशोभादिगुणभूषितया पद्मावत्या सह विवाहानन्तरं मम वासवदत्तावियोगजन्यं कष्टं किञ्चिन्न्यूनं जातमासीत्, किन्तु सम्प्रति पद्मावत्याः शिरोवेदनां श्रुत्वा पुनः चिन्तापन्नोऽभवं यत् क्वचिदियमपि वासवदत्तावदेव मां विहाय न गच्छेदिति भावः॥ २॥

**छन्दः** – वसन्ततिलकावृत्तं वर्ततेऽत्र।

**अलङ्कारः** – श्लोकेऽस्मिन् काव्यालिङ्गालङ्कारो वर्तते। तल्लक्षणमिदं – 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते।'

**व्याकरणम्** – अनुभूतं दुःखं येन सः अनुभूतदुःखः (बहु०)। पूर्वश्चासौ अभिघातः पूर्वाभिघातः (कर्म०)। रुजा सहितः सरुक्, पूर्वाभिघातेन सरुक् पूर्वाभिघातसरुक्, तस्य (तृ०त०)।

**राजा** – अथ कस्मिन् प्रदेशे वर्तते पद्मावती?

**राजा** – अच्छा, पद्मावती, किस स्थान पर है?

**विदूषकः** – समुद्दगहिके किल सेज्जा त्थिण्ण। [समुद्रगृहके किल शय्यास्तीर्णा]

**विदूषक** – समुद्रगृह में पद्मावती की सेज बिछाई गई है।

**राजा** – तेन हि तस्य मार्गमादेशय।

**राजा** – तो उसका रास्ता बताओ।

**विदूषकः** – एदु एदु भवं। [एत्वेतु भवान्।] (उभौ परिक्रामतः)

**विदूषक** – आइये आइये महाराज। (दोनों चलते हैं।)

**विदूषकः** – इदं समुद्दग्गिहकं। पविसदु भवं। [इदं समुद्रगृहकम्। प्रविशतु भवान्।]

**विदूषक** – यह समुद्रगृह है। आप प्रवेश करें।

**राजा** – पूर्वं प्रविश।

**राजा** – पहले तुम प्रवेश करो।

**विदूषकः** – भोः! तह। (प्रविश्य) अविहा! धिट्ठदु चिट्ठदु दाव भवं। [भो! तथा। अविहा! तिष्ठतु तिष्ठतु तावद् भवान्।]

**विदूषक** – जी! अच्छा (प्रवेश करके) ओहो! आप जरा ठहरिए-ठहरिए।

**राजा** – किमर्थम्?

**राजा** – किसलिए?

**विदूषकः** – एसो खु दीवप्पभावसूइदरूवो वसुधातले परिवत्तमाणो अअं काओअरो।
[एष खलु दीपप्रभाव सूचितरूपो वसुधातले परिवर्तमानोऽयं काकोदरः।]

**विदूषक** – यह दीये के उजाले में स्पष्ट दिखाई पड़ने वाला जमीन पर लोटता हुआ साँप हैं।

**राजा** – (प्रविश्यावलोक्य सस्मितम्) अहो! सर्पव्यक्तिर्वैधेयस्य।

**राजा** – (प्रवेश कर और देखकर मुस्कराते हुए) अहो! मूर्ख इसे साँप समझ रहा है।

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये उदयनः वस्तुस्थितिं ज्ञात्वा विदूषकस्य सन्देहं निवारयन्नाह –

**ऋज्वायतां हि मुखतोरणलोलमालां**
**भ्रष्टां क्षितौ त्वमवगच्छसि मूर्ख! सर्पम्।**
**मन्दानिलेन निशि या परिवर्तमाना**
**किञ्चित् करोति भुजगस्य विचेष्टितानि॥ ३॥**

**अन्वयः** – मूर्ख! त्वं तु ऋज्वायतां क्षितौ भ्रष्टां मुखतोरणलोलमालां हि सर्पम् अवगच्छसि। या निशि मन्दानिलेन किञ्चित् परिवर्तमाना भुजगस्य विचेष्टितानि करोति॥ ३॥

**पदार्थः** – मूर्ख! हे मूढ़, त्वं तु = तू तो, ऋज्वायतां = सीधी और लम्बी, क्षितौ = जमीन पर, भ्रष्टां = गिरी हुई, मुखतोरणलोलमालां = मुख्यद्वारपर लटकी हुई माला को, हि = निस्सन्देह, सर्पं = साँप, अवगच्छसि = समझ रहा है। या = जो, निशि = रात में, मन्दानिलेन = मन्द हवा द्वारा, किञ्चिद् = कुछ, परिवर्तमाना = भूमि पर लोटती हुई, भुजगस्य = साँप की, विचेष्टितानि = चेष्टाओं को, करोति = करती हैं॥ ३॥

**हिन्दी अर्थ** – अरे मूर्ख! जिसे तु साँप समझ रहा है वह वस्तुतः मुख्यद्वारा पर लटकती हुई, सीधी लम्बी तोरणमाला है, जो टूट कर धरती पर पड़ी हुई है। यह तो रात में धीरे-धीरे हवा से हिलती-डुलती हुई कुछ-कुछ साँप की चाल का अनुकरण कर रही है॥ ३॥

**व्याख्या** – पर्यायपदानि – मूर्ख = हे मूढ! त्वं तु = भवान् किल, ऋज्वायतां = सरलदीर्घां, क्षितौ = पृथिव्यां, भ्रष्टां = पतितां, मुखतोरणलोलमालां = मुख्यद्वारचपलपुष्पमालां, हि = निश्चयेन, सर्पम् = अहिम्, अवगच्छसि = जानासि, या = तोरणमाला, निशि = रात्रौ, मन्दानिलेन = मन्दवायुना, किञ्चित् = ईषत्, परिवर्तमाना = भूमौ लुठन्ती, भुजगस्य = सर्पस्य, विचेष्टितानि = विलुण्ठनकर्माणि, (इतस्ततः स्पन्दमाना) करोति = विदधाति। अतः न भेतव्यम् इति।

**भावार्थः** – रे मूर्ख! वस्तुतः रात्रौ पतितेयं मुख्यद्वारस्य तोरणमालाऽस्ति या वायुना कम्पमाना सती सर्पस्य भ्रान्तिं जनयति। अतो मालामेव सर्पं मत्वा मा विभेहि॥ ३॥

**छन्दः** – वसन्ततिलका छन्दो वर्तते।

**अलङ्कारः** – अस्मिन् श्लोके भ्रान्तापह्नुत्यलङ्कारोऽस्ति। तल्लक्षणमिदं –

'भ्रान्तापह्नुतिरन्यस्य शङ्कायां भ्रान्तिवारणे।' (कुवलयानन्दे)

**कोशः** – सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः इत्यमरः।

माला तु पंक्तौ पुष्पादि दामनि' इति हैमः।

**विदूषकः** – (निरुप्य) सुट्ठु भवं भणादि। ण हु अअं काओअरो। (प्रविश्यावलोक्य) त्तहोदी पदुमावदी इह आअच्छिअ णिग्गदा भवे। [सुष्ठु भवान् भणति। न खल्वयं काकोदरः। तत्र भवती पद्मावतीहागत्य निर्गता भवेत्।]

**विदूषक** – (अच्छी तरह देखकर) आप ठीक कह रहे हैं। यह साँप नहीं है। (भीतर जाकर और देखकर) माननीया पद्मावती यहाँ आकर चली गई होंगी।

**राजा** – वयस्य! अनागतया भवितव्यम्।

**राजा** – मित्र! आई नहीं होंगी।

**विदूषकः** – कथं भवं जाणादि? [कथं भवान् जानाति?]

**विदूषक** – आप कैसे जानते हैं?

**राजा** – किमत्र ज्ञेयम्? पश्य –

**राजा** – इसमें क्या जानना है? देखो–

**प्रसङ्गः** – प्रकृते पद्येऽस्मिन् उदयनः पद्मावत्याः समुद्रगृहकेऽनागमनमिति सम्भाव्य तदौचित्यं समर्थयन्नाह–

**शय्या नावनता तथास्तृतसमा न व्याकुलप्रच्छदा**
**न क्लिष्टं हि शिरोपधानममलं शीर्षाभिघातौषधैः।**
**रोगे दृष्टिविलोभनं जनयितुं शोभा न काचित् कृता**
**प्राणी प्राप्य रुजा पुनर्न शयनं शीघ्रं स्वयं मुञ्चति॥ ४॥**

**अन्वयः** – हि शय्या तथा आस्तृतसमा अवनता न, व्याकुलप्रच्छदा न, अमलं शिरोपधानं शीर्षाभिघातौषधैः न क्लिष्टं, रोगे दृष्टिविलोभनं जनयितुं काचित् शोभा न कृता, पुनः प्राणी रुजा शयनं प्राप्य शीघ्रं स्वयं न मुञ्चति॥४॥

**पदार्थः** – हि = क्योंकि, शय्या = सेज (बिछौना) तथा आस्तृतसमा = ज्यों की त्यों बिछी हुई हैं, अवनता न = दबी हुई नहीं है, व्याकुलप्रच्छदा न = चादर सिकुड़ी हुई नहीं है, अमलं शिरोपधानं = तकिया स्वच्छ है, शीर्षाभिघातौषधैः = सिरदर्द की दवाओं से, क्लिष्टं न = मलिन नहीं है, रोगे = रोग में, दृष्टिविलोभनं जनयितुं = आँखों को लुभाने वाली, काचित् = कोई, शोभा = सजावट, न कृता = नहीं की गई है, पुनः = फिर, प्राणी = रोगीजन, रुजा = रोग से, शयनं प्राप्य = बिछौने को पाकर, शीघ्रं = जल्दी, स्वयं = खुद, शयनं न मुञ्चति = बिछौने को नहीं छोड़ता है।

**हिन्दी अर्थ** – बिछौना ज्यों का त्यों बिछा है कहीं से दबा नहीं है। चादर में भी कहीं सिकुड़न नहीं है। सिरदर्द की दवा के लगने से तकिया भी मैला नहीं हुआ है। रोग के समय रोगी की आँखों को लुभाने वाली कोई सजावट नहीं की गई है। फिर रोगी रोगग्रस्त होकर जब बिस्तर पर जाता है तो वह जल्दी से उसे अपनी इच्छा से नहीं छोड़ता है। इससे यह सिद्ध होता है कि पद्मावती यहाँ नहीं आई है।

**व्याख्या – पर्यायपदानि** – हि = निश्चयेन, शय्या = शयनीयं, तथा = पूर्ववत्, आस्तृतसमा = आस्तीर्णबन्धुरा, अवनता न = नतोन्नता न जाता, व्याकुलप्रच्छदा = गात्रपरिवर्तनेन संकुचितावरणपटा, न = नास्ति, अमलं = निर्मलं, शिरोपधानम् = उपबर्हणं, शीर्षाभिघातौषधैः = शिरः पीडा निग्रहौषधविशेषैः, क्लिष्टा न = दूषितं नास्ति, रोगे = व्याधौ सति, दृष्टिविलोभनं = नयनाकर्षणं, जनयितुम् = उत्पादयितुं, काचित् = कापि, शोभा = सौन्दर्यं, न कृता = न

विहिता, पुनः = भूयः, प्राणी = शरीरधारी, रुजा = रोगेण, शयनं = शय्यां, प्राप्य = आसाद्य, शीघ्रं = क्षिप्रं, स्वयं = स्वतः, न मुञ्चति = न त्यजति॥ ४॥

**भावार्थः** – सुव्यवस्थितां शय्याम् असङ्कुचितमाच्छादनवस्त्रां निर्मलम् उपधानं चावलोक्य उदयनेनानुमीयते यदत्र पद्मावती नागता। यदि आगता स्यात्तर्हि सा रोगाक्रान्ता झटित्येव स्वयं शय्यां विहाय न गता स्यात्। इत्युक्ते साऽत्र नागतेति भावः॥ ४॥

**छन्दः** – शार्दूलविक्रीडितं वृत्तं वर्ततेऽत्र।

**अलङ्कारः** – श्लोकेऽस्मिन् अनुमानालङ्कारो विद्यते। तल्लक्षणमिदमुक्तं – विश्वनाथेन – 'अनुमानं तु विच्छित्त्या ज्ञानं साध्यस्य साधनात्।'

**कोशः** – निचोलः प्रच्छदपटः इत्यमरः।

**व्याकरणम्** – शिरसः उपधानम् – शिरोपधानम् (ष०त०)। जनयितुम् – जन्+णिच्+तुमुन्।

**विदूषकः** – तेण हि इमस्सि सय्याए मुहुत्तअं उवविसिअ तत्तहोदिं पडिवालेदु भवं। [तेन ह्यस्यां शय्यायां मुहूर्त्तकमुपविश्य तत्र भवतीं प्रतिपालयतु भवान्।]

**विदूषक** – तो आप कुछ देर इस शय्या पर बैठकर श्रीमतीजी की प्रतीक्षा करें।

**राजा** – बाढम्। (उपविश्य) वयस्य! निद्रा मां बाधते। कथ्यतां काचित् कथा।

**राजा** – अच्छा। (बैठकर) मित्र! मुझे नींद सता रही है। कोई कथा कहिये।

**विदूषकः** – अहं कहइस्सं। होति करेदु अन्तभवं। [अहं कथयिष्यामि। होम् इति करोत्वत्रभवान्।]

**विदूषक** – मैं कथा कहूँगा। आप हुँकारा देते जाइये।

**राजा** – बाढम्।

**राजा** – अच्छा।

**विदूषकः** – अत्थि णअरी उज्जइणी णाम। तहि अहि अरमणोआणि उदअह्वाणाणि वत्तन्ति किल। [अस्ति नगर्युज्जयिनी नाम। तत्राधिकरमणीयान्युदकस्नानि वर्तन्ते किल।]

**विदूषक** – उज्जयिनी नाम की एक नगरी है। वहाँ अत्यन्त रमणीय जलाशय है।

**राजा** – कथमुज्जयिनी नाम?

**राजा** – क्या उज्जयिनी नाम की?

**विदूषकः** – जइ अणभिप्पेदा एसा कहा, अण्णं कहइस्सं। [यद्यनभिप्रेतैषा कथा, अन्यां कथयिष्यामि।]

**विदूषक** – यदि यह कथा अच्छी नहीं लगी तो दूसरी कहूँ।

**राजा** – वयस्य! न खलु नाभिप्रेतैषा कथा। किन्तु –

**राजा** – मित्र! यह कथा पसन्द नहीं है ऐसी बात नहीं है, किन्तु–

**प्रसङ्गः** – उज्जयिनीतः कौशाम्बीं प्रति प्रस्थानकाले स्वाभिजनं स्मृत्वा वाष्पं पातयन्त्याः वासवदत्तायाः स्मरणं कुर्वन्नाह राजा –

**स्मराम्यवन्त्याधिपतेः सुतायाः**
**प्रस्थानकाले स्वजनं स्मरन्त्याः।**
**वाष्पं प्रवृत्तं नयनान्तलग्नं**
**स्नेहान्ममैवोरसि पातयन्त्याः॥५॥**

**अन्वयः** – प्रस्थानकाले स्वजनं स्नेहात् स्मरन्त्याः प्रवृत्तं नयनान्तलग्नं वाष्पं मम एव उरसि पातयन्त्याः अवन्त्याधिपतेः सुतायाः स्मरामि॥ ५॥

**पदार्थः** – प्रस्थानकाले = उज्जयिनी से कौशाम्बी जाते समय, स्वजनं = आत्मीयजनों को, स्नेहात् = स्नेह से, स्मरन्त्याः = स्मरण करने से, प्रवृत्तं = निकले हुए, नयनान्तलग्नं = आँखों के कोने में संलग्न, वाष्पम् = आँसू को, मम एव = मेरे ही, उरसि = वक्षस्थल पर, पातयन्त्याः = गिराती हुई, अवन्त्याधिपतेः = अवन्तिराज की, सुतायाः = कन्या (वासवदत्ता) की, स्मरामि = याद कर रहा हूँ॥ ५ ॥

**हिन्दी अर्थ** – (उज्जयिनी से) प्रस्थान के समय अपने परिवार वालों का स्मरण करती हुई और स्नेह के कारण से निकले हुए तथा आँखों की कोर से लगे हुए आँसुओं को मेरी छाती पर गिराती हुई अवन्तिराजकुमारी (वासवदत्ता) की मुझे याद आ रही है॥ ५ ॥

**व्याख्या** – पर्यायपदानि – (उज्जयिनीतः) प्रस्थानकाले = प्रयाणसमये, स्वजनं = बन्धुजनं, स्नेहात् = प्रेम्णा, स्मरन्त्याः = चिन्तयन्त्याः, प्रवृत्तम् = उद्गतं, नयनान्तलग्नम् = अपाङ्गसंसक्तं, वाष्पम् = अश्रुजलं, मम = मदीय एव, उरसि = वक्षःस्थले, पातयन्त्याः = मुञ्चन्त्याः, अवन्त्याधिपतेः = अवन्तिराजस्य, सुतायाः = पुत्र्याः, स्मरामि = चिन्तयामि॥ ५ ॥

**भावार्थः** – वयस्य! उज्जयिनीतः कौशाम्बीं प्रति गमनावसरे स्वबन्धुजनं स्मरन्त्या वासवदत्ताया नयनान्तलग्नमश्रुजलं मदीयोरसि निपातितमासीत्। सम्प्रति तस्या एव स्मरणं कुर्वन्नस्मि॥ ५ ॥

**छन्दः** – श्लोकेऽस्मिन् उपजातिवृत्तमस्ति। तल्लक्षणं यथा –

'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।'। अथवा–

इन्द्रवज्रोपेन्द्रवज्रयोः मिश्रणादुपजातिवृत्तं भवति।

**व्याकरणम्** – स्मरन्त्याः – स्मृ+शतृ+ङीप्। नयनयोः अन्तौ – नयनान्तौ, तयोः लग्नं नयनान्तलग्नं (त०पु०)। प्रस्थानस्य कालः प्रस्थानकालः, तस्मिन् प्रस्थानकाले (ष०त०)।

अपि च – और भी –

**प्रसङ्ग** – अत्रोदयनो वासवदत्तायाः स्वस्मिन् मन्त्रमुग्धतां वर्णयन्नाह –

**बहुशोऽप्युपदेशेषु यया मामीक्षमाणया।**
**हस्तेन स्रस्तकोणेन कृतमाकाशवादितम्॥६॥**

**अन्वयः** – उपदेशेषु माम् ईक्षमाणया यया स्रस्तकोणेन हस्तेन बहुशः अपि आकाशवादितं कृतम्॥ ६ ॥

**पदार्थः** – उपदेशेषु = वीणावादन के उपदेश के समय, मां = मुझे, ईक्षमाणया = देखती हुई, यया = जिस वासवदत्ता ने, स्रस्तकोणेन = वीणा बजाने के साधन कोण (मिजराव) के गिर जाने पर, हस्तेन = खाली हाथ से, बहुशः = बार-बार, आकाशवादितं कृतम् = बिना लय ताल के ही वीणा बजाई॥ ६ ॥

**हिन्दी अर्थ** – वीणावादन सीखते समय वह एकटक मेरा मुँह देखा करती थी। यहाँ तक कि उसके हाथ से मिजराव (वीणा बजाने की नक्खी, जो अंगुली में पहनी जाती है) के गिर जाने पर भी उसे उसका ज्ञान नहीं होता था और अनेक बार वह हवा में ही खाली हाथ फेरती रहती थी॥ ६ ॥

**व्याख्या** – पर्यायपदानि – उपदेशेषु = वीणावादनोपदेशवचनेषु, माम् = उदयनम्, ईक्षमाणया = पश्यन्त्या, यया = वासवदत्तया, स्रस्तकोणेन = पतितवीणावादनसाधनेन, हस्तेन = करेण, बहुशः = अनेकवारमपि, आकाशवादितं = शून्यवादनं, कृतं = विहितम्॥ ६ ॥

**भावार्थः** – उदयनो वासवदत्तां वीणावादन-शिक्षणसमयस्य दृश्यं स्मरन्नाह – यत् माम् उदयनमेव पश्यन्त्या वासवदत्तया पतितवीणावादनसाधनेन करेणेव अनेकवारमपि शून्यवादनम् विहितम्।

**छन्दः** – अस्मिन् श्लोकेऽनुष्टुब्वृत्तं वर्तते।

**व्याकरणम्** – ईक्षमाणया – ईक्ष्+शानच्+टाप्। स्रस्तः कोणो यस्मात् तेन स्रस्तकोणेन (ब०व्री०)। आकाशे वादितम् – आकाशवादितम् (स०त०)।

**विदूषकः** – भोदु, अण्णं कहइस्सं। अत्थि णअरं ब्रह्मदत्तं णाम। तहि किल राआ कंपिल्लो णाम। [भवतु, अन्यां कथयिष्यामि। अस्ति नगरं ब्रह्मदत्तं नाम। तत्र किल राजा काम्पिल्यो नाम।]

**विदूषक** – अच्छा, दूसरी (कथा) कहता हूँ। ब्रह्मदत्त नामक एक नगर है। वहाँ काम्पिल्य नाम का राजा है।

**राजा** – किमिति, किमिति?

**राजा**– क्या – क्या?

**विदूषकः** – (पुनस्तदेव पठति।)

**विदूषक** – (फिर उसी को दुहराता है।)

**राजा** – मूर्ख! राजा ब्रह्मदत्त, नगरं काम्पिल्यमित्यभिधीयताम्।

**राजा** – अरे मूर्ख! राजा ब्रह्मदत्त और नगर काम्पिल्य ऐसा कहो।

**विदूषकः** – किं राआ ब्रह्मदत्तो, णअरं कंपिल्लं? [किं राजा ब्रह्मदत्तः, नगरं काम्पिल्यम्?]

**विदूषक** – क्या राजा ब्रह्मदत्त और नगर काम्पिल्य?

**राजा** – एवमेतत्।

**राजा** – हाँ ऐसा ही।

**विदूषकः** – तेण हि मुहुत्तअं पाडिवालेदु भवं, जाव ओट्टगअं करिस्सं। राआ ब्रह्मदत्तो, णअरं कंपिल्लं। (इति बहुशस्तदेव पठित्वा) इदाणिं सुणादु भवं। अयि! सुत्तो अन्तभवं? अतिसीदला इअंवेला। अत्तणो पावारअ गणिह्णअ आअमिस्सं। (निष्क्रान्तः।) [तेन हि मुहूर्तकं प्रतिपालयतु भवान्, यावदोष्ठगतं करिष्यामि। राजा ब्रह्मदत्तः, नगरं काम्पिल्यम्। इदानीं शृणोतु भवान्। अयि! सुप्तोऽत्रभवान्? अतिशीतलेयं वेला। आत्मनः प्रावारकं गृहीत्वा आगमिष्यामि।]

**विदूषक** – तो आप जरा ठहर जाइये, जब तक मैं इसे कण्ठस्थ कर लूँ। राजा ब्रह्मदत्त, नगर काम्पिल्य। (इस प्रकार उसी को कई बार कहकर) अब आप सुनिये। अरे! आप तो सो गये? इस समय बहुत ठंड पड़ रही है। मैं अपनी चादर लेकर आता हूँ। (चल देता है।)

(ततः प्रविशति वासवदत्ता आवन्तिकावेषेण चेटी च।)

(तदनन्तर आवन्तिकावेषधारण की हुई वासवदत्ता और दासी प्रवेश करती है।)

**चेटी** – एदु एदु अय्या। दिढं खु भट्टिदारिआ सीसवेदगाए दुक्खाविदा। [एत्वेत्वार्या। दृढं खलु भर्तृदारिका शीर्षवेदनया दुःखिता।]

**चेटी** – आइये, आइये आर्या। राजकुमारी जी सिरदर्द से बहुत व्याकुल है।

**वासवदत्ता** – ह द्धि! कहिं! सअणीअं रइदं पदुमावदीए? [हा धिक्! कुत्र शयनीयं रचितं पद्मावत्याः?]

**वासवदत्ता** – हा! कष्ट! पद्मावती की शय्या कहाँ लगी है?

**चेटी** – समुद्यगिहके किल सेज्जा त्थिण्णा। [समुद्रगृहके किल शय्यास्तीर्णा।]

**चेटी** – समुद्रगृह में सेज बिछी है।

**वासवदत्ता** – तेण हि अग्गदो याहि। [तेन ह्यग्रतो याहि] (उभे परिक्रामतः)

**वासवदत्ता** – तो तुम आगे-आगे चलो। (दोनों घूमती हैं।)

**चेटी** – इदं समुद्यगिहकं। पविसदु अय्या। जाव अहं सीसाणुलेवणं तुवारेमि। (निष्क्रान्ता) [इदं समुद्रगृहकम्। प्रविशत्वार्या यावदहमपि शीर्षानुलेपनं त्वरयामि।]

**चेटी** – यह समुद्रगृह है। आर्या अन्दर चलें। तब तक मैं भी सिरदर्द के लेप के लिए जल्दी करती हूँ।

**वासवदत्ता** – अहो! अकरुणा खु इस्सरा मे। बिरहपय्युस्सुअस्स अय्यउत्तस्स विस्समत्थाणभूदा इअं वि णाम पदुमावदी अस्सत्थाजादा। जाव पविसामि। (प्रविश्यावलोक्य) अहो! परिजणस्सपमादो। अस्सत्थ पदुमावदीं ओसुत्ता। जाव उव विसामि। अहव अञ्ञासणपरिग्गहेण अप्पो विअ सिणेहो पडिभादि।

ता इमस्सि सय्याए उववितामि। (उपविश्य) किं णुहु एदाए सह उवविसन्तीए अज्ज पह्लादिदं विअ मे हिअअं। दिट्ठिआ अविच्छिण्ण सुहाणिस्सासा। णिवुवुत्तरोआए होदव्वं। अह व एअदेससं विभाअदाए सअणीअस्स सूएदि मं आलिङ्गेहित्ति। जाव सइस्सं (शयनं नाटयति।)

[अहो! अकरुणाः खल्वीश्वरा मे। विरहपर्युत्सुकस्यार्यपुत्रस्य विश्रामभूतेयमपि नाम पद्मावत्यस्वस्था जाता। यावत् प्रविशामि। अहो! परिजनस्य प्रमादः। अस्वस्थां पद्मावतीं केवलं दीपसहायां कृत्वा परित्यजति। इयं पद्मावत्यवसुप्ता। यावदुपविशामि। अथवाऽन्यासनपरिग्रहेणाल्प इव स्नेहः प्रतिभाति तदस्यां शय्यायामुपविशामि। किन्नु खल्वेतया सहोपविशन्त्या अद्य प्रह्लादितमिव मे हृदयम्। दिष्ट्याविच्छिन्नसुखनिःश्वासा। निवृत्तरोगया भवितव्यम्। अथवैकदेश संविभागतया शयनीयस्य सूचयति मामालिङ्गेति। यावच्छयिष्ये।]

**वासवदत्ता** – हाय! सचमुच विधाता मेरे प्रति निष्ठुर हैं। वियोग से व्याकुल आर्यपुत्र के मनोविनोद का एकमात्र साधन पद्मावती भी अस्वस्थ हो गई। अच्छा, भीतर जाती हूँ। (भीतर जाकर और देखकर) ओह! दासियों की असावधानता! अस्वस्थ पद्मावती को केवल दीपक के सहारे पर ही छोड़ गई है। यह पद्मावती सो रही है। तब तक बैठ जाती हूँ। अथवा दूसरे आसन पर बैठने से स्नेह में कमी मालूम होती है। इसलिए इसी शय्या पर बैठ जाती हूँ। (बैठकर) अहा! आज इसके साथ बैठने से मेरा चित्त पुलकित-सा क्यों हो रहा है? सौभाग्य से इनकी साँस बिना रुकावट के आराम से चल रही है। अतः इसे नीरोग होना चाहिए। अथवा शय्या के एक भाग में सोने से (मानो) यह कह रही है कि मेरा आलिङ्गन करो। तो सोती हूँ। (सोने का अभिनय करती है।)

**राजा** – (स्वप्नायते) हा वासवदत्ते!

**राजा** – (स्वप्न में) हाय वासवदत्ता!

**वासवदत्ता** – (सहसोत्थाय) हं! अय्यउतो, णहु पदुमावदी? किं णु खु दिट्ठह्मि? महन्तो खु अय्यजोअन्धराअणस्स पडिण्णाहारो मम दंसणेण णिफ्फलो संवुत्तो। [हम्! आर्यपुत्रः, न खलु पद्मावती? किन्न खलु दृष्टास्मि? महान् खल्वार्ययौगन्धरायणस्य प्रतिज्ञाभारो मम दर्शनेन निष्फलः संवृत्तः।]

**वासवदत्ता** – (झट से उठकर) ऐ! आर्यपुत्र हैं, पद्मावती नहीं? क्या मैं देख ली गई हूँ? निःसन्देह आर्ययौगन्धरायण की प्रतिज्ञा का महान् उत्तरदायित्व मेरे देखे जाने से व्यर्थ हो गया।

**राजा** – हा अवन्तिराजपुत्रि!

**राजा** – हाय अवन्तिराजकुमारी!

**वासवदत्ता** – दिट्ठिआ सिविणाअदि खु अय्यउतो। ण एत्थ कोच्चि जणो। जाव मुहुत्तअं चिट्ठिअं दिट्ठिं हिअअं च तासेमि। [दिष्ट्या स्वप्नायते खल्वार्यपुत्रः। नात्र कश्चिज्जनः। यावन्मुहूर्तकं स्थित्वा दृष्टिं हृदयं च तोषयामि।]

**वासवदत्ता** – सौभाग्य से आर्यपुत्र सपना देख रहे हैं। यहाँ कोई नहीं है। इसलिए क्षणभर ठहर कर आँखों और मन को सन्तुष्ट कर लूँ।

**राजा** – हा प्रिये! हा प्रियशिष्ये! देहि मे प्रतिवचनम्।

**राजा** – हाय प्रिये! हाय प्रियशिष्ये! मुझे जवाब दो।

**वासवदत्ता** – आलवामि भट्टा! आलवामि।[आलपामि भर्तः! आलपामि।]

**वासवदत्ता** – उत्तर दे रही हूँ स्वामी! उत्तर दे रही हूँ।

**राजा** – किं कुपिताऽसि?

**राजा** – क्या नाराज हो गई हो?

**वासवदत्ता** – णहि णहि दुक्खिदह्मि। [नहि नहि, दुःखिताऽस्मि।]

**वासवदत्ता** – नहीं नहीं, दु:खित हूँ।

**राजा** – यद्यकुपिता किमर्थं नालङ्कृतासि?

**राजा** – यदि नाराज नहीं हो तो श्रृंगार क्यों नहीं किया?

**वासवदत्ता**– इदो वरं किं? [इत: परं किम्?]

**वासवदत्ता** – इससे बढ़कर क्या। (अर्थात् मैं दु:खी हूँ, इससे बढ़कर और क्या कारण होगा।)

**राजा** – किं विरचिकां स्मरसि?

**राजा** – क्या विरचिका को याद कर रही हो?

**वासवदत्ता** – (सरोषम्) आ अवेहि, इहावि विरचिआ? [आ अपेहि, इहापि विरचिका?]

**वासवदत्ता** – (क्रोधपूर्वक) आह! हटो, यहाँ भी विरचिका?

**राजा** – तेन हि विरचिकार्थं भवतीं प्रसादयामि। (हस्तौ प्रसारयति।)

**राजा** – तो विरचिका के लिए तुम्हें मनाता हूँ। (दोनों हाथ फैलाता है।)

**वासवदत्ता** – चिरं ठिदाह्मि। को वि मं पेक्खे। ता गमिस्सं। अहव सय्यावलम्बिअं अय्यउत्तस्स हत्थं सअणीए आरोविअ गमिस्सं। [चिरं स्थितास्मि। कोऽपि मां पश्येत्। तद् गमिष्यामि। अथवा शय्याप्रलम्बितमार्यपुत्रस्य हस्तं शयनीय आरोप्य गमिष्यामि।]

(तथा कृत्वा निष्क्रान्ता)

**वासवदत्ता** – बहुत देर हो गई। कोई मुझे देख लेगा। इसलिए जाती हूँ। अथवा शय्या से लटकते हुये आर्यपुत्र के हाथ को शय्या पर रखकर जाऊँ।

(वैसा करके निकल जाती है।)

**राजा** – (सहसोत्थाय) वासवदत्ते! तिष्ठ, तिष्ठ। हा धिक्!

**राजा** – (सहसा उठकर) वासवदत्ता! रुको-रुको। हाय! धिक्कार है-

**प्रसङ्गः** – शयनकक्षे स्वप्नदृष्टां वासवदत्तां ग्रहीतुं वेगेन धावन् राजा कपाटेन ताडित: सन् तत्रैवोपविश्य स्वयमेव कथयन्नाह –

**निष्क्रामन् सम्भ्रमेणाहं द्वारपक्षेण ताडित:।**
**ततो व्यक्तं न जानामि भूतार्थोऽयं मनोरथ:॥ ७॥**

**अन्वय:** – सम्भ्रमेण निष्क्रामन् अहं द्वारपक्षेण ताडित:। तत: अयं मनोरथ: भूतार्थ: वा इति व्यक्तं न जानामि॥ ७॥

**पदार्थ:** – सम्भ्रमेण = जल्दबाजी में, निष्क्रामन् = निकलता हुआ, अहं = मैं, द्वारपक्षेण = दरवाजे के किवाड़ से, ताडित: = टकरा गया, तत: = इस कारण से, अयं = यह, मनोरथ: = मानसिक कल्पना, वा = अथवा, भूतार्थ: = वास्तविक, इति = इसे, व्यक्तं = स्पष्ट रूप से, न = नहीं, जानामि = जानता हूँ॥

**हिन्दी अर्थ** – जल्दबाजी में (दौड़कर) निकलता हुआ मैं दरवाजे के किवाड़ से टकरा गया। इससे मैं स्पष्टरूप से नहीं जानता कि यह घटना वास्तविक थी या मेरे मन का भाव ही था। अर्थात् वासवदत्ता का संस्पर्श वस्तुत: था या काल्पनिक॥ ७॥

**व्याख्या** – पर्यायपदानि – सम्भ्रमेण = वेगेन, निष्क्रामन् = निर्गच्छन्, अहम् = उदयनो, द्वारपक्षेण = द्वारस्य पार्श्वभागेन, ताडित: = आहतोऽभवम्। तत: = तस्मात् कारणात्, अयं = वासवदत्ता, संस्पर्श:, मनोरथ: = मनोभाव:, भूतार्थ: = यथार्थ:, वा = अथवा इति, व्यक्तं = स्पष्टं, न = नहि, जानामि = अवधारयामि॥ ७॥

**भावार्थ:** – उदयन: कथयति यत् वासवदत्ताया: संस्पर्शमनुभूयाहं तां धर्तुं सम्भ्रमेण बहिरागच्छन् द्वारस्य पार्श्वभागेनाहतोऽहम्। तस्माद् हि स्पष्टं वक्तुं न प्रभवामि यदयं संस्पर्श: वास्तविक: आसीत् काल्पनिको वा॥ ७॥

**छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दो वर्त्तते।

**व्याकरणम्** – द्वारस्य पक्षः द्वारपक्षः तेन द्वारपक्षेण (ष०त०)। भूतश्चासौ अर्थः – भूतार्थः (कर्म०) निष्क्रामन् – निस्+क्रम्+शतृ।

**कोशः** – इच्छाकांक्षास्पृहेहातृड्वाञ्छा लिप्सा मनोरथः इत्यमरः।

(प्रविश्य) (प्रवेश करके)

**विदूषकः** – अई! पडिबुद्धो अत्रभवं। [अयि! प्रतिबुद्धोऽत्र भवान्।]

**विदूषक** – अरे! महाराज तो जग गये।

**राजा** – वयस्य! प्रियमावेदये, धरता खलु वासवदत्ता।

**राजा** – मित्र! मैं तुम्हें खुशखबरी सुनाता हूँ। वासवदत्ता निःसन्देह जीवित है।

**विदूषकः** – अविहा! वासवदत्ता! कहिं वासवदत्ता? चिरा खु अवरदा वासवदत्ता। [अविहा! वासवदत्ता! कुत्र वासवदत्ता? चिरात् खलूपरता वासवदत्ता।]

**विदूषक** – हाय! वासवदत्ता! कहाँ है वासवदत्ता? वह तो बहुत पहले मर चुकी है।

**राजा** – वयस्य! मा मैवम्।

**राजा** – मित्र! ऐसा मत कहो।

**प्रसङ्गः** – अत्र हि राजा वासवदत्तादर्शनविषयकं वृत्तं श्रावयन्नाह –

**शय्यायामवसुप्तं मां बोधयित्वा सखे! गता।**
**दग्धेति ब्रुवता पूर्वं वञ्चितोऽस्मि रुमण्वता॥ ८॥**

**अन्वयः**– सखे! शय्यायाम् अवसुप्तं मां बोधयित्वा गता। दग्धा इति ब्रुवता रुमण्वता पूर्वं वञ्चितः अस्मि॥ ८॥

**पदार्थः** – सखे = हे मित्र! (वासवदत्ता) शय्यायां = शय्या पर, अवसुप्तं = सोये हुये, मां = मुझको, बोधयित्वा = जगाकर, गता = चली गई। दग्धा = जल गई है, इति = ऐसा, ब्रुवता = कहते हुये, रुमण्वता = रुमण्वान् (मन्त्री) के द्वारा, पूर्वं = पहले, वञ्चितः = ठगा गया, अस्मि = हूँ॥ ८॥

**हिन्दी अर्थ** – मित्र! पलंग पर सोये हुये मुझे जगाकर वह अभी-अभी गई है। 'वासवदत्ता जलकर मर गई' यह कहकर रुमण्वान् ने मुझे पहले भी ठगा था।

**व्याख्या** – **पर्यायपदानि** – सखे = मित्र!, शय्यायां = शयनीये, अवसुप्तं = गाढं निद्रितं (शयानं), माम् = उदयनं, बोधयित्वा = प्रबोध्य, जागरयित्वा, सा वासवदत्ता, गता = निर्गता, याता। दग्धा = भस्मीभूता, इति = एवं, ब्रुवता = कथयता, रुमण्वता = एतन्नामकेन मन्त्रिणा, पूर्वं = प्रथमं, पुरा, अहं, वञ्चितोऽस्मि = प्रतारितोऽस्मि॥८॥

**भावार्थः** – उदयनः कथयति – मित्र! वासवदत्ता जीविताऽस्ति, अद्यैव सा शयनीये शयानं मां जागरयित्वा निर्गता। पूर्वं लावाणके दग्धा जातेति कथयता रुमण्वतामन्त्रिणा वञ्चितोऽहम्।

**छन्दः** – अस्मिन् श्लोके अनुष्टुब्वृत्तमस्ति।

**व्याकरणम्** – बोधयित्वा – बुध्+णिच्+क्त्वा। वाञ्चितः – वञ्च्+क्त। ब्रुवता – ब्रू+शतृ+टा।

**विदूषकः** – अविहा! असम्भावणीअं एदं ण। आ उदअह्णाण सङ्कित्तणेण तत्तोहोदीं चिन्तअन्तेण सा सिविणे दिट्ठा भवे। [अविहा! असम्भावनीयमेतन्न। आ उदकस्नानसङ्कीर्तनेन तत्रभवतीं चिन्तयता सा स्वप्ने दृष्टा भवेत्।]

**विदूषक** – हाय! यह असम्भव नहीं है। हाँ, उदकस्नान की चर्चा होने के कारण आपने महारानी का स्मरण करते हुए स्वप्न में देखा होगा।

**राजा** – एवं मया स्वप्नो दृष्टः?

**राजा** – ऐसा, तो मैंने स्वप्न देखा है?

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये महाराजोदयनो विदूषकं कथयति – यदि स्वप्नेऽपि मम वासवदत्तया सह मेलनं भवेत् तर्हि अपि धन्यो भवेयम् –

**यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम्।**
**अथायं विभ्रमो वा स्याद् विभ्रमो ह्यस्तु मे चिरम्॥ ९॥**

**अन्वयः** – यदि तावत् अयं स्वप्नः, अप्रतिबोधनं धन्यम्। अथ अयं विभ्रमः वा स्यात्, मे विभ्रमः हि चिरम् अस्तु॥ ९॥

**पदार्थः** – यदि = अगर, तावत् अयं = तो यह, स्वप्नः = सपना था, अप्रतिबोधनं = नहीं जागना, धन्यम् = अच्छा था। अथ = अथवा, अयं = यह विभ्रमः = मतिभ्रमः, वा = अथवा, स्यात् = हो तो, मे = मुझ उदयन को, विभ्रमः = मतिभ्रम, हि = निश्चित ही, चिरं = लम्बे समय तक, अस्तु = बना रहे॥ ९॥

**व्याख्या – पर्यायपदानि** – यदि = चेत्, तावत् अयम् = एषः, स्वप्नः = मनः सङ्कल्पजन्य वासवदत्तादर्शनरूप विषयः, तर्हि अप्रतिबोधनम् = अजागरणं, धन्यं = प्रशस्तम्। अथ = पक्षान्तरे, अयं = स्वप्नः, विभ्रमः = मतिभ्रमः वा स्यात् = भवेत्, मे = ममोदयनस्य, विभ्रमः = मनोभ्रान्तिः, हि = निश्चयेन, चिरं = दीर्घकालं, यावत् अस्तु = तिष्ठतु॥ ९॥

**भावार्थः** – यदि स्वप्ने मतिभ्रमे वापि वासवदत्तायाः दर्शनलाभो भवेत्, तर्हि अपि मत्कृते वरम्। यतोहि सुखार्थी–प्रियजनस्य एषैवाऽऽकाङ्क्षा भवतीति भावः॥ ९॥

**छन्दः** – अस्मिन् श्लोके अनुष्टुप् छन्दो वर्तते।

**व्याकरणम्** – न प्रतिबोधनम् अप्रतिबोधनम् (नञ् तत्पुरुषः)।

**विदूषकः** – भो वअस्स! एदस्सिं णअरे अवन्तिसुन्दरी णाम जक्खिणी पडिवसदि। सा तुए दिट्ठा भवे। [भो वयस्य! एतस्मिन् नगरेऽवन्तिसुन्दरी नाम यक्षिणी प्रतिवसति। सा त्वया दृष्टा भवेत्।]

**विदूषक** – मित्र! इस नगर में अवन्तिसुन्दरी नाम की एक यक्षिणी रहती है। आपने उसे देखा होगा।

**राजा** – न न।

**राजा** – नहीं, नहीं –

**प्रसङ्गः** – वत्सराजोदयनः प्रकृते श्लोकेऽस्मिन् प्रोषितभर्तृकायाः आचरणं कुर्वत्याः वासवदत्तायाः चित्राङ्कनमुपस्थापयन्नाह –

**स्वप्नस्यान्ते विबुद्धेन नेत्र विप्रोषिताञ्जनम्।**
**चारित्रमपि रक्षन्त्या दृष्टं दीर्घालकं मुखम्॥ १०॥**

**अन्वयः** – स्वप्नस्य अन्ते विबुद्धेन (मया) चारित्रम् अपि रक्षन्त्या (वासवदत्तायाः) नेत्रविप्रोषिताञ्जनं दीर्घालकं मुखं दृष्टम्॥ १०॥

**पदार्थः** – स्वप्नस्य = सपने के, अन्ते = अन्त में, विबुद्धेन = जागे हुये, मया = मैंने, चारित्रम् अपि = अपने चरित्र की भी, रक्षन्त्याः = रक्षा करती हुई (वासवदत्ता का), नेत्रविप्रोषिताऽञ्जनं = काजल रहित आँखों वाला, दीर्घालकं = लम्बे बालो से युक्त, मुखं = मुख, दृष्टं = देखा॥ १०॥

**हिन्दी अर्थ** – स्वप्न के अन्त में जागने पर मैंने चरित्र की रक्षा करती हुई वासवदत्ता का बिना काजल की आँखों वाला तथा लम्बे-लम्बे बालों से ढ़का हुआ मुख देखा॥ १०॥

**व्याख्या – पर्यायपदानि** – स्वप्नस्य = स्वप्नावस्थायाः, अन्ते = अवसाने, विबुद्धेन = जागरितेन मया उदयनेन, चारित्रं = सतीत्वम्, अपि = जीवितेन सह, रक्षन्त्याः = पालयन्त्याः, वासवदत्तायाः, नेत्रविप्रोषिताञ्जनं

= नेत्राभ्यां दूरीभूतकज्जलं, लोचनोज्झिताञ्जनं, दीर्घालकं = लम्बचूर्णकुन्तलं, मुखम् = आननं, दृष्टम् = अवलोकितम्॥ १०॥

**भावार्थः** – स्वप्नस्यानते प्रबुद्धेन मया वासवदत्ताया मुखम् अवलोकितम्। तन्नयने कज्जलरहिते आस्ताम्। मुखञ्च दीर्घालकैराच्छादित आसीत्। इत्युक्ते सा स्वचरित्रं (प्रोषिभर्तृकाजीवनम्) रक्षन्ती नूनं जीवतीति भावः॥ १०॥

**छन्दः** – अनुष्टुप् छन्दोऽस्ति।

**व्याकरणम्** – विबुद्धेन – वि+बुध्+क्त (कर्त्तरि) तेन। नेत्रविप्रोषिताञ्जनं – नेत्राभ्यां विप्रोषितम् अञ्जनं यस्मिन् मुखे तत् मुखम् (ब०व्री०)। दीर्घालकं – दीर्घाः अलकाः यस्मिन् तत् (ब०व्री०)। रक्षन्त्याः – रक्ष्+शतृ+ङीप्–तस्याः।

**राजा** – अपि च वयस्य! पश्य, पश्य।

**राजा** – और भी मित्र! देखो, देखो।

**प्रसङ्गः** – महाराजोदयनो वासवदत्तायाः संयोगविषये सत्यतां प्रमाणयन्नाह –

**योऽयं संत्रस्तया देव्या तया बाहुर्निपीडितः।**
**स्वप्नेऽप्युत्पन्नसंस्पर्शो रोमहर्षं न मुञ्चति॥ ११॥**

**अन्वयः** – सन्त्रस्तया तया देव्या यः अयं बाहुः निपीडितः स्वप्ने अपि उत्पन्नसंस्पर्शः रोमहर्षं न मुञ्चति॥११॥

**पदार्थः** – सन्त्रस्तया = अत्यधिक भयभीत, तया = उस, देव्या = देवी वासवदत्ता के द्वारा, यः = जो, अयम् = यह, बाहुः = भुजा, निपीडितः = दबायी थी, स्वप्ने = सपने में, उत्पन्नसंस्पर्शः = स्पर्श होने पर, अपि = भी, रोमहर्षं = रोमाञ्च को, न मुञ्चति = नहीं छोड़ रहा है॥ ११॥

**व्याख्या – पर्यायपदानि** – सन्त्रस्तया = अतीव भीतया, तया देव्या = वासवदत्तया, योऽयं = पुरोदृश्यमानं, बाहुः = भुजः, निपीडितः = गृहीतः, सः स्वप्ने = स्वप्नावस्थायाम्, उत्पन्नसंस्पर्शः = सञ्जातसम्पर्कः, अपि रोमहर्षं = रोमाञ्चं, न = नहि, मुञ्चति = त्यजति॥ ११॥

**भावार्थः** – अतीवभीतया देव्या वासवदत्तया यो हस्तः संस्पृष्टः तत्राधुनापि रोमहर्षमनुभवामि। अर्थात् इदानीमपि तत्स्पर्शेणाहं रोमाञ्चयुक्तोऽस्मीत्यर्थः॥ ११॥

**छन्दः** – अनुष्टुप् छन्दोऽस्ति श्लोकेऽस्मिन्।

**व्याकरणम्** – सन्त्रस्तया – सम्+त्रस्+क्त (कर्तरि)+टाप्+टा। (निपीडितः – नि+पीड+क्त। उत्पन्नसंस्पर्शः– उत्पन्नः संस्पर्शो यस्य सः (ब०व्री०)।

**कोशः** – भुजबाहू प्रवेष्टो दोः इत्यमरः।

**विदूषकः** – मा दाणिं भवं अणत्थं चिन्तिअ। एदु एदु भवं। चउस्सालं पविसामो। [मेदानीं भवाननर्थं चिन्तयित्वा। एत्वेतु भवान्। चतुः शालं प्रविशामः।]

**विदूषक** – अब आप व्यर्थ की चिन्ता मत कीजिये। आइये, चौसाल में चलें।

(प्रविश्य) (प्रवेश करके)

**काञ्चुकीयः** – जयत्वार्यपुत्रः। अस्माकं महाराजो दर्शको भवन्तमाह – एष खलु भवतोऽमात्यो रुमण्वान् महता बलसमुदायेनोपयातः खल्वारुणिमभिघातयितुम्। तथा हस्त्यश्वरथपदातीनि मामकानि विजयाङ्गानि सन्नद्धानि। तदुत्तिष्ठतु, भवान्। अपि च –

**काञ्चुकीय** – महाराज की जय हो। हमारे महाराज दर्शक ने आपसे कहा है कि यह आपका मन्त्री रुमण्वान् भारी सेना के समूह के साथ (आप से) आरुणि का वध कराने के लिए आ पहुँचा है और मेरी विजय की सेनायें – हाथी, घोड़े, रथ और पैदल सभी तैयार हैं। अतः आप उठिये। और भी –

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये काञ्चुकीयः समागत्य अमात्य रुमण्वतः प्रयासेन रिपुपराभवादिकं विजययात्रां च महाराजोदयनाय निवेदयन्नाह –

**भिन्नास्ते रिपवो भवद्गुणरताः पौराः समाश्वासिताः**
**पार्ष्णी यापि भवत्प्रयाणसमये तस्या विधानं कृतम्।**
**यद्यत् साध्यमरिप्रमाथजननं तत्तन्मयानुष्ठितं**
**तीर्णा चापि बलैर्नदी त्रिपथगा वत्साश्च हस्ते तव॥ १२॥**

**अन्वयः** – (हे महाराज) ते रिपवः भिन्नाः भवद्गुणरताः पौराः समाश्वासिताः भवत्प्रयाणसमये या पार्ष्णी तस्याः अपि विधानं कृतम्। अरिप्रमाथजननं यत् यत् साध्यं तत् तत् मया अनुष्ठितम्। अपि च बलैः त्रिपथगा तीर्णा, वत्साः च तव हस्ते स्थिताः सन्ति।

**पदार्थः** – (हे महाराज!) ते रिपवः = आपके सभी दुश्मन, भिन्नाः = छिन्न भिन्न कर दिये गये, भवद्गुणरताः = आपके गुणानुरागी, पौराः = पुरवासी, समाश्वासिताः = आश्वस्त कर दिये गये हैं, भवत्प्रयाणसमये = आपके प्रस्थान के समय, या = जो, पार्ष्णी = आपकी पृष्ठगामी रक्षक सेना है, तस्याः = उसकी, अपि = भी, विधानं = संरचना, कृतं = कर ली गई है। अरिप्रमाथजननं = शत्रु का वध करने के लिए, यत् यत् = जो जो, साध्यं = करने योग्य कार्य हैं, तत् तत् = वो वो, मया = मेरे द्वारा, अनुष्ठितं = कर लिया गया है, अपि च = और भी, बलैः = सेनायें, त्रिपथगा = गंगानदी, तीर्णा = पार कर चुकी हैं, च = अब, वत्साः = वत्सराज्य, तव = तुम्हारे, हस्ते = हाथ में ही है॥ १२॥

**हिन्दी अर्थ** – महाराज! आपके शत्रु छिन्न-भिन्न कर दिये गये हैं, आपके गुणों पर आसक्त नगरवासियों को आश्वस्त कर दिया गया है। प्रयाण के समय आपके पीछे जाने वाली रक्षक-सेना का प्रबन्ध कर लिया गया है। शत्रुसंहार के लिए जो-जो कार्य अत्यावश्यक हैं, सब मैंने कर लिये हैं। यहाँ तक कि सेनायें गंगा नदी पार कर चुकी हैं, समझ लीजिये अब वत्सराज्य भी आपके हाथ ही में है॥ १२॥

**व्याख्या – पर्यायपदानि** – हे महाराज! ते = तव, रिपवः = शत्रवः, भिन्नाः = परस्परविभक्ताः, भवद्गुणरताः = त्वद्गुणानुरक्ताः, पौराः = नागरिकाः, समाश्वासिताः = आश्वासनं प्रापिताः, भवत्प्रयाणसमये = तव विजययात्रावसरे, या पार्ष्णी = सैन्यपृष्ठम्, अपि = तथा, तस्याः = पार्ष्ण्याः, विधानं = रचना, कृतम् = सम्पादितम्। अरिप्रमाथजननं = शत्रुसंहारकं, यत्-यत् = कार्यं, साध्यं = करणीयं, तत्-तत् = कार्यं, मया = दर्शकेन, अनुष्ठितं = सम्पादितम्, अपि च = अन्यच्च, बलैः = सैन्यैः, त्रिपथगा नदी = गङ्गानदी, तीर्णा = लङ्घितः, च = तथा, वत्साः = वत्सराज्यं, तव = भवतः, हस्ते = करे, स्थिताः सन्ति॥ १२॥

**भावार्थः** – महाराजदर्शकः काञ्चुकीय मुखेनोदयनं सूचयन्नाह – भवतां शत्रवः परस्परविभक्ताः, नागरिकाः आश्वासनं प्रापिताः, रक्षकसैन्यं (पार्ष्णी) सुव्यवस्थापितं, शत्रुनाशकारकं सर्वमपि कार्यं कृतं वर्तते। अस्माकीना सेना गङ्गामुत्तीर्णा। सम्प्रति वत्ససाम्राज्यं भवत्कर एवास्तीतिभावः।

**छन्दः** – श्लोकेऽस्मिन् शार्दूलविक्रीडितं वृत्तं वर्तते।

**व्याकरणम्** – भिन्ना – भिद्+क्त। भवतः गुणाः भवद्गुणाः तेषु रताः – भवद्गुणरताः (स०त०) अरीणां प्रमाथः अरिप्रमाथः, तस्य जननम् – अरिप्रमाथजननम् (ष०त०)।

**कोशः** – भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि, रिपौ वैरिसपत्नारिद्विषद्द्वेषदुर्हृदः, इति चामरः।

**राजा** – (उत्थाय) बाढम्। अयमिदानीम्।

राजा – (उठकर) बहुत अच्छा। अब मैं –

**प्रसङ्गः** – राज्ञः उदयनः स्वपौरुषं प्रदर्शयन् शत्रुमारुणिं नाशयितुमुद्यतः सन् कथयति –

**उपेत्य नागेन्द्रतुरङ्गतीर्णे, तमारुणिं दारुणकर्मदक्षम्।**
**विकीर्णबाणोग्रतरङ्गभङ्गे, महार्णवाभे युधि नाशयामि॥ १३॥**

**अन्वयः** – (अहं) नागेन्द्रतुरङ्गतीर्णे विकीर्णबाणोग्रतरङ्गभङ्गे महार्णवाभेयुधि दारुणकर्मदक्षं तम् आरुणिम् उपेत्य नाशयामि॥ १३॥

**पदार्थः**– (अहं = मैं उदयन), नागेन्द्रतुरङ्गतीर्णे = बडे-बडे हाथी और घोड़ो से पार किए गए, विकीर्णबाणोग्रतरङ्गभङ्गे = उमड़ती हुई प्रबल लहरों की तरह चलाये गये भयङ्कर बाणों से युक्त, महार्णवाभे = महासागर के समान, युधि = युद्ध में, दारुणकर्मदक्षं = क्रूर कार्य करने में निपुण, तम् आरुणिम् = उस आरुणि को, उपेत्य = आक्रमण करके, नाशयामि = नष्ट कर दूँगा॥ १३॥

**हिन्दी अर्थ** – बड़े-बड़े हाथी घोड़ों से खचाखच भरे तथा चलाये गये बाणरूपी लहर से उमड़ते हुए महासागर तुल्य युद्ध में पहुँचकर क्रूर कार्य करने में निपुण उस आरुणि को आक्रमण करके अवश्य ही मार डालूँगा॥१३॥

**व्याख्या – पर्यायपदानि** – अहम् = उदयनः, नागेन्द्रतुरङ्गतीर्णे = गजेन्द्राश्वलङ्घिते, विकीर्णबाणोग्रतरङ्गभङ्गे = प्रक्षिप्तशरोर्मिविक्रमे, महार्णवाभे = महासमुद्रतुल्ये, युधि = समरे, दारुणकर्मदक्षं = क्रूरकार्यचतुरं, तं = प्रसिद्धम्, आरुणिम् = एतन्नामकशत्रुम्, उपेत्य = आक्रम्य, नाशयामि = हन्मि, हनिष्यामीत्यर्थः॥ १३॥

**भावार्थः** – अहमुदयनो हि नागेन्द्रतुरङ्गतीर्णे बाणोग्रतरङ्गपूर्णे महासमरे क्रूरकर्मनिपुणं तं प्रसिद्धं शत्रुमाक्रम्य नाशयिष्यामीति भावः॥

**छन्दः** – अस्मिन् श्लोके उपेन्द्रवज्रावृत्तमस्ति। तल्लक्षणं यथा –

उपेन्द्रवज्रा जतजास्ततो गौ।

**अलङ्कारः** – अत्रोपमालङ्कारः।

**व्याकरणम्** – उपेत्य – उप+इ+ल्यप्। नाशयामि – नश्+णिच्+लट्। युधि–युध्+क्विप्। नागेन्द्रतुरङ्गतीर्णे – नागानाम् इन्द्राः (ष०त०) नागेन्द्राश्च तुरङ्गाश्च (द्वन्द्व) तैः तीर्णः (तृ०त०)।

**कोशः** – दारुणं भीषणं भीष्मं भीमं घोरं भयानकम्, मतङ्गजो गजो नागः कुञ्जरो वारणः करी, घोटके पीति तुरगतुरङ्गाश्वतुरङ्गमाः इति चामरः।

(निष्क्रान्ताः सर्वे।)

(सभी निकल जाते हैं।)

**॥ इति पञ्चमोऽङ्कः॥**

**॥ पाँचवाँ अङ्क समाप्त॥**

# अथ षष्ठोऽङ्कः

(ततः प्रविशति काञ्चुकीयः)

**काञ्चुकीयः** – क इह भोः? काञ्चनतोरणद्वारमशून्यं कुरुते?

(तदनन्तर काञ्चुकीय प्रवेश करता है।)

**काञ्चुकीय** – अरे! यहाँ कौन है? यहाँ सुनहरे मुख्य द्वार पर कौन खड़ा है?

(प्रविश्य)

**प्रतिहारी** – अय्य! अहं! विजआ! किं करीअदु? [आर्य! अहं विजया! किं क्रियताम्?]

(प्रवेश करके)

**प्रतिहारी** – आर्य! मैं विजया हूँ! क्या आज्ञा है?

**काञ्चुकीयः** – भवति! निवेद्यतां वत्सराज्यलाभप्रवृद्धोदयायोदयनाय एष खलु महासेनस्य सकाशाद् रैभ्यसगोत्रः काञ्चुकीयः प्राप्तः तत्र भवत्या चाङ्गारवत्या प्रेषितार्या वसुन्धरा नाम वासवदत्ताधात्री च प्रतिहारमुपस्थिताविति।

**काञ्चुकीय** – भद्रे! वत्सदेश का राज्य मिलने से विशेष उन्नति को प्राप्त हुए उदयन से निवेदन कीजिये कि महासेन के पास से आया हुआ रैभ्यसगोत्रीय काञ्चुकीय और माननीया अङ्गारवती की भेजी हुई श्रीमती वसुन्धरा नाम की वासवदत्ता की धाय दोनों ही द्वार पर उपस्थित हैं।

**प्रतीहारी** – अय्य! अदेसकाले पडिहारस्स। [आर्य! अदेशकालः प्रतीहारस्य।]

**प्रतीहारी** – आर्य! द्वारपाल के जाने योग्य उचित स्थान और समय नहीं है।

**काञ्चुकीयः** – कथमदेशकालो नाम?

**काञ्चुकीय** – कैसे उचित स्थान और समय नहीं है?

**प्रतीहारी** – सुणादु अय्यो! अज्ज भट्टिणी सुय्यामुहप्पासादगदेण केण वि वीणा वादिदा। तं च सुणिअ भट्टिणा भणिअं–घोसवदीए सद्दो विअ सुणोअदि त्ति। [शृणोत्वार्यः। अद्य भर्तुः सूर्यामुखप्रासादगतेन केनापि वीणावादिता। तां च श्रुत्वा भर्त्रा भणितं – घोषवत्याः शब्द इव श्रूयत इति।]

**प्रतीहारी** – आर्य! सुनिये। आज स्वामी के सूर्यामुख नामक महल में जाने पर किसी ने वीणा बजाई। उसे सुनकर स्वामी ने कहा कि – घोषवती नामक वीणा का स्वर सुनाई दे रहा है।

**काञ्चुकीयः** – ततस्ततः?

**काञ्चुकीय** – उसके बाद क्या हुआ?

**प्रतीहारी** – तदो तहिं गच्छिअ पुच्छिदो – कुदो इमाए वीणाए आगमो। तेण भणिअं अह्मेहि णम्मदातीरे कुच्चगुम्भलग्गा दिट्ठ। जई प्पओअणं इमाए, उवणीअदु भट्टिणोत्ति। तं च उवाणीदं अंके करिअ मोहं गदो भट्टा। तदो मोहप्पच्चागदेण बप्फपय्याउलेण मुहेण भट्टिणा दिसि घोसवदि! सा हुण दिस्सदित्ति।

अय्य! ईदिसो अणवसरो। कहं णिवेदेमि? [ततस्तत्र गत्वा पृष्टः – कुतोऽस्या वीणाया आगम इति। तेन भणितम् – अस्माभिर्नर्मदातीरे कूर्चगुल्मलग्ना दृष्टा। यदि प्रयोजनमनया, उपनीयतामत्र इति। तां चोपनीतामङ्के कृत्वा मोहं गतो भर्ता। ततो मोहप्रत्यागतेन वाष्पपर्याकुलेन मुखेन भर्त्रा भणितं – दृष्टासि घोषवति! सा खलु न दृश्यत इति। आर्य! ईदृशोऽनवसरः। कथं निवेदयामि?]

**प्रतीहारी** – तदनन्तर वहाँ (सूर्यामुख महल में) जाकर महाराज ने पूछा कि यह वीणा कहाँ से मिली है? उस वीणावादक ने कहा – हमने नर्मदा के किनारे कुशाओं की झाड़ी से उलझी हुई इसे पाया। यदि इसकी जरूरत हो तो महाराज को भेंट कर दूँ। भेंट की हुई उस वीणा को गोद में लेकर महाराज मूर्च्छित हो गये। फिर होश में आने पर मुख पर आँसू बहाते हुए महाराज ने कहा – 'घोषवती! तुम तो मिल गई हो किन्तु वह (वासवदत्ता) दिखाई नहीं देती।' आर्य! इस प्रकार उचित अवसर नहीं है। कैसे निवेदन करूँ?

**काञ्चुकीयः** – भवति! निवेद्यताम्। इदमपि तदाश्रयमेव।

**काञ्चुकीय** – श्रीमती! निवेदन कर दीजिए। यह भी उसी (वासवदत्ता) से सम्बन्ध रखता है।

**प्रतीहारी** – अय्य! इअं णिवेदेमि। एसो भट्टा सुय्यामुहप्पासादादो ओदरइ। ता इह एव्व णिवेदइस्सं। [आर्य! इयं निवेदयामि। एष भर्ता सूर्यामुखप्रासादादवरति। तदिहैव निवेदयिष्यामि।]

**प्रतीहारी** – आर्य! अभी निवेदन करती हूँ। ये महाराज सूर्यामुख महल से उतर रहे हैं। अतः यहीं पर निवेदन कर दूँगी।

**काञ्चुकीयः** – भवति! तथा। (उभौ निष्क्रान्तौ।)

**काञ्चुकीय** – ठीक है, ऐसा ही कीजिए। (दोनों का प्रस्थान।)

॥ मिश्रविष्कम्भकः समाप्तः॥

(ततः प्रविशति राजा विदूषकश्च।)

(तदनन्तर राजा और विदूषक प्रवेश करते हैं।)

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये राजोदयनः घोषवतीं वीणामुद्दिश्य वासवदत्तायाः वियोगं वर्णयन्नाह –

**राजा** –

**श्रुतिसुखनिनदे! कथं नु देव्याः**
**स्तनयुगले जघनस्थले च सुप्ता।**
**विहगगणरजोविकीर्णदण्डा**
**प्रतिभयमध्युषिताऽस्यरण्यवासम्॥ १ ॥**

**अन्वयः** – अयि श्रुतिसुखनिनदे! देव्याः स्तनयुगले जघनस्थले च सुप्ता विहगगणरजोविकीर्णदण्डा प्रतिभयम् अरण्यवासं कथं नु अध्युषिता असि॥ १ ॥

**पदार्थः** – अयि श्रुतिसुखनिनदे! = अरी कानों को सुखद ध्वनि से आनन्दित करने वाली वीणे!, देव्याः = देवी वासवदत्ता के, स्तनयुगले = स्तनों पर, जघनस्थले च = और जाँघों पर, सुप्ता = सोती थी, विहगगणरजोविकीर्णदण्डा = पक्षीसमूह के द्वारा की गई बीट (मल) से मलिन दण्डवाली होकर, प्रतिभयं = भयानक, अरण्यवासं = वनवास, कथं नु = क्यों, अध्युषिता = स्वीकार किया॥१ ॥

**हिन्दी अर्थ** – अरी कानों को सुखद ध्वनि सुनाने वाली वीणा! तू तो देवी वासवदत्ता के स्तनों और जाँघों पर सोती थी, फिर अब पक्षियों की बीट आदि से मलिन होकर भयानक जंगल में क्यों रहने लगी?

**व्याख्या – पर्यायपदानि** – अयि श्रुतिसुखनिनदे = कर्णानन्दध्वनियुते वीणे! पूर्वं त्वया देव्याः = वासवदत्तायाः, स्तनयुगले = पयोधरद्वये, जघनस्थले = श्रोणिपुरोभागे च, सुप्ता = शयनं प्राप्ता, किन्तु सम्प्रति, विहगगणरजोविकीर्णदण्डा = खगसमूहमलमलिनदण्डा सती, प्रतिभयं = भयानकम्, अरण्यवासं = वननिवासं, कथं = केन कारणेन, नु = वितर्के, अध्युषिता असि = आश्रित्य तिष्ठसि। अर्थात् वासवदत्तावियोगे त्वयाप्यसह्यकष्टम् अनुभूतमित्यर्थः॥१ ॥

**भावार्थः** – अयि! कर्णप्रिये वीणे! त्वं पूर्वं देव्याः वासवदत्तायाः स्तनद्वये जघनभागे च सानन्दं शयनं कृतवती, किन्तु वर्तमाने तद्वियोगे पक्षिकूलधूलिमलिनया त्वया भीषणारण्ये स्थित्वाऽसह्यकष्टमनुभूतमितिभावः॥१॥

**छन्दः** – अस्मिन् श्लोके पुष्पिताग्रा छन्दो वर्तते। तल्लक्षणं यथा –

'अयुजि न युगरेफतो यकारो, युजि च नजौ जरगाश्च पुष्पिताग्रा।'

**व्याकरणम्** – श्रुतिसुखनिनदे – श्रुतिसुखः निनदः यस्याः सा (बहुव्रीहिः), तत्सम्बोधने। विहगगणरजो विकीर्णदण्डा – विहगानां गणः विहगगणः तस्य रजांसि, तैः विकीर्णः दण्डो यस्याः सा (बहु०)।

**कोषः** – खगे विहंगविहगविहङ्गमविहायसः, इत्यमरः।

रेणुर्द्वयोः स्त्रियां धुलिः पांशुर्ना न द्वयो रजः, इत्यमरः।

अपि च, अस्निग्धासि घोषवति! या तपस्विन्या न स्मरसि –

और भी, हे घोषवती! तुम स्नेह-शून्य हो जो वासवदत्ता को याद नहीं करती हो –

**प्रसङ्गः** – श्लोकेऽस्मिन् राजोदयनः घोषवत्या वीणाया वासवदत्ताविषये स्नेहशून्यतां वर्णयन्नाह –

**श्रोणीसमुद्वहनपार्श्वनिपीडितानि**
**खेदस्तनान्तरसुखान्युपगहितानि ।**
**उद्दिश्य मां च विरहे परिदेवितानि**
**वाद्यान्तरेषु कथितानि च सस्मितानि॥२॥**

**अन्वयः** – (त्वं) श्रोणीसमुद्वहनपार्श्वनिपीडितानि खेदस्तनान्तरसुखानि उपगूहितानि च विरहे माम् उद्दिश्य परिदेवितानि च वाद्यान्तरेषु सस्मितानि कथितानि न स्मरसि॥ २॥

**पदार्थः** – हे घोषवति = हे घोषवती! त्वं = तुम, श्रोणीसमुद्वहनपार्श्वनिपीडितानि = कमर पर ढोना, बगल में दबाना, खेदस्तनान्तरसुखानि = थक जाने पर स्तनों के बीच तुझे सुखपूर्वक सुलाना, उपगूहितानि = आलिङ्गन करना, च = पुनः, विरहे = वियोग में, मां = मुझको, उद्दिश्य = लक्ष्य बनाकर, परिवेदितानि = विलाप करना, वाद्यान्तरेषु = वीणा बजाते समय बीच - बीच में, सस्मितानि = मुस्कराकर, कथितानि = (मुझसे) बातें करना, न स्मरसि = कुछ भी याद नहीं करती हो॥ २॥

**हिन्दी अर्थ** – अरी घोषवती! तुम स्नेहशून्य हो – वासवदत्ता के द्वारा तुझे कमर पर ढोना, बगल में दबाना, थक जाने पर स्तनों के बीच में सुलाना, आलिङ्गन करना, विरह काल में तुझे ही उदयन मानकर रोना तथा वीणावादन बन्द कर बीच-बीच में मन्दमुस्कान के साथ बातें करना इत्यादि तुझे कुछ भी याद नहीं है।

**व्याख्या – पर्यायपदानि** – श्रोणीसमूहद्वहनेन = कटिभागधारणेन, पार्श्वेन = पार्श्वभागेन, निपीडितानि = मर्दनानि, खेदस्तनान्तरसुखानि = खेदे – श्रमे सति, स्तनान्तरे = स्तनमध्यभागे, सुखानि = हर्षोत्पादकानि, उपगूहितानि = आलिङ्गनानि, च = भूयः, विरहे = वियुक्ते, मां = राजानं, उद्दिश्य = अभिलक्ष्य, परिदेवितानि = विलपितानि, च = पुनः, वाद्यान्तरेषु = वीणावादनविरामकाले, सस्मितानि = मन्दहासपूर्वकं, कथितानि = भाषितानि, न स्मरसि = स्मरणं न करोषि। अतस्त्वं स्नेहशून्या असि॥ २॥

**भावार्थः** – अयि स्नेहशून्ये वीणे! वासवदत्तया त्वम् अङ्के स्थापिता, स्तनान्तरे आलिङ्गिता, मयि वियुक्ते सति मामभिलक्ष्य विलपिता, वीणावादनविरामकाले सस्मितं यद्युदितं तत्सर्वं त्वया विस्मर्यते, तदुचितं नास्तीति भावः॥ २॥

**छन्दः** – पद्येऽस्मिन् वसन्ततिलकावृत्तमस्ति।

**व्याकरणम्** – समुद्वहनम् – सम्+उद्+वह्+ल्युट्।

उपगूहितानि – उप+गूह्+क्त। उद्दिश्य – उद्+दिश्+ल्यप्।

**विदूषकः** – अलं दाणिं भव अदिमतं सन्तप्पिअ। [अलमिदानीं भवानतिमात्रं सन्तप्य।]

**विदूषक** – इस समय आप इतना व्यर्थ संताप कर रहे हैं।
**राजा** – वयस्य! मा मैवम्।
**राजा** – मित्र! ऐसा मत बोलो – मत बोलो –

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये महाराजोदयनः विदूषकस्य वचनमाकर्ण्य स्वसन्तप्तायाः कारणं प्रकटयन्नाह –

**चिरप्रसुप्तः कामो मे वीणया प्रतिबोधितः।**
**तां तु देवीं न पश्यामि यस्या घोषवती प्रिया॥ ३॥**

**अन्वयः** – चिरप्रसुप्तः मे कामः वीणया प्रतिबोधितः। यस्या घोषवती प्रिया तां देवीं तु न पश्यामि॥३॥

**पदार्थः** – चिरप्रसुप्तः = लम्बे समय तक सोये हुये, मे = मेरे, कामः = प्रेम को, वीणया = घोषवती वीणा ने, प्रतिबोधितः = जगा दिया। यस्याः = जिसको, प्रिया = प्रिय थी, तां देवीम् = उस देवी वासवदत्ता को, तु = तो, न = नहीं, पश्यामि = देख रहा हूँ॥ ३॥

**हिन्दी अर्थ** – घोषवती नामक इस वीणा ने मेरे बहुत समय से सोये हुए प्रेम को जगा दिया। परन्तु जिसको यह वीणा अत्यधिक प्रिय थी आज उस देवी को नहीं देख रहा हूँ। मित्र वसन्तक! इसी का मुझे आन्तरिक कष्ट है॥३॥

**व्याख्या – पर्यायपदानि** – चिरप्रसुप्तः = दीर्घकालं यावत् शयितः, मे = मम, कामः = अनुरागः, वीणया = घोषवत्या विपञ्च्या, प्रतिबोधितः = जागरितः। यस्याः = वासवदत्तायाः, घोषवती नाम्नी वीणा, प्रिया = प्रीतिपात्रमासीत्, तां देवीं = वासवदत्तां तु न = नहि, पश्यामि = द्रष्टुं प्रभवामीत्यर्थः॥ ३॥

**भावार्थः** – महाराजोदयनः कथयति यत् मे चिरप्रसुप्तोऽनुरागः अनया घोषवत्या वीणयाऽद्य प्रतिबोधितः किन्तु यां एषा वीणा अतिशयप्रियाऽऽसीत् तां प्राणप्रियां वासवदत्तां नावलोक्याहं महत्कष्टमनुभवन्नस्मीत्यर्थः॥३॥

**छन्दः** – अनुष्टुब्वृत्तमस्ति श्लोकेऽस्मिन्।
**व्याकरणम्** – प्रतिबोधितः – प्रति+बुध्+णिच्+क्त। प्रिया–प्री+क+टाप्।
**कोशः** – 'वीणा तु वल्लकी विपञ्ची' इत्यमरः।

वसन्तक! शिल्पिजनसकाशान्नवयोगां घोषवतीं कृत्वा शीघ्रमानय।
वसन्तक! कारीगर से घोषवती की मरम्मत कराकर शीघ्र ले आओ।
**विदूषकः** – जं भवं आणावेदि। [यद् भवानाज्ञापयति।] (वीणां गृहीत्वा निष्क्रान्तः।)
**विदूषक** – जो महाराज की आज्ञा। (वीणा लेकर निकल जाता है।)

(प्रविश्य) (प्रवेश करके)

**प्रतीहारी** – जेदु भट्टा। एसो खु महासेणस्य सआसादो रैभ्यसगोत्तो कचुईओ देवीए अङ्गारवदीए पेसिदा अय्या वसुन्धरा णाम वासवदत्ताधाती अ पडिहारं उवट्ठिदा। [जयतु भर्ता! एष खलु महासेनस्य सकाशाद् रैभ्यसगोत्रः काञ्चुकीयो देव्याऽङ्गारवत्या प्रोषितार्या वसुन्धरा नाम वासवदत्ताधात्री च प्रतीहारमुपस्थितौ।]

**प्रतीहारी** – महाराज की जय हो। महासेन जी के यहाँ से रैभ्यस गोत्रीय काञ्चुकीय और महारानी अंगारवती द्वारा भेजी गई मान्या वसुन्धरा नाम की वासवदत्ता की धाय माँ द्वार पर उपस्थित हैं।

**राजा** – तेन हि पद्मावतीं तावदाहूयताम्।
**राजा** – तब तो पद्मावती को शीघ्र बुलाओ।
**प्रतीहारी** – जं भट्टा आणवेदि। [यद् भर्ताज्ञापयति।] (निष्क्रान्ता)
**प्रतीहारी** – जो महाराज की आज्ञा। (निकल जाती है।)
**राजा** – किन्नु खलु शीघ्रमिदानीमयं वृत्तान्तो महासेनेन विदितः?
**राजा** – क्या इतनी जल्दी यह समाचार महासेनजी को ज्ञात हो गया?

(ततः प्रविशति पद्मावती प्रतीहारी च।)
(तत्पश्चात् पद्मावती और प्रतीहारी का प्रवेश।)

**प्रतीहारी** – एदु, एदु भट्टिदारिआ। [एत्वेतु भर्तृदारिका।]

**प्रतीहारी** – आइये, राजकुमारी जी! आइये।

**पद्मावती** – जेदु अय्यउत्तो। [जयत्वार्यपुत्रः।]

**पद्मावती** – आर्यपुत्र की जय हो।

**राजा** – पद्मावति! किं श्रुतं महोसनस्य सकाशाद् रैभ्यसगोत्रः काञ्चुकीयः प्राप्तस्तत्र भवत्या चाङ्गारवत्या प्रेषितार्या वसुन्धरा नाम वासवदत्ता च प्रतीहारमुपस्थितावििति।

**राजा** – पद्मावती! क्या तुमने सुना कि महाराज महासेन जी के पास से रैभ्यसगोत्रीय काञ्चुकीय और माननीया अंगारवती के द्वारा भेजी गई श्रीमती वसुन्धरा नाम की वासवदत्ता की धाय माँ दोनों द्वार पर उपस्थित हैं।

**पद्मावती** – अय्यउत! पिअं मे आदिकुलस्य कुसलवुत्तन्तं सोदुं। [आर्यपुत्र! प्रियं मे ज्ञातिकुलस्य कुशलवृत्तान्तं श्रोतुम्।]

**पद्मावती** – आर्यपुत्र! कुटुम्ब–परिवार का कुशल समाचार सुनना मुझे रुचिकर है।

**राजा** – अनुरूपमेतद् भवत्याभिहितं – वासवदत्तास्वजनो मे स्वजन इति। पद्मावति! आस्यताम्। किमिदानीं नास्यते?

**राजा** – तुमने यह अपने कुल के अनुरूप ही कहा है कि वासवदत्ता के भाई–बन्धु मेरे भी स्वजन हैं। पद्मावती! बैठिये। अब क्यों नहीं बैठ रही हो?

**पद्मावती** – अय्यउत्त! किं मए सह उवविट्ठो एदं जणं पेक्खिस्सदि? [आर्यपुत्र! किं मया सहोपविष्ट एतं जनं प्रेक्षिष्यते?]

**पद्मावती** – आर्यपुत्र! क्या आप मेरे साथ बैठकर उन लोगों से मिलेंगे?

**राजा** – कोऽत्र दोषः?

**राजा** – इसमें क्या अनुचित है?

**पद्मावती** – अय्यउत्तस्स अवरो परिग्गहो त्ति उदासीणं विअहोदि। [आर्यपुत्रस्यापरः परिग्रह इति उदासीनमिव भवति।]

**पद्मावती** – आर्यपुत्र ने दूसरा विवाह कर लिया है, यह उन्हें कदाचित् अच्छा नहीं लगे।

**राजा** – कलत्रदर्शनार्हं जनं कलत्रदर्शनात् परिहरतीति बहुदोषमुत्पादयति। तस्मादास्यताम्।

**राजा** – पत्नी दर्शन के योग्य (गृहस्थ) जन को पत्नी को देखने से रोकना बहुत दोषपूर्ण होता है। इसलिए बैठ जाइये।

**पद्मावती** – जं अय्यउत्तो आणवेदि। (उपविश्य) अय्यउत्त! तादो वा अम्वा वा किं णु खु भणिस्सदि त्ति आविग्गा विअ संवुत्ता। [यदार्यपुत्र आज्ञापयति। आर्यपुत्र! तातो वा अम्बा वा किन्नु खलु भणिष्यन्तीत्याविग्नेव संवृत्ता।]

**पद्मावती** – जो आर्यपुत्र की आज्ञा। (बैठकर) आर्यपुत्र! पिताजी अथवा माताजी क्या कहेंगे? ऐसा विचार कर मैं उद्विग्न सी हो गई हूँ।

**राजा** – पद्मावति! एवमेतत्।

**राजा** – पद्मावती! बात तो ऐसी ही है।

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये महाराजोदयनः महासेनस्य सकाशाद् काञ्चुकीयः धात्री च तयोः आगमनं श्रुत्वा भयमनुभवन्नाह –

**किं वक्ष्यतीति हृदयं परिशङ्कितं मे**
**कन्या मयाप्यपहृता न च रक्षिता सा।**

**भाग्यैश्चलैर्महदवाप्तगुणोपघातः**
**पुत्रः पितुर्जनितरोष इवास्मि भीतः॥ ४॥**

**अन्वयः** – किं वक्ष्यति इति मे हृदयं परिशङ्कितम्। मया कन्या अपहृता, अपि सा न रक्षिता। चलैः भाग्यैः महदवाप्तगुणोपघातः पितुः जनितरोषः पुत्र इव भीतः अस्मि॥४॥

**पदार्थः** – किं = क्या, वक्ष्यति = कहेंगे, इति = यह सोचकर, मे = मेरा, हृदयं = हृदय, परिशङ्कितं = शङ्का से युक्त है। मया = मैंने, कन्या = इनकी पुत्री वासवदत्ता, अपहृता = अपहरण किया, सा च = और उसकी, न रक्षिता = रक्षा नहीं कर सका, चलैः = चलायमान (चञ्चल), भाग्यैः = भाग्यों से, महदवाप्तगुणोपघातः = बड़ों के गुणों को विनष्ट करने वाला मैं, पितुः = पिता से, जनितरोषः = अपराधी, पुत्रः = पुत्र की, इव = तरह, भीतः = डरा हुआ, अस्मि = हूँ॥ ४॥

**हिन्दी अर्थ** – वे क्या कहेंगे ऐसा सोचकर मेरा हृदय शङ्का से युक्त हो गया हैं? क्योंकि मैंने उनकी पुत्री (वासवदत्ता) का हरण तो किया किन्तु उसकी रक्षा नहीं कर सका। अपने चञ्चल भाग्य के प्रभाव में आकर मैंने बड़ों के प्रति अपराध किया है। मैं उनसे उसी तरह डर रहा हूँ जैसे अपराधी पुत्र अपने क्रोधित पिता से डरता है॥४॥

**व्याख्या** – **पर्यायपदानि** – किं वक्ष्यति = किं कथयिष्यति, इति = अस्मिन् विषये, मे = मम, हृदयः = मनः, परिशङ्कितं = शङ्काकुलं वर्तते, कन्या = पुत्री वासवदत्ता, मया = उदयनेन, अपहृता = अपनीता अपि, सा = कन्या, न = नहि, रक्षिता = पालिता, चलैः = चञ्चलैः, भाग्यैः = देवैः, महदवाप्तगुणोपघातः = पूज्यजनप्राप्तगुणविनाशः, पितुः = जनकस्य, जनितरोषः = उत्पादितक्रोधः, पुत्र इव = सुत इव, भीतः = भययुक्तः, अस्मि = भवामि॥ ४॥

**भावार्थः** – कुपितो महाराजो महासेनो न जाने कि कथयिष्यतीति विचिन्त्यैव मम मनः शङ्काकुलमस्ति। यतोहि तेषां कन्या मयाऽपनीता परं न च सा पालिता। चञ्चलभाग्यवशादेवैतादृशः अपराधो जातः। अतः अहमपि अधुना पितुर्जनितरोषः सुत इव भयमनुभवन्नस्मि।

**छन्दः** – वसन्ततिलका छन्दोऽस्ति श्लोकेऽस्मिन्।

**अलङ्कारः** – अस्मिन् पद्ये उपमालङ्कारो विद्यते।

**व्याकरणम्** – परिशङ्कितम् – परि+शङ्क्+क्त। वक्ष्यति – वच्+लृट्+तिप्। कन्या – कन्+यत्+टाप्। उपघातः– उप+हन्+घञ्। रक्षिता – रक्ष्+क्त+टाप्। जनितः रोषो येन सः जनितरोषः (ब०वी०)।

**कोशः** – चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः इत्यमरः।

**पद्मावती** – ण किं सक्कं रक्खिदुं पत्तकाले? [न किं शक्यं रक्षितुं प्राप्तकाले?]

**पद्मावती** – समुचित अवसर पर किसकी रक्षा नहीं की जा सकती है? अर्थात् अनुकूल समय में आप उनकी रक्षा अवश्य ही करते।

**प्रतीहारी** – एसो कञ्चुइओ धत्ती अ अडिहारं अवदिठदा। [एष काञ्चुकीयो धात्री च प्रतीहारमुपस्थितौ।]

**प्रतीहारी** – ये काञ्चुकीय और धाय दोनों दरवाजे पर खड़े है।

**राजा** – शीघ्रं प्रवेश्यताम्।

**राजा** – शीघ्र अन्दर ले आओ।

**प्रतीहारी** – जं भट्टा आणवेदि। [यद् भर्ताज्ञापयति।] (निष्क्रान्ता)

**प्रतीहारी** – जो स्वामी की आज्ञा। (चली जाती है।)

(ततः प्रविशति काञ्चुकीयो धात्री प्रतीहारी च।)

(तदनन्तर काञ्चुकीय, धाय और प्रतीहारी का प्रवेश।)

**काञ्चुकीयः** – भोः!

**काञ्चुकीय** – अहा!

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये महासेनस्य रैभ्यसगोत्रीय काञ्चुकीयः स्वमनोभावान् प्रकटयन्नाह –

**सम्बन्धिराज्यमिदमेत्य महान् प्रहर्षः**
**स्मृत्वा पुनर्नृपसुतानिधनं विषादः।**
**किं नाम दैव! भवता न कृतं यदि स्यात्**
**राज्यं परैरपहृतं कुशलं च देव्याः॥ ५॥**

**अन्वयः** – इदं सम्बन्धिराज्यम् एत्य महान् प्रहर्षः, पुनः नृपसुतानिधनं स्मृत्वा महान् विषादः (अस्ति)। हे दैव! यदि परैः अपहृतं राज्यं देव्याः च कुशलं स्यात् तर्हि भवता किं नाम न कृतम्॥ ५॥

**पदार्थः** – इदम् = इस, सम्बन्धिराज्यं = सम्बन्धी के राज्य में, एत्य = आकर, महान् = बहुत अधिक, प्रहर्षः = हर्ष हो रहा है, पुनः = फिर, नृपसुतानिधनं = राजकुमारी वासवदत्ता की मृत्यु को, स्मृत्वा = याद करके, महान् विषादः = अत्यधिक दुःख हो रहा है। हे दैव! = हे भाग्य!, यदि = अगर, परैः = दुश्मनों से, अपहृतं = छीना गया, राज्यं = राज्य, च देव्याः = और देवी वासवदत्ता विषयक, कुशलं = कुशलता, स्यात्= होती, तर्हि = तब तो, भवता = आपने, किं नाम न कृतं = क्या नहीं किया होता। अर्थात् सब कुछ किया होता॥ ५॥

**हिन्दी अर्थ** – सम्बन्धी महाराज उदयन के राज्य में आकर महान् हर्ष का अनुभव कर रहा हूँ, लेकिन जब राजकुमारी वासवदत्ता की याद आती है तो महान् दुःख की अनुभूति होती है। हे दैव! दुश्मन से छीना गया राज्य वापिस मिल गया वैसे ही यदि देवी वासवदत्ता का भी कुशल मिल जाता तो तुमने हमारा क्या भला नहीं किया होता? अर्थात् समस्त मनोकामनाएँ एक साथ पूरी हो जाती॥ ५॥

**व्याख्या** – **पर्यायपदानि** – इदम् = एतत्, सम्बन्धिराज्यं = जामातुः उदयनस्य राज्यम्, एत्य = प्राप्य, महान् = भूयान्, प्रहर्षः = आनन्दः वर्तते, पुनः = किञ्च, नृपसुतानिधनं = देव्याः वासवदत्तायाः मरणं, स्मृत्वा = चिन्तयित्वा, विषादः = दुःखं जायते। हे दैव! = हे विधे!, परैः = शत्रुभिः, अपहृतं = स्वाधीनीकृतं, राज्यं = वत्सराज्यं, इव देव्याः = वासवदत्तायाः, कुशलं = भद्रं स्यात्, तर्हि भवता = त्वया, किं नाम = क्षेमं, न = नहि, कृतं = विहितं भवेत्। वत्सराज्येन सहैव वासवदत्तायाः प्राप्तिरपि भवेत् तर्हि त्वस्माकं सर्वथाभीष्टं सिद्धं स्यादित्यर्थः॥५॥

**भावार्थः** – उदयनराज्यं समागत्याहमतीव प्रसन्नोऽस्मि, किन्तु वासवदत्तायाः मरणं चिन्तयित्वा खेदमनुभवामि। यदि दैवात् उदयनराज्यस्य पुनर्लाभेन सहैव वासवदत्ताऽपि सुरक्षिता मिलेत् तर्हि तु आनन्दातिरेकः स्यात्॥

**छन्दः** – पद्येऽस्मिन् वसन्ततिलका वृत्तमस्ति।

**व्याकरणम्** – एत्य – आ+इ+ल्यप्। नृपस्य सुता – नृपसुता तस्याः निधनम् नृपसुतानिधनम् (ष०त०)।

**कोशः** – देवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः इत्यमरः।

**प्रतीहारी** – एसो भट्टा, उपसप्पदु अय्यो। [एष भर्ता, उपसर्पत्वार्यः।]

**प्रतीहारी** – ये स्वामी हैं, आप पास में जाइये।

**काञ्चुकीयः** – [उपेत्य] जयत्वार्यपुत्रः।

**काञ्चुकीय** – [समीप जाकर] महाराज की जय हो।

**धात्री** – जेदु भट्टा। [जयतु भर्ता।]

**धात्री** – स्वामी की जय हो।

**राजा** – (सबहुमानम्) आर्य!

**राजा** – (सम्मान के साथ) आर्य!

**प्रसङ्गः** – प्रस्तुतेऽस्मिन् श्लोके महाराजोदयनः पूजनीय-महासेनस्य कुशलं पृच्छन्नाह –

**पृथिव्यां राजवंश्यानामुदयास्तमयप्रभुः।**
**अपि स राजा कुशली मया काङ्क्षितबान्धवः॥ ६॥**

**अन्वयः** – पृथिव्यां राजवंश्यानाम् उदयास्तमयप्रभुः, मया काङ्क्षितबान्धवः स राजा अपि कुशली?॥ ६॥

**पदार्थः** – पृथिव्यां = भूमण्डल पर, राजवंश्यानां = राजवंश में उत्पन्न राजाओं के, उदयास्तमयप्रभुः = उत्कर्ष और अपकर्ष करने में समर्थ, मया = मुझ, उदयन के साथ, काङ्क्षितबान्धवः = बन्धुत्व की इच्छा रखने वाले, सः = वे प्रसिद्ध, राजा = महासेन जी, अपि कुशली = सकुशल तो हैं?॥६॥

**हिन्दी अर्थ** – समस्त भूमण्डल में राजवंश में उत्पन्न राजाओं के उत्थान एवं पतन करने में सक्षम तथा मुझसे बन्धुत्व की इच्छा रखने वाले महाराज प्रद्योत सकुशल तो हैं?

**व्याख्या – पर्यायपदानि** – पृथिव्यां = धरायां, भूमौ, राजवंश्यानां = राजवंशोद्भवानां नृपाणाम्, उदयास्तमयप्रभुः = उत्कर्षापकर्षसमर्थः, मया = उदयनेन, काङ्क्षितबान्धवः = अभीष्टबन्धुभावः, स राजा = महाराजः प्रद्योतः, अपि कुशली = कुशलयुक्तो वर्तते किम्?॥६॥

**भावार्थः** – महाराजोदयनः महासेनस्य सकाशादगतं काञ्चुकीयं महाराजस्य कुशलवृत्तान्तं पृच्छन्नाह – पृथिव्यां नृपकुलोत्पन्नां नृपाणामुत्कर्षापकर्षसमर्थः ममाभीष्ट बन्धुभावः महासेन प्रद्योतः कुशलयुक्तो वर्तते किम्?॥६॥

**छन्दः** – अनुष्टुप् छन्दो वर्तते।

**अलङ्कारः** – श्लोकेऽस्मिन् परिकरालङ्कारोऽस्ति। तल्लक्षणं यथा –

'अलङ्कारः परिकरः साभिप्राये विशेषणे'। चन्द्रालोके – ५-३९।

**व्याकरणम्** – वंशे भवाः वंश्या इति वंश्+यत्। राज्ञां वंश्याः (ष०त०) तेषां – राजवंश्यानाम्। उदयश्च अस्तमयश्च उदयास्तमयौ (द्वन्द्वः) तयोः प्रभुः (ष०त०) उदयास्तमयप्रभुः। काङ्क्षितं बान्धवं येन सः (ब०व्री०) काङ्क्षितबान्धवः।

**काञ्चुकीयः** – अथ किम्? कुशली महासेनः। इहापि सर्वगतं कुशलं पृच्छति।

**काञ्चुकीय** – और क्या? महासेन जी कुशलपूर्वक हैं। उन्होंने भी आप सब का कुशल मंगल पूछा है।

**राजा** – (आसनादुत्थाय) किमाज्ञापयति महासेनः?

**राजा** – (अपने आसन से उठकर) महासेन जी की क्या आज्ञा है?

**काञ्चुकीयः** – सदृशमेतत् वैदेहीपुत्रस्य। नन्वासनस्थेनैव भवता श्रोतव्यो महासेनस्य सन्देशः।

**काञ्चुकीय** – यह शिष्टता (सम्मान में आसन से उठना) वैदेहीपुत्र (आप) के अनुरूप ही है। किन्तु आप आसन पर बैठे-बैठे ही महासेन जी का सन्देश सुनें।

**राजा** – यदाज्ञापयति महासेनः। (उपविशति)

**राजा** – महासेनजी की जो आज्ञा। (बैठ जाता है।)

**काञ्चुकीयः** – दिष्ट्या परैरपहृतं राज्यं पुनः प्रत्यानीतमिति। कुतः –

**काञ्चुकीय** – भाग्य से दुश्मनों द्वारा छीना गया राज्य फिर से प्राप्त हो गया है। क्योंकि –

**प्रसङ्ग** – प्रकृतेऽस्मिन् पद्ये काञ्चुकीयः महाराजोदयनं सोत्साहैः जनैरेव राज्यलक्ष्मीरूपभुज्यत इति कथयन्नाह–

**कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते।**
**प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेवोपभुज्यते॥ ७॥**

**अन्वयः** – ये कातराः अपि वा अशक्ताः तेषु उत्साहः न जायते। हि प्रायेण नरेन्द्रश्रीः सोत्साहैः एव उपभुज्यते॥७॥

**पदार्थः** – ये = जो (लोग), कातराः = कायर, अपि वा = अथवा, अशक्ताः = असमर्थ हैं, तेषु = उनमें,

उत्साहः = साहस, न जायते = नहीं होता है। हि = क्योंकि, प्रायेण = बहुधा, प्रायः, नरेन्द्रश्रीः = राज्यलक्ष्मी, सोत्साहैः = उत्साही लोगों के द्वारा, एव = ही, उपभुज्यते = भोगी जाती है॥७॥

**हिन्दी अर्थ** – जो लोग कायर (डरपोक) अथवा असमर्थ होते हैं, उनमें कभी उत्साह होता ही नहीं है। किन्तु जो लोग उत्साहसम्पन्न होते हैं उन्हीं के द्वारा ही राज्यलक्ष्मी का उपभोग किया जाता है॥ ७॥

**व्याख्या – पर्यायपदानि** – ये = (जनाः) कातराः = अधीराः, भीरवः, अपि वा = अथवा, अशक्ताः = असमर्थाः, तेषु = जनेषु, उत्साहः = साहसः, न जायते = नहि उत्पद्यते। हि = निश्चयेन, प्रायः = बहुधा, नरेन्द्रश्री = राज्यलक्ष्मीः, विजयश्रीः, सोत्साहैः = उत्साहयुक्तैः, एव = जनैः, उपभुज्यते = आस्वाद्यते॥ ७॥

**भावार्थः** – ये अधीराः निर्बलाः वा भवन्ति तेषु उत्साहो न उत्पद्यते। यतः प्रायेण उत्साहसम्पन्नैरेव जनैः (नरेन्द्रैः) राज्यलक्ष्मीः उपभुज्यते। अत एवोक्तं वर्तते ''साहसे श्रीर्वसतीति''॥ ७॥

**छन्दः** – श्लोकेऽस्मिन् अनुष्टुब्वृत्तमस्ति।

**अलङ्कारः** – अस्मिन् पद्ये अर्थान्तरन्यासालङ्कारोऽस्ति।

**कोशः** – लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया इत्यमरः।

**व्याकरणम्** – नराणाम् इन्द्रः नरेन्द्रः तस्य श्रीः नरेन्द्रश्रीः। न शक्तः अशक्तः ते (नञ्) उत्साहेन सहितः सोत्साहः तैः सोत्साहैः।

**राजा** – आर्य! सर्वमेतन्महासेनस्य प्रभावः। कुतः –

**राजा** – आर्य! यह सब तो महासेनजी का ही प्रभाव है। क्योंकि –

**प्रसङ्गः** – प्रकृतेऽस्मिन् श्लोके राजोदयनः महासेनस्य माहात्म्यम् आत्मीयताञ्च वर्णयन्नाह –

**अहमवजितः पूर्वं तावत् सुतैः सह लालितो**
**दृढमपहृता कन्या भूयो मया न च रक्षिता।**
**निधनमपि च श्रुत्वा तस्यास्तथैव मयि स्वता**
**ननु यदुचितान्वत्सान् प्राप्तुं नृपोऽत्र हि कारणम्॥८॥**

**अन्वयः** – पूर्वं तावत् अहम् अवजितः, सुतैः सह लालितः, मया कन्या दृढम् अपहृता भूयः च न रक्षिता। तस्याः निधनं श्रुत्वा अपि मयि तथैव स्वता, ननु उचितान् वत्सान् प्राप्तुं यत्। अत्र हि नृपः कारणम्॥८॥

**पदार्थः** – पूर्वं तावत् = पहले, अहं = मैं राजा उदयन, अवजितः = जीत लीया गया, सुतैः = पुत्रों के साथ, लालितः = पाला गया, मया = मैंने, कन्या = वासवदत्ता का, दृढं = दृढतापूर्वक, अपहृता = अपहरण किया, भूयः च = और फिर, न रक्षिता = उसकी रक्षा नहीं की। तस्याः = उसका, निधनम् अपि = मृत्यु को भी, श्रुत्वा = सुनकर, मयि = मुझमें, तथैव = उसी प्रकार, पूर्ववत् ही, स्वता = आत्मीयता बनायी रखी है। ननु = निश्चित् ही, उचितान् = पूर्वोपभुक्त, वत्सान् = वत्सराज्य को, प्राप्तुं = प्राप्त करने में, अत्र = इस विषय में, नृपः = महासेन जी, हि = निश्चय ही, कारणं = कारणभूत हैं।

**हिन्दी अर्थ** – पहले ही मुझे जीतकर अपने पुत्रों के साथ (पुत्रवत्) मेरा पालन किया। मैंने उनकी पुत्री वासवदत्ता का दृढतापूर्वक हरण किया और उसकी रक्षा भी न कर सका। अपनी पुत्री की मृत्यु का समाचार सुनकर भी वे मेरे साथ आत्मीयता का व्यवहार कर रहे हैं। निश्चित् ही मेरे पूर्वोपभुक्त वत्सराज्य को पुनः प्राप्त करने में महाराज महासेन ही मूल कारण हैं॥ ८॥

**व्याख्या – पर्यायपदानि** – पूर्वं तावत् = पुरा गजाऽऽखेट प्रसङ्गे, अहम् = उदयनः, अवजितः = पराजित्य गृहीतः, सुतैः = स्वपुत्रैः, सह = साकं, लालितः = पालितः, मया = उदयनेन, कन्या = राजकुमारी वासवदत्ता, दृढम् = बलपूर्वकम्, अपहृता = अपनीता, भूयः = पुनः, न च = नैव, रक्षिता = परिपालिता। तस्याः = वासवदत्तायाः, निधनं = मरणं, श्रुत्वा = निशम्यापि, मयि = उदयने, तथा एव = पूर्ववदेव, स्वता = आत्मीयता वर्तते।

ननु = निश्चयेन, उचितान् = मम राज्यभूतान्, वत्सान् = वत्सदेशान्, प्राप्तुं = स्वाधीनीकर्तुम्, अत्र = अस्मिन् जयलाभाविषये, नृपः = महाराज महासेनः, हि = एव, = कारणं = हेतुरस्ति ॥८ ॥

**भावार्थः** – उदयनः महासेनस्य औदार्यम् आत्मीयताञ्च प्रकटयन्नाह – महाराजमहासेनेन पूर्वं निगृहीय स्वपुत्रवत् पालितोऽस्मि, मया तस्य पुत्र्याः वासवदत्तायाः हठादपहरणं कृतं न तु रक्षणम्। तस्याः मृत्योरनन्तरमपि तेषां मयि तादृश्येव आत्मीयता वर्तते। पुनश्च अरिभिः हृतस्य मम वत्सराज्यस्य पुनः प्राप्तावपि महाराजस्यैव मुख्या भूमिका विद्यते। नास्त्यत्र सन्देहावसर इत्यर्थः॥ ८ ॥

**छन्दः** – पद्येऽस्मिन् हरिणीवृत्तं वर्तते। तल्लक्षणमिदमाह –

न समरसलागाषड्वेदैः हयैर्हरिणी मता।

**अलङ्कारः** – अस्मिन् श्लोके काव्यलिङ्गम् अलङ्कारोऽस्ति।

**व्याकरणम्** – अवजितः – अव+जि+क्त। स्वता – स्वस्य भावः स्वता, स्व+तल्+टाप्।

**कोशः** – हेतुर्ना कारणं बीजम् इत्यमरः।

**काञ्चुकीयः** – एष महासेनस्य सन्देशः। देव्याः सन्देशमिहात्र भवती कथयिष्यति।

**काञ्चुकीय** – यह महासेनजी का सन्देश है। महारानीजी का सन्देश पूज्य धाय (वसुन्धरा) कहेंगी।

**राजा** – हा! अम्ब!

**राजा** – हाय! माँ! –

**प्रसङ्ग** – प्रकृतेऽस्मिन् पद्ये राजोदयनः वासवदत्तायाः मातुः महाराज्ञ्याः अङ्गारवत्याः कुशलं पृच्छन्नाह –

**षोडशान्तःपुरज्येष्ठा पुण्या नगरदेवता।**
**मम प्रवासदुःखार्ता माता कुशलिनी ननु॥९ ॥**

**अन्वयः** – षोडशान्तःपुरज्येष्ठा पुण्या नगरदेवता मम प्रवासदुःखार्ता माता कुशलिनी ननु?॥९ ॥

**पदार्थः** – षोडशान्तःपुरज्येष्ठा = अन्तःपुर की सोलह रानियों में प्रधान, पुण्या = पावन चरित्रवाली, नगरदेवता = नगरवासियों द्वारा देवी तुल्य पूजनीया, मम = मेरे, प्रवासदुःखार्ता = देशान्तर निवास के दुःख से पीड़ित, माता = महारानी अंगारवती जी, कुशलिनी ननु = सकुशल तो हैं॥९ ॥

**हिन्दी अर्थ** – अन्तःपुर की सोलह रानियों में प्रमुख, पुण्यशीला, नगर की देवी के रूप में पूजनीया तथा मेरे वियोग से दुःखित माताजी महारानी अंगारवती जी सकुशल तो हैं न?॥ ९ ॥

**व्याख्या – पर्यायपदानि** – षोडशान्तःपुरज्येष्ठा = षोडशपत्नीषुमुख्यतमा, पुण्या = पवित्रचरित्रा, नगरदेवता = नगरदेवीतुल्या पूज्या, मम = उदयनस्य, प्रवासदुःखार्ता = देशान्तरवासस्य दुःखेन पीडिता, माता = अम्बा अङ्गारवती, कुशलिनी ननु = क्षेमयुक्ताऽस्ति खलु॥९ ॥

**भावार्थः** – महाराजप्रद्योतस्य षोडशपत्नीषु प्रधानभूता, पवित्रशीला, नगरदेवीवपूज्या पुनश्च ममोदयनस्य देशान्तरप्रवासपीडिता मातृकल्पा देवी अङ्गारवती क्षेमयुक्ताऽस्ति किल?॥९ ॥

**छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दो वर्तते।

**कोशः** – जनयित्री प्रसूर्माता जननी इत्यमरः।

**व्याकरणम्** – षोडशान्तः पुरज्येष्ठा – षोडशसंख्यकानि अन्तःपुराणि इति, तत्र ज्येष्ठा (म०लो०)। नगरदेवता – नगरस्य देवता (ष०त०)। प्रवासदुःखार्ता – प्रवासस्य दुःखम् (ष०त०) तेन आर्ता। प्रवासः – प्र+वस्+घञ्। कुशलिनी – कुशल+इनि+ङीप्।

**धात्री** – अरोआ भट्टिणी भट्टारं सव्वगदं कुशलं पृच्छदि। [अरोगा भट्टिनी भर्तारं सर्वगतं कुशलं पृच्छति।]

**धाय** – महारानीजी कुशल हैं, उन्होंने आप सबका कुशल-मंगल पूछा है।

**राजा** – सर्वगतं कुशलमिति? अम्ब! ईदृशम् कुशलम्।

**राजा** – सबकी कुशलता? माताजी! कुशल तो ऐसा ही है।

**धात्री** – मा दाणिं भट्टा आदिमत्तं सन्तप्पिदुं। [मेदानीं भर्तातिमात्रं सन्तप्तुम्।]

**धाय** – स्वामी, अब आप अधिक सन्ताप न करें।

**काञ्चुकीयः** – धारयत्वार्यपुत्रः उपरताऽप्यनुपरता महासेनपुत्री एवमनुकम्प्यमानार्यपुत्रेण। अथवा–

**काञ्चुकीय**– आर्यपुत्र धैर्य धारण करे। आपके द्वारा इस प्रकार स्मरण की जाने वाली महासेन की पुत्री (वासवदत्ता) मर कर भी नहीं मरी। अथवा –

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये काञ्चुकीयः दृष्टान्तमाध्यमेन शोकसंतप्तमुदयनं सान्त्वयन् जीवनस्य क्षणभङ्गुरतां निर्दिशति –

**कः कं शक्तो रक्षितुं मृत्युकाले रज्जुच्छेदे के घटं धारयन्ति।**
**एवं लोकस्तुल्यधर्मो वनानां काले-काले छिद्यते रुह्यते च॥ १०॥**

**अन्वयः** – मृत्युकाले कः कं रक्षितुं शक्तः? रज्जुच्छेदे के घटं धारयन्ति? एवं वनानां तुल्यधर्मः लोकः काले–काले छिद्यते रुह्यते च॥१०॥

**पदार्थः** – मृत्युकाले = मरने के समय में, कः = कौन, कं = किसको, रक्षितुं = बचाने में, शक्तः = समर्थ हो सकता है?, रज्जुच्छेदे = रस्सी के टूटने पर, के = कौन, घटम् = घड़े को, धारयन्ति = गिरने से रोक सकते हैं? एवम् = इसी प्रकार, लोकः = मनुष्य, वनानां = जंगलों के, तुल्यधर्मः = समानधर्म वाला है, काले–काले = समय–समय पर, छिद्यते = काटा जाता है, च = और, रुह्यते = फिर से उत्पन्न हो जाता है।

**हिन्दी अर्थ** – मृत्यु के समय में कौन किसको बचा सकता है? रस्सी के टूटने पर (उससे बँधे हुये) घड़े को नीचे गिरने से कौन रोक सकता है? इसी तरह मानव मात्र का जीवन भी वन के समान है जो समय–समय पर (बार–बार) काटा जाता है और बार–बार उत्पन्न हो जाता है, ठीक उसी प्रकार मनुष्य भी बार–बार जन्म लेता है और मरता है।

**व्याख्या – पर्यायपदानि**– मृत्युकाले = मरणसमये, कः = जनः, कं = जनं, रक्षितुं = त्रातुं, शक्तः = समर्थः? रज्जुच्छेदे = गुणभङ्गे सति, के = पुरुषाः, घटं = कलशं, धारयन्ति = ग्रहीतुं शक्नुवन्ति? एवम् = इत्थं, वनानाम् = अरण्यानां, तुल्यधर्मः = समानस्वभावः। लोकः = जनः, काले–काले = समये–समये, छिद्यते = नश्यति, रुह्यते च = उत्पद्यते च॥१०॥

**भावार्थः** – मृत्युकाले प्राप्ते सति कोऽपि जनः प्रियजनं त्रातुं समर्थो न भवति। रज्जुच्छेदे सति तत्सम्बद्धं पतन्तं घटं रक्षितुं कोऽपि समर्थो नास्ति। अतः लोकोऽपि अरण्यतरुरिव कालानुसारेण नश्यति–उत्पद्यते च।

**छन्दः** – पद्येऽस्मिन् शालिनीवृत्तमस्ति।

**अलङ्कारः** – अस्मिन् श्लोके दृष्टान्तालङ्कारो वर्तते। तल्लक्षणमिदं –

'दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्।'

**कोशः** – शुल्वं वराटकः स्त्री तु रज्जुस्त्रिषु वटी गुणः इत्यमरः।

**व्याकरणम्** – रज्जुच्छेदे – रज्ज्वाः छेदः तस्मिन् (ष०त०)। छिद्यते – छिद्+लट्+ते। मृत्योः कालः मृत्युकालः तस्मिन् (ष०त०)। तुल्यः धर्मः यस्य सः (बहु०)।

**राजा** – आर्य! मा मैवम्।

**राजा** – आर्य! ऐसा मत कहिये, मत कहिये –

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये जन्म-जन्मान्तरेष्वपि वासवदत्तां विस्मर्तुं न शक्नोम्यहमिति वर्णयन्नाहोदयनः –

**महासेनस्य दुहिता शिष्या देवी च मे प्रिया।**
**कथं सा न मया शक्या स्मर्तुं देहान्तरेष्वपि॥ ११ ॥**

**अन्वयः** – महासेनस्य दुहिता मे शिष्या प्रिया देवी च, देहान्तरेषु अपि सा मया स्मर्तुं कथं न शक्या? ॥११ ॥

**पदार्थः** – महासेनस्य = महाराज प्रद्योत की, दुहिता = पुत्री, मे = मुझ उदयन की, शिष्या = छात्रा, प्रिया = प्रियतमा, देवी च = और राजमहिषी थी। देहान्तरेषु = दूसरे जन्म में, अपि = भी, सा = वासवदत्ता, मया = मेरे द्वारा, स्मर्तुं = याद करने के, कथं = किस कारण से, न शक्या = योग्य नहीं हैं? ॥११ ॥

**हिन्दी अर्थ** – महाराज प्रद्योत की पुत्री वासवदत्ता मेरी शिष्या और प्रिय रानी थी। मैं दूसरे जन्मों में भी उसे क्यों न याद करूँगा? अर्थात् जन्म-जन्मान्तर में भी याद करता रहूँगा ॥११ ॥

**व्याख्या – पर्यायपदानि** – महासेनस्य = प्रद्योतस्य, दुहिता = पुत्री, मे = मम उदयनस्य, शिष्या = छात्रा, प्रिया = प्राणेश्वरी, देवी = राजमहिषी च वासवदत्ता आसीत्। सा = वासवदत्ता, देहान्तरेषु = जन्मान्तरेषु, अपि, मया = उदयनेन स्मर्तुं = स्मरणं कर्तुं, कथं = केन कारणेन, न = नहि, शक्या = योग्या? अपि तु जन्मान्तरेष्वपि स्मर्तुं योग्या एव ॥११ ॥

**भावार्थः** – राजोदयनः कथयति यत् महाराजमहासेनस्य पुत्री वासवदत्ता मम शिष्या प्राणवल्लभा राजमहिषी चासीत्। अतः सा जन्मजन्मान्तरेष्वपि स्मरणीयाऽस्तीति भावः॥

**छन्दः** – अनुष्टुप् छन्दो वर्तते श्लोकेऽस्मिन्।

**अलङ्कारः** – पद्येऽस्मिन् परिकरालङ्कारोऽस्ति।

**कोशः** – सुता तु दुहिता पुत्री, कायो देहः क्लीबं पुंसोः स्त्रियां मूर्तिस्तनुस्तनूः, दयितं वल्लभं प्रियम् इति चामरः।

**व्याकरणम्** – दुहिता – दुह्+तृच्। देहान्तरेषु – अन्ये देहाः देहान्तराणि तेषु (मयूरव्यंसकः)। शिष्या – शास्+क्यप्+टाप्। प्रिया-प्री+क।

**धात्री** – आह भट्टिणी – उवरदा वासवदत्ता। मम वा महासेण्णसावा जादिसा गोवालअपालआ, तादिसो एव्व तुमं पुढमं एव्व अभिप्पेदो जामादु अत्ति। एदण्णिमित्त उजजइणिं आणीदो। अणग्गिसक्खिअं वीणाववदेसेण दिण्णा। अत्तणो चवलदाए अणिव्वुत्त विवाहमङ्गलो एव्व गदो। अहअ अह्मेहि तव अ वासवदत्ताए अ पडिकिदिं चिन्तफलआए आलिहिअ विवाहो णिव्वुन्तो। एसा चित्तफलआ तव सआसं पेसिदा। एदं पेक्खिअ णिव्वुदो होदि। [आह भट्टिनी – उपरता वासवदत्ता। मम वा महासेनस्य वा यादृशौ गोपालकपालकौ, तादृश एव त्वं प्रथममेवाभिप्रेतो जामातेति। एतन्निमित्तमुज्जयिनीमानीतः। अग्निसाक्षिकं वीणाव्यपदेशेन दत्ता। आत्मनश्चपलतयाऽनिर्वृतविवाहमङ्गल एव गतः। अथ चावाभ्यां तव च वासवदत्तायाश्च प्रतिकृतिं चित्रफलकायामालिख्य विवाहो निर्वृत्तः। एषा चित्रफलका तव सकाशं प्रेषिता। एतां प्रेक्ष्य निर्वृतो भव।]

**धाय** – महारानी जी ने कहा है कि वासवदत्ता मर गई है। मेरे और महाराज के लिए जैसे गोपालक और पालक हैं वैसे ही तुम हो, जो पहले दामाद मान लिये गये थे। इसी कारण तुमको उज्जयिनी में लाया गया था। अग्नि को साक्षी बनाये बिना ही वीणा (सिखाने) के बहाने वह तुम्हें दे दी गई थी लेकिन अपनी चपलता के कारण बिना विवाह संस्कार के ही तुम चले गये थे। तत्पश्चात् हम दोनों ने तुम्हारा और वासवदत्ता का चित्र एक चित्रपट पर बनवाकर विवाह कर दिया था। यह चित्रपट तुम्हारे पास भेजा है। इसे देखकर धैर्य धारण करो।

**राजा** – अहो! अतिस्निग्धमनुरूपं चाभिहतं तत्र भवत्या।

**राजा** – अहो! महारानी जी ने अत्यन्त स्नेहपूर्ण और अपने अनुरूप ही कहा है।

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये राजोदयनः देव्या अङ्गारवत्याः सन्देशमतिमहत्त्वपूर्णं मत्वा महाराज्ञ्याः औदार्यं वर्णयन्नाह –

**वाक्यमेतत् प्रियतरं राज्यलाभशतादपि।**
**अपराद्धेष्वपि स्नेहो यदस्मासु न विस्मृतः॥ १२॥**

**अन्वयः** – एतत् वाक्यं राज्यलाभशतात् अपि प्रियतरं यत् अपराद्धेषु अपि अस्मासु स्नेहः न विस्मृतः॥१२॥

**पदार्थः** – एतत् वाक्यं = महारानी जी का यह वाक्य, राज्यलाभशतात् = सैकड़ों राज्यों के लाभ से, अपि = भी, प्रियतरम् = अधिक प्रिय है, यत् = क्योंकि, अपराद्धेषु अपि = अपराधी होने पर भी, अस्मासु = हम पर, स्नेहः = वात्सल्य को, न = नहीं, विस्मृतः = भुलाया है॥१२॥

**हिन्दी अर्थ** – महारानीजी का यह वाक्य सैकड़ों राज्यों के लाभ से भी बढ़कर है। क्योंकि वासवदत्ता का हरण एवं उसकी रक्षा न करना जैसा अपराध किये जाने पर भी उन्होंने मुझ पर स्नेह को भुलाया नहीं है।

**व्याख्या – पर्यायपदानि** – एतत् वाक्यं = पूर्वोक्तवचनं, राज्यलाभशतात् = शतसंख्यकराज्यप्राप्तेः, अपि, प्रियतरम् = अभीष्टतरं, मनोहरतमं वा, यत् = यतः, अपराद्धेषु = वासवदत्तापरहणरूपापराधेषु अपि, अस्मासु = मादृशेषु, मयि उदयने वा, स्नेहः = वात्सल्यं, न = नहि, विस्मृतः = परित्यक्तः॥१२॥

**भावार्थः** – महादेव्याः अङ्गारवत्याः वचनम् मत्कृते शतसंख्यकराज्यप्राप्तेरपि प्रियतरमस्ति। यतोहि मादृशेषु अपराधिषु इदानीमपि पूर्ववदेव स्नेहं प्रकटयति॥१२॥

**छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दो विद्यते।

**कोशः** – अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम् इत्यमरः।

**व्याकरणम्** – प्रियतरं – प्रिय+तरप्। राज्यलाभशतात् – राज्यानां लाभः इति राज्यलाभः (ष०त०) तेषां शतं (ष०त०) राज्यलाभशतं, तस्मात् राज्यलाभशतात्।

**पद्मावती** – अय्यउत्त! चित्रगदं गुरुअणं पेक्खिअ अभिवादेहुं इच्छामि। [आर्यपुत्र! चित्रगतं गुरुजनं प्रेक्ष्याभिवादयितुमिच्छामि।]

**पद्मावती** – आर्यपुत्र! चित्र-स्थित गुरुजन को देखकर मैं अभिवादन करना चाहती हूँ।

**धात्री** – पेक्खदु पेक्खदु भट्टिदारिआ। [प्रेक्षतां प्रेक्षतां भर्तृदारिका।]

(चित्रफलकां दर्शयति।)

**धाय** – देखिये, राजकुमारीजी देखिये। (चित्रपट दिखलाती हैं।)

**पद्मावती** – (दृष्ट्वा आत्मगतं) हं! अदिसदिसा खु इअं अय्याए आवन्तिआए। (प्रकाशम्) अय्यउत्त! सदिसी खु इअं आय्याए?[हम्! अतिसदृशी खल्वियमार्याया अवन्तिकायाः। आर्यपुत्र! सदृशी खल्वियमार्यायाः?]

**पद्मावती** – (देखकर मन में) ओह! यह आर्या अवन्तिका से बहुत मिलती-जुलती है। (प्रकट में) आर्यपुत्र! क्या यह आर्या के समान ही है?

**राजा** – न सदृशी। सैवेति मन्ये। भोः! कष्टम्।

**राजा** – समान ही नहीं, यह वही है, मैं ऐसा मानता हूँ। हाय! कष्ट है –

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये राजोदयनः वासवदत्तायाः चित्रं दृष्ट्वा शोकं प्रकटयन्नाह –

**अस्य स्निग्धस्य वर्णस्य विपत्तिर्दारुणा कथम्।**
**इदं च मुखमाधुर्यं कथं दूषितमग्निना॥ १३॥**

**अन्वयः** – अस्य स्निग्धस्य वर्णस्य दारुणा विपत्तिः कथम्? इदं मुखमाधुर्यं च कथम् अग्निना दूषितम्?॥१३॥

**पदार्थः** – अस्य = इस (वासवदत्ता) के, स्निग्धस्य = सुन्दर, वर्णस्य = रूप की, दारुणा = कठोर, विपत्तिः = विपत्ति, कथं = कैसे हुई? इदम् = इस, मुखमाधुर्यं = मुख सौन्दर्य को, च = और, अग्निना = आग के द्वारा, कथं = कैसे, दूषितं = दूषित किया, जलाया?॥१३॥

**हिन्दी अर्थ** – इस सुन्दर रुप की यह दारुण स्थिति कैसे हुई? ऐसे मुख के सौन्दर्य को आग ने कैसे दूषित (नष्ट) किया?॥१३॥

**व्याख्या – पर्यायपदानि** – अस्य = पुरोवर्तमानस्य, स्निग्धस्य = मनोहरस्य, प्रीतिकरस्य वा, वर्णस्य = रूपस्य, दारुणा = कठोरा, विपत्तिः = विनाशरूपविपत्, कथं = केन प्रकारेण अभूत्? इदं च = एतञ्च, मुखमाधुर्यं = वदनसौन्दर्यं, कथं = केन हेतुना, अग्निना = वह्निना, दूषितं = कलुषीकृतम्।

**भावार्थः** – राजोदयनः चित्रफलकस्थां वासवदत्तामवलोक्य कष्टेन वदन्नस्ति यत् दैवेन एतादृशं मुखमाधुर्यं वह्निदाहरूपेण केन हेतुना विनष्टम्? एवं नैव करणीयमासीत्।

**छन्दः** – पद्येऽस्मिन् अनुष्टुप् छन्दो वर्तते।

**व्याकरणम्** – विपत्तिः – वि+पद्+क्तिन्। दारुणा – दारुण+अच्+टाप्। मुखमाधुर्यम् – मुखस्य माधुर्यमिति (ष०त०)।

**पद्मावती** – अय्यउत्तस्य पडिकिदिं पेक्खिअ जाणामि इअं अय्याए सदिसी ण वेत्ति। [आर्यपुत्रस्य प्रतिकृतिं प्रेक्ष्य जानामीयमार्यया सदृशी नवेति।]

**पद्मावती** – आर्यपुत्र! इस चित्र को देखकर मैं समझूँगी कि यह आर्या के समान है या नहीं।

**धात्री** – पेक्खदु पेक्खदु भट्टिदारिआ। [प्रेक्षतां प्रेक्षतां भर्तृदारिका।]

**धाय** – देखें, राजकुमारी जी! देखें।

**पद्मावती** – (दृष्ट्वा) अय्यउत्तस्स पडिकिदीए सदिसदाए जाणामि अइं अय्याए सदिसी त्ति। [आर्यपुत्रस्य प्रतिकृत्याः सदृशतया जानामीयमायार्याः सदृशीति।]

**पद्मावती** – (देखकर) आर्यपुत्र के चित्र की समानता देखकर मैं समझती हूँ कि यह भी आर्या के समान ही है।

**राजा** – देवि! चित्रदर्शनात् प्रभृति प्रहृष्टोद्विग्नामिव त्वां पश्यामि।

**राजा** – देवी! चित्र देखने के समय से मैं तुम्हें प्रसन्न और उद्विग्न (युक्पथ) सी देख रहा हूँ। क्या कारण है?

**पद्मावती** – अय्यउत्त! इमाए पडिकिदिए सदिसी इस एव्व पडिवसदि। [आर्यपुत्र! अस्याः प्रतिकृत्याः सदृशीहैव प्रतिवसति।]

**पद्मावती** – आर्यपुत्र! इस चित्र की जैसी एक स्त्री तो मेरे पास रहती है।

**राजा** – किं वासवदत्तायाः?

**राजा** – क्या वासवदत्ता की जैसी?

**पद्मावती** – आम्। (आम्।)

**पद्मावती** – हाँ।

**राजा** – तेन हि शीघ्रमानीयताम्।

**राजा** – तो उसे शीघ्र ले आओ।

**पद्मावती** – अय्यउत्त! मम कण्णभावे केणवि ब्रह्मणेण मम भइणिअ त्ति ण्णासो णिक्खित्तो। पोसदिभत्तुआ परपुरुषदंसणं परिहरदि। ता अय्यं मए सह आअदं पेक्खिअ जाणदु अय्यउत्तो। [आर्यपुत्र! मम कन्याभावे केनापि ब्राह्मणेन मम भगिनिकेति न्यासो निक्षिप्तः। प्रोषितभर्तृका परपुरुषदर्शनं परिहरति। तदार्यां मया सहागतां प्रेक्ष्य जानात्वार्यपुत्रः।]

**पद्मावती** – आर्यपुत्र! जब मैं कुमारी थी तब किसी ब्राह्मण ने मेरी बहिन है ऐसा कहकर उसे मेरे पास न्यास (धरोहर) के रूप में रखा था। पति के परदेश में होने के कारण वह किसी दूसरे पुरुष का दर्शन नहीं करती है। इसलिए मेरे साथ आई हुई उस देवी को देखकर आर्यपुत्र जान लें (कि वह देवी वासवदत्ता है अथवा नहीं)।

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये राजोदयनः संसारेऽस्मिन् जनानां प्रायशः समरूपता भवतीति वर्णयन्नाह –

**राजा** – **यदि विप्रस्य भगिनी व्यक्तमन्या भविष्यति।**
**परस्परगता लोके दृश्यते रूपतुल्यता॥ १४॥**

**अन्वयः** – यदि विप्रस्य भगिनी व्यक्तम् अन्या भविष्यति। लोके परस्परगता रूपतुल्यता दृश्यते॥१४॥

**पदार्थः** – यदि = अगर, विप्रस्य = ब्राह्मण की, भगिनी = बहिन है, तब तो, व्यक्तं = निश्चित ही, अन्या = कोई दूसरी स्त्री, भविष्यति = होगी, लोके = संसार में, परस्परगता = एक दूसरे में, रुपतुल्यता = आपस में रूप की समानता, दृश्यते = देखी जाती है॥ १४॥

**हिन्दी अर्थ** – यदि वह ब्राह्मण की बहिन है तब तो अवश्य ही कोई दूसरी स्त्री होगी, क्योंकि संसार में बहुत लोगों की आकृति आपस में मिलती जुलती देखी जाती है॥१४॥

**व्याख्या** – **पर्यायपदानि** – यदि = चेत्, सा, विप्रस्य = ब्राह्मणस्य, भगिनी = स्वसा, तर्हि, व्यक्तं = स्पष्टम्, अन्या = अपरा, भविष्यति = वर्तिष्यते। लोके = संसारेऽस्मिन्, परस्परगता = परस्परत्वेन, रूपतुल्यता = आकृतिसादृश्यं, दृश्यते = अवलोक्यते॥१४॥

**भावार्थः** – राजोदयनः कथयति यद्यदि सा ब्राह्मणस्य भगिनी अस्ति, तर्हि निश्चयेनैषाऽन्या भवितुमर्हति। यतोहि विश्वस्मिन् विश्वे समरूपा बहवो जनाः भवन्त्येव। अर्थात् सा वासवदत्ता नास्तीत्यर्थः।

**छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दोऽस्ति।

**अलङ्कारः** – अर्थान्तरन्यासोऽलङ्कारोऽत्र वर्तते।

**व्याकरणम्** – परस्परं गता इति परस्परगता (द्वि०त०)। व्यक्तं – वि+अञ्ज्+क्त। रुपतुल्यता – रुपस्य तुल्यता (ष०त०) तुल्यस्य भाव तुल्यता – (तुल्य+तल्+टाप्)।

(प्रविश्य)

**प्रतीहारी** – जेदु भट्टा। एसो उज्जइणीओ ब्राह्मणो, भट्टिणीए हत्थे मम भइणिअति ण्णासो णिक्खित्तो, त पडिग्गहिदुं पडिहारं उवटिठदो। [जयतु भर्ता। एष उज्जयिनीयो ब्राह्मणः, भट्टिन्या हस्ते मम भगिनिकेति न्यासो निक्षिप्तः, तं प्रतिग्रहीतुं प्रतीहारमुपस्थितः।]

(प्रवेश करके)

**प्रतीहारी** – महाराज की जय हो। उज्जयिनी का एक ब्राह्मण महारानी के पास मैंने अपनी बहिन को धरोहर के रूप में रखा था, ऐसा कहते हुए उसे लेने के लिए मुख्यद्वार पर खड़ा है।

**राजा** – पद्मावति! किन्नु स ब्राह्मण?

**राजा** – पद्मावति! क्या (यह) वही ब्राह्मण हैं?

**पद्मावती** – होदव्वं।[भवितव्यम्]

**पद्मावती** – (वही) होना चाहिए।

**राजा** – शीघ्रं प्रवेश्यतामभ्यन्तरसमुदाचारेण स ब्राह्मणः।

**राजा** – गृहोचित शिष्टाचारपूर्वक उस ब्राह्मण को शीघ्र अन्दर प्रवेश कराओ।

**प्रतीहारी** – जं भट्टा आणवेदि। [यद् भर्ताज्ञापयति।] (निष्क्रान्ता)

**प्रतीहारी** – जो महाराज की आज्ञा। (चली जाती है।)

**राजा** – पद्मावति! त्वमपि तामानय।

**राजा** – पद्मावती! तुम भी उसे ले आओ।

**पद्मावती** – जं अय्यउत्तो आणवेदि। [यद् आर्यपुत्र आज्ञापयति।]

**पद्मावती** – जैसी आर्यपुत्र की आज्ञा।

(निष्क्रान्ता।) (चली जाती है।)

(ततः प्रविशति यौगन्धरायणः प्रतीहारी च।)

(तदनन्तर यौगन्धरायण और प्रतीहारी का प्रवेश।)

**यौगन्धरायणः** – भोः! (आत्मगतम्)।

**यौगन्धरायण** – ओह! (मन में)।

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये परिव्राजकवेषो यौगन्धरायणः चिन्तयति यत् मया राजमहिषीप्रच्छादनादिकं कार्यं नृपतेः हितार्थमेव कृतमस्ति पुनरपि अधुना मां दृष्ट्वा न जाने सो राजा किं कथयिष्यतीति प्रतिपादयन्नाह–

**प्रच्छाद्य राजमहिषीं नृपतेर्हितार्थं**
**कामं मया कृतमिदं हितमित्यवेक्ष्य।**
**सिद्धेऽपि नाम मम कर्मणि पार्थिवोऽसौ**
**किं वक्ष्यतीति हृदयं परिशङ्कितं मे॥ १५॥**

**अन्वयः** – मया नृपतेः हितार्थं राजमहिषीं प्रच्छाद्य इदं हितम् इति अवेक्ष्य कामं कृतं। मम कर्मणि सिद्धे अपि असौ पार्थिवः किं वक्ष्यति, इति मे हृदयं परिशङ्कितम्॥१५॥

**पदार्थः** – मया = मैंने, नृपतेः = राजा के, हितार्थं = हित के लिये, राजमहिषीं = महारानी वासवदत्ता को, प्रच्छाद्य = छुपाकर, इदं = यह, हितं = लाभकारी है, इति = इस प्रकार, अवेक्ष्य = विचार करके, कामम् = अपनी इच्छा से, कृतं = किया। मम = मुझ यौगन्धरायण के, कर्मणि = कार्य के, सिद्धे = सफल होने पर, अपि = भी, असौ = यह, पार्थिवः = राजा उदयन, किं = क्या, वक्ष्यति = कहेगा, इति = इस कारण से, मे = मेरा, हृदयं = चित्त, परिशङ्कितं = शङ्कालु हो रहा है, सन्देह युक्त हो रहा है॥१५॥

**हिन्दी अर्थ** – मैंने राजा (उदयन) के हित के लिए महारानी (वासवदत्ता) को छुपाकर, इसी में उनका भला है यह सोचकर ही यह कार्य किया। यद्यपि मेरा कार्य सफल भी हो गया, फिर भी 'राजा क्या कहेंगे' यह सोचकर मेरा हृदय भयभीत हो रहा है॥१५॥

**व्याख्या – पर्यायपदानि** – मया = यौगन्धरायणेन, नृपतेः = उदयनस्य, हितार्थं = कल्याणार्थं, राजमहिषीं = महाराज्ञीं वासवदत्तां, प्रच्छाद्य = संगोप्य, इदं = पद्मावत्या सह परिणयकार्यं, हितं = लाभदायकम्, इति = एवम्, अवेक्ष्य = विचार्य, कामं = स्वैरं, कृतं = सम्पादितं, मम = यौगन्धरायणस्य, कर्मणि = कार्ये, सिद्धे = सफले, जातेऽपि, नाम असौ पार्थिवः = महाराजोदयनोऽयं, किं, वक्ष्यति = किं कथयिष्यति, इति = इत्थं, मे = मम, हृदयं = स्वान्तं, परिशङ्कितं = शङ्कायुक्तं, भीतं वा वर्तते।

**भावार्थः** – यद्यपि मया महाराजोदयनस्य हितार्थमेव महाराज्याः गोपनादिकं सर्वमपि स्वैरं कृतम्। विचारितेऽस्मिन् कार्ये सफलताऽपि प्राप्ता पुनरपि न जाने किं कथयिष्यति महाराजः इति विचिन्त्य मनसि भयमनुभवन्नस्मि॥१५॥

**छन्दः** – पद्येऽस्मिन् वसन्ततिलका वृत्तमस्ति।

**कोशः** – स्वान्तं हृन्मानसं मनः, राज्ञिराट् पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः इति चामरः।

**व्याकरणम्** – नृणां पतिः नृपतिः तस्य नृपतेः। (ष०त०)। राज्ञः महिषी राजमहिषी (ष०त०)। हितार्थं – हिताय इदम् इति (च०त०) पार्थिवः – पृथिव्याः ईश्वरः इति, पृथिवी+घञ्। अवेक्ष्य – अव+ईक्ष्+ल्यप्।

**प्रतीहारी** – ऐसा भट्टा। अवसप्पदु अय्यो। [एष भर्ता। उपसर्पत्वार्यः।]

**प्रतीहारी** – ये महाराज है। आप पास में जाइये।

**यौगन्धरायणः** – (उपसृत्य)। जयतु, भवान् जयतु।

**यौगन्धरायणः** – (पास में जाकर) जय हो आपकी जय हो।

**राजा** – श्रुतपूर्व इव स्वरः। भो ब्राह्मण! किं भवतः स्वसा पद्मावत्या हस्ते न्यास इति निक्षिप्ता?

**राजा** – यह स्वर तो पहले सुना हुआ लग रहा है। हे ब्राह्मण! क्या आपकी बहिन पद्मावती के पास धरोहर के तौर पर रखी हुई है?

**यौगन्धरायणः** – अथ किम्?

**यौगन्धरायण** – और क्या?

**राजा** – तेन हि त्वर्यतां त्वर्यतामस्य भगिनिका।

**राजा** – तब तो शीघ्रातिशीघ्र इसकी बहिन को लाया जावे।

**प्रतीहारी** – जं भट्टा आणेवदि। [यद् भर्ताज्ञापयति।] (निष्क्रान्ता)

प्रतीहारी – जो महाराज की आज्ञा। (चली जाती है।)

(ततः प्रविशति पद्मावती आवन्तिका प्रतीहारी च।)

(तदनन्तर पद्मावती आवन्तिका और प्रतीहारी का प्रवेश।)

**पद्मावती** – एदु एदु अय्या! पिअं दे णिवेदेमि। [एत्वेत्वार्या। प्रियं ते निवेदयामि।]

**पद्मावती** – आइये, आइये आर्या! मैं आपको प्रियवचन निवेदन कर रही हूँ।

**आवन्तिका** – किं किं। [किं किम्?]

**आवन्तिका** – क्या? क्या?

**पद्मावती** – भादा दे आअदो। [भ्राता ते आगतः।]

**पद्मावती** – आपके भाई आये हैं।

**आवन्तिका** – दिट्ठिआ इदाणिं पि सुमरदि। [दिष्ट्येदानीमपि स्मरति।]

**आवन्तिका** – सौभाग्य से अभी भी याद कर रहे हैं।

**पद्मावती** – (उपसृत्य) जेदु अय्यउत्तो। एसो ण्णासो। [जयत्वार्यपुत्रः। एषः न्यासः।]

**पद्मावती** – (पास में जाकर) आर्यपुत्र की जय हो। यह धरोहर है।

**राजा** – निर्यातय पद्मावति! साक्षिमन्न्यासो निर्यातयितव्यः। इहात्रभवान् रैभ्यः अत्र भवती चाधिकरणं भविष्यतः।

**राजा** – पद्मावती! धरोहर (न्यास) को लौटा दो। साक्षी (गवाह) के सामने धरोहर लौटानी चाहिए। इसमें पूज्य रैभ्य और पूज्या वसुन्धरा साक्षी होंगे।

**पद्मावती**– अय्य! णीअदा दाणिं अय्या। [आर्य! नीयतामिदानीमार्या।]

पद्मावती – आर्य! अब आप आर्या को ले जायें।

**धात्री** – (आवन्तिकां निर्वर्ण्य) अम्मो। भट्टिादारिआ वासवदत्ता! [अम्मो! भर्तृदारिका वासवदत्ता!]

**धाय** – (आवन्तिका को ध्यान से देखकर) अरे! यह तो राजकुमारी वासवदत्ता है।

**राजा** – कथं महासेनपुत्री? देवि! प्रविश त्वमभ्यन्तरं पद्मावत्या सह।

**राजा** – क्या महासेनजी की पुत्री? देवी! तुम पद्मावती के साथ अन्दर चलो।

**यौगन्धरायणः** – न खलु न खलु प्रवेष्टव्यम्। मम भगिनी खल्वेषा।

**यौगन्धरायण** – नहीं – नहीं अन्दर नहीं जाना चाहिए। यह तो मेरी बहिन है।

**राजा** – किं भवानाह? महासेनपुत्री खल्वेषा।

**राजा** – आपने क्या कहा? यह निश्चित ही महासेनजी की पुत्री है।

**यौगन्धरायणः** – भो राजन्!

**यौगन्धरायण** – हे राजन्!

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये यौगन्धरायणः उदयनं भरतकुलोत्पन्नानां राज्ञां राजधर्मं स्मारयन्नाह –

**भारतानां कुले जातो विनीतो ज्ञानवाञ्छुचिः।**
**तन्नार्हसि बलाद्धर्तुं राजधर्मस्य देशिकः॥१६॥**

**अन्वयः** – भारतानां कुले जातः, विनीतः ज्ञानवान् शुचिः राजधर्मस्य देशिकः। तद् बलात् हर्तुं न अर्हसि॥१६॥

**पदार्थः** – भारतानां =भरतवंशी राजाओं (पाण्डवों) के, कुले = वंश में, जातः = उत्पन्न, विनीतः = विनम्र, ज्ञानवान् = ज्ञानयुक्त, शुचिः = पुनीतचरित्रयुक्त, राजधर्मस्य = राजधर्म के, देशिकः = उपदिष्टा हैं। तत् = इसलिए, बलात् = बलपूर्वक, हर्तुं = हरण करने के लिए, न अर्हसि = योग्य नहीं हैं॥१६॥

**हिन्दी अर्थ** – महाराज! आप भरतवंशी राजाओं के वंश में जन्मप्राप्त विनम्र, ज्ञानी, पवित्रचरित्र वाले एवं राजधर्म के प्रवर्तक आचार्य हैं। इसलिए (किसी दूसरे की धरोहर) मेरी बहिन को बलपूर्वक हरण करने के योग्य नहीं है।

**व्याख्या – पर्यायपदानि** – भारतानां = भरतकुलोत्पन्नानां, नृपाणां, कुले = वंशे, जातः = समुत्पन्नः, विनीतः = विनम्रः, सुसंस्कारितः वा, ज्ञानवान् = ज्ञानी, शुचिः = पुनीतचरितः, राजधर्मस्य = प्रजापालक कर्तव्यस्य, देशिकः = उपदेष्टा, प्रवर्तक आचार्यश्च, तत् = तस्मात् कारणात्, बलात् = बलपूर्वकं हठात् वा, इमां मम भगिनीं, हर्तुं = नेतुं, न अर्हसि = योग्यो नासि॥१६॥

**भावार्थः** – संन्यासी वेषो यौगन्धरायणः उदयनं स्मारयति यत् राजन्! भवान् भरतवंशीयो विनम्रो विद्वान् शुद्धचरितो राजधर्मस्य प्रवर्तकाचार्यश्चास्ति। अतः उपयुक्तैर्गुणैर्भवताऽन्यस्य न्यासस्य (मम भगिन्याः) बलपूर्वकं हरणमुचितं न स्यादितिभावः॥१६॥

**छन्दः** – अस्मिन् पद्ये अनुष्टुप् छन्दोऽस्ति।

**अलङ्कारः** – श्लोकेऽस्मिन् परिकरकाव्यलिङ्गालङ्कारौ स्तः।

**विशेषः** – विष्णुपुराण के अनुसार उदयन का जन्म भरतवंश में अभिमन्यु से पच्चीसवीं पीढ़ी में हुआ था।

**व्याकरणम्** – भारतानाम् – भरतस्य गोत्रापत्यानि पुंमासः भारताः, तेषाम्। देशिकः – दृश्यते इति देशः, देशेन आचरति इति देश+ठक्। विनीतः – वि+नी+क्त। ज्ञानवान् – ज्ञान+मतुप्। हर्तुं – हृ+तुमुन्।

**राजा** – भवतु, पश्यामस्तावद्रूपसादृश्यम्। संक्षिप्यतां जवनिका।

**राजा** – अच्छा तो रूप (आकृति) की समानता देखते हैं। (घूँघट हटाइये।)

**यौगन्धरायणः** – जयतु स्वामी।

**यौगन्धरायण** – महाराज की जय हो।

**वासवदत्ता** – जेदु अय्यउत्तो। (जयत्वार्यपुत्रः।)

वासवदत्ता – आर्यपुत्र की जय हो।

**राजा** – अये! असौ यौगन्धरायणः इयं महासेनपुत्री।

**राजा** – अरे! यह यौगन्धरायण और यह महासेन जी की पुत्री वासवदत्ता!

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये राजोदयनः महासेनपुत्रीं साक्षाद् विलोक्य आश्चर्यान्वितो भूत्वा कथयति –

**किन्नु सत्यमिदं स्वप्नः सा भूयो दृश्यते मया।**
**अनयाऽप्येवमेवाहं दृष्ट्या वञ्चितस्तदा॥ १७॥**

**अन्वयः** – इदं किं नु सत्यं स्वप्नः वा, मया सा भूयः दृश्यते। तदा दृष्ट्या अपि अनया अहम् एवम् एव वञ्चितः॥१७॥

**पदार्थः** – इदं = यह, किं = क्या, नु = प्रश्नार्थ, सत्यं = सत्य है? स्वप्नः वा = अथवा स्वप्न है, सा = वह, वासवदत्ता, मया = मेरे द्वारा, भूयः = फिर से, दृश्यते = देखी जा रही है। अहं = मैं (उदयन), तदा = उस समय, अपि = भी, दृष्ट्या = देखी गई, अनया = इसके द्वारा, एवमेव = इसी तरह, वञ्चितः = ठगा गया था॥ १७॥

**हिन्दी अर्थ** – क्या यह सत्य है या स्वप्न है, वह वासवदत्ता मेरे द्वारा फिर से देखी जा रही है, उस समय भी इसी प्रकार देखी गई, इसके द्वारा मैं ठगा गया था। इसलिए मुझे पूर्ण विश्वास नहीं हो पा रहा है।

**व्याख्या – पर्यायपदानि** – इदं = महासेनपुत्र्याः साक्षाद्दर्शनं, किं नु = प्रश्ने वितर्के वा, सत्यं = तथ्यम्, उत स्वप्नः = स्वप्नवद् अतथ्यं, सा = वासवदत्ता, मया = उदयनेन, भूयः = पुनरपि, दृश्यते = अवलोक्यते, तदा = तस्मिन् (समुद्रगृहशयन) समये, अपि, दृष्ट्या = विलोकितया, अनया = वासवदत्तया, एवम् एव = अनेनैव प्रकारेण, अहं वञ्चितः = प्रतारितोऽहं छलितो वा॥१७॥

**भावार्थः** – राजोदयनः महासेनतनयां प्रत्यक्षं दृष्ट्वापि शङ्कितो भूत्वा पृच्छति यदिदानीं पुनरस्याः दर्शनं साक्षाद्वास्वप्नोवा यतोहि पूर्वमपि समुद्रगृहयशनयसमयेऽनया वञ्चितोऽस्मि। वस्तुतः य कोऽपि जनः एकदा वञ्चितो भवति चेत्तदा भूयः सः यथार्थेऽपि शङ्कितो भवतीति भावः॥१७॥

**छन्दः** – अस्मिन् पद्येऽनुष्टुब्वृत्तमस्ति।

**कोशः** – सत्यं तथ्यमृतं सम्यक् इत्यमरः।

**व्याकरणम्** – दृष्ट्या – दृश+क्त+टाप्। (तृ०एक०)।

**यौगन्धरायणः** – स्वामिन्! देव्यपनयेन कृतापराधः खल्वहम्। तत् क्षन्तुमर्हति स्वामी। (इति पादयोः पतति।)

**यौगन्धरायण** – स्वामी! महारानीजी को छुपाकर मैंने निश्चित ही अपराध किया है। मुझे क्षमा करें। (यह कहकर पैरों में गिरता है।)

**राजा** – (उत्थाप्य) यौगन्धरायणो भवान् ननु।

**राजा** – (उठाकर) क्या वस्तुतः आप यौगन्धरायण हैं?

**प्रसङ्गः** – प्रकृतेऽस्मिन् पद्ये पादयोः पतितं यौगन्धरायणं स्नेहपूर्वकमुत्थाप्य तमभिनन्दयन्नाह राजोदयनः–

**मिथ्योन्मादैश्च युद्धैश्च शास्त्रदृष्टैश्च मन्त्रितैः।**
**भवद्यत्नैः खलु वयं मज्जमानाः समुद्धृताः॥ १८॥**

**अन्वयः** – मिथ्योन्मादैः च युद्धैः च शास्त्रदृष्टैः मन्त्रितैः च भवद्यत्नैः मज्जमाना वयं खलु समुद्धृताः॥१८

**पदार्थः** – मिथ्योन्मादैः = झूठी कल्पित उन्मादी चेष्टाओं से, च = और, युद्धैः = युद्धों से, शास्त्रदृष्टैः = शास्त्रसम्मत, मन्त्रितैः = मन्त्रणाओं द्वारा, भवद्यत्नैः = आपके प्रयासों से, मज्जमाना = विपत्ति के समुद्र में डूबते हुए, वयं = हम सबको, खलु = निश्चित ही, समुद्धृताः = बचा लिये गये॥१८॥

**हिन्दी अर्थ** – आपने अपनी उन्मादी चेष्टाओं, युद्धों तथा शास्त्रसम्मत गुप्त मन्त्रणाओं व पुनः राज्य प्राप्ति हेतु किये गए प्रयत्नों से निश्चय ही विपत्ति रूपी सागर में डुबते हुए हम सबको बचा लिया॥ १८॥

**व्याख्या – पर्यायपदानि** – मिथ्योन्मादैः = कपटोन्मादचेष्टितैः, युद्धैः = संग्रामैः, शास्त्रदृष्टैः = शास्त्रसम्मतैः, मन्त्रितैः = गुप्त–मन्त्रणाभिः, च = समुच्चार्थे, भवद्यत्नैः = भवतः प्रयासैः, मज्जमानाः = निमज्जन्तः, वयं = उदयनादयः, खलु = निश्चयेन, समुद्धृता = रक्षिताः॥१८॥

**भावार्थः** – अमात्ययौगन्धरायणेन कृतैः मिथ्योन्मादैः शास्त्रदृष्टैरादिभिः सम्प्रयत्नैरेव वयं सर्वे विपत्सागराद् उत्तोलिता इति मत्वैव राजोदयनः तं हृदयेन भृशं प्रशंसति॥१८॥

**छन्दः** – श्लोकेऽस्मिन् अनुष्टुप् छन्दोऽस्ति।

**व्याकरणम्** – मिथ्योन्मादैः – मिथ्याकल्पिता उन्मादाः तैः (म०लो०)। शास्त्रदृष्टैः – शास्त्रेषु दृष्टानि तैः (स०त०)। मज्जमाना – मज्ज्+शानच्। भवद्यत्नैः – भवतो यत्नाः तै (ष०त०)। समुद्धृताः – सम्+उद्+धृ+क्त।

**यौगन्धरायणः** – स्वामिभाग्यानामनुगन्तारो वयम्।

**यौगन्धरायणः** – हम तो महाराज के भाग्य के पीछे चलने वाले हैं।

**पद्मावती** – अम्महे! अयया खु इअं। अय्ये! सहीजणसमुदाआरेण अजाणन्तीए अदिक्कन्दो समुदाआरो। ता सीसेण पसादेमि। [अहो! आर्या खल्वियम्। आर्ये सखीजनसमुदाचारेणाऽजानन्त्याऽतिक्रान्तः समुदाचारः। तच्छीर्षेण प्रसादयामि।]

**पद्मावती** – अहा! ये तो आर्या (सम्मान्या दीदी) हैं। दीदी! अनजाने में मैंने सहेली का सा व्यवहार करके शिष्टाचार का उल्लंघन किया है। अतः सिर झुकाकर आपसे क्षमा माँगती हूँ।

**वासवदत्ता** – (पद्मावतीमुत्थाप्य) उट्ठेहि उट्ठेहि अविहवे! उट्ठेहि! अत्थिसअं णाम सरीरं अवरद्धइ। [उत्तिष्ठोत्तिष्ठाऽविधवे! उत्तिष्ठ। अर्थिस्वं नाम शरीरमपराध्यति।]

**वासवदत्ता** – (पद्मावती को उठाकर) उठो उठो सुहागिन! उठो। याचक (यौगन्धरायण) का धन बना हुआ (मेरा) शरीर ही अपराधी है।

**पद्मावती** – अणुग्गाहिदह्मि। (अनुगृहीतास्मि।)

**पद्मावती** – मैं अनुगृहीत हूँ।

**राजा** – वयस्य यौगन्धरायण! देव्यपनये का कृता ते बुद्धिः?

**राजा** – मित्र यौगन्धरायण! महारानी को छुपाने में तुम्हारा क्या उद्देश्य था?

**यौगन्धरायण** – कौशाम्बीमात्रं परिपालयामीति।

**यौगन्धरायण** – केवल कौशाम्बी पर हमारा अधिकार रह गया था।

**राजा** – अथ पद्मावत्या हस्ते किं न्यासकारणम्?

**राजा** – फिर पद्मावती के हाथ वासवदत्ता (न्यास) को रखने का क्या कारण था?

**यौगन्धरायणः** – पुष्पकभद्रादिभिरादेशिकैरादिष्टा स्वामिनो देवी भविष्यतीति।

**यौगन्धरायण** – पुष्पकभद्र आदि ज्योतिषियों ने भविष्यवाणी की थी कि पद्मावती महाराज की रानी होंगी।

**राजा** – इदमपि रुमण्वता ज्ञातम्?

**राजा** – क्या यह रुमण्वान् को भी पता था?

**यौगन्धरायणः** – स्वामिन्! सर्वैरेव ज्ञातम्।

**यौगन्धरायण** – महाराज! सब लोगों को पता था।

**राजा** – अहो! शठः खलु रुमण्वान्।

**राजा** – अरे! यह रुमण्वान् बडा दुष्ट है।

**यौगन्धरायणः** – स्वामिन्! देव्याः कुशलनिवेदनार्थमद्यैव प्रतिनिवर्ततामत्र भवान् रैभ्योऽत्र भवती च।

**यौगन्धरायण** – महाराज! महारानी वासवदत्ता का कुशलक्षेम सूचित करने के लिए आज ही पूज्य रैभ्य और पूज्या वसुन्धरा जी लौट जायें।

**राजा** – न न। सर्व एव वयं यास्यामो देव्या पद्मावत्या सह।

**राजा** – नहीं नहीं, हम सब लोग देवी पद्मावती सहित जायेंगे।

**यौगन्धरायणः** – यदाज्ञापयति स्वामी।

**यौगन्धरायण** – जो महाराज की आज्ञा।

(भरतवाक्यम्)

**प्रसङ्ग** – प्रकृतेऽस्मिन् पद्ये कुशीलवैः नाटकाभिनयसमाप्तौ सर्वजनकल्याणाय भरतवाक्यत्वेनाशीर्दीयते –

**इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम्।**
**महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः॥ १९॥**

**अन्वयः** – नः राजसिंहः सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम् एकातपत्राङ्काम् इमां महीं प्रशास्तु॥१९॥

**पदार्थः** – नः = हमारे, राजसिंहः = श्रेष्ठमहाराजोदयन, सागरपर्यन्तां = समुद्र तक विस्तृत, हिमवद्विन्ध्यकुण्डलां = हिमालय और विन्ध्याचल रूपी कुण्डलों से शोभित, एकातपत्राङ्काम् = एक छत्र चिह्नाङ्कित, इमाम् = इस, महीं = धरा का, प्रशास्तु = प्रशासन करें॥१९॥

**हिन्दी अर्थ** – राजश्रेष्ठ महाराज उदयन समुद्रतक फैली हुई, हिमालय और विन्ध्याचल को कुण्डलरूप में धारण करने वाली इस पृथ्वी पर एक छत्र शासन करें।

**व्याख्या** – **पर्यायपदानि** – नः = अस्माकं, राजसिंहः = नृपश्रेष्ठः, सागरपर्यन्तां = समुद्रपर्यन्तविस्तृतां, हिमविद्विन्ध्य कुण्डलां = हिमालयविन्ध्यपर्वतकर्णभूषणां, एकातपत्राङ्काम् = एकच्छत्रचिह्नाम्, इमाम् = एताम्, महीं = सकलामपि वसुन्धरां, प्रशास्तु = राज्यं करोतु॥ १९॥

**भावार्थः** – सागरपर्यन्तविस्तृतां हिमालयविन्ध्याचल कर्णभूषणाम् एकेनैव राजक्षत्रेण शासिताम् आर्यावर्तरूपां पृथ्वीं नृपश्रेष्ठः उदयनः प्रशास्तु, अर्थात् समस्ताया अस्याः पृथिव्याः एकराड्भूयादिति भावः॥१९॥

**छन्दः** – पद्येऽस्मिन् अनुष्टुप् छन्दोऽस्ति।

**अलङ्कारः** – श्लोकेऽस्मिन् रूपकोपमाऽलङ्कारौ स्तः।

**कोशः** – सिंहः शार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः 'भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम्' इति चामरः।

**व्याकरणम्** – राजसिंहः – राजा सिंह इव (उपमित स०)। सागरपर्यन्तां – सागराः पर्यन्ताः यस्याः सा, ताम् (बहुव्रीहिः)। हिमवद्विन्ध्यकुण्डलाम् – हिमवांश्च विन्ध्यश्च हिमवद्विन्ध्यौ (द्वन्द्वः) हिमवद्विन्ध्यौ कुण्डले यस्याः सा, ताम् (बहु०)। एकातपत्राङ्काम् – एकम् आतपत्रम् एव अङ्कः यस्याः सा, ताम् (बहु०)। प्रशास्तु – प्र+शास्+लोटि।

**विशेषः** – नाटक के अन्त में नाटक के पात्रों द्वारा जनता के कल्याणार्थ आशीर्वादात्मक और शुभाकांक्षा से युक्त गाया जाना वाला मंगल पद्य भरतवाक्य कहलाता है।

(निष्क्रान्ताः सर्वे)

(सब निकल जाते हैं)

**॥ इति षष्ठोऽङ्कः॥**

॥ छठा अङ्क समाप्त॥

**॥ इति स्वप्नवासवदत्तं समाप्तम्॥**

॥ स्वप्नवासवदत्ता नाटक समाप्त॥ शुभं भूयात्

# पारिभाषिकशब्दाः

सूत्रधारः – सूत्रं प्रयोगानुष्ठानं धारयतीति सूत्रधारः।
नाट्यस्य यदनुष्ठानं तत्सूत्रं स्यात्सबीजकम्।
रङ्गदैवतपूजाकृत् सूत्रधार इति स्मृतः॥

नान्दी – नन्दन्ति देवा अस्यामिति नान्दी, नन्दयति देवद्विजनृपादीनिति नान्दी वा।
आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता॥

नेपथ्यम् – कुशीलवकुटुम्बस्य गृहं नेपथ्यमुच्यते।

प्रकाशम् – सर्वश्राव्यं प्रकाशं स्यात्।

स्वगतम् – अश्राव्यं स्वगतं मतम्।

जनान्तिकम्– त्रिपताकाकरेणान्यानपवार्यान्तरा कथाम्।
अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम्।

कञ्चुकी – अन्तःपुरवृद्धो विप्रो गुणगणान्वितः।
सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते॥
आचार्य भासेन स्वनाटकेषु काञ्चुकीय इति प्रयोगो विहितः।

आकाशभाषितम् – किं ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते।
श्रुत्वेनानुक्तमप्यर्थं तत्स्यादाकाशभाषितम्॥

प्रवेशकः – प्रवेशकोऽनुदातोक्त्या नीच पात्र प्रयोजितः।
अङ्कद्वयान्तरर्विज्ञेयः शेषं विष्कम्भके यथा॥

विषकम्भकः – वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः॥

विदूषकः – कुसुमवसन्ताद्यभिधः कर्मवपुर्वेषभाषाद्यैः।
हास्यकरः कलहरतिर्विदूषकः स्यात् स्वकर्मज्ञः॥

प्रोषितभर्तृका – नानाकार्यवशाद् यस्या दूरदेशं गतः पतिः।
सा मनोभवदुःखार्त्ता भवेत् प्रोषितभर्तृका॥

अङ्कः – अन्तनिष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्तितः।

अभिनयः – भवेदभिनयोऽवस्थाऽनुकरः स चतुर्विधः।
आङ्गिको वाचिकश्चैवमाहार्यः सात्त्विकस्तथा॥

# प्रमुखसूक्तयः

### 1. सर्वजनसाधारणमाश्रमपदं नाम –

**प्रसङ्गः** – प्रस्तुतेयं सूक्तिः महाकविभासविरचितस्य स्वप्नवासवदत्तनाटकस्य प्रथमाङ्काद् उद्धृता अस्ति। अत्र हि काञ्चुकीयः ब्रह्मचारिणं प्रति तपोवनस्य सर्वजनसुलभतां वर्णयति।

काञ्चुकीयो ब्रह्मचारिणं बोधयति यत् महोदय! भवान् निर्भयं प्रविशतु। यतोहि तपोवनस्य द्वारं सर्वदा सर्वेषां कृते उद्घाटितं भवति न तु विशिष्टस्य कस्यापि जनस्य कृते। अतएवोक्तं 'सर्वजनसाधारणमाश्रम पदं नाम' इति।

### 2. कालक्रमेण जगतः परिवर्तमाना, चक्रारपंक्तिरिव गच्छति भाग्यपंक्तिः –

**प्रसङ्गः**– प्रस्तुतेयं सूक्तिः महाकविभासप्रणीतस्य स्वप्नवासवदत्तनाटकस्य प्रथमाङ्कादुधृता वर्तते। अस्यां सूक्तौ यौगन्धरायणः वासवदत्तां सान्त्वयन् कथयति यत् लोकेऽस्मिन् सर्वेषां मनुष्याणां शुभान्यशुभानि भाग्यानि समयानुसारेण तथैव परिवर्तन्ते यथा चक्रगतानि दण्डानि (अराणि)क्रमेण उपरि अधश्च भवन्ति। अर्थात् दुःखान्तरं सुखागमनं ध्रुवमेव। अतः त्वया दुःखवेलायामस्यां धैर्यं धारणीयमिति भावः।

### 3. प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते –

**प्रसङ्गः** – प्रस्तुतेयं सूक्तिः भासरचितस्वप्नवासवदत्तमिति नाटकस्य प्रथमाङ्कादुद्धृता वर्तते। अत्र यौगन्धरायणस्तपोवने पद्मावतीं दृष्ट्वा स्वमनोभावं प्रकटयन्नाह – पूर्वं सर्वेषामुत्सारणप्रवर्तिकेयमिति विचार्य मम मनसि एतां प्रति द्वेषः समुत्पन्नः, किन्त्विदानीं तु इयमेव महाराजस्य पत्नी भूयात् इति विचिन्त्य पद्मावतीं प्रति सद्यैव महती आत्मीयता उत्पन्ना। अनेन प्रतीयते यत् अतिशयः द्वेषः अत्यादरो वा मानसकर्मणः (भावनाविशेषादेव) उत्पद्यते।

### 4. दुःखं न्यासस्य रक्षणम् –

**प्रसङ्गः** – प्रस्तुतेयं सूक्तिः नाटककारभास प्रणीतस्य स्वप्नवासवदत्तनाटकस्य प्रथमाङ्काद् उद्धृता विद्यते। अत्र काञ्चुकीयः परकीयन्यासस्य रक्षणमतीव दुष्करमिति प्रकटयन्नाह – धनप्राणतपःफलादीनां दानं लोके सुकरमस्ति, किन्तु परकीयस्य न्यासस्य रक्षणं सर्वतोभावेन दुष्करं भवति। अत एतस्यार्थितस्य अभिलाषपूर्तिरस्माभिः कर्तुं न शक्यते इति भावः।

### 5. नहि सिद्धवाक्यान्युत्क्रम्य गच्छति विधिः सुपरीक्षितानि –

**प्रसङ्गः**– प्रस्तुतेयं सूक्तिः महाकविभासविरचितस्य स्वप्नवासवदत्तनाटकस्य प्रथमाङ्काद् गृहीताऽस्ति। अत्र यौगन्धरायणः देवज्ञाचार्यैः कथितां भविष्यवाणीं स्मरन् मनसि चिन्तयति यत् पुष्पकभद्रादिभिः देवज्ञैः पूर्वमुक्तमासीत् यत् राज्ञः उदयनस्य राज्यं शत्रुहस्तगतं भविष्यतीति वचनं यथा सत्यं जातं तथैव तेषां द्वितीयं वचनमपि पद्मावती हि उदयनस्य द्वितीया पत्नी भविष्यतीति सत्यं भवेदिति सिद्धवचनविश्वासात् मया पद्मावत्या हस्ते न्यासतया वासवदत्ता स्थापिता। यतः भाग्यम् अनेकधा सत्यत्वपरीक्षया वीक्षितानि सिद्धपुरुषाणां वचनानि उल्लङ्घ्य न प्रचलति, अपितु तदनुसारमेव फलं ददाति।

### 6. साक्षिमन्यासो निर्यातयितव्यः –

**प्रसङ्गः** – सूक्तिरियं महाकविभासस्य स्वप्नवासवदत्तनाटकस्य षष्ठाङ्काद् उद्धृता वर्तते। अत्र हि

वत्सराजोदयनः न्यासस्य परावर्तनकाले साक्ष्यस्य सर्वथाऽनिवार्यतामुपस्थापयति। नो चेत् कदाचित् परस्परं विरोधे सति साक्ष्यास्याभावे जनः न्यासं गृहीत्वाऽपि असत्यं वक्तुं शक्नोति यदहं तु न प्राप्तवानिति। अतः न्यासस्य परावर्तनं सदैव कस्यापि समक्षमेव कर्तव्यं न त्वेकान्ते।

7. **तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः।**
8. **अहो! अकरुणाः खल्वीश्वराः।**
9. **अयुक्तं परपुरुषसंकीर्त्तनं श्रोतुम्।**
10. **अनतिक्रमणीयो हि विधिः।**
11. **प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेवोपभुज्यते।**
12. **काले-काले छिद्यते रुह्यते च।**
13. **परस्परगता लोके दृश्यते रुपतुल्यता।**

## अभ्यासार्थ-प्रश्नाः

**(अ) वस्तुनिष्ठप्रश्नाः -**

1. 'स्वप्नवासवदत्तम्' नाटकस्य रचयिता कः?
   (अ) श्रीहर्षः (ब) भारविः
   (स) भासः (द) भवभूतिः ( )
2. उदयनस्य प्रधानामात्यः कः?
   (अ) आरुणिः (ब) यौगन्धरायणः
   (स) दर्शकः (द) महासेनः ( )
3. यौगन्धरायणः वासवदत्तां न्यासरूपेण कस्यै/कस्मै समर्पयति?
   (अ) पद्मावत्यै (ब) वसन्ताय
   (स) तापस्यै (द) दर्शकाय ( )
4. 'स्वप्नवासवदत्तम्' नाटकस्य नायकः कः?
   (अ) यौगन्धरायणः (ब) महासेनः
   (स) आरुणिः (द) उदयनः ( )
5. 'स्वप्नवासवदत्तम्' नाटकस्य नायिका का?
   (अ) वासवदत्ता (ब) तापसी
   (स) पद्मावती (द) धात्री ( )

**(ब) अतिलघूत्तरात्मकप्रश्नाः -**

1. उदयनः कस्य देशस्य नृपः आसीत्?
2. मगधदेशस्य राजकुमारी का आसीत्?
3. अवन्तिदेशस्य राजा कः आसीत्?

4. राज्ञः प्रद्योतस्य पुत्री का आसीत्?
5. स्वप्नवासवदत्ते नाटके कति अङ्काः सन्ति?

**( स ) लघूत्तरात्मकप्रश्नाः –**

1. नान्दीलक्षणं लिखत।
2. महाकविभासस्य नाटकानां नामानि लिखत।
3. प्रथमाङ्कस्य कथासारः स्वसंस्कृतभाषया लेखनीयः।
4. उदयनस्य चरित्र-चित्रणं कुरुत।
5. वासवदत्तायाः चरित्र-चित्रणं कुरुत।
6. पञ्चमाङ्कस्य कथासारः संस्कृतेन स्वशब्दैः लेख्यः।
7. यौगन्धरायणस्य चरित्र-चित्रणं कुरुत।
8. 'स्वप्नवासवदत्तम्' नाटकस्य नामकरणं किमर्थम् इति लिखत।

**( द ) निबन्धात्मकप्रश्नाः –**

1. महाकविभासस्य व्यक्तित्वं कृतित्वञ्च वर्णयत।
2. **अधोलिखितानां पद्यानां सप्रसङ्गं व्याख्या कार्या –**
   (अ) धीरस्याश्रमसंश्रितस्य.................................ग्रामीकरोत्याज्ञया॥
   (ब) पूर्वं त्वयाप्यभिमतं ..................................गच्छतीतिभाग्यपंक्तिः॥
   (स) सुखमर्थो भवेद् .......................................न्यासस्य रक्षणम्॥
   (द) खगावासोपेताः .........................................शनैरस्तशिखरम्॥
   (य) विस्रब्धं हरिणा.........................................धूमो हि बह्वाश्रयः॥
3. **अधोनिर्दिष्टानां श्लोकानां सप्रसङ्गं भावार्थः स्वसंस्कृतभाषया लेखनीयः –**
   (अ) प्रच्छाद्य राजमहिषीं ..................................हृदयं परिशङ्कितं मे॥
   (ब) कः कं शक्तो ..........................................छिद्यते रुह्यते च॥
   (स) ऋज्वायतां हि .........................................भुजगस्य विचेष्टितानि॥
   (द) अनाहारे तुल्यः ..........................................यदि तस्याप्युपरमः॥
   (य) पद्मावती नरपतेः .......................................विधिः सुपरीक्षितानि॥
4. **निम्नलिखितानां पारिभाषिकशब्दानां परिचयो देयः –**
   सूत्रधारः, काञ्चुकीयः, विदूषकः, नेपथ्यम्, अङ्कः, अभिनयः, आकाशभाषितञ्च।
5. **अधोलिखितानां सूक्तीनां सप्रसङ्गं भावार्थः लेखनीयः –**
   (अ) चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः।
   (ब) प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेवोपभुज्यते।
   (स) स्त्रीस्वभावस्तु कातरः।
   (द) दुःखं न्यासस्य रक्षणम्।
   (य) प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।